३५४

३५४

654

654

उपदेश सहस्त्री

Upadesha Sahastri : Title

: Author

: Editor

: Year, Vols.

: Publisher

654 : Remarks

वेदान्त

उप.स. १ ॥ ॥श्रीगणेशाय नमः॥ ॥समस्तब्रह्मविद्यासंप्रदायप्रवर्त्तकाचार्येभ्यो नमः॥ ॐनमो भगवते सर्वात्म गद्य.१
ने वासुदेवाय॥ प्रणम्य रामाभिधमात्मधीपदं जगत्प्रसूतिस्थितिसंयमायतं॥ तदात्मकानन्दकरपूर्व
कान्गुरून्मयोपदेशार्थविभाग उच्यते॥१॥ इह भगवत्पादाभिधेन भगवान्भाष्यकारः सर्वोपनिषदर्थ
सारसंग्राहिकामुपदेशसहस्रीं गद्यपद्यविभागेन ग्रंथरचनया प्रकटीकुर्वन्नादौ गद्यबंधमारंनमारभ
माणः प्रारिप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजनं शिष्टाचारविशेषपरिप्राप्तमंगलमाचरति
॥अथेति॥ ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा॥ कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभावि
ति स्मृतावथशब्दस्य मांगलिकत्वावगमात्॥ अथवा आनंतर्यार्थत्वायमर्थशब्द उच्चारणमात्रेण मंग
लप्रयोजनोऽपि भवति॥ अन्यार्थं क्रियमाणमृदंगादिध्वनिश्रवणादिवत् किमानंतर्यार्थतेति चेत्॥ वि
स्तरेणानेकशास्त्रार्थनिबंधनिर्माणानंतर्यार्थतेति वदामः॥ अत्र प्रतिवचनाक्षेपसमाधानप्रकारैरनेकप्रमा
णयुक्तिविशेषैः॥ निपुणतरमवधारिते समस्तोपनिषत्शास्त्रार्थेनैकवाक्ययुक्त्यनुसंधानव्यवधानम १
तरेण साक्षादनुभवोदयाय संग्रहनिरूपणप्रवृत्तस्योपपत्तेरिति॥ अत्र चिकीर्षितं प्रतिजानान प्रवृत्तं गत

याशास्त्रीयानुबंधजातं संगृह्णाति॥ मोक्षसाधनेति॥ अथ विस्तरेण शास्त्रार्थनिरूपणानंतरं॥ मोक्षो निःप्र
पंचब्रह्मात्मताविर्भावस्तस्य साधनमौपनिषदाद्वितीयात्मतत्त्वज्ञानं तस्योपदेशा उपदेशनमुपदेशस्तदर्थवा
क्यानामर्थविभागेन शिष्यं प्रतिपादनं॥ तस्य विधिः प्रकारविशेषः तं विस्पष्टमाख्यास्यामः कथयिष्यामः॥ मोक्ष
शब्देन प्रत्युक्तत्वं ब्रह्मविषयो निर्दिष्टः॥ साधनशब्देन तत्त्वज्ञानस्योक्तत्वात् तत्साध्यज्ञानादिबंधनिवृत्तिः प्रयो

ॐनमः परमात्मने॥ अथ मोक्षसाधनउपदेशविधिं व्याख्यास्यामो मुमुक्षूणां॥ ॥

जनं सूचितं॥ उपदेशविधिशब्देन संबंधो बोध्यबोधकलक्षणः शास्त्रविषययोर्दर्शित इदानीमधिकारिणमा
ह॥ मुमुक्षूणामिति॥ मुमुक्षूणां मोक्षमात्रमिच्छतामित्यनेनैहिमुष्मिकार्थतृष्णालेशवतामप्यनधिकार इति
सूचितं॥ श्रद्दधानानामिति शिष्यानुपदेशशास्त्रार्थविश्वासवतामित्यनेन मुमुक्षवोऽपि संतो ये कर्मस्वन्यशास्त्रेषु प

उप॰स॰ पि वा श्रद्दधते तेषामिहानधिकारः सूचितः॥ अर्थिनामिति तेन शास्त्रार्थज्ञानार्थिनामित्यनेन श्रद्दधानानामपि येषां गद्य॰१
२ जिज्ञासा विस्तरेण श्रवणमतस्तेषामिहानधिकारो ध्वनितः॥ तथा चैवंविधानामधिकारिणामर्थायोपकाराय व्याख्या
स्याम इत्यन्वयः॥ संग्रहेणोक्तमर्थं विवृणोति॥ तदिदमिति॥ तदिदं मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रू

श्रद्दधानानामर्थिनामर्थाय तदिदं मोक्षसाधनं ज्ञानं॥ ॥

यादित्यन्वयः॥ तत्तद्ग्रंथांतरेषु विस्तरेण प्रतिपादितमिदमिदानीमिह॥ वक्ष्यमाणमित्यर्थः॥ किं तन्मोक्षसाधनं सहे
तुबंधनिवृत्त्या ब्रह्मात्माविर्भावस्य निमित्तं यदुक्तं तदिदं ज्ञानं वक्ष्यमाणमित्यर्थः॥ मोक्षसाधनपदं व्याख्यातमुपदेश २
विधिपदमनेन शिष्याचार्यप्रश्नादिपरंपरया व्याख्यास्याममुमुक्षूणामित्याद्युक्तमधिकारिणं व्याचष्टे॥ साधनेत्यादि

ना॥ संग्रहेऽधिकारिबहुत्वनिर्देशः प्रदर्शनार्थो न तु विवक्षितः॥ अत एव विवरणे एकवचनं॥ एकात्मवादे बहूनां
निरपेक्षाणां मुमुक्षूणामसंभवादिति॥ नाविरक्ताय संसारान्नानिरस्तैषणाय चेत्यादिशास्त्रमनुररीकृत्याह॥ साधनसाध्या
दिति॥ साधनैः॥ दृष्टादृष्टार्थैः॥ कृष्यादियागादिभिः साध्याद्दैहिकादामुष्मिकाच्च भोग्यजातादत एवानित्यादनात्मत्वा
त्॥ सर्वस्मात् ब्रह्मलोकांतादपि विरक्ताय विगतरागाय निवृत्ताभिलाषायेत्यर्थः॥ कथं अवगम्यते अयं विरक्त इ

साधनसाध्यादनित्यात्सर्वस्मात् विरक्तायत्यक्त॥ ॥

त्यपेक्षायां विशेषणांतरेण विरक्तचिह्नमाह॥ त्यक्तेति॥ अत्रैषणाशब्देन कामापरपर्यायेण तत्तत्प्रयुक्ता प्रवृत्तिर्ल
क्ष्यते॥ तत्र पुरुषार्थं दारसंग्रहे प्रवृत्तिः पुत्रैषणा॥ कर्माद्यनुष्ठानार्थमपरविद्याग्रवादिरूपोपायविधेर्वित्तपरिग्रहो
वित्तैषणा॥ पुत्रकर्मापरविद्यासाध्येतत्तल्लोकपितृलोकदेवलोकफलैषणा लोकैषणा एतास्त्रिषणाः॥ ॥श्रीरामः॥

उप.स. त्यक्त्वायेन तस्यैसा धनेषु प्रवृत्तो त्सुकत्यागादेव साध्यमभिलाषशून्यतागम्यत इत्यर्थः॥ तथा च श्रुतिः॥ न कर्मणा न ग.घ.१
३ प्रजया धनेन त्यागेनैके ऽमृतत्वमानशुरिति॥ इदानीमेतमेव प्रव्राजिनो लोकमीमांसंतः॥ प्रव्रजंति॥ तानि वाण

पुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय॥ ॥

तानि ऽवराणि तपांसि न्यास एवात्यरेचयदित्यादिश्रुत्यास्वमनुरुध्यह॥ प्रतिपन्नेति॥ परमहंसविशेषणं कुटीच ३
कादिस्मार्त्तसंन्यासिव्यावृत्त्यर्थं॥ न हि द्वैताद्वैतवादिनामद्वितीयात्मतत्त्वोपदेशग्रहणाधिकार इति भावः॥ ॥

एतावता मुमुक्षुपदं व्याख्यातमिति॥ अनाप्याश्रमधर्ममात्रनिष्ठस्याधिकारो नास्तीति विवक्षयन् पुनः विशिन
ष्टि शमदमदयादियुक्तायेति॥ शमः अंतःकरणस्यानात्मविषयेभ्यो व्यावृत्तिः॥ दमः बाह्येंद्रियाणां॥ दया नूतेषष्टो
हः॥ आदिपदेनोपरतितितिक्षासमाधानश्रद्धाः संगृह्यते॥ एतेन श्रद्धधानानामित्येतत् व्याख्यातं॥ अमान्यम
त्सरो दक्षो निर्ममो दृढसौहृदः॥ असत्वरोर्थजिज्ञासुरनसूयुरमोघवागित्यादिवचनमनुसृत्य पुनः॥ विशिनष्टि॥ शा

शमदमदयादियुक्ताय शास्त्रप्रसिद्ध॥ ॥

स्त्रप्रसिद्धेति॥ एतेनार्थिनामिति व्याख्यातं॥ नाशुचिः ब्रह्मकीर्त्तयेत त्रिसंध्यं दौ स्नानमाचरेदित्यादि॥ शास्त्रमाश्रित्या
ह॥ शुचयरिति॥ बाह्याभ्यंतरशौचसंपन्नायेत्यर्थः॥ ब्राह्मणो निर्वेदमायादेतत्॥ अस्माद्धैतत्पूर्वे ब्राह्मणा अनूचाना
तविद्वांसः॥ प्रजां न कामयंते एवं वै तमात्मानं विदित्वा ब्राह्मणा इत्यादि॥ शास्त्राण्यनुसृत्याह॥ ब्राह्मणायेति॥ ॥

विविदिषवोपि क्षत्रियादयो न पारमहंस्ये संन्यासधर्मेऽधिक्रियंत इति भावः ॥ अत एवोत्पन्नज्ञानापि जनका
दयो न गार्हस्थ्यं परित्यक्तवंत इति श्रूयते ॥ इदं चात्र ज्ञेयं यथोक्तसंन्यासेऽधिकारिकमेव नाश्रमांतराधिकारिकं ॥
आश्रमांतरस्य प्रवृत्तिधर्मपरत्वेन तद्‌त्यागे तद्विरुद्धनिवृत्तिनिष्ठापरत्वायोगात्त्यागे चाश्रमांतरत्वानुपपत्तेः

शिष्यगुणसंपन्नाय ब्रह्मचर्ये ब्राह्मणाय ॥ ॥

॥ वक्ष्यति च भगवान्भाष्यकारः ॥ अहं ब्रह्मास्मि कर्ता च भोक्ता चास्मीति ये विदुः ॥ तेन प्राज्ञानकर्मभ्यां नास्तिका
स्युर्न संशय इति ॥ संन्यासिभ्यः प्रवक्तव्यः ॥ शांतेभ्यः ॥ शिष्टबुद्धिनेति च ॥ अतः पारिव्राज्यविशेषणं नित्याधिका
रित्वख्यापनार्थं ॥ नाश्रमांतरव्यावृत्त्यर्थमिति केषांचित् व्याख्यानं चिंत्यं ॥ ॥ श्रीकृष्णायनमः ॥ ॥ श्री ॥ ॥

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिमाश्रित्याह विधिवदुपसन्नायेति
॥ विद्याग्रहणार्थं गुरुपादग्रहणपूर्वकमधीहि भगव इत्यादिमंत्रोच्चारणेनाभिसंवादनमुपसत्तिस्तां कृतवते इ
त्यर्थः ॥ शिष्याय शासनार्हाय पूर्वश्रुतत्वादिनिमित्तौद्धत्यरहिताय विनययुक्तायेत्यर्थः ॥ किंगोत्रो नु सोम्यासीति तं ह
सः ॥ ऋषिरुवाच ॥ भूय एव तपसा श्रद्धया ब्रह्मचर्येण संवत्सरं वसत संवत्सरवासिने ब्रूयादित्यादि ॥ श्रौतलिंग

विधिवदुपसन्नाय शिष्याय जातिकर्मवृत्तविद्याभिजनैः ॥ ॥

मवगम्याह ॥ जातिकर्मेत्यादिना ॥ जातिपरीक्षणं कुंडगोलकक्षत्रियादिव्यावृत्त्यर्थं कर्मपरीक्षणं पतितत्वाभि
शस्तत्वादिराहित्येन शिष्टताज्ञानाय वृत्तमाचारः शीलं वा ॥ तत्परीक्षणं विद्याग्रहणोत्तरकालमपि तत्परिपालन
योग्यताज्ञानार्थं ॥ विद्या पूर्वाधीतवेदशास्त्रादिरूपाउपास्य ॥ ॥

प॰स॰ देवतादिविशेषविषयावासादि परीक्षणीया उक्तार्थग्रहणधारणादियोग्यत्वायोग्यत्वनिश्चयाय॥ तथा च श्रुतिः॥ ग द्य॰१
५ नाप्रशान्ताय दातव्यं नापुत्राय शिष्याय वा पुनरिति॥ अभिजनः कुलं जन्मस्थानं तदपि परीक्षणीयं॥ माता पितृ
भ्यां गुरुभिश्च शिक्षितत्वाशिक्षितत्वज्ञानार्थं यथा मातृमान्॥ पितृमानाचार्यमान् ब्रूयादिति श्रौतलिंगात्॥ एवं वि

परीक्षिताय ब्रूयात् पुनः पुनः यावत् ग्रहणं दृढीभवति॥ ॥

शिष्याय शिष्याय ब्रूयादित्याचार्यं शिक्षयति॥ उपदेशस्य दृढार्थतामभिप्रेत्याह॥ पुनः पुनरिति॥ अवधिमाह ५
॥ यावत् ग्रहणं दृढीभवतीति शिष्यस्येति शेषः॥ ॥

एवमुक्तविशेषणेन शिष्येण गुरूपसत्तिः॥ कार्या गुरुश्च तमुपदिशेत् विद्यामित्युक्तेऽर्थे श्रुतिमुदाहरति॥ श्रुतिश्चे
ति॥ परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्युपक्रम्य॥ येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्म
विद्यामिति॥ दृढग्रहीता हीति॥ आत्मनः॥ श्रेयोग्रंथेनोक्तोऽर्थो निरूपित इत्यर्थः॥ शिष्यस्य दृढग्रहणपर्यंतं गुरुणा पु

श्रुतिश्च परीक्ष्य तत्त्वतो ब्रह्मविद्यां यावत् दृढग्रहीता
हि विद्यात्मनः श्रेयसे संतत्यै च भवति॥ ॥

नः॥ विद्योपदेष्टव्येत्यत्र हेतुमाह॥ आत्मनः श्रेयो अविद्यादिदोषसंसारनिवृत्तिः संततिः॥ शिष्यप्रशिष्यादिसंचारेण वि
द्याया अविच्छेदः॥ विद्यासंततेः॥ उक्तोपयोग इत्यत्राह॥ विद्येति॥ यथा नदीतरणाय तत्र प्रविष्टस्यागाधे निमज्जतो नरस्य
पारं प्रापयितुं नौरुपस्थाप्यते॥ कृपालुना॥ तथा संसारसागरे निमज्जतः

उप॰स॰ ६ प्राणिनऽउद्धरणेन तत्पारं विष्णोः परमं पदं प्रापयितुं विद्यासंतानसंरक्षणमित्यर्थः॥ पूर्वोक्तशिष्यगुणसंपन्नायप गद्य॰१
रीक्षिताय॥ विधिवदुपसन्नायैव विद्या देया न यथाकथंचित्॥ आम्नायधनादिलोभात् हेति गुरोः॥ नियमार्थं श्रुतिमासन
मुदाहरति॥ शास्त्रं चेति॥ नियामकं शास्त्रं चात्रास्तीत्यर्थः॥ तदेवाह॥ यद्यपीति॥ इमां पृथ्वीं अद्भिः परिगृहीतां समुद्रपरि

विद्यासंततिश्च प्राण्यनुग्रहाय भवति नौरिव नदीं तितीर्षोः॥
शास्त्रं च यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां
दद्यादेतदेव ततो भूय इति॥ २॥

वेष्टितां धनस्य पूर्णां वित्तेनोपचितां दद्यात् कश्चित्॥ यद्यपि नैतत् तद्दर्शनं तस्मै दद्यात्॥ एतत् ततो वित्तपूर्णपृथिवीदा ६
नादपि भूयोऽधिकातरमिति योजना॥ २॥ ॥

नह्याकाशादिसमस्तभूतभौतिकाधिष्ठानस्य ततोऽप्यधिकातरस्यापरिच्छिन्नस्य ब्रह्मणो दानस्येदमनुरूपमिति भा
वः॥ तथा च श्रुतिः॥ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति॥ तदेवमाचार्येण परीक्षिताय शिष्याय कृपयैव वि
द्या वक्तव्येत्युक्तं॥ तत्र किमाचार्योपगमनेन कार्यं स्वयमेव जिज्ञासोऽन्यायाद्यनुसरणतो विद्योदयसंभवादिति॥ संका

अन्यथा च ज्ञानप्राप्त्यभावात् तथा च श्रुतिराचार्यवान् पु
रुषो वेदाचार्याद्धैव विद्याचार्याज्ञाविदितं सम्यग्॥ ॥ ॥

यामाह॥ अन्यथेति॥ यद्वा किमित्येवं संकटमवष्टभ्याचार्येण विद्या देया शिष्यस्वयमेवेतां किं न संपादयेदित्यत आ
ह॥ अन्यथा वेति॥ अत्र श्रुतिस्मृती प्रमाणयति॥ आचार्यवानित्यादिना॥ आचार्याद्धैव विद्या विदिता साधिष्ठं प्राप॥
यतीति वाक्यशेषः॥ आदिपदात् तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया॥

उप॰स॰ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इत्यादिवचनं गृह्यते॥ तथा चातिसूक्ष्मपरमार्थनिर्णयस्य स्वबुद्धिसामर्थ्य गद्य॰१
७ मात्रेणासंपादयितुमशक्यत्वमेतैः॥ वाक्यैः॥ गम्यत इत्यर्थः॥ ननु जिज्ञासोरुक्तविशेषणस्य शिष्यस्य सकृदुपदेशाग्र
हणादेव विद्यादार्ढ्योपपत्तेः॥ किमिति पुनः॥ पुनः॥ उपदेशः॥ कार्य इत्युक्तमत आह॥ शिष्यस्येति॥ शिष्यस्य ज्ञानाग्र

ज्ञानं प्लव इहोच्यते इत्यादिश्रुतिस्मृतिभ्यः शिष्यस्य ज्ञानाग्र
हणं च लिंगैर्बुध्वाऽग्रहणहेतून्॥ ॥ ॥

हणं च कारात् विपर्ययग्रहणं च मुखादिचेष्टावचनव्यक्त्यादिलिंगैः॥ बुध्वाऽग्रहणादिहेतून्॥ तत्प्रतिपक्षै ७
स्तन्निवर्तकैः॥ श्रुतिस्मृतिविहितैरपनयेदिति संबंधः॥ ॥ ॥

तानेवाह॥ धर्मेत्यादिना॥ अधर्मः संचितः॥ लौकिक इदानींतनः॥ प्रमादः॥ कामचारवादभक्षणादी॥ तत्र सूर्या
दिदेवतोपासनादिनियमोपदेशेनाधर्मक्षपणं कारणीयं वर्ज्यादिप्रतिषेधशास्त्रेण प्रमादनिरासः॥ नित्यानित्यविवेक
स्य यो विषयश्चेतनाचेतनरूपः तस्मिन्नसंजातं तत्पर्यंतं न प्रसृतं यत् दृढपूर्वश्रुतत्वं तत् युक्तिविशेषाद्युपन्यासेनाप॰

अधर्मलौकिकप्रमादनित्यानित्यविवेकविषयासंजातदृढपू
र्वश्रुतत्वं लोकचिंतावेक्षणजात्याद्यभिमानादींस्तत्प्रतिपक्षैः
श्रुतिस्मृतिविहितैरपनयेत्॥ ३॥ ॥

नीयविवेकपर्यंततां नयेदित्यर्थः॥ लोकचिंतावेक्षणं लोकानां व्यवहारसाधुत्वासाधुत्वविचारलक्षणं॥ लोकेभ्यः पूजा
ख्यात्याद्यपेक्षया तत्संसर्गोपरोधेन व्यवहरणं॥ एवं तत्त्वचक्ष्यमाणो मानित्वमदंभित्वमित्यादि॥ शास्त्रोक्तनिषेप
देशेनापनेतव्यं॥ जात्यादीत्यादिपदात्॥ कुलविद्यादि गृह्यते॥ ॥

उप.स. त्वंपदार्थपरिशोधनोपदेशेन जात्याद्यभिमानं त्याजयेदित्यर्थः॥ अभिमानादीनित्यादिपदेन तत्प्रयुक्तो व्यवहारो ऽन्य गद्य.१
८ धिकरणादिर्गृह्यते॥३॥ अक्रोधादिभिरित्यत्रादिपदेनाकामादयो गृह्यंते॥ अहिंसादिभिश्चेत्यादि॥ पदेनासत्यास्तेयब्रह्म
चर्यापरिग्रहा गृह्यंते॥ अत्राक्रोधादीनामहिंसादीनामुपायोपेयभावेनोपदेशो बोधव्यः॥ शौचसंतोषः॥ तपः स्वाध्यायई

अक्रोधादिभिरहिंसादिभिश्च यमैर्ज्ञानाविरुद्धैश्च नियमैः॥ ॥

श्वरप्रणिधानानि नियमा उच्यंते॥ तेषां च ज्ञानाविरुद्धैरिति विशेषणेन तीर्थयात्राचांद्रायणोपवासादिकर्मकांडपरा ८
यणं॥ बाह्यसाधनक्रियाव्यसनेश्वरपूजानिष्ठादि च यज्ज्ञाननिष्ठाविक्षेपकरं तस्यानादरणीयतां दर्शयति॥ ॥ ॥

यमनियमोपदेशस्तु सर्वदोषनिरासद्वारेणोपाय इति द्रष्टव्यं॥ एवं ज्ञानग्रहणप्रतिबंधकनिवर्तकमुपदिश्य ज्ञा
नोदयहेतुजातमुपदिशति॥ अमानित्वादिगुणमिति॥ आदिपदाददंभित्वादितत्त्वज्ञानार्थदर्शनांतं गृह्यते॥ यद्वा॥ अमा
नित्वनादंभित्वादिकं सहपतितत्वेनोपलक्ष्यादिपदेनाद्वेष्टासर्वभूतानामित्यादिनोक्ता हि अद्वेष्टृत्वादयो धर्मा ग्राह्याः॥
अत्र सम्यक्पदमेतन्निष्ठस्य सर्वदोषपरिहारेण यत्नलभ्यं॥ ज्ञानदाढ्यमिति दर्शयितु॥ अयंभावः॥ न हि सकृत् ग्रहण

अमानित्वादिगुणं ज्ञानोपायं सम्यक्॥ ॥

मात्रात् विद्या दृढोत्पद्यते आवृत्तिरसकृदुपदेशादिति न्यायात् श्रवणोत्तरकालं मननसाधनादिविधानसामर्थ्याच्च दृ
ढत्वे हि फलपर्यंतत्वं विद्याया विवक्षितं॥ अतः तत् फलानुकूलतया यावत् निर्विचिकित्स्यं तत् संजायते॥ तावत् गुरुणा शि
ष्यं कृतार्थं कर्तुं प्रवृत्तेन विद्योपयोगार्थं वा प्रवृत्तेनोपदेशः॥ ॥

उप॰स॰ कार्यएवेति॥ एवमाचार्यकृत्यमुक्त्वा तस्य लक्षणमाह॥ आचार्यस्त्विति॥ एतत्स्वतत्त्वजिज्ञासुनाधिकारिणा। गद्य॰२
९ एवंविध आचार्य उपगंतव्यो नान्यादृश इति॥ इदमपि तु न त्वाचार्येणैवंविधगुणेन भवितव्यमिति नियोगः क्रि
यते॥ तस्य कृतार्थत्वादिति द्रष्टव्यं॥ शिष्येणानुक्तस्याप्यूहनमूहः॥ उपदेशासमयसमये शिष्यप्रतिपत्त्यनुकूला

ग्राहयेदाचार्यस्तूहापोदग्रहणं॥ ॥

पूर्वयुक्तिकल्पनं वा॥ शिष्यस्य मिथ्याग्रहणस्याकरणसामर्थ्यमपोहः॥ सिद्धांतप्रतिपत्तिनिराकरणसामर्थ्यं वा
॥ शिष्यकृतयुक्त्याहोपवाक्यार्थानां नासद्वोधधारणसामर्थ्यग्रहणमिति॥ ॥श्रीरामायनमः॥ ॥श्री॥ ॥ ९

गृहीतानां तेषां सारावधारणपूर्वकं प्रत्युक्तिसमयेस्मरणयोग्यतापादनं॥ धारणं शमदमौ व्याख्यातौ॥ दयादुःखितं
प्रत्यनुजिघृक्षा॥ तदनंतरं दः॥ विनोदः॥ खापकरणे प्रवृत्तिरनुग्रहः॥ आदिशब्दादुपसन्नस्य विनीतस्यानुग्रही
तस्यापरित्यागो गृह्यते॥ यस्तु हिंसानुग्रहयोरनारंभीति॥ गौतमेन संन्यासिधर्मे दृष्टिर्तो यच्च न व्याख्यानपरोयं।
तिरित्यादिवचनं॥ तत्रख्यातिलाभपूजापांडित्यवृद्ध्यादिहेतुप्रवृत्तिविषयमित्यदोषः संपन्न इति पूर्वोक्तगुणै

धारणशमदमदयानुग्रहादिसंपन्नो लब्धागमो दृष्टादृष्टभोगे॥

रादृष्टेतोच्यते॥ लब्धागमः स्वगुरुभ्यः॥ प्राप्तविद्योपदेशः॥ अनेन विशेषणेन गुरोः॥ सांप्रदायिकत्वमपि शि
ष्यैणान्वेषणीयमिति सूचयति॥ दृष्टा भोगा ऐहिकाः॥ अदृष्टाश्च॥ पारलौकिकास्तेष्वनासक्तः॥ ततसाधनलौ
कारोधनतपोयज्ञादिप्रवृत्तिशून्य इत्यर्थः॥ यतः॥

उप.स. त्यक्तानि सर्वकर्माणि साधनानि धनदारसंग्रहशिखायज्ञोपवीतादीनि येन सः ॥ तथा ॥ अतो भोगानासक्तरि गद्य.१
१० ति विदितरित्यर्थः ॥ ब्रह्मवित् ॥ महावाक्यार्थप्रत्यगात्मतत्त्वज्ञानवानित्यर्थः ॥ तत् किं परोक्षतयैवेनेत्याह ॥ ब्र

घनासक्तस्त्यक्तसर्वकर्मसाधनो ब्रह्मवित् ब्रह्मणि स्थितोऽभिन्नवृत्तो ॥ ॥

ह्मणि स्थित इति ॥ ब्रह्मणि स्थितिः ॥ नाम नित्यापरोक्षं ब्रह्मैवाहमस्मीति ॥ स्फुटानुभवेनावस्थानं ॥ एवंवि १०
धोऽपि न यथेष्टचेष्टावानित्याह ॥ अभिन्नवृत्त इति ॥ न भिन्नं नोल्लंघितं वृत्तमाचारो येन स न तथा शिष्टविगर्हि

तो न भवतीत्यर्थः ॥ दंभो धर्मध्वजित्वं आत्मनो लोके धार्मिकत्वख्यापनमिति यावत् ॥ कुहकं परप्रतार
णं ज्ञानाद्यैर्नैपुण्यं माया परव्यामोहनं मात्सर्यं गुणेषु दोषाख्यापनं ॥ अनृतं मिथ्याभाषणं ॥ अहंकारो देहाभि
मानः ॥ ममत्वं पुत्रशिष्यादिषु स्वत्वाभिमानः ॥ एतैः ॥ दंभादिभिः ॥ दोषैः ॥ वर्जितरित्यर्थः ॥ एवंविधस्यैकि

दंभकुहकज्ञानाद्यमायामात्सर्यानृताहंकारमम
त्वदोषवर्जितः केवलपरानुग्रहः ॥ ४ ॥

मित्यन्योपदेशे प्रवृत्तिरित्यत आह ॥ केवलेति ॥ परस्य संसारसागरात् निर्विण्णस्य यः परमपदप्रापणरू
पोऽनुग्रहस्तदेव प्रयोजनं यस्य सः ॥ तथा ॥ केवलविशेषणेनानुषंगिकमपि प्रयोजनांतरं प्रवृत्तिहेतुं वारयति ॥
तर्हि किं निमित्तमेव परानुग्रहस्य प्रवृत्तिरुन्मत्तप्रवृत्तिवद्यादृच्छिकीनेत्याह ॥ विद्योपयोगार्थीति ॥ ॥

उप॰स॰ उपयोगोविनियोगः॥वाचारंभणंविकारोनामधेयमित्यादिवत्॥त्यजधर्ममधर्मंचउभेसत्यानृतेत्यजः॥ गद्य॰१
११ उभेसत्यानृतेत्यक्त्वायेनत्यजसितत्त्यजेत्॥इत्यत्रयेनज्ञानेनधर्मादिषुप्रवृत्तिनिरोधेनतानिपरित्यजसि॥
तत्ज्ञानंत्यजेत्युक्तं॥ज्ञानस्यामूर्तत्वात्॥स्वरूपेणात्यागायोगाद्धिनिःशेषेष्वप्रतिपादनंप्रतिपन्निकर्मक्रियते

प्रयोजनोविद्योपयोगोऽर्थःपूर्वमुपदिष्टोतत्सदेवसोम्ये
दमग्रआसीदेकमेवाद्वितीयं॥४॥ ॥

॥तत्त्ववस्तुमहिम्नापरानुग्रहंतांप्रतिपद्यतेइतिभावः॥एवंविधआचार्यःपूर्वमुपदिष्टोदित्यपेक्षायामक्तमंदर्शय
ति॥प्रथममेकमुपदिष्टोदित्यपेक्षायामात्मैकत्वप्रतिपादकवाक्यानिउपदिष्टोदितिवाक्यानिपठति॥सदेवेत्यादि ११
ना॥इत्यात्मैकत्वप्रतिपादनपराः॥श्रुतीः॥पूर्वमुपदिष्टोदितिसंबंधः॥४॥ ॥

यत्रनान्यत्पश्यतियत्रनान्यच्छृणोतिनान्यद्विजानातिसभूमेतिवाक्यशेषः॥ब्रह्मैवेदंविश्वमिदंवरिष्ठमि
तिशेषः॥अत्रसद्भूमात्मब्रह्मशब्दाःपर्यायाः॥अनेकशाखादिगतवाक्योदाहरणंगतिसामान्यादितिन्यायेना
विरोधतः॥स्वार्थपरत्वख्यापनार्थंकिंतत्ब्रह्मादिशब्दैर्वस्तूच्यते॥कथंचतदद्वितीयमवगम्यतइत्यपेक्षायाम

यत्रनान्यत्पश्यति॥आत्मैवेदंसर्वंब्रह्मैवेदंसर्वमात्मावाइदमे
कएवाग्रआसीत्सर्वंखल्विदंब्रह्मेत्याद्यात्मैक्यप्रतिपादनपरा
श्रुतीः॥५॥

ह॥उपदिष्टश्चग्राहयेत्क्योपजन्तुगमिति॥योऽशनायेपिपासेशोकंमोहंजरांमृत्युमत्येतीतिशेषः॥आ
नंदमनंतमित्युभयत्रब्रह्मेतिवाक्यशेषः॥एवंसर्वत्रवाक्येपुरुषोपाहराणिश्रुतिपरिचयेनपूरणीयानिग्रंथगौरवभया
त्वात्रसर्वत्रैदृशंतं॥यआत्मापहतपाप्माइत्यादिप्राजापत्यवाक्ये॥ ॥ ॥

उप॰स॰ न जाग्रदाद्यवस्थासु द्रष्टृत्वेनानुगतोऽवस्थाधर्मरहितोऽशरीरः ॥ प्रियाप्रियाभ्यामसंस्पृष्टः स प्रत्यगात्मै गद्य॰१
१२ व परं ज्योतिः ॥ परं ब्रह्मोपास्यं तेयं चेति ॥ प्रकरणार्थोपन्यासेन प्रत्यग्ब्रह्मैक्यमुपलक्षयेदित्यर्थः ॥ य आत्मा
सर्वान्तरो द्रष्टृबुद्धिरश्मिलक्षणया दृष्ट्या प्राणनादिव्यापारोपलक्षितः ॥ स एवाशनायादिप्राणान्तः ॥ करणाशरीर

उपदिश्य च ग्राहयेत् ब्रह्मोपलक्षणं य आत्माऽपहतपाप्मा यत्
साक्षात् अपरोक्षात् ब्रह्म योऽशनायापिपासे नेति नेति अस्थूल
मनणु स एव नेति नेति ॥ ॥

धर्मातीतः ॥ साक्षादपरोक्षात् ब्रह्मेति द्वितीयवाक्यार्थः ॥ नेति नेत्यादिवाक्यानां प्रपञ्चद्वयप्रविलापनेना १२
द्वितीयात्मतत्त्वोपलक्षणपरत्वं ॥ अदृष्टं द्रष्टरित्यादिना नान्यदतोऽस्ति द्रष्टृ इत्यादिवाक्यैः ॥ ॥श्रीकृष्णायनमः॥

यः सर्वसाक्षित्वेन प्रत्यगात्मैवान्तरं यस्मिन्नव्याकृताकाशादि धरित्र्यन्तं जगदोतं च प्रोतं चेत्युपलक्षितं तत्त्वमि
त्यर्थः ॥ विज्ञानमानन्दं ब्रह्मेति ॥ को न्वेतं जनयेत् पुनः मर्त्यः स्वित् ॥ मृत्युना वृक्णः कस्मात् मूलात् प्ररोहतीति प्रश्नस्य ज
गन्मूलकारणत्वेनोपलक्षितस्य ॥ स्वरूपं विज्ञानानन्दं लक्षणमिति तत्त्वज्ञार्थतत्त्वमुपलक्षितमित्यर्थः ॥ एवं ब्रह्मवि
दाप्नोति परमिति ॥ उक्तस्य ब्रह्मणः सत्यं ज्ञानमनन्तमिति स्वरूपं निर्दिश्य ॥ तस्माद्वा एतस्मादात्मन आकाशः संभू

अयं द्रष्टृविज्ञानमानन्दं सत्यं ज्ञानमनन्तमद्वयेनात्मा ॥ ॥

त इत्यादिना जगत्कारणत्वेनोपलक्ष्य तस्यैव सृष्टेषु कार्यकारणसंघातेषु प्रवेशं दर्शयित्वा अदृश्येऽनात्म्येऽ
निरुक्ते इत्यादिना ॥ प्रपञ्चापवादेन सर्वाधारं सर्वसाक्षिणमात्मानमानन्दरूपं ब्रह्मपुच्छं प्रतिष्ठेति ॥ अथ सोऽभयं ग
तो भवति स यश्चायं पुरुषे यश्चासावादित्ये स एक इति च तत्त्वमुपलक्षयेदित्यर्थः ॥ ॥श्रीरामायनमः॥ ॥ ॥

उप॰स॰ स वा एष महानज आत्मा योऽयं विज्ञानमयः॥ प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी इत्या गद्य॰१
१३ दिना॥ जाग्रदाद्यवस्था धर्मैरसत्वागतस्यासंगस्य कामाकामाभ्यां संसारमोक्षावनुभवतो बुध्यादिसाक्षिण आ
त्मनोऽन्तर्हृदये आकाशशब्दवाच्याजरामराभयादिलक्षणब्रह्माभेद इति तत्वमुपलक्षितमित्यर्थः॥ दिव्यो ह्य
मूर्तः॥ पुरुषः॥ स बाह्याभ्यंतरो ह्यजः॥ अप्राणो ह्यमनाः॥ शुभ्रो ह्यक्षरात्परतः पर इति॥ अथ परतपरयात

स वा एषो प्राणो ह्यमनाः स बाह्याभ्यंतरो ह्यजो॥ ॥

इत्यक्षरमधिगम्यते यत्तदद्रेश्यमित्यादिना॥ ग्राह्यग्राहकाद्यनेकोपाधिप्रतिषेधेनोपलक्षितस्य सर्वभूतयोनि
त्वेन च संभावितस्य सर्वज्ञस्य सर्वविकारोऽग्निविस्फुलिंगादिवज्जीवरूपेण॥ विभक्तत्वोक्त्या प्राप्तपरिच्छेदनिराक १३
रणेन प्रत्युक्तत्वमुपलक्षितं ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्यंतेनेत्यर्थः॥ ॥

इदं सर्वं यदयमात्मेति सर्वस्य दृश्यस्यात्मव्यतिरेकेण स्वरूपाभावमुक्त्वा दुंदुभ्यादिदृष्टांतैरुपपाद्यैकितदात्मन
:स्वरूपमित्यपेक्षायां महद्भूतमनंतमपारं॥ विज्ञानघन एवेति॥ तत्वमुपदिष्टमित्यर्थः॥ तदेतद्ब्रह्मापूर्वमनप
रमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूतिरितित तत्वंपदार्थपरिशोधनपूर्वकं वाक्यार्थो दर्शितः॥ तत्रापूर्व

विज्ञानघन एव अनंतरमबाह्यमन्यदेव विदितादथो
विदितादधि॥ ६॥ आकाशो वै नामेत्यादिश्रुतिभिः स्मृति
भिश्च॥ न जायते म्रियते॥ नादत्ते कस्यचित्पापं॥ ॥

मित्यादिना कार्यकारणत्वादिधर्मरहितत्वेन तत्पदार्थ उपलक्षितः॥ सर्वानुभूतिरिति॥ सर्वसाक्षितया त्वंपदा
र्थः॥ अयमात्मा ब्रह्मेति वाक्यार्थ इति विभागः॥ मनः प्राणादिषु प्रकाशकत्वेन प्रेरकत्वेन चोपलक्षितमात्मतत्वं प्र
त्यविदिताविदिताभ्यां कार्यकारणाभ्यामन्यदिति तत्स्वरूपं निवेद्यते अन्यदेव तद्विदितादथो विदितादधीत्यं तेने

नेनेत्यर्थः॥ क्वचिदाकाशशब्देनापि ब्रह्म लक्ष्यत इत्याह॥ आकाशो वै नामेति॥ नामरूपयोः जगत्बीजभूतयोर्व्या
कृतयोः॥ योनिः॥ वहिता व्याकर्त्ता ते नामरूपे च यदंतरा यस्य सः॥ मध्यवर्त्तते मनः॥ पृथक्स्वतंत्रे तत् ब्रह्म तदमृतं
स आत्मेति वाक्यशेषात् दहरोस्मिन्नंतराकाश इत्यत्राकाशशब्देनापि ब्रह्म लक्ष्यत इत्यर्थः॥ आदिपदात् प्राणोसि

यथाकाशस्थितो नित्यं॥ क्षेत्रज्ञं चापि मां विद्धि॥ न सत्तन्नासदु
च्यते॥ अनादित्वान्निर्गुणत्वात्॥ समं सर्वेषु भूतेषु॥ उत्तमः पुरुष
रित्यादिभिः॥ श्रुत्युक्तलक्षणाविरुद्धाभिः॥ ॥

प्रज्ञात्मा प्राण इति होवाचेत्याद्याः श्रुतयो गृह्यंते॥ न केवलं श्रुतिभिरेव ब्रह्मोपलक्षणं ग्राह्यपेदपि तु स्मृतिभिश्चे
त्याह॥ स्मृतिभिश्चेति॥ श्रुत्युक्तलक्षणाविरुद्धाभिरिति विशेषणं॥ ॥

श्रुत्युक्तेर्थे स्मृत्युदाहरणं प्रतिपत्तिदार्ढ्यार्थं न श्रुतेः॥ प्रामाण्यसिद्ध्यर्थं विशेषणं च सांख्यादिस्मृतिप्रसंगव्यावृत्त्यर्थ
मिति च द्रष्टव्यं॥ परमात्मासंसारित्वप्रतिपादनपराभिरित्यादिविशेषणद्वयं श्रुतिस्मृत्योः साधारणं॥ परमश्चासावा
त्मा च परमात्मा परमत्वं चास्याविद्यातत्कार्यसंघाततदवस्थासाक्षितया॥ अव्यभिचार्यनुगतप्रकाशस्वभावत्वं

परमात्मासंसारित्वप्रतिपादनपराभिस्तस्य सर्वेणानन्यत्वप्र
तिपादनपराभिश्च॥७॥ एवं श्रुतिभिः स्मृतिभिः गृहीतपरमात्म
लक्षणं संसारसागरादुत्तितीर्षुः प्रपद्येत॥

तस्यासंसारित्वप्रतिपादनं संघाताद्यवस्थात्रयोपाधेः॥ सम्यग्विवेचनं तत्पराभिरित्यर्थः॥ तस्य सर्वोपहितस्य त्वंप
दार्थस्य सर्वेणा सर्वमस्मिन्निति॥ सर्वं सर्वाधिष्ठानं ब्रह्म तेनानन्यत्वं तदेकात्मत्वं तत्प्रतिपादनपराभिरित्यर्थः॥ न्याया
नुगृहीताभिश्चेत्यस्मिन्नर्थे विकारः॥ एवं वाक्योपदेशेन तदर्थोपलक्षणपरश्रुतिस्मृतिव्याख्यानेन च॥ ॥श्रीरामः

उप॰स॰ इति बोधितं शिष्यमत्यन्तसंशयविपर्ययापोहेनोपदिष्टार्थमतिनैश्चल्यापत्तये पुनः पृच्छेदाचार्य इत्याचार्यकृत्यमाह गद्य॰१
१५ णां च श्रुतिभिः स्मृतिभिश्चेति॥ तथा च शिष्य इति पत्रिपरीक्षणार्थं श्रुतिः॥ मनवति॥ यदि मन्यसे सुवेदेति॥ अहरह
मेवाधिन्तं तत्त्ववेत्ता ब्रह्मणो रूपमित्याद्याहे सौम्य प्रियदर्शनक॥ त्वं किमात्मक इति॥ गुरुणा पृष्टो यदि स शिष्यो ऽत्र

कस्त्वमसि सौम्येति॥ यदि स ब्रूयात् ब्राह्मणपुत्रोऽदोऽन्वयो ब्रह्म
चार्यासं गृहस्थो वेदानीमस्मि परमहंसपरिव्राट् संसारसा
गरात् जन्ममृत्युमहाग्राहादुत्तितीर्षुरित्याचार्यो ब्रूयात्॥ ॥

ति यस्मादिदोषप्रतिबन्धवशात् ब्रूयात् ब्राह्मणपुत्र इत्यादि॥ तदा आचार्यो ब्रूयादिति संबंधः॥ असावन्वयो वंशो १५
यस्य सोऽहमदोऽन्वयः॥ अर्थमुक्तदीक्षितवंशोऽहमित्यर्थः॥ ॥

महाग्राहेण नक्रतिमिंगिलेन वा॥ अहो यद्यपि देहाभिमानप्रतिबद्धत्वान्नेदृश इति तं त्याजयत्याचार्यः॥ इहैव
त इत्यादिना॥ वयोभिः पक्षिभिः॥ गृध्रादिभिरित्यर्थः॥ एवं स्थूलदेहाभिमाने त्याजिते ततो विविक्तं आत्मानं म

इहैव ते सौम्य मृतस्य शरीरं वयोभिरद्यते मृद्भावं चापद्यते तत्कथं सं
सारसागरादुत्तितीर्षसि नहि नद्याः परे कूले भस्मीभूते नद्याः पारं
तरिष्यसि॥ स यदि ब्रूयादन्योऽहं शारीराच्छरीरं तु जायते म्रियते वयोभिरद्य
ते मृद्भावं चापद्यते शस्त्राग्न्यादिभिश्च विनाश्यते व्याधिभिश्च युज्यते॥

न्यमानः सन्॥ स यदि शिष्यो ब्रूयादन्योऽहं शारीरादित्यादि॥ तदा इत्याचार्यैर्ब्रूयादित्युत्तरेणान्वयः॥ कथं शारीरा
दन्यत्वमवगतमित्यत आह॥ शारीरं तु जायत इत्यादिना॥ शारीरावस्थानष्टत्वात् दृश्यात् विकारिणो हं द्रष्टा अ

उप॰स॰ विकार्यन्यारित्यर्थः॥ कथंतर्हिदेहादन्यस्यतवदेहाभिमानपूर्वकोव्यवहारइतिचेदविद्याप्रयुक्तकामप्रवृत्तित गद्य॰१
१६ धर्माधर्मवशादित्याह॥ तस्मिन्नहमिति॥ स्वकृतविशेषणेनाहंकारपूर्वकत्वद्योतनादहंकारस्याचाविद्याविनाके

तस्मिन्नहंस्वकृतधर्माधर्मवशात्प्रतीनीडमिवप्रविष्टः पुनःपुनःश
रीरविनीडोधर्माधर्मवशात्पुनःशरीरांतरंप्राप्याभिपूर्वनीडविनाशे
पत्तीवनीडांतरंएवमेवाहमनादौसंसारेदेवमनुष्यादितिर्यङ्निरय
स्थानेषुस्वकर्मवशादुपात्तंशरीरंत्यजन्नन्यंचान्यदुपाददानोजन्ममर
णप्रबंधचक्रेघटीयंत्रवत्स्वकर्मणाभ्राम्यमाणः॥ ॥श्रीनाथजी॥

वलेन्नात्मन्यसंभवादविद्याप्रयुक्ताभिमानमूलत्वंधर्माधर्मयोरितिभावः॥ ॥श्री॰अंबाजीसत्यछे॥ ॥ ॥ १६

यद्येवंजानासिमातर्हिकर्मकार्षीरितिचेत्पूर्वपूर्वकृतकर्मवासनापरवशात्पोत्तरोत्तरकर्मप्रवृत्तेर्नैतच्छक्नो
म्यहंनिरोद्धुमित्यभिप्रेत्याह॥ एवमेवाहमनादाविति॥ ह्रियमाणःकालनद्याक्वचिन्नरतिकस्थनेत्यादिन्यायेनाह॥
कर्मणेदंशरीरमासाद्येति॥ बहूनांकर्मणांसंचितत्वेपिक्रमेणैवफलजारंभोनयुगपदित्येकभविकत्ववादः॥ क्रमेणे

क्रमेणेदंशरीरंप्रासाद्यसंसारचक्रभ्रमणादस्मान्निर्विण्णोभग
वंतमुपपन्नोस्मिसंसारचक्रभ्रमणप्रशमायेति॥ तस्मान्नित्यए
वाहंशरीरादन्यःशरीराण्यागच्छंत्यपगच्छंतिचवासांसीवापुरुषः

ब्देननिरस्यते। तेननित्यानित्यविवेकश्चात्मनोजातइतिफलितमाह॥ आचार्यस्तुविवेकोक्तिंप्रत्युतसन्नाप्यनुजा
नीतिसाध्ववादीरिति॥ एवंविवेकवतस्तवनर्ममाद्यभिमानोभ्रांतिमूलएवेत्याह॥ कथंमृषावादीरिति॥ कथंप्र

उप॰स॰ १७ तिः ममेति। एवं तमाचार्यो ब्रूयादित्याह॥ तमिति॥ किं ब्रूयादित्येतदाह॥ यतस्त्वमित्यादिना॥ जातिजन्मान्वयः पित्रा गद्य॰१
दिसंस्कारो जातकर्मादिरुपनयनादिश्च भिन्नाः अनात्मभूता जात्यन्वयः॥ संस्काराश्च यस्य शरीरस्य तत्तथा॥ जात्यन्व

स्येत्यादीत्यादीत्याचार्यो ब्रूयात् साध्ववादीः॥ सम्यग् पश्यसि॥ १७॥ कथं मृषा
वादीः ब्राह्मणपुत्रोदोन्वयो ब्रह्मचार्यासं गृहस्थो वेदानीमस्मि परमहंसपरि
व्राडिति॥ स यदि ब्रूयात् भगवन् कथमहं मृषावादीमिति॥ तं प्रति ब्रूयादाचा
र्यो यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयसंस्कारवर्जितस्यात्म
नः प्रत्यभासीः ब्राह्मणपुत्रोदौन्वय इत्यादिना वाक्येनेति॥ ॥ ॥ ॥

यसंस्कारवर्जितस्यात्मनः कूटस्थस्य स्वरूपमिवाहमित्युल्लिखन् शरीरं प्रतिज्ञातत्वान्॥ ब्राह्मणपुत्र इत्यादि १७
नावाक्येनातो विपर्ययदर्शित्वात् मृषावादीरित्यर्थः॥ ॥

उक्तमर्थं विवृणोदीकर्तुं शिष्यप्रश्नमुत्थापयति॥ स यदीति॥ गुरोरुत्तरदानाय प्रवृत्तिमाह॥ आचार्य इति॥ वक्त
व्यस्यार्थस्यातिसूक्ष्मदृष्टिगम्यत्वात् सावधानो भवेत्याह॥ शृणु सोम्येति॥ यथेदमित्यादिवर्जित इत्यन्तं शिष्योक्तानु
वादवाक्यमुक्त्वा तं शिष्यं पूर्वोक्तं परमात्मलक्षणं स्मारयेदिति योजना॥ यस्मात् सदेवेत्यादिश्रुतिभिः॥ तदर्थानु

स यदि पृच्छेत् कथं भिन्नजात्यन्वयसंस्कारं शरीरं कथं वाहं जात्यन्वयसं
स्कारवर्जित इति॥ आचार्यो ब्रूयात् शृणु सोम्य यथेदं शरीरं त्वत्तो भिन्नं
जात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जित इति उक्त्वा तं स्मारयेत्॥

रूपाभिः स्मृतिभिश्च॥ यथोक्तलक्षणं परमात्मानं सर्वात्मानं भावितोसि तस्मात्॥ स्मर्तुमर्हसि सौम्येति योजना
याग्रंथः॥ य आत्मापहतपाप्मेत्यादिभिः॥ श्रुतिभिर्न जायत इत्यादिस्मृतिभिश्च पूर्वोक्तं अत्रोक्तपलक्षणं तस्या

उ.प.स.
१८

त्मचेतनः॥स्मर्तुमर्हसीत्यन्वयः॥एवमुक्तस्वरूपं स्मारयित्वा शरीरस्य भिन्नजात्यन्वयसंस्कारत्वतापनाय तत् गद्य.१
दुत्पत्तिप्रकारमुपदिशन्नादित्याह॥ब्रह्मपरमात्मेति॥ब्रह्मापरमात्मलक्षणविषया स्मृतिरनुसंधानं येन तस्मै
॥निष्पाय ब्रूयादित्यर्थः॥उपलक्षणत्वेनोक्तवाक्यार्थमेव प्रकटयन्नात्मनः॥सकाशात्त्वं वातोत्पत्तिप्रकारम

स्मर्तुमर्हसि सोऽप्यपरमात्मानं स्वात्मानं यथोक्तलक्षणं श्रावितोऽसि
देवसौम्येदमग्र आसीदित्यादिश्रुतिभिः स्मृतिभिश्च॥१०॥ लक्षणं तस्य श्रु-
तिभिः स्मृतिभिश्च ब्रह्मलक्ष्म परमात्मलक्षणास्मृतये ब्रूयात् योसावाको
शनामा॥

ह॥योसावित्यादिना॥यः शास्त्रांतरे प्रकरणांतरे वात्मादिशब्दैः॥प्रसिद्धोसावाकाशो वै नाम नामरूपयोर्निर्व १८
हिता ते यदंतरे तद्ब्रह्मेत्यादौ निर्दिष्ट आकाशनामा स्वात्मविलक्षणो योऽव्याकृतादिसर्वव्यापकोऽस्त्यन्वयः॥ ॥

आकाशोनामेत्युक्ते भूताकाशशंका स्यात् नामाकाशोऽर्थांतरत्वादिव्यपदेशादिति न्यायेन परिहरति॥नामरूप
भ्यां अर्थांतरभूतं इति॥भूताकाशस्य नामरूपांतःपातित्वात् तयोराधारभूत आत्मा आधेयाद्भूताकाशादेरत्यंत
त्यर्थः॥असंगत्वादिभिराकाशसाम्यात् परमात्माप्याकाशशब्देन श्रुतिषु क्वचिन्निर्दिश्यते॥गौण्याद्वृत्त्येति॥ द्व

नामरूपाभ्यामर्थांतरभूतो शरीरे स्थूलादिलक्षणोपहत
पाप्मादिलक्षण अपर्वैः संसारधर्मैरनागंधितो॥११॥ ॥

व्यं॥अत एवाशरीरो मूर्तिवर्जितः अशरीरपदमनिंद्रियत्वादेरप्युपलक्षणमित्यभिप्रेत्य विवृणोति॥अ
स्थूलादिलक्षणरिति॥अथवा शरीरः॥शरीरादिसंघातरहितः त्यत्र प्रमाणं सूचयन् अस्थूलादिलक्षणरिति॥य
तः शरीरेंद्रियमनः॥प्राणादिरहितोऽत एवापहतपाप्मादिलक्षणोऽभिमन्यमानस्याभावे अभिमानाभावादित्य
र्थः॥

चशब्देन स्वतो विकाररहितत्वं समुच्चीयते॥ सर्वैः विशेषणैः सिद्धमर्थमाह॥ सर्वैरिति॥ अनागंधितोऽसंस्पृष्ट इत्यर्थः॥१॥ नन्वेवं परमात्मनो शरीरादिलक्षणत्वेपि जीवः॥ शरीरादिलक्षणत्वस्यादित्याशंक्य॥ तस्य तेनानन्यत्वश्रवणात् मैवमित्यभिप्रेत्याह॥ यस्मात्साक्षादित्यादिना॥ विज्ञाते तु उक्ते आप्तं विज्ञानकर्तृत्वं वारयति॥ नित्य

यस्मात्साक्षादपरोक्षात् अस्मायं आत्मा सर्वान्तरो दृशेर्द्रष्टा श्रोतु
तः श्रोता मन्तो मन्ता विज्ञातो विज्ञाता नित्यविज्ञानस्वरूपोऽनन्त
रोऽबाह्यो विज्ञानघन एव परिपूर्ण आकाशवत्॥ ॥ ॥

विज्ञानस्वरूप इति॥ तत्र प्रमाणमाह॥ अनन्तर इत्यादिना॥ आकाशवत् परिपूर्ण इत्यन्वयः॥ पूर्ण इति॥ १९
निष्प्रपञ्चत्वरूपेण कर्मणि॥ किंतु॥ कर्तरि परिच्छेदाभावद्योतीत्याकाशदृष्टान्तः॥ ॥श्रीरामाय नमः॥ ॥ ॥

कथमेवंलक्षणस्य दृष्टृत्वादिकमुक्तमित्यत आह॥ अनन्तशक्तिरिति॥ इन्द्रो मायाभिः पुरुरूप ईयत इति श्रुतेः॥ अनन्ता अनवच्छिन्ना दुर्घटस्य मायावस्थारूपा शक्तयः॥ उपाधयो यस्य सोऽनन्तशक्तिः॥ मायाकार्यैः करणेन्द्रियोपाधिभिः॥ दृष्टृत्वादिव्यपदेशभाग्भवतीत्यर्थः॥ सर्वस्य स्थावरजङ्गमरूपस्य प्रपञ्चस्यात्मा स्व

अनन्तशक्तिरात्मा सर्वस्याशनायादिवर्जित आविर्भावतिरोभाव॥

रूपमित्यर्थः॥ तस्य नित्यमसंसारित्वं स्वाभाविकमाह॥ अशनायादीनि॥ आविर्भावतिरोभाववर्जितत्वाद्वेति वर्जित इत्यर्थः॥ एवमात्मस्वभावमुक्त्वानात्मरूपात्मकानात्मस्वभावं प्रपञ्चयति॥ स्वात्मविलक्षणयोरित्यादिना॥ अचेतनयोरित्यर्थ इति॥ उपादानत्वमुच्यते॥ जगद्बीजभूतयोरिति॥ कथं तर्ह्यात्मनोपादानत्वश्रुति

रित्यत आह॥ स्वात्मस्थयोरिति॥ उपादानाध्यस्ततामात्रेण कथमुपादानत्वसिद्धिरित्यत आह॥ सद्भा
वो नाम सत्त्वं आत्मसत्तामात्रेणाविभक्ततिष्ठितयोः न पृथक् सतोरात्मनिष्ठयोरित्यर्थः॥ तथा च॥ स्वात्मैकतांग
तयोः नामरूपयोः॥ व्याकर्त्रा स्वात्मनैव व्याकृतैस्तुपादानत्वसिद्धिरात्मन इत्यभिप्रायः॥ कुतः एवं चिद्रूपस्या

वर्जितस्य स्वात्मविलक्षणयोः नामरूपयोः जगद्बीजभूतयोः स्वात्म
स्थयोः सद्भावमात्रेणचिंत्यशक्तित्वात् व्याकर्त्री व्याकृतयोः॥१२॥

त्मनो चिद्रूपेण स्वात्मव्याकरणमित्यत आह॥ अचिंत्यशक्तित्वादिति॥ अव्याकृतयोरनभिव्यक्तयोरित्यर्थ २०
॥ अनभिव्यक्ततया स्थितं हि व्यक्तीक्रियते तेन प्रागसदिति प्रसंगादिति भावः॥

उक्तलक्षणयोर्नामरूपयोर्यदा मौनिः पादयिता तदा किमात्मके ते प्रथमं निष्पाद्येते इति तदाह॥ तेन नामरूपे इ
त्यादिना॥ तस्मादपहतपाप्मत्वादिलक्षणादेतस्मादचिंत्यशक्तेः॥ सर्वज्ञादीकारादिति नामवाचकेः॥ शब्दः॥ आ
कृतिः वाच्याकार इत्येवमाकारे संवृत्ते॥ एवं व्यवहारयोग्ये आभूतामित्यर्थः॥ वाच्यवाचकाकारेण सदात्मकं ब्रह्मैवमा

तेन नामरूपे व्याकृते सति व्याक्रियमाणे तस्मादेतस्मादात्मन
आकाशनामाकृती संवृत्ते तथा शब्दं भूतमनेन प्रकारेण प
रमात्मनः संभूतं प्रसन्नादिव सलिलात् मलमिव फेनं न सलिलं

याव शब्दाद्यभिव्यक्तमाकाशादिशब्दार्थात्मकमिति तात्पर्यार्थः॥ न तु कथं चिदात्मनो चिदात्मका काशात्मना निष्प
त्तिरिति॥ शंकां दृष्टांतेन व्याचष्टे॥ तथा काशाख्यमित्यादिना॥ दृष्टांतं विवृणोत्यं तस्मात्मनः॥ परिणामित्वशंकां वार

उप॰स॰ यति॥ न सलिलमित्यादिना॥ सलिलव्यतिरेकेण स्वरूपतः॥ अथगानुपलंभादित्यर्थः॥ फेनस्य सलिलात् भेदा गद्य॰१
२१ भावे सलिलस्यापि ततो न भेद इत्यत आह॥ सलिलं त्विति॥ अतो न सलिलमेव फेनं नापि ततो भिन्नं किंत्वनिर्वचनी

न च सलिलादत्यंतं भिन्नं फेनं सलिलव्यतिरेकेणादव्यतिरेकेणादर्शना
त् सलिलं तु स्वच्छमन्यच्च फेनान्मलरूपादेवं परमात्मा नामरूपाभ्यां भ
न्नः फेनस्थानीयाभ्यां शुद्धः अ सत्वस्तद्विलक्षणस्तेन नामरूपे अव्याकृतेय
नी व्याक्रियते माणे फेनस्थानीये आकाशनामरूपाकृती सह्चे॥१३॥ ॥

यर्थः॥ पोते च श्रुतिः॥ वाचारंभणं विकारो नामधेयमिति॥ दार्ष्टांतिकमाह॥ एवं परमात्मेति॥ तद्रूपिता मा का २१
र्यात्पत्तिं निगमयति॥ तेनामरूपे इति॥१३॥ ॥ ॥

इदानीं ततो वाय्वाद्युत्पत्तिं प्रतिपादयति॥ ततोपीत्यादिना॥ आकाशात्मना स्थिते नामरूपे तदनुगतेनात्म
ना व्याक्रियमाणे ततोप्याकाशादपि स्थूलभावमापद्यमाने सती वायुभावमापद्येते इति योजना॥ स्थूलभाव
:॥ स्पर्शगुणेनोपचयः॥ येनामरूपे आकाशात्मतां प्राप्ते ते एव व्याक्रियमाणे वायुभावमापद्येते इति॥ वदनूति

ततोपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभाव
मापद्येते ततोप्यग्निभावं अग्नेरप्भावे ततः पृथिवीभावमित्येवं
क्रमेण पूर्वपूर्वोत्तरोत्तरानुप्रवेशेन पंचमहाभूतानि पृथिव्यंता
नि समुत्पन्नानि ततः पंचभूतगुणविशिष्टा पृथिवी पृथिव्याश्च

कारांतरोपादानत्वं वारयति॥ एवमुत्तरत्रापि द्रष्टव्यं॥ तदेवं भूतोत्पत्तिमुक्त्वा तेभ्यः संघातस्य स्थूलस्योत्पत्ति
प्रकारमाह॥ पृथिव्याश्चेति॥ पंचात्मका इति पंचीकृतपंचभूतनिर्वर्तिता इत्यर्थः॥ ॥श्रीरामायनमः॥ ॥

उप॰स॰ तदुभयं स्त्रियो जो हितं पुंसः शुक्रं चेत्यर्थः ॥ काम एव खे खजो विजो इको मंथा स्तेनानिर्मथितो ऽद्भुतमित्यर्थः ॥ एवं ग॰द्य॰ १
२२ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वतीत्यादि गर्भाधानमंत्रैः ॥ संस्कृतमित्यर्थः ॥ एवं शरीरोत्पत्तिमुपोद्घाततयोप

पंचात्मका व्रीहियवाद्याः ओषधयो जायंते ताभ्यो ऽन्नं हि ताभ्यो जो ताभ्यो ऽन्नहितौ
भ्यो जो हि स शुक्रं च स्त्रीपुंसशरीरसंबंधी संभूय तदुभयं मृतुकाले ऽग्निविद्या वयु
क्तं बीजं निर्मथितो ऽद्भुतं मंत्रसंस्कृतं गर्भाशये निषिच्यते ॥ तत्स्त्रयोनिरसा
नुप्रवेशेन वर्द्धमानं गर्भसंभृतं नवमे दशमे वा मासि जायते तज्जातं लब्ध्वा
नामाकृतिकमिति ॥ ॥

द्विरूपतस्य भिन्नजात्यन्वयसंस्कारं वक्ष्यं प्रतिपादयति ॥ तज्जातमित्यादिना ॥ जातमित्यस्य व्याख्यानं २२
ब्धनामाकृतिकमिति ॥ ॥

भूतोपादान[illegible]त्वेन पित्रादिनिमित्तकत्वेन च भिन्नजात्यन्वयो शरीरस्योक्तो ऽस्येदानीं संस्कारमाह ॥ जातकर्मा
दिभिरिति ॥ एवं [illegible] शरीराभिमानात् शिष्यमुत्याप्य स्वस्य शरीराभिमानमपितस्य त्याजयं स्तस्यापि भौति

जातकर्मादिभिर्मंत्रैः संस्कृतं पुनरुपनयनसंस्कारयोगेन ब्रह्मचा
रिसंज्ञं भवति तदेव शरीरं पत्नीसंस्कारयोगेन गृहस्थसंज्ञं भवति ॥
तदेव वनस्थसंस्कारेण तापससंज्ञं भवति ॥ तदेव क्रियाविनिवृत्ति
निमित्तसंस्कारेण परिव्राट्संज्ञं भवतीत्येवं त्वत्तो भिन्नजात्यन्वयसंस्कारं

कत्वमा[illegible]त्यादिना ॥ नामरूपकारायेव भौतिकान्येवेत्यर्थः ॥ तत्र प्रमाणमाह ॥ अन्नमयं हि ति ॥ श्रु
तौ मनस्पादि[illegible]स्नमयं घातो विना ऽऽप्नोति कत्वात् स्थूलवदित्यर्थः ॥ कथं भिन्नजात्यन्वयसंस्कारं शरीरमित्य

पं.म. स्य त्रयस्यापरमभिधास्यन् कथं चाहं जात्यन्वयसंस्कारवर्जितः इति त्रिश्योक्तिमनूद्योत्तरमाह॥ कथं चेत्या गद्य.१
२३ दिना॥ यद्वा नामरूपविलक्षणः पूर्वोक्तविशेषणो नामरूपात्मकस्य सर्वस्य स्रष्टा जात्यन्वयसंस्कारवर्जितः

शरीरं मनश्चेन्द्रियाणि च नामरूपकार्याणि च। अन्नमयं हि सोम्य
मन इत्यादिश्रुतिभ्यः कथं चाहं जात्यन्वयसंस्कारवर्जित इत्येतत्तृणा
योसौ नामरूपयोः व्याकर्त्ता नामरूपधर्मविलक्षणः स एव नामरूपे व्या
कुर्वन्सृष्ट्वेदं शरीरं स्वयं संस्कारधर्मवर्जितो नामरूपे इह प्रविष्टः॥ ॥

॥स एवात्र प्रविष्टः स हेषु कार्यकारणसंघातेषु प्रविष्टो जीवात्मनेति श्रुतिप्रसिद्धत्वात्॥ ततस्य जात्यन्वयसं २३
स्कारसंबंध इति प्रतिपादयन्नाह॥ योसावित्यादिना॥ ॥ ॥

ननु परमात्मैव चेदिह प्रविष्टः॥ पश्यन्नोऽवतीं तर्हि कथं स तत्र सर्वैर्नोपलभ्यत इति तत्राह॥ अन्यैरदृष्ट इति॥
अदृष्टो द्रष्टेत्यादिश्रुतिरिहार्थतो दर्शिता सर्वस्य यो विज्ञाता स सर्वावभासकत्वान्नान्यैरवभास्यते सोऽन्यैरेवेह अ
विष्ट इति भावः॥ अत्र मंत्रमुदाहरति॥ सर्वाणीति॥ रूपाणि शरीराणि विचिंत्य विरचय्य॥ धीरो धीमान् सर्वज्ञ

अन्यैरदृष्टः स्वयं पश्यन्नथा श्रुतः शृण्वन् मतो मन्वानो वि
ज्ञातो विजानन्॥ सर्वाणि रूपाणि विचिंत्य धीरो नामानि कृत्वा
भिवदन्यदास्ते इत्यस्मिन्नर्थे श्रुतयः सहस्रशः॥ ॥ ॥

तमत्र प्रविश्य नामानि कृत्वा देवोऽहं मनुष्योऽहमित्यभिवदना दिव्यापारं कुर्वन्यदास्ते यो वर्त्तते॥ तं वेदाहमेत
मित्यादिवाक्यैर्नान्वयः॥ अस्मिन्नर्थ इति॥ स्वपुरे वजीवरूपेण प्रवेशादित्यर्थेनेत्यर्थः॥ ॥श्रीरामायनमः॥ ॥

उप·म·
२५

ब्राह्मणवाक्यान्यप्युदाहरति॥ तत्सृष्ट्वेत्यादिना॥ एवं तत्त्वात्माऽन्तरयाम्यमृत इतिवाक्यशेषः॥ सदेवे ग·द्वि·१
ईक्षणपूर्वकं जगत्सृष्ट्वा तमेव प्रविष्टं सीमानं शिरः॥ कपालसंधिं विदार्येत्यर्थः॥ एतया ब्रह्मरंध्रवाच्यया द्वा-
राछिद्रेण प्रापद्यत देहमध्ये प्रविष्ट इत्यर्थः॥ अन्तः प्रविष्टं कर्तारमेतं मन्त्रं सत्प्रियमाणो विभर्ति॥ एको देवो

तत्सृष्ट्वा तदेवानुप्राविशदन्तः प्रविष्टः शास्ता जनानां सएष।
इह प्रविष्टः॥ एवं तत्त्वात्मा स एतमेव सीमानं विदार्यैतया द्वारा प्रा-
पद्यत॥ एष सर्वेषु भूतेषु गूढात्मा सेयं देवतैक्षत हन्ताहमिमास्ति-
स्रो देवता इत्याद्याः श्रुतयः॥

बहुधा संनिविष्टः॥ इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्॥ एकं सद्विप्रा बहुधा वदन्त्यग्निं २५
यमं मातरिश्वानमाहुरित्यादि॥ मन्त्रब्राह्मणवादानप्यत्र सूचयतीत्याद्याः श्रुतय इति॥ ॥श्रीरामः॥ ॥

परमात्मैव क्षेत्रज्ञ इति॥ श्रुत्युक्तेर्थे स्मृतीरप्युदाहरति॥ स्मृतयोपीति॥ शरीरे वर्तमानस्याप्यशरीरधर्मासं-
स्पर्शित्वे श्रुतिं प्रमाणयति॥ अशरीरमिति॥ सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमित्या-
दिश्रुत्यर्थः॥ यस्मादेवं श्रुति॥ स्मृतिन्यायैरात्मा देहादेः॥ भिन्नो संगत्वद्धर्मासंस्पृष्टश्च तस्मादिति॥ प्रकृतमुप-

स्मृतयोपीति आत्मैव देवताः सर्वाः नवद्वारे पुरे देही॥ क्षेत्रज्ञं
चापि मां विद्धि समं सर्वेषु भूतेषु॥ उपद्रष्टानुमन्ता च॥ उत्तमः पुरु-
षस्त्वन्यः॥ अशरीरं शरीरेष्वित्याद्याः स्मृतयः॥ ॥ ॥

संहरति॥ तस्मादिति॥ एवं परमात्माऽभेदोपदेशो न जीवस्य॥ जात्यन्त्यसंस्कारराहित्यमुक्तमवधार्य
तत्रैवानुभवविरोधं शंकते॥ सयदीति॥ अप्रतत्वादेः॥ ॥ ॥

उप॰स॰ स्वात्मन्यनुभवसिद्धत्वात्तद्द्विजन्मनो ईश्वरात्मकं श्रुत्यादिभिरुक्तमपि न संभावयामि ॥ किंतु ॥ भिन्नमेवत गद्य॰१
२५ महं मन्येऽकृष्णमीश्वरं निकृष्टसंसार्यात्मना पश्यतः ॥ प्रत्यवायापत्तेरतः ॥ तदेवं स्वकर्मणा भक्त्या चाराध्यत

तस्मात्जात्यत्वग्निसंस्कारवर्जितस्त्वमिति विद्धि मिति ॥ स यदि ब्रूयादन्यदा वाह
मतः सुखदुःखी बद्धः संसार्यन्यो सौ मद्विजन्मणो संसारी देवस्तमहं बल्युपहारन
मस्कारादिभिः वर्णाश्रमकर्मभिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि कथमहं स
एवेति ॥ आचार्यो ब्रूयान्नैवं सौम्य प्रतिपत्तुमर्हसि प्रतिषिद्धत्वात् भेदप्रतिपत्तेः ॥

तत्र साहृत्वस्तु संसारोऽनविद्यामीति मे मतिरिति ॥ हिप्यामि प्रायर्ईत्यर्थः ॥ मैवं वादीः ॥ भेददर्शन एव प्रत्यव
यश्रवणादिति ॥ गुरुः परिहरति ॥ नैवं सौम्येति ॥ संग्रहवाक्यमाह परमाध्यनाम्यो विवृणोति ॥ कथंमित्यादिना ॥ २५

प्रत्यक्षसिद्धस्य कथं तद्विरुद्धप्रमाणान्तरेण प्रतिषेध इत्याक्षेपार्थः ॥ असंसारीश्वरस्य प्रत्यक्त्वात्तद्भेदस्य
स्वात्मनि प्रत्यक्षत्वाभावात् ॥ सुखित्वाद्यनुभवस्य चात्मन्युपपन्नत्वात् भेदाध्यवसायायोगादनन्यथासिद्धा
र्थश्रुति ॥ प्रतिषिद्धो भेदो न मानमर्हतीति समाधानाभिप्रायः ॥ उदाहृताः ॥ श्रुतयो न भेददर्शनमात्रं निषेधंति ॥ किंतु ॥

कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह ॥ अन्योऽसाव
न्योऽहमस्मीति न स वेद ॥ ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म
वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्येवमाः ॥

भेददर्शिनः प्रत्यवायमप्यनर्थप्राप्तिरूपमविदधंतीत्याह ॥ एतावतेति ॥ तथाहि ॥ अन्योऽसौ परमेश्वरो मद्विजन्म
णोऽन्योऽहं तद्विलक्षणः ॥ संसार्येवेति योऽन्यां देवतामुपास्ते तात्पर्येण पश्यति ॥ न स वेद तत्त्वमिति ॥ भेददर्शनस्याविद्या
मूलत्वमुक्तं यथा पशुरेवं स देवानामिति ॥ ॥

उप.स. २६ देवपशुत्वप्राप्तिं तस्य दर्शयति॥ न हि पराधीनात्मत्वतोऽन्यत् दैन्यं कष्टं वा वर्त्तत इति॥ तथा योऽन्यां वान्यदेवेदमि गद्य.१
त्यानात्मनः॥ पृथगेव ब्रह्म ब्राह्मणजाति वेद तं तं देव ब्रह्म ब्राह्मणत्वजातिः॥ परादात् पराकुर्यात् तत्त्वविमुखं कुर्या
त्॥ आत्मरूपं मामनात्मतया पश्यतीति द्वेष्टि वन तु हितमावहतीत्यर्थः॥ एवं हृत्रं तं परादादित्यादि सर्वं तं परादा

त्येवमाद्या एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयंति॥ ॥

दिस्यं तमुदाहरणं दृष्ट्व्यमिहात्मनि यो नानाऽव पश्यति इव नाऽन्बो नानात्वदर्शनस्याभासत्वद्योतनार्थः॥ समृत्योः
॥ मृत्युं संसारात् संसारं अनर्थपरंपरामेवाप्नोतीत्यर्थः॥ इत्येवमाद्या इति॥ नेह नानास्ति किंचन॥ उदरमंतरं कु २६
रुते अथ तस्य भयं भवतीत्याद्याः श्रुतयो गृह्यंते॥ ॥

भेददृष्टिं निंदित्वा भेददृष्टिफलवत्तया प्रशंसंस्तस्या एवोपादेयतां दर्शयति॥ अभेदप्रतिपत्तेश्चेति॥ तत्र श्रुत्ये
कदेशमुदाहृत्य व्याचष्टे॥ स आत्मेत्यादिना॥ तत्रैवान्वयव्यतिरेकोपपत्ति॥ परं श्रुत्यर्थमुदाहरन्नुक्तमर्थं दृढयति
॥ अभेदविज्ञानादेवेति॥ पुरुषं सौम्येति॥ हस्तगृहीतमानयंतीति रव्वेउदंदमप्यर्थं दर्शयतीत्यर्थः॥ मुमुक्षोः परमात्म

अभेदप्रतिपत्तेः स्वमोक्षं दर्शयंति सहस्रशः स आत्मा तत्त्वमसीति
परमात्मभावं विधयाचार्यवान् पुरुषो वेदेत्युक्त्वा तस्य तावदेव चि
रमिति मोक्षं दर्शयंत्यभेदविज्ञानादेव तस्य सत्यसंधस्य तस्करस्येव

न्यून्य भेदसंपन्नावपि तथा ज्ञाता भावापराधादेव पुनरपि॥ व्याघ्रादिभावेनोत्थितानां संसाराविच्छेदं दर्शयंतीति
श्रुतिः॥ परमात्माभेदेनात्मज्ञानमेव मोक्षहेतुरिति सूचयतीत्यभिप्रेत्याह॥ तद्द्व्याघ्रो वेत्यादिना चेति॥ अत्रै
वोदाहरणांतरमाह॥

अभेददर्शनात्स्वराडित्यादिना यदाह्येवैष एतस्मिन्नदृश्येनात्मेनिरुक्तेनिलयनेभयं प्रतिष्ठां विंदते अथ सो
भयगतो भवति॥ यदाह्येवैष तस्मिन्नुदरमंतरं कुरुते॥ अथ तस्य भयं भवतीत्याद्याः श्रुतयोप्युदाहर्तव्या इत्याह

दाहाद्यभाववत् संसाराभावं दर्शयति॥ दृष्टांतेन भेददर्शनाद् असत्या
भिसंधस्य संसारगमनं दर्शयति॥ तस्करस्येव दाहादिदृष्टांतेन॥ तदु
हव्याघ्रो वेत्यादिना चाभेददर्शनात् सस्वराड्भवतीत्युक्त्वा तद्विप
रीतेन भेददर्शनेन संसारगमनं दर्शयत्यथ येन्यथातो विदुरन्यराजान
स्ते क्षय्यलोका भवंतीति प्रतिज्ञारूपं॥ ॥

॥ प्रतीदिति॥ शास्त्रमिति॥ यस्मादेवं भेददर्शननिंदयाभेददर्शनस्तुत्या च जीवस्य ब्रह्माभेदो वधारितो ब्राह्मणत्वा २७
द्यभिमानस्यात्मनि मिथ्यादृष्टित्वात्सिद्धमिति॥ प्रकृतमुपसंहरति॥ तस्मादिति॥ यदुक्तं॥ ॥श्रीरांमायनमः॥

पश्यस्त्व हीति गुरोरुक्तिः॥ पश्यद्दृष्टिमानेव त्वं सुषुप्ते इत्यर्थः॥ यस्मादित्यादि स्तदुपपादनपरो ग्रंथः स्पष्टार्थः॥
सुषुप्ते मया किंचिन्न दृष्टमित्युक्त्वा तस्य परामर्शानुपपत्त्या सौषुप्त्यानुभवस्यावस्थात्रयभावात्तदाकरणोपसंहारात्

कथं व्याघातः पश्यतस्त्वं न पश्यामीति व्याहतं वचनं॥ न हि किंचित्कदाचिद्भगवन्
सुषुप्ते मया चैतन्यदा किंचिद्दृष्टं॥ पश्यत हि सुषुप्ते त्वं यस्माद्दृष्टमेव प्रतिषेधसि ना
दृष्टं यातवद्दृष्टिस्तद्वैतन्यमिति मयोक्तं॥ यया त्वं विद्यमानया न किंचिद्दृष्टमिति प्रतिषे
धसि सा दृष्टिस्तद्वैतन्यं तच्च हि सर्वत्राव्यभिचारात्कूटस्थनित्यत्वसिद्धं स्वतः एव न प्र
माणापेक्षं॥ स्वतः

गंतुकानुभवात्स्वरूपचैतन्यमनागंतुकरूपं स्यादवस्थात्रयभावात्स्वरूपं सिद्धमित्युपसंह
ति॥ यस्येत्यादिना॥ चैतन्यस्य स्वतः सिद्धिमुपपादयति॥ स्वतःसिद्धस्य हि प्रमातरि॥ हिरण्यो लोकानुभवप्रसिद्धि
द्योतनार्थः॥ स्वतः सिद्धः॥ प्रमाणनिर्पेक्षत्वेनैव सिद्धः॥

उप॰स॰ प्रमाणप्रवृत्तेः प्रागेव प्रकाशमानः इतियावत्॥ एवंविधस्य प्रमातुर्यदन्यत्प्रमेयं तद्यदेकस्य परिच्छित्तिं स्फूर्त्तिं प्र गद्य॰१
८ तिप्रमाणापेक्ष्यान प्रमातृस्वरूपपरिच्छित्तिं प्रमाणापेक्षेत्यर्थः॥ यात्वन्यस्यापरिच्छित्तिरूपस्याचेतनस्य परि

स्वतःसिद्धस्य हि प्रमातुरन्यस्य प्रमेयस्य परिच्छित्तिः प्रमाणापेक्षा यात्वनित्यान्या
परिच्छित्तिरपेक्ष्यतेन्यस्यापरिच्छित्तिरूपस्य परिच्छेदाय साहि नित्यैव कूटस्थात्स्वयंज्यो
तिःस्वभावात्मनि प्रमाणत्वे प्रमातृत्वे वा न तां प्रति प्रमाणापेक्ष्या तत्स्वभावत्वात्

छेदायवभासनाय नित्या स्वतः॥ सिद्धा चान्या परिच्छित्तिः॥ संविद्रूपेत्याते साहि कूटस्थैव यतो नित्या स्वयंज्योतिस्वभावा चे २८
तियोजना॥ तां प्रति स्वरूपकूटस्थनित्यसंविदं प्रति आत्मनि संविद्॥

तमहं वज्रपहारनमस्कारादिभिः॥ वर्णाश्रमकर्मभिश्चाराध्येति सापि दृष्टिभेददर्शनाप्रवादादेव न समग्र
दृष्टिरित्याह॥ तस्मात् प्रतिषिद्धत्वादिति॥ भेदविषयत्वाच्च कर्मोपादानस्येति॥ क्रियाकारकफलभेदाश्रयमंत
रेण कर्मणः स्वरूपासिद्धेरित्यर्थः॥ यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा इति॥ श्रुतेः यज्ञोपवीतधारणादेः॥

तस्मात्त्यक्तैषैव वादी आत्मणापुत्रो दोन्वयः संसारीपरमात्मविलक्ष
णः इति॥ तस्मात् प्रतिषिद्धत्वात् भेददर्शनस्य॥ भेदविषयत्वाच्च कर्म
र्मोपादानस्य॥ कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादान
स्य परमात्माभेदप्रतिपत्त्याप्रतिबंधः॥ ॥

कर्मसाधनत्वाच्च गमात् साध्यकर्माभावे तत्साधनपरिग्रहो निरर्थक इत्यभिप्रेत्याह॥ कर्मसाधनत्वाच्च यज्ञो
पवीतादेरिति॥ कर्मसाधनयोरुपादानं कर्मसाधनोपादानं तस्येति विग्रहः॥

उप॰ सं॰ कथमभेदप्रतिपत्तिमात्रेण कर्मतत्साधनप्रतिषेधसिद्धिः कर्मिणोप्यभेदप्रत्तिसंभवादित्याशंक्याह ॥ क गद्य॰ १
२८ र्मिणो हीति ॥ ब्रह्माहं कर्त्ता चाहमिति ॥ विरुद्धप्रतिपत्तिसरे कस्मिन्पुरुषे समुच्चयायोगादित्यर्थः ॥ तर्हि प्रधि
कार्यभावान्निराजवत्कर्मकाण्डमप्रमाणं स्यादिति नेत्याह ॥ संसारिणो हीति ॥ संसारिणो जात्याद्यभिमानवत इत्य

कृतावेदितव्यः कर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमात्मा
भेदप्रतिपत्तिविरुद्धत्वात्संसारिणो हि कर्माणि विधीयन्ते ॥ तत्साध
नानि च यज्ञोपवीतादिनि न परमात्मनो भेददर्शनमात्रेण च ततोन्यत्व

र्थः ॥ न पुरमात्मनो भेददर्शिन इत्यर्थः संसारिणोपि परमात्मानन्यत्वात्कथं तस्य कर्मविधिरित्यत आह ॥ भेदद २८
र्शनमात्रेण च ततोन्यत्वमिति ॥ न वस्तुवृत्त्याभेदापेक्ष्या कर्मविधेरिति भावः ॥

यदुक्तं ॥ ब्रह्मात्मैक्यप्रतिपत्त्या कर्मणां तत्साधनानां च युक्तः प्रतिषेधः कृत इति तद्व्यतिरेकमुखेन साधय
ति ॥ यदि कर्मणीत्यादिना ॥ परमात्मन इति चकारादात्मनो ब्रह्मणो वाभेदप्रतिपत्तिमिति योज्यं ॥ एवमादिभिरित्य

यदि कर्माणि नैकेव्यानि न विद्धि विचितानि कर्मसाधनसंबंधिनः कर्मनिमित्त
जात्याश्रयासंबंधिनश्च परमात्मनश्चात्मनेवाभेदप्रतिपत्तिर्नावेस्यात् स आत्मा
तत्त्वमसीत्येवमादिभिर्निश्चितरूपैर्वाक्यैर्भेदप्रतिपत्तिर्निंदा च नान्यथास्यादे
ष नित्यो महिमा ब्राह्मणस्यानन्वागतं पुण्येनानन्वागतं पापेनात्रत्तेनरित्यादि

हं ब्रह्मास्मीत्यादिवाक्यगृहीतैर्निश्चितरूपैः ॥ वाक्यैरिति संवादिविसंवादिप्रमाणांतरासिद्धविषयत्वे सत्यन
न्यशेषतया च स्वार्थैकपरत्वेन निर्णीतस्वभावैरित्यर्थः ॥ भेदप्रतिपत्तिर्निंदामिति ॥ मृत्योः स मृत्युमित्यादिभिः ॥

उप॰स॰ २८ यो वेदेति विग्रहः॥ ब्राह्मणस्य ब्रह्मविदः स हि मुख्यो ब्राह्मणः। स ब्राह्मण इति श्रुतेरित्यर्थः॥ उदाहृतवाक्यानां मद्य॰१
कर्मणां तात्पर्यमाह॥ कर्मसंबंधेत्यादिना॥ वैदिककर्मादिभिन्नपरित्याज्यपि त्यक्तानि तद्धि विमुक्तं सर्वं कर्मान्यथा

नाकत्यादिना कर्मसंबंधरूपं तत्कर्मनिमित्तवर्णाद्युसंबंधतां नामान्यथास्य
तत्कर्माणि च तत्साधनानि च यज्ञोपवीतादीनि यद्यपरित्याज्यानि तानि॥
तस्मात्तत्साधनं कर्म परित्यक्तव्यं मुमुक्षुणा परमात्माभेददर्शनविरोधात्
न परमात्मभावप्रतिपन्नत्वोपधातुकत्वं तत्र॥

स्यादिति संबंधः॥ अभिधत्ते तु श्रुतिस्तं तमर्थमितो ब्रह्मात्मज्ञानविमुक्तः कर्माणि निःपरित्यजतीत्याह॥ तीस्या २८
दिति॥ तदेवमात्मसमावेशनेन निरूपितब्रह्मात्मैक्यायुक्तविवेकस्यापि यत्नमुक्तत्वोपदः॥ ॥श्रीनाथजी॥

तत्रास्ते ब्राह्मणः शिष्यो जीवपरमात्मानौ वस्तुतो भिन्नौ विरुद्धधर्मसंसर्गत्वात् तमःप्रकाशवदित्यनुमानेन प्रत्यवतिष्ठत
इत्याह॥ स यदीत्यादिना॥ एवं विरुद्धधर्मवत्त्वं हेतुमुपपाद्यानुमानमाह॥ कथं तद्विलक्षण इति॥ एवं सति भेदस्यता

स यदि ब्रूयाद्भगवन्दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदना नानायादिनिमित्तं
च प्रत्यक्षं दुःखमनुभवन् परस्त्वात्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपि-
पासः सर्वसंसारधर्मवर्जितः श्रूयते श्रुतिस्मृतिषु॥ कथं तद्विलक्षणोऽनेकसंसारध-
र्मसंयुक्तः सं परमात्मानमात्मत्वेन मां च संसारिणं परमात्मत्वेनाग्निमिव शीतत्वे

त्विकत्वे कर्मतत्साधनपरित्यागात्मकस्य संन्यासस्य नास्त्यवसर इत्याह॥ संसारी चेति॥ तत्रानुमाने तावद्धेत्वसि-
द्धिं दर्शयितुमुपक्रमते॥ तं प्रति ब्रूयादित्यादिना॥ जीवपरमात्मानाविति॥ किमुपाधिभेदविशिष्टं वस्तु यथा प्रति

उप॰स॰ पत्तिर्निर्दिश्यते किंवा चैतन्यमात्रासाकारं॥ अद्वैतबाधव्यभिचारौ आकाशभेदवदौपाधिकस्य भेदस्याप्यवास्तव गद्या॰
३० त्वात् भेदमात्रसाधने सिद्धसाधनत्वात् चेत्यद्वितीये सिद्धिमुक्तानामुपपादयति॥ तदसत् कस्मादिना॥ वृत्तद

न प्रतिपद्येयं संसारी संसारिच सन् सर्वाभ्युदयनिःश्रेयससाधनेधिकृतोभ्युदयनिः
श्रेयससाधनानि कर्माणि तत्साधनार्थानीति यज्ञोपवीतादीनि कथं परित्यजेयमि
ति॥ तं प्रति ब्रूयाद्यदेवाच तत् दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति
तदसत् कस्मात् दह्यमाने छिद्यमानेऽव वृक्षे उपलब्धुरुपलभ्यमाने॥ ॥ ॥

वदह्यमाने छिद्यमाने शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वात्॥ दाह॥ दिसमानाश्रयैव दाहच्छेदादिवेदनेति यो ३०
जनं॥ शरीरस्यैव तदुपलब्धृत्वशंकां वारयितुं तद्विशिनष्टि॥ ॥

कर्मणीति॥ कर्मत्वं साधयत्युपलब्धुरूपलभ्यमानइति॥ उक्तमर्थं लोकप्रसिध्या दृढयति॥ पत्रहीति॥ तत्रैवानुभ
वमपि प्रपूर्वकमर्पयति॥ कथमित्यादिना॥ पुनः तदेव व्यतिरेकमुखेनोपपादयति॥ यद्युपलब्धुरिति उपदिष्टो दि
त्यस्मात् पूर्वं लब्धुरमित्यध्याहारः॥ यद्युपलब्धुरिवेदनास्यात्॥ तदा दाहाद्याश्रयदेहदेशवत् वेदनानिमित्तदाहच्छेदा

कर्मणि शरीरे दाहच्छेदवेदनाया उपलब्धुरूपलभ्यमानत्वात् दाहादिस
मानाश्रयैव॥ यत्र हि दाहच्छेदौ क्रियेते तत्रैव व्यपदिश्यते दाहादिवेदना लो
केन दाहाद्युपलब्धुरिति कथं कुत्र वेदनेति पृष्टः शिरसि मे वेदनोरसि उदर इति

हि दिज वेदनाश्रयत्वेनोपलब्धारमुपदिशेत् लोको नैवमुपदिश्योऽनुपलभ्यते॥ अतो दाहच्छेदादिसमानाश्रयैव वेदने
तियोजना॥ तत्रैवयुक्त्यंतरमाह॥ स्वयं चेति॥ यथा च क्षुर्गतं रूपं न चक्षुषा गृह्यते॥ ॥ श्रीकृष्णायनमः॥ ॥ ॥

उप.स. तथात्मगतावेदनात्मनान गृह्यते कर्मकर्तृत्वविरोधादित्यर्थः॥ आत्मनो वेदनाश्रयत्वनिराकरणमुपसंहरति॥ तस्मा गद्य.१
३१ दिति॥ ननु वेदनानाम दुःखं न तच्चेतनेदेहे संभवति॥ सुखदुःखादिधर्माणां चेतनाश्रयत्वनियमात्॥ यदि पुनश्चेतनो

यत्र दाहादिस्तत्रैव व्यपदिश्यते न तु व्यपदेशात्तूपलब्धरीति॥ यद्युपलब्धारि वेदनौ
नाश्रयात् वेदनानिमित्तदाहच्छेदादि वेदनाश्रयत्वेनोपदिश्यते तदा हो द्याश्रयवत्तत्स्वयं
चेतोपलभेतच्चक्षुर्गतरूपवत् तस्मात् दाहच्छेदादि समानाश्रयत्वेनोपलभ्य
मानत्वात् दाहादिवत् कर्मभूतैव वेदना॥ ॥

प्यात्मा न वेदनाश्रयः॥ तदा शरीरमप्यचेतनं न तदाश्रय इत्यनाश्रयैव वेदनास्तु॥ बौद्धैरपि तथाभ्युपगमादित्य ३१
तत्राह॥ भावरूपत्वाच्चेति॥ भावरूपत्वं कार्यत्वं वेदनासाश्रयाका॥ ॥

त् तंदुलपाकादिवदित्यर्थः॥ हेतोरप्रयोजकतामाशंक्य विपक्षे बाधकमाह॥ वेदनासमानाश्रय इति॥ वेदनास
मानाश्रय एव तत्संस्कार इति निराश्रयत्वे तन्नाशे संस्काराभावात् कालान्तरे स्मरणं न स्यादित्यर्थः॥ यद्वा॥ हेत्वसि
द्धिं परिहरति॥ वेदनायाः समानाश्रय एव तत्संस्कार इति॥ वेदनाया अकार्यत्वे तत्संस्कारस्मृत्योरसंभवात् कालान्त

भावरूपत्वाच्च साश्रया तंदुलपाकवद्वेदनासमाना
श्रय एव तत्संस्कारः स्मृतिश्च॥

रे पादे मे वेदनाभूदित्यादिव्यवहारो न स्यादित्यभिप्रायः॥ अपवासाश्रया यदि वेदना तर्ह्यन्याश्रयैव स्यादात्मन्ये
व तत्संस्कारस्मृत्यादेरुपलंभादित्यानुशंक्याह॥ वेदनासमानाश्रय एव तत्संस्कार इति॥ यतस्या वेदनोपलभ्यते ता
स्य एव तज्ज॥ संस्कारादि वेदनातत्संस्कारस्मृतीनामेकाश्रयत्वनियमात् वेदनायाश्चोपसमतिसमानकालकर्म

उप॰स॰ निश्चलोपपादनान्नोपलब्धृत्वात्मनित्वसंस्कारादिरित्यर्थः॥ तदेवानुमानेन साधयति॥ स्मृतिसमानकाल एवेति गद्य॰१
३२ ॥स्मृतेः यथा लोके जाग्रत्स्वप्नावस्था रूपः॥ तत्रैवोपलभ्यमानत्वात्॥ सुषुप्त्यादावनुपलभ्यमानत्वात्॥ वेदनाविष
योसमानविषयः॥ समानाश्रय एव तत्संस्कार इत्यर्थः॥ तथाचायं प्रयोगः॥ वेदनादिरनात्माश्रयो ऽनात्म

मानकाल एवोपलभ्यमानत्वाद्वेदनाविषयस्तन्निमि
त्तद्वेषोपि संस्कारसमानाश्रय एव॥

प्रत्ययकाल एवोपलब्धिगोचरत्वात्॥ देहकार्श्यादिवदिति॥ इतोपि ऽनात्माश्रय एव वेदनादिरित्याह॥ तन्नि ३२
मित्तश्चेति॥ तस्या वेदनाया यन्निमित्तं दाहच्छेदादि तद्विषयो द्वेषोपि संस्कारतुल्याश्रयो ऽनात्माश्रय इत्यर्थः॥ अ
यमिह प्रघट्टकाभिप्रायः॥

देहे छिद्यमाने दह्यमाने वाहं छिन्नो दग्ध इति चेद्देहाभिन्नमात्मानं मन्यमानः संतप्यते जनस्तन्निमित्तकवेदना
तत्संस्कारस्मृतिद्वेषांश्च देहाभिन्न एवात्मन्युपलभते न देहाभिमानहीनावस्थायां देहस्योपलभ्यमानत्वादुपलब्धि
कर्मैव तेषामुपलब्ध्याश्रय इति संघातस्यैव वेदनादिस्तामंहतस्य साक्षिणो ऽनात्मन इति नित्यशुद्ध एवात्मेति॥ एवं निरूपि

तथाचोक्तं॥ रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत्॥ गृह्यते धी
श्रयं यस्मात्तज्ज्ञाता शुद्धोऽभयः सदा॥ किमाश्रयाः पुनः रूपादिसंस्कारा
दयरित्युच्यते॥ ॥

तेर्थे वृद्धसंमतिमाह॥ तथाचोक्तं॥ रूपेति॥ रूपं नीलपीतादिविषयः॥ तस्य संस्कारः सूक्ष्मावस्था तदनुभवसं
स्कारो वा स्मृतिहेतुः॥ तद्रूपसंस्कारस्तेन समहतुल्यः॥ समानः आधिरूपाधिराश्रयो ययो रागद्वेषयोस्तौ रूपसं
स्कारतुल्याधी यच्च भयं तदपि रूपसंस्कारतुल्याधीत्यर्थः॥ ॥

उप॰स॰ किमाश्रयत्वमेषामित्यत आह॥ गृह्यते धीरयमिति॥ गृह्यतेऽयमेतदिति विशेषः॥ संकल्पविचिकित्सादेरप्युप गद्य॰१
३३ लक्षणमेतत्॥ यतः यस्मात् रूपादिसंस्कारतज्ज॥ न्यरागादिस्सर्वः जीवसंसाररहितः॥ इत्याश्रितमेवोपलभ्यते तत्तत्
साक्षिसंश्रितं तत्तत् तस्मात् ज्ञाता आत्मा सदा शुद्धो रागद्वेषरहितोऽभयश्च संसाररहित इत्यर्थः॥ युक्त्या संमत्या चोप

यत्र कामादयः क्व पुनस्ते कामादयः कामः संकल्पो विचिकित्सेत्या
दिश्रुतेः बुद्धावेव॥ ॥

पादितं वेदनादीनामनात्मधर्मत्वं पुनः॥ प्रश्नपूर्वकं श्रुत्या प्रतिपादयंस्तदाश्रयविशेषं निर्धारयति॥ किमाश्रया ३३
इत्यादिना॥ इत्यादिश्रुतेः॥ एतत्सर्वं मन एवेत्यवधारणात् मनो बुद्ध्योऽश्रांतः॥ करणात्मकत्वात् बुद्धावेव कामाद
योनात्मनीत्यवधारितमित्यर्थः॥ ॥

कामादेर्बुद्ध्याश्रयत्वेपि कथं रूपादिसंस्कारसमानाश्रयत्वसिद्धिरित्याशंक्य रूपादेरपि बुद्ध्याश्रयकापत्वे
श्रुतिमाह॥ तत्रैवेत्यादिना॥ कामादेरंतःकरणनिष्ठत्वेनाक्यांतरं प्रवृत्ति कामायेस्योति॥ तीर्णो हि तदा सर्वाञ्छोकान्
हृदयस्येत्युक्तेः॥ मनिदानानामेव तेषां हृदयाश्रयत्वं गम्यते॥ तस्माच्छोकनिमित्तरूपादिसंस्काराणामपि बुद्ध्याश्र

तत्रैव रूपादिसंस्कारादयोपि कस्मिन्नु रूपाणि प्रतिष्ठितानीति
हृदय इति श्रुतेः॥ कामा येऽस्य हृदि श्रिताः॥ तीर्णो हि॥ असंगो ह्य
यं तदा अस्येतदतिच्छंदा इत्यादिश्रुतिभ्यस्तेभ्योऽविकार्योयमु
च्यते॥

येत्यमुक्तयेव अन्यथा सर्वविशेषणानुपपत्तेरि॥ त्यर्थः॥ इदानीमात्मनो वेदनाकामद्वेषाद्यसंस्पृष्टत्वे श्रुतिस्मृती
॥ पर्वतति॥ असंगो हीत्यादिना॥ अतिच्छंदा इति छांदसं रूपविशेषणत्वादतिच्छंदं छंदः कामो तिगत कामममसंस्पृष्ट
कामादिदोषमेतदात्मरूपमित्यर्थः॥ निर्गुणत्वादित्यादिस्मृतिभ्यश्चेति संबंधः॥ ॥श्रीरामायनमः॥ ॥ ॥

इदानीं सिंहावलोकितेन कामादेरनात्मधर्मत्वमुक्तं॥ स्मृतिमाह॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः॥
एतत्क्षेत्रं समासेन सविकारमुदाहृतमित्यादिस्मृतान्यश्चेच्छादिक्षेत्रस्यैव धर्मा नात्मन इति योजना॥ क्षेत्रस्याना
त्मत्वं समासेन सविकारत्वं द्योतयितुं विषयस्येति विशेषणं श्रुतिस्मृतिसिद्धमर्थमुपसंहरति॥ कर्मस्थैवाशुद्धिर्नात्म

अनादित्वान्निर्गुणत्वादित्यादिना॥ इच्छाद्वेषादि च क्षेत्रस्यैव विषयस्य ध
र्मो नात्मन इति स्मृतिन्यायात्कर्मस्थैवाशुद्धिस्त्वस्योत्पत्तौ रूपादिसंस्काराद्यशु
द्धिसंबंधाभावाच्च परस्मादात्मनो विलक्षणत्वमिति प्रत्यक्त्वादिविरोधाभा
वाद्युक्तं परं एवात्माहमिति प्रतिपत्तुं॥ ॥

स्येति इति सिद्धमिति शेषः॥ परमप्रकृतमुपसंहरत्यतो रूपादीति रूपादित्वं संस्काराद्यशुद्धिसंबंधाभावादेव प्र ३४
त्यक्त्वादिविरोधाभावान्न परस्मादात्मनो विलक्षणत्वमिति॥ हेतोः परं एवात्माहमिति॥ प्रतिपत्तुं युक्तमिति यो
जना॥

आत्मा मे देहे नैव ब्रह्म प्रतिपत्तव्यमित्युक्तेऽर्थे श्रुतिवाक्यानुदाहरति॥ आत्मानमेवेत्यादिना॥ आत्मानं प्रत्यंचमेवा
हं ब्रह्मास्मीत्यवेदवगतवत्त्वज्ञस्येत्यर्थः॥ एकधैवैकस्वरूपेणैव न तु विषयत्वेन भेदेन वानुद्रष्टव्यमाचार्योपदेशा
नंतरमनुसंधेयमेतदप्रमेयं ध्रुवमिति वाक्यशेषः॥ स एवाधस्तादित्यादिना॥ भूमानं परमात्मानं सर्वाधिष्ठान

आत्मानमेवावेदेकधैवानुद्रष्टव्यमहमेवाधस्तादात्मैवाधस्तात्॥

मुपक्रम्यातादात्म्यतस्थ्यशंकानिवृत्तये अहंकारात्मत्वमुपदिश्य पुनरहमुपरागकृतपरिच्छेदादितिवृत्त्येत
त्॥ साक्षित्वप्रत्यगेकरसतां तस्यातिदिशतीति छांदोग्यश्रुतिरित्याह॥ अहमेवाधस्तादिति॥ शमादिसाधनसंपन्नः॥
सन्सर्वमात्मानं पश्येदिति निर्दिष्टेऽर्थे हेतुमिव च चेवनांतरमाह॥ यत्र त्वस्य॥ सर्वमात्मैवेति॥ अभूत तत केन कं प

उप.म. श्येदित्यादिः॥वाक्यशेषः॥इदंसर्वंयत्भोक्तृभोग्यादिजगत्एवंविश्वंततसर्वमयमात्मानातोन्यत्वस्तुनास्तीत्य ग.घ.१
३५ र्थः॥सएवैषोऽकजोऽमृतइतिश्रुत्योपनिषत्गतवाक्यं॥सएषप्रत्यगात्माऽकजाशब्दवाच्यजन्मोपाधिभिः॥वियु
क्तोऽमृतोऽमृतंब्रह्मैवेतितस्यार्थः॥तदेतत्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मेतिवाक्यंबृहदारण्यकेमु

सर्वमात्मानंपश्येद्यत्रत्वस्यसर्वमात्मैवेदंसर्वंपरइयमात्मासएवैषो
अनंतरमबाह्यंसबाह्याभ्यंतरोह्यजः॥ब्रह्मैवेदं॥ ॥

दाहरति॥अनंतरमबाह्यमिति॥मंडूकवाक्यंचतत्समानार्थमाह॥सबाह्येति॥अमूर्त्तःपुरुषएवसबाह्याभ्यं
तरः॥सर्वस्यसबाह्याभ्यंतररूपेणवर्त्तमानोऽन्योऽजोजन्मादिविक्रियारहितइत्यर्थः॥ब्रह्मैवेदममृतंपुरस्तादित्यादि॥चा ३५
त्रोदाहर्त्तव्यमित्याह॥ब्रह्मैवेदमेवेति॥इदंसर्वंब्रह्मैवेत्यर्थः॥ ॥

एवंब्रह्मात्मैक्यप्रतिपादकानिवाक्यान्युदाहृत्यब्रह्मणएवजीवात्मनाकार्यप्रवेशवादिवाक्यानिचजीवस्यब्र
ह्माभेदप्रतिपत्त्यर्थमुदाहरति॥एतयाद्वारेत्यादिना॥सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतेतिशिरःकपालयो
॥संधिगतछिद्रेणदेहेप्रवेशंसृष्टुरीश्वरस्यदर्शयत्यैतरेयकवाक्यमित्यर्थः॥तत्रप्रविष्टस्यस्वरूपनिर्द्धारणपरंवा

एतयाद्वाराप्रापद्यतप्रज्ञानस्यनामधेयानिसत्यंज्ञानमनंतंब्रह्म
तस्माद्वाएतस्मादात्मनःसृष्टातदेवानुप्राविशदेकोदेवःसर्वभूतेषुगूढ
ःसर्वव्यापीसर्वभूतांतरात्मा॥ ॥

क्यंयेनवापश्यतीत्यादिप्रज्ञानस्यनामधेयानिभवंतीत्यंतंप्रज्ञप्तिमात्रंतत्स्वरूपंप्रज्ञानंब्रह्मेति॥तस्यब्रह्मात्मत्वं
चतस्मात्क्रमित्यभिप्रेत्याह॥प्रज्ञानस्यनामधेयानीति॥सृष्टेरेवसृष्टकार्येजीवरूपेणप्रवेशाद्दर्शयतदेवतैत्तिरीयवाक्ये
नदृढयति॥सत्यंज्ञानमनंतमित्यादिना॥पारमात्मैवसर्वसाक्षीसर्वभूतांतरात्मेत्यत्रश्वेताश्वतरीयमंत्रमुदाहरति

उप.स. ॥एको देव इति॥ शरीरादिसंसृष्टतया प्रतीयमानस्यात्माप्यात्मनस्तद्धर्मसंसर्गाभावेन ब्रह्मात्मनाज्ञेयत्वे काठकवाक्य गद्य.१
३६ द्वयमुदाहरति॥ अशरीरं शरीरेषु॥ न जायते म्रियते वा विपश्चिदिति च॥ अवस्थासाक्षिणः॥ आत्मनो वस्थाधर्मास्पृ
ष्टत्वेन ब्रह्मत्वप्रतिपत्तौ काठकवाक्यमाह॥ स्वप्नांतं जागरितांतमिति नेत्यारनानिरूपरथ च कृनिदर्शनेन इत्यद

अशरीरं शरीरेषु॥ न जायते म्रियते वा विपश्चित्॥ स्वप्नांतं जाग-
रितांतं सम आत्मेति विद्यात्॥ यस्तु सर्वाणि भूतानि तदेजति तन्नैजति

र्शनेन तत्साधनभूतसर्वजगदात्मस्वरूपं ज्ञानं प्रतिपादितं ब्रह्मैव समेनमाप्नोति॥ प्रवृत्तं कौषीतकेयोपनिषद्वाक्यमुदा
हरति॥ सम आत्मेति॥ विद्यादिति॥ यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति॥ तदेजति तन्नैजतीति च मंत्रद्वय- ३६
मीशावास्यगतमुदाहृतं ज्ञाद्यो मंत्रः स्पष्टार्थः॥ ॥

॥

द्वितीयः परोपाधिनिबंधनचलनादिप्रतिभातं स्वतस्तु निर्विकारः॥ अदृष्ट एवात्मेति दर्शयितुमित्यर्थः॥ वेनस्तत्प
श्यन् विश्वा भुवनानि बिभ्रं भवत्येकनीडमिति मंत्रे तैत्तिरीया आमनंति॥ तस्यार्थः॥ यत्र यस्मिन् सर्वात्मके सर्वोपा
दाने पूर्वोत्तरमंत्रनिर्दिष्टे वस्तुनि विश्वं समस्तं एकनीडं भवति॥ एकायनं वर्त्तते तद्देवविश्वा भुवनानि सर्वाणि भव

वेनकांतीमत्वे ईश्वरवेनस्तत्पश्यन् तदेवाग्निरहं मनुरभवं सूर्य
श्चांतः प्रविष्टः शास्ता जनानां स देवः सोम्य तत्स आत्मा तत्त्वम
सीत्यादि श्रुतिभ्यः स्मृतिभ्यः च पूः प्राणिनः॥

नानि नतनः॥ अथ कुक्षिमें प्यस्त्वीति पश्यन् श्रुत्याचार्यप्रसादादनुभवन् विद्वान्॥ स्तानी वेनो भवतीति॥ नतेः॥ कां
तिकर्मणो वेनतेर्वा स भजनीयार्थस्य धातोरिदं वेनः कांतिमान् संभजनीयो भवतीश्वर एव भवतीति॥ पुनरपि विदु
षः॥ सर्वात्मत्वे मंत्रद्वयं पठति॥ तदेवाग्निस्तदादित्यरित्यादिरेकः॥

उप॰स॰ अहं मनुरभवं सूर्यश्चेति वामदेववाक्यरूपो परश्चेति॥ अंतः प्रविष्टः शास्ता जनानामेकः सन् बहुधा विचचार गद्य॰१
३७ इति तैत्तिरीयश्रुतिरेकस्यैवांतर्यामिणो बहुधा विवरणं संसारव्यवहारं वदंती जीवपरयोर्भेदं सूचयतीत्यर्थः॥ त
त्रैव सोपक्रमं छांदोग्यवाक्यं पठति॥ सदेवेति॥ श्रुत्युक्तेऽर्थे स्मृतीरप्याह॥ स्मृतिभ्यश्चेति॥ सर्वभूतानां गुहा

गुहाशयस्य आत्मैव देवताः॥ नवद्वारे देही॥ समं सर्वेषु भूतेषु
विद्याविनयसंपन्ने॥ अविभक्तं विभक्तेषु॥ वासुदेवः सर्वमित्या
दिभ्यः॥ एक एवात्मा परं ब्रह्म सर्वसंसारविनिर्मुक्तस्वमिति सिद्धं॥

यस्यैवात्मन॥ इषु पुराणिच्छरीराणि न प्रतीच्छरीरमात्मभेद इत्यर्थः॥ उदाहृतश्रुतिस्मृत्यर्थं सकलप्रकरणार्थमुपसं ३७
हरति॥ एक एवेति॥ ॥श्रीगणपीजनवल्लभायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामः॥

तदेवं श्रुतिस्मृतिन्यायसिद्धे ब्रह्मात्मैकत्वेऽभिहिते लौकिकव्यवहारविरोधं शंकते॥ यैसेरीति गृहक्षेत्रदेशकोशादि
कं साध्यमिह लौकिकं रूप्यते॥ तत्साधनं च प्रतिग्रहसेवाविजययुद्धादि॥ तत्साधकश्च तदर्थिवर्गो ब्राह्मणादिः रूप्यते

सयदि ब्रूयाद्यदि भगवन्ननंतरोऽबाह्यः सबाह्याभ्यंतरो ह्यजः कृ
त्स्नः प्रज्ञानघन एवैसैंव घनवत्सर्वमूर्तिभेदवर्जितः आत्मैका
त्रावदेकरसः किमिदं दृश्यते श्रूयते वा साध्यं साधनं साधकश्चेति॥ श्रु
तिस्मृतिलोकप्रसिद्धं वादिनात विप्रसिद्धं वादिनात विप्रतिपत्तिविषयं

॥तथा यागादि साधनं स्वर्गादि साधनं स्वर्गादि साध्यं तत्कामस्य साधक इति॥ पारलौकिकमपि त्रिकं रूप्यते स्वर्ग
कामो यजेदित्येवमादीत्यर्थः॥ कुत्र दृश्यते श्रूयते वेत्याकांक्षायामाह॥ श्रुतिस्मृतिलोकप्रसिद्धमिति॥ लोक इति॥ ॥

उप·स· व्यवहर्तृजन उच्यते॥ देहात्मप्रसिद्धिवल्लौकिकप्रसिद्धेरतंत्रत्वं शंकायामाह॥ वादिन्नातेति॥ वादिभ्रांतं विप्रतिपत्तीनां गद्य·१
३८ विषये त्वयस्मिन् उक्तिवितये तत्रथोक्तं॥ व्यवहारस्याविद्याविषयत्वान्न तेन पारमार्थिकं ब्रह्मात्मैक्यं निरुध्यत
इति समाधत्ते॥ आचार्यो ब्रूयादित्यादिनास्य शेषस्यार्थः॥ उक्तं श्रुतीरुदाहृति॥ यत्र वा इत्यादिना॥ इवशब्दोऽन्यदर्श

मित्याचार्यो ब्रूयाद् अविद्याकृते मे तद्यादिदं दृश्यते वा श्रूयते वा परमा
र्थतस्त्वेक एवात्मा अविद्यादृष्टेरनेकवदवभासते तिमिरदृष्ट्याने
कचंद्रवत्॥ यत्र वा अन्यदिव स्याद्यत्र हि द्वैतमिव भवति तदितर इ
तरं पश्यति॥ मृत्योः स मृत्युमाप्नोति॥

नस्याभासत्वं द्योतयति॥ स्वप्नावस्थायां दृष्टांतार्थो वाशब्दः॥ यत्र यदाविद्यावस्थायां द्वैताभावेपि द्वैतमिव दृष्टं दृश्यदृ
र्शनभेदवत् भवति॥ तत्तदा इतर इतरं स्वव्यावृत्तं कर्मभूतं विषयमितरेण चक्षुषा करणेन पश्यति पश्यतीत्येवे ३८
त्यर्थः॥

यच्च भेददर्शनोपलब्धं तदल्पं परिच्छिन्नं यच्च परिच्छिन्नं तन्मर्त्यं विनाशि न तत् सत्॥ नासतो विद्यते भाव इति वच
नादित्यर्थः॥ द्वैतस्याविद्याकृतत्वे श्रुतीरुपन्यस्य ब्रह्मात्माद्वयस्य परमार्थत्वे श्रुतीरुपन्यस्यति॥ एकमेवेत्यादिना॥
ननु साध्यसाधनभेदस्येदविद्याविषयः॥ तर्हि मिथ्यार्थगोचरत्वात् कर्मकांडमप्रमाणं स्यादिति शिष्यः शंकते॥ यद्ये

षु यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति द्वैतेत्वं म
न्यमिति वाचारंभणं विकारो नामधेयमनृतमन्योसावन्योह
मिति भेददर्शनं निंदोपपत्तेरविद्याकृतं द्वैतं॥ ॥

वमिति॥ न केवलं कर्मकांडाप्रामाण्यापत्तिः॥ द्वैतमिथ्यात्वेपि ज्ञानकांडेपि सत्याद्यदिवाक्यानां निर्विषयतया प्रामा
ण्यहानिप्रसंग इत्यभिप्रेत्याह॥ उत्पत्तिः प्रलयश्चेति॥ श्रुत्या किमर्थमुच्यत इत्यनुषंगः॥ तत्र वेदांतवाक्यजनितब्र
ह्मात्मविज्ञानात् प्राक् कर्मकांडाप्रामाण्यापत्तिश्चोदिते॥ तदूपर्धवेति॥ ॥

उप॰स॰ विकल्पाद्यं प्रत्याह॥ अत्रोच्यते विद्यावतउपपत्तेरिति॥ अप्राप्ते शास्त्रमर्थवदिति न्यायात् कर्तृसाधनफलभेदरू ग॰घ॰१
३९ रूपस्य शास्त्रात् ज्ञानं शून्यानामपि प्रसिद्धेस्तत्र वेदस्य तात्पर्याद्युपपत्तिं नेदमादायमुमुक्षुः पुरुषार्थसाधनमविज्ञातं
बोधयतः॥ शास्त्रस्य नाप्रामाण्यशंकेत्यपि चेत्यसंगृहीतमर्थं विवृणोति॥ शरीरादिभेदस्येत्यादिना॥ साधनैरवैरुपशान्ति

एकमेवाद्वितीयं यत्र तत्त्वं तत्र को मोहः कः शोक इत्यादौ कृत्स्नवि
धिश्रुतिभ्यश्चेत्यन्ते तिथिरेवं भगवदुक्तिमर्थं श्रुत्या साध्यसाध
नादिभेद उच्यते॥ उत्पत्तिः प्रजयश्चेत्यत्रोच्यते॥ अविद्यावत उ
पपत्तेः

चानिष्टपरिहारं चेच्छतः इष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानतः॥ ज्ञानैः तद्विषयमज्ञानं निवर्त्तयितुं शास्त्रमित्य ३९
र्थः॥ साधनैरेवैः इष्टानिष्टप्राप्तिपरिहारे ज्ञापां निमित्तं विशेषणांतरेण द्योतयन्नाह॥ शरीरेति॥ ॥श्रीरामायनमः॥

शरीरादिभेदस्य शरीरेन्द्रियादिसंघातविशेषस्य संबंधिनी ये इष्टानिष्टे तद्युक्तमात्मानं मन्यमानस्येति योजना॥ अयं भा
वः॥ अयं भावः॥ अनाद्यविद्यावृतनिजस्वभावस्य शरीरइन्द्रियमनोबुद्धिप्राणेष्वध्यस्तात्मभावस्य॥ परिच्छिन्नमात्मानं मन्य
मानस्य स्वातिरिक्तविषयसंबंधाधीनमेव पुरुषार्थमिच्छतस्तदुपायं पर्येषमाणस्य साध्यात्॥ पुरुषार्थमात्मतत्त्वं बोद्धु

शरीरादिभेदस्येष्टानिष्टयोगिनमात्मानं मन्यमानस्य साधनैरेवै
ष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानत इष्टप्राप्तिं चानिष्टप
रिहारं चेच्छतः॥ ज्ञानैस्तद्विषयमज्ञानं नि॥

मसमर्थत्वात्तं प्रयत्नं तदभिलषितस्वर्गादिसुखादिसाधनं मानान्तरादविज्ञातं बोधयतः शास्त्रान्तं विधिनिषधयोर्व्यव
स्थापयति॥ नतो विहितानुष्ठानान्निषिद्धपरिवर्जनाच्चाहरहरेधमानात्मशुद्धेरनुपचीयमानपाप्मनो निषिद्धफलनि
वकाम्यकलमप्यानित्यान्तं चिदुः॥ स्वरूपसंसारणवेति॥

उप॰स॰ काम्यकर्मपरित्यागेनावश्यकमेवकर्मेश्वराराधनरूपमनुतिष्ठतोतितरांशुद्धांतः॥ करणस्य॥ सूक्ष्मवस्तुतत्त्वप्रति गद्य॰१
५० पत्तियोग्योयस्मिन्दानीजातइत्यात्मतत्त्वज्ञानमज्ञातंपरमपुरुषार्थसाधनमुत्पादयदनयाप्रणालिकयाज्ञातार्थाविबोधने
नाज्ञातेपुंसोनिवर्तयितुंशास्त्रंप्रवृत्तमित्येतदभिप्रेत्याचार्यैरित्युक्तमिति॥ ननुकिमित्येवंतात्पर्यंवर्ण्यतेप्रतीयमान

वर्तयितुंशास्त्रंनसाध्यसाधनादिभेदंविधत्तेऽप्रतिष्ठरूपः
संसारोहियतइति॥ ॥

साध्यसाधनभेदस्वरूपस्यापिविधिरूपवाक्यतात्पर्यगोचरताकिंनस्यादित्याशंक्योभयपरत्वेवाक्यभेदापत्तेर्मैवमित्या
ह॥ नसाध्येति॥ कस्मादन्यतरपरत्वेपिवस्तुतत्त्वपरत्वंनेष्यतइत्याशंक्य॥ पुरुषार्थेतात्पर्यायोगादित्यभिप्रेत्याह॥ ५०
ऽप्रतिष्ठरूपः॥ संसारोहियतइति॥ आपाततःपरीक्षितोवाधिगतब्रह्मात्मभावस्य॥ ॥

एवंकर्मकांडस्याज्ञातार्थविबोधनेतात्पर्यंनभेदस्यवस्तुत्वबोधनइत्युपपाद्यज्ञानकांडस्यापाकृतस्याद्वितीयाकारस्य
साक्षादद्वैतवस्तुप्रतिपत्तिपरत्वात्स्वात्ममात्रप्रमाणत्वंकेत्याह॥ तद्भेददृष्टिमिति॥ उत्पत्तिप्रलयादेरित्यादिपद्यात्प्राग्युक्तिप्रवे
शानियमानिरस्यंते॥ उत्पत्तिप्रलयादेरेकत्वोपपत्तिदर्शनेनाद्वैतयुक्तिप्रदर्शनद्वारेणसंसारमूलमविद्यामेवोन्मूल

तद्भेददृष्टिमेवाविद्यांसंसारमूलमुन्मूलयत्युत्पत्तिप्रलयादेरेकत्वोपपत्तिदर्शनेना
विद्यायामुन्मूलितायांश्रुतिस्मृतिन्यायेभ्योनंतरमबाह्यमबाह्यान्यंतरोह्यजः॥ सैंधवघन
नवत्प्रज्ञानघनएवैकरसःआकाशवत्परिपूर्णइत्यत्रैवैकात्मताप्रतिष्ठितापरमार्थ॥ ॥

यतिमन्त्राद्वितीयाकारमित्युपसंहारेणयोजना॥ अविद्यायाःसंसारमूलत्वंद्योतयितुंतांविशिनष्टितद्भेददृष्टिमिति॥ तस्य
साध्यसाधनसाधकरूपस्यभेदस्यदृष्टिःप्रतिभासोयस्याःसातथोक्तातामित्यर्थः॥ अविद्योन्मूलनेवाकिंस्यादित्यतआ
ह॥ अविद्यायामुन्मूलितायामित्यादिना॥ एवंप्रतिष्ठितब्रह्मस्यपरमार्थदर्शिनः॥

उप.स.
४१

साध्यसाधनविशेषबुद्ध्यजनकत्वात्तत्कर्मकाण्डस्यैवस्वरूपतोप्रतीतेरप्रामाण्यमिदृष्टमेवेति॥ विकल्पांतरपरिहारउ
क्तो॥ वेदितव्यः॥ एवं सति यदुक्तं प्रागुपद्येवं संसारी च सन्नित्यादि॥ तदुपपन्नानविज्ञापितं मुमुक्षायामुत्पन्नायां कर्मतत्साध
नापरित्यागे हेत्वभावादित्यभिप्रेत्याह॥ तस्मैतदिति॥ पांक्तरूपेति पंचप्रकारमित्यर्थः॥ यजमानपत्नीपुत्रवित्तवयसाध्य

दर्शिनो भवति न साध्यसाधनोत्पत्तिविलयादिभेदेनात्मद्दिमं धेप्पु
पपद्यते॥ तस्मैतत्परमार्थदर्शनं प्रतिपत्तुमिच्छतावर्णाश्रमाद्यभिमा
नकृतपांक्तरूपपुत्रवित्तैषणादिभ्यो व्युत्थानं कर्त्तव्यं॥ ॥ ॥

कर्मफलभूतैतल्लोकपितृलोकः॥ देवलोकैषणाभ्यो व्युत्थानं वै परीत्येतात्यानं तत्र तिस्रहतयात त्साधनसर्वकर्म ४१
तदुपकरणसंन्यासरूपे परिव्राज्यं कर्त्तव्यमित्यर्थः॥ प्रापीततः परोक्षतो दृष्टवाधिगतब्रह्मात्मभावस्य॥ ॥श्री॥ ॥

तदापरोक्षतो मुमुक्षोरस्य प्राप्तत्वयादिदेहाद्यध्यासनिबंधनकर्माधिकारित्वाभिमानस्योपपत्त्यात् तस्यो दृश्यविरोधस्त्वात्य
मेव ससाधनं कर्मत्युक्तेर्थे हेतुमाह॥ सम्यगिति॥ अभेददर्शनमेव सम्यक्ज्ञानं तद्वित्वताचतद्विरुद्धाभिमानतदास्पदसर्वव्या
ज्यमित्यत्रैव श्रुतार्थोपपत्तिमाह॥ भेददर्शनेति॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति उदरमंतरं कुरुते॥ अथ तस्य

सम्यक्कृत्स्यविरोधत्त्वदभिमानस्य॥ भेददर्शनप्रतिषेधार्थोप
पत्तिश्चोपपद्यते॥ न कस्मिन्नात्मन्यसंसारित्वबुद्धौ नानात्वान्यायोत्था
दितापांतद्विपरीताबुद्धिर्भवति॥

भयं भवतीत्यादिभेददर्शनप्रतिषेधरूपोर्थोर्थस्तस्योपपत्तिरूपपादनं साउपपद्यत इत्यक्षरार्थः॥ भेदस्यतत्त्वयुक्ता
भिमानस्य च॥ प्रामाणिकत्वे श्रुत्यातन्निषेधोन घटते न हि प्रामाणिकस्य प्रमाणेन प्रतिषेधः संभवति न च प्रतिषेध
श्रुतेः॥ विषयांतरमुत्प्रेक्ष्यते॥ अतः प्रतिषेधकवाक्यानां भेदापवादपरत्वाभावे तदाम्नानामनर्थकं स्यात्॥ ॥ ॥

उप॰स॰ ४२ तस्मान्नियमाध्ययनविधिविरोधादिति भावः॥ ननु सम्यग्ज्ञानस्य कर्मसमुच्चितस्यैव मोक्षसाधनत्वान्न विहितकर्म गद्य॰१
त्यागो युक्त इत्यत आह॥ न हीति॥ विरोधादेव समुच्चयस्यानुष्ठातुमशक्यत्वात्॥ तद्धि ध्वनासंभवात् कर्मजन्यस्य चानि

न ह्यात्मैकत्वबुद्धिः शरीरे वा जरामरणबुद्धिः॥ तस्माद् विद्याकार्यत्वात् सर्वकर्म
णां तत्साधनानां च यज्ञोपवीतादीनां परमहंसपारिव्राज्येन त्यागः कर्तव्यः॥ ॥ ॥

त्यत्वात् मोक्षत्वानुपपत्तेर्न ज्ञानकर्मसमुच्चयो मोक्षसाधनमिति भावः॥ पदक्रमेव विरोधं दृष्टान्तोक्त्याह दर्शयति॥ न ४२
हीत्यादिना॥ निरूपितमर्थसारमुपसंहरति॥ तस्मादिति॥ ॥श्रीरामाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीराम॥ ॥

॥ ॥इति श्रीउपदेशसहस्रीगद्यबंधे शिष्यप्रतिबोधनविधिनामकं प्रकरणं विवृतं प्रथमं समाप्तं

॥ ॥इति श्रीउपदेशसहस्रीगद्यबंधे शिष्यप्रतिबोध
नविधिर्नाम प्रकरणं प्रथमं विवृतं समाप्तं॥१॥ ॥ ॥

॥१॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥श्रीरामाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीनाथजी सत्य॥ ॥

॥ ॥इतिश्रीउपदेशसहस्री गद्यबंधः समाप्तः॥१॥

उप॰स॰ ॥ ॥ॐ नमः॥ तदेवं शिष्यस्य देहद्वयाभिमानापोहेन ब्रह्मरूपत्वमुपदिश्य तस्यामवस्थायां कर्मतत्साधनसं गद्य॰१
१ न्यायत उपपादितो ब्रह्मस्वभावविपरीतं चाविद्याकृतमित्युपेक्षितं तदिदानीं ब्रह्मरूपत्वस्याविद्यात्मकत्वमा
त्मनः॥ कूटस्थतया स्वाभाविकं ब्रह्मरूपत्वं चोपपादयितुं प्रकरणांतरमारभमाणः प्रकृतसत्यासस्य मुमुक्षोः॥ कृ
त्यश्रवणविधितः सूचयन् शिष्यत्वमवतारयति॥ सुखमिति॥ सुखमासीनमित्यनेनाविहितमचित्तं तया प्रस

॥ॐ नमः॥ सुखमासीनं ब्राह्मणं ब्रह्मनिष्ठं कश्चिद्ब्रह्मचारी॥ ॥

न्नतोक्ता व्यावहारिकदृष्ट्या ब्राह्मणमित्युक्त्वानापदि ब्राह्मणेतरवर्णस्योपदेशो ग्राह्य इति सूचयति॥ परमार्थतो
ब्रह्मनिष्ठमित्युक्त्वा शिष्यत्वेति बोधनसामर्थ्यं सूच्यते॥ कश्चिदिति॥ प्रागुक्तगुणगणोपेतमुपरिक्षितः॥ शिष्यत्वक्त ४४
॥ तस्योपदेशग्रहणकालेऽणकाकित्वं सूचयितुं कश्चिदित्युक्तं॥ तस्य विशेषणानि ब्रह्मचारीत्यादीनि॥ ॥श्री॥ ॥

ब्रह्मणि वस्तुक्तत्वे चरितुं शीलमस्यास्तीति ब्रह्मचारी ब्रह्मविचारतत्पर इत्यर्थः॥ अनेन नित्यानित्यवस्तु
विवेको दर्शितः॥ विशेषणांतरेण वैराग्यमुक्तं॥ विवेकवैराग्ययुक्तस्य शान्त्यादिरर्थप्राप्त इति॥ मत्वा चरमविशेषण
माह॥ मुमुक्षुरिति॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः॥ श्रोत्रियं ब्रह्मनिष्ठमित्यादिना शास्त्रमनुस्मरन्नाह॥ वि

जन्ममरणलक्षणात्संसारान्निर्विण्णो॥ मुमुक्षुर्विधिवदुपसन्नः पप्रच्छ॥
भगवन्कथमहं संसारान्मोक्ष्ये शरीरेंद्रियविषयवेदनावान्॥ ॥ ॥

धिवदुपसन्न इति॥ प्रश्नप्रकारमेवाह॥ भगवन्नित्यादिना॥ नैमित्तिक इत्यं तेन ग्रंथेन॥ संसारमोक्षविषयकः॥ प्र
श्नो दुःखानुभवस्यात्मस्वभावत्वविषयोऽपरः॥ किमयमित्यादि प्रश्न इति विवेकः॥ प्रथमप्रश्नस्य निमित्तमाह॥ शरीरेति
॥शरीरेंद्रियविषयं निमित्तं वेदनानुभवो हि संसारस्तद्वानस्म्यहं कथं संसारान्मोक्ष्य इति॥ जागरित इति॥ ॥ ॥

उप॰स॰ द्वितीयप्रश्नस्यबीजमुक्तं जाग्रत्स्वप्नयोर्दुःखानुभवात्सुषुप्तेचात्मनि॥ तत्तद्दमनुभवात्संशयोत्थानमित्यर्थः॥ नैमि गद्य॰१
२ त्तिकइतिचपदच्छेदस्त्वयः॥ उभयत्रफलमाह॥ यदिस्वभावइत्यादिना॥ स्वस्वभावपक्षमवलंब्यगुरुरुत्तरंवदन्नने

जागरितेदुःखमनुभवामितथास्वप्नेदुःखमनुभवामीतिचपुनःपुनःसुषु
प्तिपर्यन्तोविश्रम्यःकिमयमेवममस्वभावः॥ किंवान्यस्वभावस्यसतोनैमि
त्तिकइति॥ यदिस्वभावोनमेमोक्षाशास्वभावस्यावर्जनीयत्वादथनैमित्तिको
निमित्तपरिहारात्तस्यात्मोक्षोपपत्तिः॥ तंगुरुराह॥ शृणुवत्सेनतवायंस्वभा
वोनैमित्तिकइत्युक्तः॥ ॥

तद्द्योतयेति॥ शिष्यमाश्वासयतीत्याह॥ ग्रंथकारस्तंगुरुरिति। किंत्वितिमध्येध्याहारः॥ कार्यः॥ कृताश्वासः॥ शिष्य ४५
उवाच॥ किंनिमित्तमिति॥ ॥

निमित्तनिवृत्तिमंतरेणनैमित्तिकस्यात्यंतिकनिवृत्त्यनुपपत्तेस्तत्स्वरूपमविदित्वातत्परिहारायोगात्तस्यप्रश्नः॥ कु
तः॥ निवर्त्तकप्रश्नस्तुतत्तोस्वभावपरिज्ञानेनतदवलंबनार्थः॥ सुखंदुःखादिमत्वस्यास्वभावत्वोक्तौतर्हिकिंस्वभा
वप्राप्नोतितिःस्वभावंवस्तुनोस्तीतिमन्वानपृच्छति॥ कोवति॥ यस्मिन्निमित्तेनिवर्त्तितेनैमित्तिकाभावस्तत्किंनिमित्तं

शिष्यउवाच॥ किंनिमित्तंकिंवातस्यनिवर्त्तकं॥ कोवाममस्वभावोय
स्मिन्निमित्तेनिवर्त्तितेनैमित्तिकाभावोरोगनिमित्तनिवृत्ताविवरोगीस्व
भावंप्रतिपद्यतइति॥

किंवातस्यनिवर्त्तकमित्यन्वयः॥ इवशब्दोयथाशब्दार्थः॥ रोगीरोगनिमित्तनिवृत्तौयथास्वभावंप्रतिपद्यते॥ तथा
दुःखनिमित्तनिवृत्तौयंस्वभावमहंप्रतिपद्येयस्यकोवाममस्वभावइतियोजना॥ इतिशिष्यउवाचेतिसंबंधः॥ एवं
स्तुस्वरूपकथनेनोत्तरंगुरुरुवाच॥ शृणुविद्येत्यादिना॥ साविद्यानिमित्तंनिदानंयस्यसससारस्तन्निमित्तस्तस्मादितिवि

अ०प०स० ग्रहः॥तदास्वप्नजागरितदुःखंचात्मधर्मत्वेननानुभविष्यसीत्यर्थः॥स्वरूपतोवगतपदार्थानांविशेषबुभुत्सयावि ग०द्य०१
३ नेयः॥पृच्छतीत्याह॥शिष्येणोवाचेति॥वाक्यार्थस्यार्थेकिमाश्रयाचसेत्यर्थः॥विद्याचकायथास्वभावंप्रतिपद्येयजाग्रदा

गुरुरुवाच॥अविद्यानिमित्तंविद्यातस्यानिवर्त्तिकाविद्यायांनिवृत्ता
यांतन्निमित्ताभावात्त्वंजन्ममरणजरागणात्संसारात्स्वप्नजाग्रद्दुः
खंचनानुभविष्यसीति॥शिष्यउवाच॥कासावविद्याकिंविषयावावि
द्यानिवर्त्तिकायथास्वभावंप्रतिपद्येयेति॥

दावपिदुःखाद्यननुभवहीनमात्मतत्त्वमुपसंपद्येयेत्यर्थः॥तत्स्वरूपावरणविपर्ययाध्यासलक्षणात्तत्स्वरूप ४६
श्रयविषयाविद्येति॥अथप्रश्नस्योत्तरंगुरुरुवाचेत्याह॥

तंगुरुरिति॥परमात्मानंपरिपूर्णस्वरूपंविपरीतंपरिच्छिन्नस्वरूपमहमस्मीतित्वंप्रतिपद्यतेइति॥प्रतिद्वंद्वंयो
ज्यं॥यन्निमित्तमेवंसंसार्यात्मनात्मानमेवप्रतिपद्यसेपरिपूर्णत्वाद्यात्मनेविद्यमानमपिनप्रतिपद्यसेसेयमविद्यात्व
दाश्रयात्वद्विषयाचत्वदनुभवसिद्धात्वंतुचिज्ज्ञानुचिद्रानंदैकरस॥कूटस्थइत्यभिप्रायः॥विद्यमानंचाविद्यमान

गुरुरुवाच॥त्वंपरमात्मानंसंतमसंसारिणंसंसार्यहमस्मीतिविपरी
तंप्रतिपद्यसेकर्त्तारंसंतंकर्त्तेत्यभोक्तारंसंतंभोक्तेतिविद्यमानंचाविद्य
मानमितिइयमविद्या॥

मिति॥नित्यंसंतमनित्यमित्यर्थः॥शिष्यस्त्वात्मनोनित्यत्वमुक्तमंगीकृत्यासंसार्यात्मत्वमुक्तमाक्षिपतीत्याह
॥शिष्यउवाचेति॥अन्यस्तमहंकर्त्तेत्यादिप्रत्ययः॥कर्त्तृत्वादिः॥साश्रयोधर्मत्वाद्रूपादिवदिति॥साश्रयत्वेसिद्धेचेत
नेपाषाणादौतददर्शनात्॥परिशेषाद्देहेनाश्रयत्वसिद्धिरनुमाने॥गुणान्वयोयः॥

उप॰स॰ फलकर्मकर्त्राकृतस्यातस्यैव सचोपभोक्तृ॥ यदप्युक्तं पुराग्रन्थिकामं कामं पुरुषो निर्मिमाण इत्यादि॥ रामसम्बा गद्य॰१
५ दिन्नाद्यर्थः॥ विपक्षे बाधिकां युक्तिं संगृह्णाति॥ अविद्यायाः॥ स्वात्मविषयत्वानुपपत्तेरिति॥ अविद्यास्वरूपोपन्या

शिष्य उवाच॥ यद्यप्यहं विद्यमानस्तथापि न परमात्मा कर्तृत्वभोक्तृ
त्वजन्मतः॥ संसारीमम स्वभावः प्रत्यक्षादिभिः॥ प्रमाणैरनुभूयमान
त्वान्नाविद्यानिमित्तो विद्यायाः स्वात्मविषयत्वानुपपत्तेः॥ अविद्या
नामान्यस्मिन्नन्यधर्माध्यारोपणम्॥

सपूर्वकं संगृहीतमर्थं विवृणोति॥ अविद्यानामेत्यादिना॥ मिथ्याज्ञानमेवाविद्योक्तेति मत्वा तस्याप्युपन्यासः॥ ॥ ४७

शुक्तिकायामध्यारोपयतीति वक्ष्यमाणस्यानुषंगः॥ एवमुत्तरत्राप्यनुषंगो द्रष्टव्यः॥ कस्मिंश्चिद्विषयन्तैर्धे
न्यतः॥ प्रसिद्धस्य विषयान्तरस्याध्यारोपाह्यविष्टेति प्रसिद्धेस्तत्रात्मायदि प्रसिद्धस्तत्रात्मा यदि प्रसिद्ध एव स्यात्त
दातस्याध्यासविरोधिप्रकाशात्मकत्वान्न तस्मिन्नतद्धर्मप्रतिभासः स्यात्॥ यद्यप्रसिद्धस्तदा विषयास्फुरणात्कुत्र

यथाप्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायां यथाप्रसिद्धं पुरुषं स्थाणावध्यारो
पयति प्रसिद्धं वा स्थाणुं पुरुषेनाप्रसिद्धं प्रसिद्धे प्रसिद्धे वाप्रसिद्धेन त्वात्मन्य

तद्धर्मप्रतिभासो न वेत्॥ तथा च कर्तृत्वादेरात्मन्याविद्यकत्वानुपपत्तिरतः॥ स्वाभाविक एवात्मनः॥ कर्तृत्वादि
जन्मणो धर्म इत्यपि प्रायः॥ तत्राधिष्ठानाध्यस्यमानयोः॥ पृथक्प्रसिद्धिमन्तरेणाध्यासानुपपत्तिरिति॥ ते मतं किं
वा प्रसिद्धिमात्रं विनेति॥ विकल्प्यनात्यः॥ प्रसिद्धिमात्रस्यांगीकारादित्यपि प्रेत्यादं निराकरोति गुरुः॥ नत्वा॥ ॥

उ.प.स. भिचारादिति॥ सुषुप्त्यादावात्मन्यवभासमानेऽपि कर्तृत्वाद्याकारस्यानवभासाद्विशिष्टात्मविषयत्वमेव प्रत्य गद्य॰१
५ क्षानुमानागमानामित्यु॥ विद्यात्मनाबाधकत्वमिति द्रष्टव्यं॥ हेवत्सेति॥ संबोधयन्नाह्यापित्वं बालएव नन्याय

नात्मानमध्यारोपयत्यात्मनोऽप्रसिद्धत्वान्न चात्मानमनात्मनीप्रसिद्धत्वा
देव॥ तं गुरुराह॥ न व्यभिचारान्नहि वत्स प्रसिद्धं प्रसिद्ध एवाध्यारोपयती
ति नियंतुं शक्यमात्मन्यध्यारोपदर्शनात्॥

मार्गेऽप्युत्पन्न इति दर्शयति॥ अन्यत्र पृथक् प्रसिद्धमेवान्यत्र प्रसिद्धेऽध्यारोपयतीति॥ न हि नियंतुं शक्यते व्य ५८
भिचारादित्यन्वयः॥ कुत्र व्यभिचार इति तत्राह॥ आत्मनीति॥

मंग्रहं विवृणोति॥ गौरोहमिति॥ तं देहातिरिक्तात्मवादिभिः॥ कृशोहमित्यादि॥ देहधर्मावभास आत्मन्यहंप्रत्य
यविषये तस्य च देहे मनुष्योहं जानामीत्यवभासोऽप्यध्यासो गीक्रियते न हि देहात्मनोः॥ पृथक् प्रसिद्धिरस्ति अत
स्तत्रोक्तनियमभंग इत्यर्थः॥ पयास्याणुपुरुषयोः॥ प्रसिद्धयोरन्योन्यस्मिन्नध्यासस्तथा देहात्मनोरपी द्रियवि

गौरोहं कृशोहमिति॥ देहधर्मस्याहंप्रत्ययविषये आत्मन्यहंप्रत्य
यविषयस्य देहे यमहमस्मीति॥ शिष्यं प्रत्याच॥ प्रसिद्ध एव तर्ह्यात्मन्य
हंप्रत्ययविषये तेगयो देहस्यायमिति॥ तत्रैवं सति प्रसिद्धयोरेव देहा
त्मनोरितरेतराध्यारोपणं॥

षयत्वेनाहं प्रत्ययविषयत्वेन च प्रसिद्धयोरेवेतरस्मिन्नितराध्यासविशेषाभावान्न व्यभिचार इति शंकते शिष्य
आहेति॥ तथा चाहं कर्तृचिदात्मनोः॥ पृथगवभासाभावान्नेतरेतराध्यास इति॥ ॥श्रीकृष्णायनमः॥ ॥ ॥

उप॰स॰ ६ दार्ष्टांतिकासिद्धिरिति भावः॥ आचार्यस्तु देहात्मनोः॥ प्रसिद्धत्वेपि त्वदभिमतः॥ नियमस्तत्र नास्तीत्यभिप्रेत्य गद्य॰१

स्थाणुपुरुषयोः शुक्तिकारजतयोरिव च॥ तत्रैकं विशेषमाश्रित्य भग
वतोक्तं प्रसिद्धयोरितरेतराध्यारोपणेति नियंतुं न शक्य इति॥ गुरुरु
वाच॥ प्रसिद्धो न्मणुमत्वं प्रसिद्धौ देहात्मानौ न तु स्थाणुपुरुषावविविक्तप्र
त्ययविषयतया सर्वलोकाप्रसिद्धौ कथं तर्हि नित्यमेव निरंतराविवि
क्तप्रत्ययविषयतया॥

व्यभिचारं दर्शयतीत्याह॥ गुरुरिति॥ सत्यं प्रसिद्धौ देहात्मानौ तत्र न्मणु विशेषमिति योजना॥ विशेषमेवाह॥ ॥ ५८

अविविक्तप्रत्ययविषयतया प्रसिद्धिमेवाभिनयति॥ नह्ययमित्यादिना॥ तत्र लिंगमाह॥ अत एव हि मो
मुह्यते लोक इति॥ मोहातिशयमेवाभिनयति॥ एवमात्मेति॥ देह आत्मा इंद्रियाण्यात्मा कर्तात्मा कर्तात्मा व्या
पकः॥ परिच्छिन्नः॥ सगुणो निर्गुण इति लोकवादिविप्रतिपत्तेः॥ सर्वो लोको मोमुह्यमानो दृश्यते विविक्त त

तर्ह्ययं देहोयमात्मेति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णा
तिपतः कश्चिदतएव हि मोमुह्यते लोक आत्मानात्मविषये॥ ॥

योपलंभे त्विदं न स्यादित्यस्ति विशेष इत्युपसंहरतीमं विशेषमिति॥ तस्मादेकतानोपरक्ततयोपलंभ एवा
ध्यस्यमानाधिष्ठानयोः॥ सिद्धिरध्यासे पेक्ष्यते न पृथक् सिद्धिरित्यतोहं कर्ताभोक्तेत्याहे मनुष्य इतिवत
ध्याकारप्रतिभासादध्यारोपत्वसिद्धिरिति भावः॥ ॥

उप॰स॰ नत्वात्मानात्मनोरुभयोरपि दृश्यत्वमगोचरत्वात्तदाध्यस्तस्य मिथ्यात्वादात्मनः॥ ईंसत्त्वानुपपत्तिप्रसं गद्यु॰१
७ गइति॥ निष्प्रत्यक्ष कते॥ नन्विति॥ यद्यदमिथ्याध्यारोपितं तत्तदसदृश्यं यथा शुक्तिकादौ रजतादीति व्याप्ति

एवमात्मानैवमात्मेति॥ इमं विशेषमाश्रित्याचोचं नैवं नित्यं तु
त्रोक्तामिति॥ न च विद्याध्यारोपितं यत्र यत्तदसत्तत्तदृश्यं यथा र
जतं शुक्तिकायां स्यात्॥ पुरुषो रज्ज्वां सर्पश्चाकाशे तलमजवत्तमि
त्याहि॥

मुक्तापक्षधर्मतामाह॥ तथा देहात्मनोरपीति॥ अनुमानं प्रयुंक्ते तदितरैतरे तयोरित्यादिना॥ नतत्र ५०
व्याप्तिपक्षधर्मत्वसिद्धौ सत्यामिति यावत्॥

स्यात्मन्यनात्मा अनात्मनि चात्मा नित्यमेवासन्नूनविनुमर्हति॥ नित्यमेवेतरेतरन्ताध्यस्तत्वाच्छुक्तिकादौ
शुक्त्यादिवच्चेत्यवयवत्रयमनिअयोपनयनिगमनेनिर्दिशति॥ तदिदं देहात्मनोरिति॥ सिद्धसाध्यत्वाशंकां निराक

तथा देहात्मनोरपि नित्यमेव निरंतराविविक्तत्वयेनेतरत
राध्यारोपणात्ताभ्यामितरेतरयोर्नित्यमेवासत्त्वं स्याद्यथा
शुक्तिकादिषु विद्याध्यारोपितानां रजतादीनां शुक्तिकादिषु नि
त्यमेवात्यंतासत्त्वं तद्विपरीतानां च विपरीतेषु॥ ॥ ॥

रोति॥ तच्चानिष्टमिति॥ नन्विमेमेतरेतराध्यासो गीक्रियते॥ येनात्मनोप्यसत्त्वप्रसंगः स्यात्॥ किं त्वन्यतराध्या
स एवान्यत्रांगीक्रियत इत्याशंकते॥ गुरुरपेति॥ गुतद्विपर्ययेणात्माधिष्ठानविपर्ययेणेत्यर्थः॥ ॥ ॥

उप.स. तदेवस्पष्टयति॥ देह इति॥ शिष्यो निराकरोति॥ देहस्यात्मनि सतीति॥ यथा शुक्तिकायां सत्येव नेदं रजतमि गद्य.१
८ त्यादिना॥ तदसत्त्वं प्रतीयते॥ तथात्मन्यहमवभासे सत्येव देहस्यासत्त्वमनुभूयेत न ह्यनुभूयतेऽनुभूयतए

तद्देहात्मनोरविद्ययैवेतरेतराध्यारोपणात् कृतास्यात्तत्रैवं स
ति देहात्मनोरसत्त्वं प्रसज्येत॥ तच्चानिष्टं वैनाशिकपक्षत्वादथ
तद्विपर्ययेण देहोऽप्यात्मन्यविद्ययाध्यारोपितो देहस्यात्मनि
सति ऽसत्त्वं प्रसज्यते॥

वेत्यभ्युपगमः॥ प्रमाणविरोधादयुक्त इत्यर्थः॥ यस्मादेवं युक्तिं न सहते तस्मान्नात्मासदित्युपसंहरति॥ ५१
तस्मादिति॥

कथं तर्ह्यहं मनुष्य इत्यादिव्यवहारो लोकस्येति गुरुः॥ शंकते॥ कथं तर्हीति॥ शिष्यो मांसकादिमत आश्रित्य
संयोगमेवं ध्यादिति सदृष्टांतमाह॥ वेणुस्तंभवदिति॥ यथा वेणूनां स्तंभानां माध्यारध्येयभावेन परस्परं संयोगवि
शेषे सति गृहमित्येकशब्दप्रत्ययगोचरत्वमेवं देहात्मनोरपि संयोगविशेषादहं मनुष्य इत्यादिसामानाधिकर

ण्यानिष्टं प्रत्यक्षादिविरोधात् तस्माद्देहात्मानौ नाविद्यात्मास्ते
तरेतरस्मिन्नध्यारोपितौ॥ कथं तर्हि वेणुस्तंभवन्नित्यसंयुक्तौ
॥ नानित्यत्वपरार्थत्वप्रसंगात्संहतत्वाद्वेणुस्तं॥ , ॥ ॥

ण्यव्यवहारगोचरत्वमित्यर्थः॥ सिद्धांती परिशोधितेतरेतराध्यासं साधयितुमुक्तसंबंधं तावत् प्रत्याचष्टे॥ ना
नित्यत्वेति॥ यत्संहतं तदनित्यं परार्थं च दृष्टं यथा वेणुस्तंभादि तथा यद्यात्मापि देहादिभिः॥ संहत एवस्यात्तदा
त्माप्यनित्यः॥ परार्थश्च स्यात् तस्मान्निष्टमनित्यत्वे संघातात्मवादापत्तेः॥ ॥

उप.स. परार्थत्वे चाचेतनत्वापत्तेरित्यर्थः॥ एवं परपक्षनिराकरणेनार्थान्नित्यः॥ स्वार्थश्चात्माभ्युपेय इत्युक्तं॥ तदे गद्य.१
८ वानूद्यास्तिकैः॥ पुद्गलमपिगमपिगत्वासीत्युपगंतव्यः॥ इत्यभिप्रेत्य स्वपक्षं साधयति॥ किंचेति॥ तेनैव पदार्थेना
नित्येन संघातेनालिंगेन परः॥ संघातादन्यो विलक्षणः प्रस्तावदात्मा नित्यसिद्ध इति योजना विदेहः॥ स्वविज्ञत्वएव

मादिवदेव॥ किंच॥ यस्तु परैर्देहैनसंहतः कश्चित् आत्मासंहत
त्वात्परार्थत्वे चाचेतनत्वापत्तेरित्यर्थः॥ नासंहतः पारोन्योस्ति
नित्यसिद्धत्वावत्॥

शेषः॥ संहतत्वाद्गृहवदित्यर्थः॥ ननु सत्यं संघातादचेतनादन्य आत्मा तस्य च संघातासंबंधेहं मनुष्य इति॥ ५२
व्यवहारानुपपत्तेः॥ तत्संबंधो वाच्यस्तत्र संयोगविशेषस्यानंगीकारे तादात्म्याध्यासः॥ संबंध इत्यायोतः॥

तथा च॥ निरात्मवादापत्तिरिति॥ आगुक्तं शिष्यः स्मारयति॥ तस्यासंहतस्येति॥ तस्यासंहतस्य संघातसाक्षि
णो देहे स्वप्निन्नध्यस्ते इति योज्यं देहस्यसातंत्र्येणाभिष्ट्यनंगीकारादित्यर्थः॥ तथा च तादृशो देहे ध्यारोपितत्वे नहे
तुनात्मेनो देहमात्रतया सत्त्वानित्यत्वादिदोषप्रसंगो भवति॥ तत्रैवं परस्पराध्यासाभ्युपगमे सतीतिभावत्॥ अध्य
स्तस्य मिथ्यात्वनियमात्॥ निरात्मको देहो निर्देहकश्चात्मेति शून्यवादप्रसंग इत्यर्थः॥ किंमूलवादप्रसंगोत्रास

तस्यासंहतस्य देहे देह इमात्रतध्यारोपितत्वेनासत्त्वा
नित्यत्वादिदोषप्रसंगो भवति॥ तत्र निरात्मको देह इति वै
नाशिकपक्षप्राप्तिदोषः स्यात्॥

तत्याविभासस्याध्यासनिबंधनत्वं नेष्यते भवता॥ किंवा आधाराधेयभावादिसंबंधस्य प्रामाणिकस्य तद्धेतोः
॥सत्त्वादिति॥ विकल्पाद्यं निराकरोति गुरुर्नत्वेवतएवेति॥

ऽयमर्थः॥ देहादिर्हि रूपादिमत्वात् सावयवत्वाद्घटादिवज्जडोपि संस्तद्विजडस्तु॥ चेतनात्मतयोपलभ्य
ते॥ ततश्चेतनत्वाय॥ पिंडत्वं तस्य चेतनसंसर्गोपाधिकं वक्तव्यः॥ तथात्मनः॥ संघातसाहित्ये चैतन्यमात्रस्वभावस्य

न स्वतन्त्र्यात्मनः स्याकाशस्येवासंहतत्वाभ्युपगमात्पूर्वं॥
संहतः स च स्यादात्मेति न निरात्मको देहादिः सर्वः स्यात्॥ ॥

निरवयवस्याकाशवत्स्वतः॥ परिच्छेदाद्यध्यासादिधर्मयोगासंभवाद्देहं क्षेपकृतस्तस्मिंस्तत्प्रतिभासइतिव
क्तव्यं॥ तथा चेतरेतरधर्मसंसर्गितयोभयोरितरेतराध्याससेनुभवानुसारेणैव सिद्धे निरधिष्ठानस्यारोप॥ ॥

स्यादृष्टचरत्वादारोपस्थाने स्फुरतोर्धर्मयोर्यदन्योन्योपरागमंतरेणाकदापिस्यात्तच्चोपलब्धं स्फुरति तत्स्वरूपेणैवा
रोपितं भवति॥ यथा गगनोपरक्ततया स्फुरन्माजित्यादि॥ यत्तु तद्विपरीतं तदितरस्मिन्न स्वरूपेणारोपितं भ
वति॥ किंतु॥ संसृष्टरूपेणैव यथाशुक्तौ रजतादिरूप्यादौ॥ तत्रात्मनो देहाद्युपरागं विनापि शुद्धत्वात्स्वतः॥

यथाकाशं सर्वेणासंहतमिति सर्वेन निराकाशं भवत्येवं॥
तस्मान्नैवनाशिकपक्षप्राप्तिदोषः॥

स्फुरणात्तस्य संघाते स्वरूपेणनाध्यासः॥ किंतु॥ संसृष्टत्वेनैव देहे स्तद्विपरीतत्वात्स्वरूपेणैवेतिनानित्यत्वादि
दोषप्रसंगश्चिदात्मनो नापि देहादेर्निरात्मकत्वप्रसंग इति॥ न शून्यवादसंस्कावकाशः॥ देहस्य तु चैतन्याभास
व्याप्ततया चिदात्माध्यारोपाधिष्ठानत्वमुपचर्यत इति न परस्पराध्यासपक्षे कश्चिद्दोष इति॥ स्वतो हि संहतस्या

उप॰स॰ त्मनः॥ सर्वत्र सर्वदाविद्यमानत्वान्न संवातो निरात्मकः॥ स्यान्नाप्यात्मानित्यत्वादिदोषवानित्यर्थः॥ आ गद्य॰१
११ काशस्यैवेत्युक्तं दृष्टान्तं विवृणोति॥ यथाकाशमिति॥ स्वपक्षे दूषणोद्धारमुपसंहरति॥ तस्मादिति॥ तदेवं दूषणो
द्धारेणेतरेतराध्यासं तादात्म्यव्यवहारहेतुमाह॥ पित्राद्ये विकल्पं निराकर्तुं दिशेनी परमते दूषणमापादयितुं

स्याद्यत्तु नरकं देहस्यात्मत्वे प्रत्यक्षादिविरोधः स्या
दिति॥ तत्र प्रत्यक्षादिभिरात्मनि देहस्यासत्त्वानुपपत्तेः॥

द्वितीयमुत्थापयति॥ यत्तु नरकमिति॥ निराकरोति॥ नन्वेति॥ आत्मनि देहोऽस्तीत्येवं प्रत्यक्षं तावन्न संभवी
ति चक्षुः॥ स्पर्शनाभ्यां देहस्य गृहीतत्वेऽप्यात्मनस्ताभ्यामगृहीतत्वात्तद्ग्रहणाभावे च तत्रेदमिति ग्रहणानुपपत्ते ५४
॥ परोक्षं चिरवानीति श्रुतेश्चात्मनोऽतीन्द्रियविषयतो न तस्मिन्देहसंबंधप्रत्यक्षः॥

अत एवानानुमानादिगोचरत्वमपीत्यभिप्रेत्यानुपलब्धिं व्यतिरेकदृष्टान्तैर्विवृणोति॥ नाहीत्यादिना॥
आद्यः प्रत्यक्षस्याद्वितीयोऽनुमानस्य तृतीयोऽर्थापत्तेः॥ नहि कुण्डे बदरवद्देहात्मनावेकदेशसंज्ञयानुपल
भ्येतदित्युक्ते भिन्नविचित्रयोर्भेदेनानुपलंभे विषयाध्यारोपभावस्तथात्रापीत्याशंक्याह॥ भिन्नौ चित्रभित्तिवेति॥ चि

न ह्यात्मनि कुण्डे बदरं क्षीरे सर्पिरिव ज्ञायते तं भिन्नौ चित्रमिव च
प्रत्यक्षादिभिर्देह उपलभ्यते तस्मान्न प्रत्यक्षादिविरोधः॥

त्रांकितायाभित्तेरुपलंभवद्देहाकाराकित आत्मानोपलभ्यते॥ तथा सति मयि मनुष्यो देहोऽयमस्तीति व्यवहार
॥ स्यात्तनुमनुष्योऽहं स्थूलोऽहमित्यादिरिति समुदायार्थः॥ ननु सामान्यतो गृहीते विशेषतश्चागृहीते विषयांतरा
ध्यासादृष्टस्तद्वदेहात्मनः॥ प्रत्यक्षाद्यविषयकत्वे कथं तत्रात्माध्यारोपो नात्मनि बाधकं यमा॥ ॥श्रीनाथजीः॥

उप॰स॰ १२ त्माध्यारोपस्तस्मात्त्वं तासत्त्व इत्यपि त्रेत्याशिष्यः ॥ न्वंकृते कथं तर्हीति ॥ किमात्मनः स्फुरणाभावाच्चाध्यासो गद्य॰१
नसंभवतीत्युच्यते ॥ किंवा विषयत्वेन स्फुरणाभावत् ॥ गृहीतसामान्यांशाग्रहमाणविशेषांशाभावाद्वा तत्रना
द्य इत्याह ॥ नायं दोषः स्वभाव प्रसिद्धत्वादात्मन इति स्वप्रकाशस्यात्मनः ॥ स्वमहिम्नैव स्फुरणादित्यर्थः ॥ नद्वि

कथं तर्हि प्रत्यगात्मन्यपि बुद्धान्ततिदेहाध्यारोपणं देहेचात्माध्या
रोपणं नायं दोषः स्वभाव प्रसिद्धत्वादात्मनो न हि कादाचित्कसि
द्धवेनाध्यारोपणेन नित्यसिद्धाविति नियतुं शक्यमाकाशेतलम
लाद्यध्यारोपणदर्शनात् ॥

तीय इत्याह ॥ तर्हीति ॥ आकाशे प्रत्यक्षेपीतिशेषः ॥ अनेंद्रियकेप्याकाशे ऐंद्रियकभ्रमदर्शनाद विषयेपि ५५
स्वतः ॥ स्फुरत्यात्मनि विषयाध्यासो संभावित इत्यर्थः ॥

न चरमो बहिरर्थेषु विद्यमानयोरपि सामान्यविशेषांशयोरग्रिपैगंत्यादिवत् द्रूमादावध्यासं प्रत्यतंत्रत्वात्
स्वरूपमात्रेणास्फुरणमध्यासविरोध्याकारेणास्फुरणं चाधिष्ठानस्याध्यासे पेक्ष्यते ॥ तदिहात्मनः ॥ स्वरूपत
॥ स्फुरणेप्यनंतजडदुः ॥ खांतवत्त्वानात्मव्यावर्त्ताकारेणविशेषतजनितहानेसति विरोधिनि स्फुरणाभावादध्या

किं भगवन्देहात्मनोरितरेतराध्यारोपणाद्देहादिसंघातकृता
अथवात्मकृतेति ॥ गुरुरुवाच ॥ यदि देहादिसंघातकृता यदिवा
त्मकृता किं तत्र स्यादित्युक्तः शिष्य आह ॥

सोपपत्तिकं कश्चिद्दोष इति द्रष्टव्यं ॥ नन्वध्यासस्तानाकारपरिणामकिमात्मनउतानात्मनः ॥ किं वोभयोर्न्त्वाद्यस्त
स्यविकारित्वापत्तेरनित्यत्वादिदोषप्रसंगात् ॥ न द्वितीयोचनस्पतद्नुपपत्तेरत एवन तृतीय इत्यभिप्रेत्य शिष्य
ः पृच्छति ॥ किं भगवन्निति ॥ शिष्याभिप्रायं श्रोतुकामो गुरुरुवाचेति ॥ कस्मिन्सतिकिं स्यादिति पृच्छति ॥ यदीति ॥

उप०स० किंतत्रस्यान्नवेतिनोच्यः॥ स्वामि प्रायं शिष्यः॥ प्रकटयतीत्याह॥ इत्युक्त इति॥ अनात्मनः स्वरूपेण ध्यस्त गद्य०
१३ त्वात्तिः॥ सम्भवस्य तस्याध्यासकर्तृत्वानुपपत्तेरात्मैवतत्कर्त्रेतिस्वयमहमानोहमवभासत्वात्मप्रत्ययत्वात्

यद्यहंदेहादिसंघातमात्रस्ततोमम अचेतनत्वात्परार्थत्वमिति
नमत्कृता देहात्मनोरितरेतराध्यारोपणा अथाहमात्मापरोन्यः सं
घाताच्चितिमत्त्वात्स्वार्थ इति॥ मयैवचितिमतात्मनाध्यारोपणा
क्रियते सर्वानर्थबीजभूता॥

घाते च तद्दर्शनात्सर्वाहमन्यो वाध्यासक इत्युभयत्र दोषमुपन्यस्यतीति शिष्यः प्राह॥ यद्यहमित्यादिना॥ आद्ये ५६
पक्षे ध्यासकर्तुरभावात्संसारदर्शनं न स्यादिति भावः॥ द्वितीये स्वयमेव स्वानर्थायैव प्रवृत्तत्वादनिर्मोक्षापत्तिरि
तिभावः

चिन्मात्राश्रयविषयानाद्यनिर्वचनीयाविद्यावैशाद्भवत्याश्रिहात्मैवाविद्यापरिकल्पिताहंकारादिस्थूलशरीरां
तमात्मत्वेनाभिमन्यमानोभिध्यैवाध्यासकइति प्रसिद्धिमुपगतः॥ परमार्थतस्तुकूटस्थएवात्मा अविद्याति
रस्याच संसारनिवृत्तिर्निर्भ्रान्तिरूपस्वरूपेवेप्रनिवृत्तिरिति॥ नानुपपन्नं किंचिदित्यभिप्रेत्याचार्येण॥ प्रत्युक्तार्थं

इत्युक्तो गुरुरुवाच॥ अनर्थबीजभूतांचेन्मिथ्याध्यारोपणांजानीषेमा
कार्षीस्तर्हि नैव भगवन्शक्नोमि न कर्तुमन्येनकेनचित्प्रयुक्तोहंन
स्वतंत्र इति॥

शिष्यबुद्धिमारोहयतिगुरुरित्याह॥ इत्युक्तोगुरुरित्यादिना॥ देहाद्यात्मभावनामनर्थोपचिंचेदवगंतुमसिकिमि-
ति॥ तर्हि तां न मंचसि स्वतंत्रचेति तावद्यत्संघातविलक्षणं तां तेस्यसूचयति॥ अनर्थबीजभूतामिति॥ साक्षि
णः कूटस्थात्मनोवानर्थसंबंधः॥ परमार्थत इत्युक्ताभिप्रायमनवबुध्यमानः शिष्य आह॥ नैव भगवन्निति॥

उप.स. हे भगवन्॥ न कर्त्ता नैव भोक्तेति त्यन्वयः॥ श्रुतिस्मृतीपि मे निरूप्य नाशयान्नाहं तत्रोऽन्येनकेनचित् तद्भेद्यमाण- ग.प.१
१४ एवेति मन्ये इत्यर्थः॥ यद्येवं मन्यसे तदा चितिमत्त्वात् स्वार्थ इति॥ मयैवेत्यादिनोक्तं॥ म एवेति गुरुः स्वाभिप्रायं

न तर्हि चितिमत्त्वात् स्वार्थत्वं येन त्वयुक्तोऽस्वतंत्रः प्रवर्त्तसे स चिति-
मान् स्वार्थः संघात एव त्वं॥ यद्यचेतनोऽहं कथं सुखदुःखवेदनां भवद्-
क्तं च जानामि॥

प्रकटयति॥ न तर्हि चितिमत्त्वादिति॥ ननु कथमहं संघातो मात्मत्वादिति शिष्य आह॥ यद्यचेतन इति॥ न ५७
वदुक्तं इति संघात एव त्वमित्यादीत्यर्थः॥ ॥

मिथ्याध्यासप्रयुक्तकर्तृत्वाद्यवभासस्य देहेन्द्रियान्तः॥ करणगतचिदाभासाविविक्ततया तद्विशिष्टात्मवि-
षयत्वात् तस्य चाविवेकविवेकाभ्यामात्मनः॥ परसंत्रत्वस्वतंत्रत्वप्रतिभासगोचरतोत्वाद् विवेकनिराकरणे-
नास्य स्वरूपप्रतिष्ठा बुद्धिः॥ संपाद्येत्यभिप्रेत्याचार्य इत्युक्तीत्याह॥ गुरुरुवाच॥ किं मित्यादिना॥ शिष्य पुनः॥

गुरुरुवाच॥ किं सुखदुःखवेदनायामनुक्ताख्यान्यस्त्वं किं वानन्य एवेति॥
शिष्य उवाच॥ नाहं तावदनन्यः कस्मात् यस्मात् दुःखं कर्मभूतं घटादि-
कमिव जानामि यद्यनन्योऽहं तेन तद् दुःखं न जानीयां॥ ॥

स्यानवतुमनुसरन्नुत्तरमाह॥ इति दर्शयति॥ शिष्य इति॥ नाहं संघातानन्यस्तद्दृष्टत्वाद्योपदृष्टानसतरन-
न्यायथा घटद्रष्टेत्यर्थः॥ हेतोर् प्रयोजकताशङ्कामनवकाशयति॥ यदीति॥ तेनेति॥ अनन्यत्वेन हेतुनेत्यर्थः॥

उप·स· नहि स्वसंवेद्यं स्ववेद्यं किमपि भवति॥ स्वात्मनि वृत्तिविरोधात्कर्तृत्वस्य च स्वप्रकाशतानुपपत्तेः॥ स्वान्यदृश्यविष ग·द्य·१
१५ यत्वोभावेन तदसिद्धिप्रसंगाच्च द्वयरहितो ज्ञेयः॥ प्रसज्येतेति भावः॥ उपनयति गमने दर्शयति॥ किंतु॥ जानामि तस्माद्

किंतु॥ जानामि तस्मादन्यः सुखदुःखवेदनाविक्रियाश्च
स्वार्थैव प्राप्नोति॥ यदुक्तं चानन्यत्वे॥२३॥ ॥

न्य इति॥ अनन्यत्वे विषयत्वानुपपत्तिरूपं बाधकमभिधाय प्रत्येकं तरानावात्॥ संघातस्य स्वशेषत्वापत्तिं बा ५८
धकांतरमाह॥ सुखदुःखेति॥ विक्रिया कर्तृत्वादिजन्यत्वेत्यर्थः॥ यदुक्तं चेति॥ असत्वानित्यत्वादिपूर्वोक्तदोष
श्च प्राप्नोतीत्यर्थः॥२३॥

न च तु स्वार्थतेत्यान्यं कथं विषयस्य स्वार्थत्वाभावं दृष्टांत्वेन तेनोपपादयति॥ न च तयोरिति॥ सुखदुःखवेदना
विक्रययोरित्यर्थः॥ द्रष्टुरात्मनो दृश्यादन्यत्वं दोषित्वं चोपपादितमुपसंहरति॥ तस्मादिति॥ तातु तेषु संबंधमाह
॥ बुध्यारूढमिति॥ यदीवं प्रति बुद्धो पि बध्यन तर्हि परप्रयुक्तता तवेति॥ तस्य न बोधयत्स्वाचार्यमाह॥ तं गुरुरि

न चैतयोः स्वार्थता युक्ता नहि चंदनकंटककृते सुखदुःखे चं
दनकंटकार्थे घटोपयोगो वा नैव तादर्थ्यस्तस्मात्तद्विज्ञातु मम चं
दनादिकृतो र्थो हि हितो न्यः संस्तमर्थं जानामि बुध्यारूढं॥

ति॥ ननु चितिमतोपि परार्थत्वं किं न स्यादिति॥ चेत्तत्रवक्तव्यं किंचिति मांश्चितिमदर्थः॥ किं वा चितिमदर्थ इ
ति॥ आद्येपि स्वयमेव स्वार्थश्चितिमदंतरार्थो वा नाद्यः॥ एकस्मिन्नुपकार्योपकारकभावलक्षणस्यात्यर्थि
त्वस्यायोगादित्यभिप्रेत्य द्वितीयं प्रत्याह॥ चितिमत इति॥

उप०स० समत्वादन्योन्यस्मिन्नन्योन्यकृतातिशयाभावादित्यर्थः॥ द्वितीयं दूषयति॥ नापीति॥ अचितिमदर्थत्वं चि गद्य०१
१६ तिमत इति पूर्वेणानुषंगः॥ अचितिमतोजडस्य जडत्वादेव शेषित्वानुपपत्तेरितिहेत्वर्थः॥ तदृत्याशंक्याह दृष्ट
विरोधमन्येवमित्याह॥ नाप्यचितिमच्चेतोरिति॥ यदुक्तं॥ चितिमतश्चितिमदर्थत्वमानं तद्यचेतनानामविशि

तं गुरुशिष्येच॥ एवं तर्हि स्वार्थत्वं चितिमत्वान्न परेण प्रयुज्यते नहि चिति
मात्परतन्त्रः परेण प्रयुज्यते॥ चितिमतश्चितिमदर्थत्वानुपपत्तेः समत्वात्
प्रकाशयोरिव॥ नाप्यचितिमदर्थत्वं चितिमतो भवति॥ अचितिमत्वादेवा
र्थसंबंधानुपपत्तेः॥ नाप्यचितिमतोरन्योन्यार्थत्वं दृष्टं नहि काष्ठकुड्यं चान्यो
न्यस्यार्थं कुर्वति॥

तिमच्छेषत्वं तेषामन्योन्यार्थता किमिति न भवेदतः॥ किमिति॥ चेतनोध्य ५९
तः स्वार्थकल्प्यते नोपपद्यते समत्वादिति॥ तत्रव्यभिचारं शंकते॥ नन्विति॥

स्वामिचैतन्यस्य भृत्यादेहत्वाच्चेतनभागमुपकरोति॥ न तन्निरपेक्षं चिन्मात्रं तथा भृत्यचैतन्यस्य स्वामि
देहत्वाच्चेतनभागमुपकरोति न चैतन्यमात्रं तथात्वान्नादित्यभिप्रेत्य परिहरति॥ नैवमग्नेरिति॥ तदेवं चैत
न्यशेषत्वे सति तस्येन्नरात्मत्वं सिद्धमतः॥ कूटस्थ एवात्मेत्युपसंहरति॥ तस्मैवं सतीति॥ चितेमतः स्वार्थत्वमेव

न तु चितिमत्वे समेपि भृत्यस्वामिनोरन्योन्यार्थत्वं दृष्टं॥ नैवमग्नेरुष्णप्र
काशवत्वचितिमत्वस्याविवक्षितत्वात् प्रदर्शितस्य दृष्टांतः प्रदीपप्रका
शयोरिवेति॥ तस्मैवं सति स्वोबुध्याहृढमेव सर्वमुपजनमसे॥ ॥ ॥

न परार्थत्वं सर्वदृशितिस्थितेसतीत्यर्थः॥ स्वबुध्याहृढमेव स्वाध्यस्तांतः॥ करणवृत्तिकवलितं॥ तमेव सर्वमध्य
स्तात्माधिभूताधिदैवत्वरूपेण संघातमप्युपमप्रकाशवत् स्वरूपभूतेन निर्विकारनित्यचैतन्यस्वभावेनोपलभे तेन त्व
मतोनित्यमुक्तोहं न संघातोप्यासकेश्ननामेसं घातकधर्मेसं सर्गोस्तीति स्वप्नेभवेत्यर्थः॥ ॥ ॥ ॥

उप॰स॰ १७ ऽमितिचेत्तं ब्रूयात्तदा गुरुरेवं ब्रूयादित्याह॥ यदि चैवमिति॥ मोहादेवाब्रुवमिति॥ चेत्तं ब्रूयात्तदा तं प्रति गद्य॰१
गुरुणा वक्तव्यमाह॥ किमसाविति॥ ननु संसार्यहं दुःखी नित्यमुक्तस्वभावाद्वा स्वरादन्य इत्यादि॥ त्वमहेतुर्येय्या

न्प्रयुमप्रकारान्तुल्येन कूटस्थनित्यचैतन्यस्वरूपेण॥ यदि चैवमात्मन
॥ सर्वज्ञानिर्विशेषत्वमुपगच्छसि किमित्युच्यते तदुपदेशे विश्वन्यो विश्वस्याज्ञाग्र
लक्षणयोर्दुःखमनुभवामि किमयमेव मम स्वभावः॥ किं वा नैमित्तिक इति चेत्कि
मसौ व्यामोहोऽपगतः किं वा नेतीत्युक्तः॥ ॥ ॥

मोहे विवक्षितेन्यात्मासीत्यमसद्वान्निवृत्तः॥ परंतु कूटस्थचैतन्यस्वरूपेणेति॥ यदिदं मम कूटस्थत्व ६७
मुच्यते तन्मे नावस्तिव प्रतिविषयं ज्ञानेकरत्वात्॥ कथं कूटस्थचित्स्वभावतेति संशयो जायत॥ ॥ ॥

इति शिष्यप्रश्नमुत्थापयतीत्युक्तः॥ शिष्य उवाचेति॥ अपगतो मोह इत्यनुषंगः॥ संघातसाक्षिणो निर्विकारत्व
स्योक्तत्वात्कथं संशय इति॥ तन्मुखेनैव कूटस्थतामवगमयितुं गुरुः पृच्छति॥ कथमिति॥ संशय इत्यनुषंगः॥ अ
शिष्यः॥ स्वविदितमर्थं निवेदयति॥ शब्दादीनामिति॥ शब्दस्पर्शरूपरसगंधास्तावद्विषयाः॥ प्रसिद्धाः॥ तेषामचिद्रू

शिष्य उवाच॥ भगवन्नपगतस्त्वत्प्रसादाद्व्यामोहः॥ किंतु मम कू
टस्थतायां संशयः॥ कथं शब्दादीनां स्वतः॥ सिद्धिर्नास्ति अचेतनत्वाच्छ
ब्दाकारप्रत्ययोत्पत्तेस्तु तेषां प्रत्ययसा॥

पत्वात्स्वतः॥ स्फुरणं नास्ति इत्यविवादं कथं तर्हि तेषां स्फूर्तिरिति तदाह॥ शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषामि
ति॥ सिद्धिरित्यनुषंगः॥ शब्दाद्याकाराणां प्रत्ययरूपत्वात्स्वातिरिक्तग्राह्यतेति विज्ञानवादिमतमाशंक्यमध्येतिरा

उप. सू. १८ करोति॥ प्रत्ययानामित्यारभ्य सिद्धिरित्यंतेन॥ इतरेतरंव्यावृत्तानि विशेषणानि तैर्विशिष्टा शब्दाद्याकाररूपाणि येषां गद्य. १
तेतथा॥ हेतुगर्भं विशेषणं प्रकाशस्वभावत्वात्॥ प्रत्ययानां स्वतएव परोपरमां विनानीलपीताद्याकारवत्तायां
असंभवान्न प्रत्ययमात्रस्वरूपाः॥ शब्दादय इत्यध्याहारेण योजना परमतनिराकरणमुपसंहरति॥ तस्मादिति

नामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारवत्तायाः॥ स्व
तोसिद्ध्यसंभवात्॥ तस्माद्बाह्याकारनिमित्तत्वं गम्यतेइति॥ बाह्या
कारत्ववच्छब्दाद्याकारत्वसिद्धिः॥

॥बाह्यः आकारः॥ शब्दादिरूपइंद्रियसंसृष्टो यो निमित्तं येषां प्रत्ययानां तेषां भावो बाह्याकारनिमित्तत्वमिति वि ६१
ग्रहः॥ इति यतस्तस्मात् प्रत्ययानां बाह्याकारवच्छब्दाद्याकारत्वसिद्धिरित्यर्थः॥ ॥श्रीरामाय नमः॥ ॥श्री॥ ॥

चैतन्यात् इष्णाकारवंतो ये शब्दादयः॥ परागव्यवहारयोग्यास्तत्कृताकारत्वसिद्धिः॥ प्रत्ययानां
नस्वतइत्यर्थः॥ एवं शब्दादीनां विषयाणां स्वव्यतिरिक्तप्रत्ययग्राह्यत्वे चेद्ध्यवस्यति तर्हि प्रत्ययस्वरूपैवि
शेषाभावेसिद्धिकूटस्थात्वमिश्रेत्यसिद्धिरित्याशंक्याह॥ तथाप्रत्ययानामपीति नहि विषयसंसृष्टतयाभासमानावि

तथा प्रत्ययानामप्यहं प्रत्ययावलंबनवस्तुभेदानां संहतत्वादचै
तन्योपपत्तेः स्वार्थाभिनवात् स्वरूपव्यतिरिक्तग्राहकग्राह्यत्वेन सिद्धि
शब्दादिवदेवासंहतत्वे सतिचैत॥

षयाकाराः॥ प्रत्ययाः॥ स्वप्रकाशचैतन्यरूपानवंत्यागमापायित्वात्॥ किंत्वन्यसाक्षिका एवेत्यसिद्धिकूटस्थ
त्वमिश्रेत्यत तत्स्वरूपविशेषं विशेषणानि दर्शनेन कथयत्यहं प्रत्ययालंबनवस्तुभेदानामिति॥ अहं प्रत्ययाव
लंबनवस्त्वित्॥ करणांतस्यभेदावृत्तिविशेषास्तदात्मकानामित्यर्थः॥ विमताः॥ प्रत्ययानचित्स्वभावाः॥ ॥

उप॰स॰ संहतत्वात्संहतत्वं चागमापायवत्त्वाच्छब्दादिवद्देहादिवद्वा ॥ तथा विमतः ॥ व्यतिरिक्तग्राहकग्राह्या अचेतनत्वा ग॰घ॰१
१८ च्छब्दादिवदित्यर्थः ॥ अतः परमाकाराभावात् इत्यर्थोऽस्य आत्मनस्तावत् चीति निर्विशेषचिद्रूपात्मा सिद्ध एव इति कुतः ॥
कूटस्थतायां संशय इति न वाच्यमित्याह ॥ असंहतत्वे सतीति ॥ यद्यपि संघातादन्यश्चेतनस्तत्स्वभावः ॥ तथापि वात्मा

न्यात्मकत्वात्तस्यार्थोऽप्यहं प्रत्ययानां नीलपीताद्याभाव
कारेणानुपजश्चेति विक्रियावानेव कूटस्थ इति संशयः

तथाप्यहं प्रत्ययानामंतः ॥ करणवृत्तीनां नीलपीताद्याकारेणानुपजश्चोपजश्चिक्रत्वादिति हेतोर्विक्रियावानेवा ६२
यं कथं कूटस्थ इति मे संशय इत्यर्थः ॥

एवं चेदन्यदर्शनेविवेचयसि न तर्हि ते संशयावकाशापरिहरिति ॥ तं गुरुवाच ॥ तथायुक्त इत्यादिना ॥ संशयायोगे
हेतुमाह ॥ यत इति ॥ यः परिणामी चित्तादिस्तस्य क्रमेण स्वविषयग्राहकत्वसकलस्वविषयावस्थाग्राहकत्वं च हे
तव्यापकमात्मनः ॥ प्रत्ययासाक्षिणः ॥ सकाशाद्यावर्तमानस्य व्याप्यपरिणामित्वमपि तस्य व्याप्यतीति

तं गुरुवाच ॥ न युक्तस्तव संशयो ॥ यतस्तेषां प्रत्ययानां नियमेनाशेषतउपज
श्चैरवापरिणामीत्वात्कूटस्थत्वसिद्धौ निश्चयहेतुमेवाशेषचित्तप्रचारोपज
ब्धिं संशयहेतुमात्थ ॥ यदि हि तव परिणामित्वं स्यादशेषस्वविषयचित्तप्रचा

॥ व्यापकविरुद्धोपजब्धेः कूटस्थत्वसिद्धौ निश्चय एव युक्तो न संशय इत्यर्थः ॥ उक्तमेवार्थं व्यतिरेकव्याप्तिं विदृढ एव
न्नुपपादयति ॥ यदिहीति ॥ इदानीं प्रकृतिप्रत्ययार्थपर्यालोचनयोपजब्धा कूटस्थ इति विरुद्धमिति ॥ ॥ ॥

उप.स. त्रिष्यन्तं कामुप्रावयति॥ तत्राहेति॥ उपोपसर्गस्यलभते र्धातोः॥ कर्त्तरि तु चोविधनाद्धात्वर्थस्य च क्रियात्वाक्रि गद्य.१
२० यायाश्चोत्पत्तिर्विनात्वात्ततेकर्त्तरि कर्थं विक्रियाराहित्यमित्यर्थः॥ क्रियैव प्रकृतिभूतधात्वर्थः॥ कर्त्तैव च प्रत्य

शेपलब्धिर्नस्यात्किन्तस्यैव स्वविषयेयथाचेंद्रियाणां स्वविषयेषु न च तथात्मन
स्तत्स्वविषये कदेशोपलब्धिरतकूटस्थतैवतवेति॥ तत्राहोपलब्धिर्नाव्यथा
त्वर्थोविक्रियैवोपलब्धुः कूटस्थात्मता चेति विरुद्ध॥

यार्थः॥ सर्वत्र मुख्य इति नास्ति॥ नियमो गद्विवदने कदेशोपविता प्रकाशाते सविता प्रकाशते सविता प्रकाशय
तीत्यत्र व्यभिचारादित्यभिप्रेत्य प्रकृतेर्धात्वर्थतत्कर्तृवचनस्योपलब्धात्रादस्य गौणार्थत्वमेव युक्तं॥ ॥ ६३

इत्याह गुरु॥ न धात्वर्थेति॥ संग्रहं विवृणोति॥ योहि बोध इति॥ बोधो बुद्धिपरिणामः॥ स प्रतिविषय
मयति॥ गच्छतीति प्रत्ययः॥ ननु बुद्धेरंतः॥ करणस्य द्रव्यत्वात्तत्परिणामस्य च मृघटादिवत् द्रव्यत्वोपपत्तेः॥
कथं क्रियात्वमिति तत्राह॥ स धात्वर्थो विक्रियात्मक इति॥ विशिष्ट क्रियात्मक इत्यर्थः॥ न हि मृदादिवत्स्वाका

गुरुरुवाच॥ न धात्वर्थविक्रियायामुपलब्धुपचाराद्यो हि
बोधो प्रत्ययः स धात्वर्थो॥

रतिरोधनेनांतः॥ करणपरिणाम इष्यते॥ किंतु॥ तन्तुकवत्तद्वोजोकवच्चासंकोचविकासरूपेणतादृशा
स्तु परिणामः॥ परिणामिनेत्स्वरूपत्वान्क्रियतेति॥ वक्तुं युक्तइत्यभिप्रायः॥ तस्याः क्रियाया उपलब्धिशब्दो
पचारे निमित्तमाह॥ आत्मन इति॥ आत्मनः स्वरूपभूताव्योपलब्धिः॥ सत्यं तानेविज्ञानघटादेस्त्वादि

उप.स.
२१ तिसिद्धातस्याभासो वह्निव्याप्तायः॥ पिंडस्यब्रह्माकारत्ववच्चिदात्मव्याप्ततयापि तद्धीपापत्तिः तद्देवफ गद्य.१
लंतद्दवमानस्तयेतइति॥ कूटस्थोपलब्धिशब्देनोपचर्यत इत्यर्थः॥ तत्रानुरूपं दृष्टांतमाह॥ यथेति॥ अयोमानवः
॥ अयःपिंडवत्काष्ठाद्युपलब्धिशब्दार्थः॥ प्रसिद्धः॥ सनार्थधर्मोयेनोज्ज्वलत्वादिस्तु तेनाप्यंतः॥ करणधर्मस्तस्यापि

विक्रियात्मकः आत्मनश्चोपलब्ध्याभासफलावसानत्वादुपलब्धि
शब्देनोपचर्यते॥ यथाछिदिक्रियाद्वैधीभावफलावसानेति धात्व
र्थेनोपचर्यते तद्वत्॥ ॥

करणत्वाच्चैतन्यप्रकाशाश्रयत्वायोगात्तथापि स्वयंप्रकाशमानेनित्यचैतन्यात्मन्यव्यवधानेनाहंतयोध्यासाध्या ६४
सात् स्वसत्तायां प्रकाशयतीति॥ उपलब्धेः॥ रेराकार्यात्मचैतन्यव्याप्तदृष्टाकारावृत्तिः॥ ॥श्रीरामायनमः॥ ॥ ॥

कुर्वंतःकरणमुपलब्धाकर्तृप्रमातात्मोक्तेतिच प्रमातृत्वकर्तृत्वभोक्तृत्वानुभवितृत्वव्यपदेशास्पदं भवति॥ यथा
यः॥ पिंडोदहतीप्रकाशयतीतितद्वत्॥ आत्मा चाकाशवदविक्रियत्वात् कूटस्थोपि संस्तादृगंतः॥ करणगतस्वा
भासाविवेकात् तद्धर्मैस्तद्वत्स्यान्नियामिथ्यैव व्यपदिश्यते च तु॥ कोणेवर्तुलः कृशः॥ स्थूलोजातोनाशोऽग्निरिति॥ य

इत्युक्तः शिष्य आह॥ ननु भगवन्मम कूटस्थत्वप्रतिपादनं प्रत्यस
मर्थोदृष्टांतः॥ कथं छिदिःछेत्तुविक्रियावसानेनूपचर्यते यथा धात्वर्थे
नतथोपलब्धिशब्दोपचारितोपि धात्वर्थो बोद्धःप्रत्ययः॥ ॥

थायः॥ पिंडगताभासाविवेकादपि व्यपदिश्यते तद्वत्॥ वैतस्मादंतःकरणस्यविकारिणः॥ कर्तृत्वेप्युपलब्धेः॥
क्रियमाणत्वाभावादुपलब्धिस्वरूपस्यात्मनः॥ सिद्धं कूटस्थत्वमिति॥ तत्रोक्तमर्थं विप्रादीकर्तुं दृष्टांतस्यदार्ष्टांति
कानमुरूपत्वशंकयति इत्युक्तः॥ शिष्य आह॥ छिनत्तीति॥ ॥

उप.स. २२ उभयत्र प्रकृतिप्रत्ययार्थयोरौपचारिकत्वस्योक्तत्वात्॥ कथं दृष्टान्तासामर्थ्यमिति गुरुराह॥ कथमिति॥ उपचा ग द्य.१
रितत्वेप्युपलब्धुर्विक्रियादुर्वारा यतः॥ छिदिक्रियासाध्यं द्वैधीभावाख्यं फलं॥ विक्रियैवमुपलब्धिफलस्यापि फ
लत्वाविशेषात्तत्साध्यतया विक्रियात्वोपपत्तेः॥ कथमुपलब्धा कूटस्थः स्यादिति॥ किं च दृष्टान्तासामर्थ्यमुपपा

आत्मोपलब्धिविक्रियावसानश्चेन्नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः॥ ॥

दयति॥ छिदिरित्युक्त्यादिना॥ छिदिक्रियायाः॥ छेद्यविक्रियावसानत्ववद्दोषो धात्वर्थ उपलब्धिर्नात्रोपचरितोपि
आत्मोपलब्धिविक्रियावसानश्चेदिति॥ योजना छिदिक्रियायाः॥ छेदनकृतद्वैधीभावपर्यन्तत्ववदात्मकृतोपलब्धि ६५
विकारपर्यन्त उपलब्धिधात्वर्थश्चेदित्यर्थः॥ उपलब्धेः॥ ॥

स्वरूपेणैव फलत्वं विवक्षित्वा दृष्टान्ताननुगुणत्वमध्यवस्यसि किं वोपाधिवशादिति विकल्पोद्यं दूषयति॥ सत्यमे
वमिति॥ विशेषो भेदः॥ नित्यशब्देन बौद्धमताद्व्यावृत्तिमात्रपदेन भेदाभेदमतात्॥ प्रज्ञानघन एव प्रज्ञानं ब्रह्मेत्या
दिश्रुतिप्रसिद्धं हेतुमाह॥ हीति॥ एवकारव्यावर्त्यमाह॥ न तु तार्किकेति॥ यद्येवमात्मतत्त्वं कथं तर्हि धात्वर्थफल

तं गुरुरुवाच॥ सत्यमेवं स्याद्यद्युपलब्धुर्विशेषो नित्योपलब्धिमात्र एव ह्यु
पलब्धा॥ न तु तार्किकसमय इवान्योपलब्धिरन्य उपलब्धा च॥

वचनमिति शिष्यः॥ शंकेत॥ नत्वेति उपाधिवशात्फलत्वोपचार उपलब्धेर्न स्वरूपतस्तु कं स्मारयन्नुपपत्त्यं
तरमविरुद्धमित्याह गुरुः॥ सत्यमिति॥ अंतःकरणवृत्तीनामाविर्भावतिरोभावधर्मकत्वात्तद्विशिष्टतया स्मरणमं
गीकृत्य॥ विषयस्य चैतन्याभेदेन प्रकाशमानवृत्तितत्स्याभासाश्रयतयाभासमान आत्मा प्रमातेत्युच्यते॥

उप.म.
२३

कर्मेंद्रियाण्यधिष्ठानयक्रियावत्प्राणभृपतनांतः॥ कारणलिंगमतानासाविवेकात्कर्त्रेतिचोच्यते॥ त्रिगुणात्म गद्यः १
नकर्मोपस्थापितातः॥ करणपरिणामविक्षेपंतद्विवेकात्स्वगतमिवपश्यन्नात्माभोक्तेत्युच्यते॥ एतांसर्वा

ननूपलब्धिफलावसानोर्थत्वर्थः कथमुच्यते॥ शृणूपलब्धाभासफ
लावसान इत्युक्तं किंनश्रुतं तत्स्वयानत्वात्मनोविक्रियोत्पादनावसानइति
मयोक्तं॥

मेवचित्तविच्छायासावस्थांस्वरूपचैतन्यानुगममात्रेणसाक्षादवभासयन्निवभासमानोनुपप्लवकाचोसंदिग्धो ६६
विपर्यस्तोविषयः॥ साक्षीउपलब्धाज्ञातेतिचव्यपदिश्यते॥ ॥

वृत्तिविनाशात्तन्नतच्चिदाभासस्यापिविलयात्तत्संस्कारसंभवेति॥ समयांतरेपूर्वानुगतविषयाकारस्मृतिरुत्पद
येतन्नताभासद्वारासएवस्मर्त्रेतिव्यपदिश्यते॥ सएवतुचिदात्मासमस्तकार्यकारणप्रपंचोपलक्षितस्तदनुरूप
सत्ताभेदेनासर्वाधिष्ठानमित्युच्यते॥ कारणोपाध्यविवेकेनानुपलक्षितज्ञानशक्तितयाचांतर्याम्यादिशब्दवाच्योपिभव

शिष्यउवाच॥ कथंतर्हिकूटस्थोमध्यस्थोषस्त्वविषयचित्तप्रचारोपलब्धा
त्वमित्यात्यंतगुरुराह॥ सत्यमेवोच्यतेनैवकूटस्थतामनुवर्तत॥ ॥

ति॥ तस्मात्केनचिदुपाधिनाक्वचित्कश्चित्तथाव्यवहारास्पदत्वेनाविद्यावशाज्ज्ञासमानोप्यात्मास्वरूपतोनिर्विका
रोनिर्धर्मकोसंगः॥ कूटस्थएवेत्येतत्सर्वमभिप्रेत्योक्तमर्थंप्रश्नमुत्थाप्योपसंहरति॥ शिष्यउवाच॥ कथंतर्हिसा
रूप्यतवेत्यंतेन॥ तैनवात्रोपस्वविषयचित्तप्रचारोपलब्धृत्वेनेत्यर्थः॥

उप.म. अतः कुतस्तत्र वा नानात्वप्रसो जायत इत्यभिप्रायः॥ आत्मनो नित्यनिरस्ताशेषस्वगतविशेषतयास्वेकूटस्थत्वेव गद्य:१
२५ चोधितेव बुद्धस्वरूपः॥ शिष्यस्तत्रांतिबीजं मपश्यन् पृच्छति॥ यद्येवमिति॥ अथवा बौद्धप्रत्ययाश्चेद्दुपलब्धाभा

वद्भिः स्वरूपेमपि ज्ञानाकारबौद्धप्रत्ययेषु मतत्स्वरूपोपलब्धमासफ
लावसानवतत्प्रत्ययमानेषु कस्तव पराधेममः॥ सत्यं नास्त्यपराधः॥ ॥

सफलावसाना जायंते॥ तदा तान्नात्मनि नित्यं पश्यतो मम कोपराध इत्याक्षिपति॥ यद्येवमिति॥ अन्यस्योत्तरमा ६७
ह॥ सत्यं नास्त्यपराध इति॥ कथं तर्हि किं नमुतं त्वयेति मयोक्तमिति न्नुंकते॥ ॥

किं त्विति॥ जिज्ञासोस्तव येनावतत्प्राथानव धानेनागंतुकदोषनिमित्तकं संभाव्यत इत्यभिप्रेत्य मयोक्तमिति
परिहरति॥ अविद्येति॥ यद्वा॥ दोषं परिहरति॥ सत्यमिति॥ नास्त्यपराधस्तव स्वानुभवाप्रच्छादकत्वात् कथं तर्हि
त्वयोक्तं मम नानात्वप्रसो जायत इति पृच्छति॥ किं त्विति॥ अन्योस्त्यपराध इत्युत्तरमाह॥ अविद्येति॥ तदेवं यथावद्

किं त्वविद्यामात्रेस्त्वपराध इति भगवोचं॥ यद्भिगवन्नुसुप्त
इव मम विक्रियानास्तिकाथं स्वप्नजागरिते॥ तं गुरुराह॥ किं त्वनु
भूयेते त्वया सततं॥ बाढमनुभवामि॥ किं तु॥ ॥

त्मनः॥ स्वरूपानवभासाविद्यानिबंधन एव संसारित्वमधिकृतत्वमित्याशंतद्धर्मविनाशोन परमार्थोस्तीत्युप
पत्तितोवगमितमात्मनः॥ कूटस्थनित्यत्वमिदानीमवस्थात्रयसाक्षितयावस्थाधर्मास्पर्शित्वेन पुनः॥ कूटस्थतां प्र
तिपादयितुमाक्षेपमुत्थापयति॥ यदि भगवन्निति॥ स्वप्नजागरिते ममेति नेषः॥

उप.स. त्वच्चैतन्यप्रकाश्यत्वान्न तत्स्वभावावभूवेते ते आगन्तुके इति परिहृतमिति ॥ तं गुरुराहेति ॥ सततमिति ॥ यदा ते भवतस्तद्दाना ग.प्र.१
२५ नुभूयमाने भवत इत्यर्थः ॥ अननुभूयमानस्य त्वद्धर्मीकृत्य सततानुभवनाद्यर्थमजानानः शिष्य आह ॥ बाढमिति ॥ तं गु
रु ॥ राहागन्तुके त्ववत इति ॥ सुषुप्तौ वात्मस्वरूपेणासमाने चितयोरनवभासान्नात्मनः ॥ स्वरूपभूते ते अवस्थे अतो विहि

विद्धि यत्ननुसततं तं गुरुराह ॥ आगन्तुके त्वतो न तवात्मभूते ॥ यदि तवात्मभूते चैत
न्यस्वरूपवत् स्वतःसिद्धे संतते एव स्यातां ॥ न हि यस्य यत् स्वरूपं तत् तद्व्यभिचारि दृ
ष्टं ॥ स्वप्नजागरिते तु चैतन्यमात्रत्वात् व्यभिचरतः ॥ ॥

स्यानुभूयेते त्वया त इत्यर्थः ॥ विमते नात्मभूते व्यभिचारित्वाद्वस्त्रादिवदित्युक्त्वा व्यतिरेके णैतदेव द्रढयति ॥ यदीत्या ६९
दिना ॥ चैतन्यमात्रत्वादिति चेतत्स्वभावादित्यर्थः ॥ ॥

यत्र यदनुभवगोचरस्तत्रैव चेन्नानुभूयते तदा तस्य ध्वंसो वा अभावो वा स्यादन्यथापि तस्य नाधिष्ठानधर्मत्वमिति ॥
यदृष्टान्तमुपपादयति ॥ सुषुप्ते चेदित्यादिना ॥ नाशो ध्वंसो अभावो बाधः ॥ तत्रापि व्योतिप्रसंगं नांकते ॥ नन्वेवमिति
॥ इति श्रुतिमतिविज्ञातिजडाणो हि स्वप्नजागरितेदृष्ट्यादिमध्ये चैतन्यमेवातो यदि सुषुप्तौ स्वप्नजागरितेनोपलभ्येते इति ॥ त

सुषुप्ते चेत् स्वरूपं व्यभिचरेन्नष्टं नास्तीति वा धार्यं वा स्यादागंतुका
नामतद्धर्माणामुभयात्मकदर्शनाद्यथा धनवस्त्रादीनां नाशो दृष्टः
स्वप्नभ्रांतिलब्धानां त्वभावो दृष्टः ॥ ॥

त्रतेनस्तत्त्वदा चैतन्यमेव सुषुप्तौ नास्तीत्यात्मा आगंतुकचैतन्यो वा स्यादचैतन्यस्वरूपो वा गत्यंतराभावादित्यर्थः
गुरुः परिहरति ॥ नेति ॥ नैवं वक्तुमुचितमित्यर्थः ॥ कथमिति चेत्तत्राह ॥ पश्येति ॥ पर्यालोचयेत्यर्थः ॥ वस्तुस्वभावे आ
लोच्यमाने चैतन्यस्यागंतुकत्वानुपपत्तेर्नैवं वक्तुमुचितमिति वाक्यार्थः ॥ ॥

उप॰स॰ ननु सुषुप्ते दृष्ट्यादिरूपस्य चैतन्यस्यादर्शनाज्जाग्रदादौ दर्शनादागन्तुकमेव चैतन्यं पर्यायेण च भातीति चैतन्यवस्तुत्व गद्य॰१
२६ व्यक्तिनिरुपाधिचित्स्वरूपमेवागन्तुकं प्रत्ययविशेषानयनादिद्वारकबुद्धिवृत्त्युपहितमिति॥ विकल्पादृष्टं त्याह॥ चैत

नन्वेवं भगवन् चैतन्यस्वरूपमप्यागन्तुकं प्राप्तं स्वप्नजागरितयोरि
व सुषुप्तेऽनुपलब्धेश्चैतन्यस्वरूपो नास्यामहं॥ न प्रत्ययतदनुपपत्ते
श्चैतन्यस्वरूपं चेदागन्तुकं प्रत्ययविप्रलुप्ततद्रूपत्वे तेनाप्युपपत्त्या
कल्प्यितुं शक्यमेव यमन्यो वा चैतन्योऽपि॥

न्यस्वरूपं चेदिति॥ अलौकिकप्रमस्त्वं चैतन्यस्वरूपमागन्तुकं प्रत्ययस्ति॥ तर्हि प्रत्ययवपं तुन्यायप्रमाणलक्षणाज्जान्य
पितश्चैतन्यस्वरूपमागन्तुकं दृष्टुं घटयितुं शान्तवर्णितेनापि शक्नुमोऽन्यो वा कश्चिद्चैतन्योऽपि मूढोऽपि न शक्नुयादित्य ६८
र्थः॥

अयं भावः॥ चैतन्यस्यागन्तुकत्वं चैतन्येन गृह्यते॥ किं वा चैतन्येन नाद्यः स्वग्राह्यत्वे स्ववृत्तिविरोधात्॥ न द्वि
गुप्त्यग्रेण तदेव स्यान्नाते॥ असिद्धस्याबाधितासिद्धेः॥ नाप्यन्यचैतन्येस्यागन्तुकत्वं ग्राह्यमन्यत्वस्याद्याप्यसिद्धेः
॥ न द्वितीयोऽजरस्य चिरध्यानप्रकाशतया चित्प्रकाशकत्वायोगात्॥ अतश्चैतन्यमनागन्तुकमिति॥ अतिरिक्तं भवतिय

यं हृतत्वात्तैरार्थमन्येकत्वान्नाशित्वं न केनचिदुपपत्त्या वारयितुं
शाक्यमस्वार्थस्य स्वतःसिद्धभावादित्यवोचाम॥ चैतन्यस्वरूपस्यात्मा
त्मनः स्वतःसिद्धेरन्यानपेक्षत्वं न के॥

द्धितन्नप्रत्ययतिप्रत्ययत्वेतवैपैन्नेष्यति॥ तर्हि ईदृशे विपरिलोपोनिद्यतेविचारितात्तत्तुततद्द्वितीयमस्तितनो
त्यद्विमक्तोयत्यपदित्याद्याः॥ एवमाद्यविकल्प्यमेनुपपत्त्या निराकृत्याद्वितीयमचैतन्यार्थदर्शनेन निराकरोति संह
तत्वादिति॥ नयनादिद्वारकबुद्धिवृत्त्युपाधिग्रस्तत्वात्तु संहतत्वान्न॥

उप.स. २७ रार्थत्वादिकं पूर्वमेवोपपादितमिति ॥ नेदं तो नोमुपपत्तिर्वक्तव्येत्याह ॥ इत्यवोचामेति ॥ अत्रापि श्रुतिर्नवतिनदृष्टे गद्य.१
र्द्रष्टारं पश्येन्न श्रुतेः श्रोतारं शृणुयान्न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया इत्याद्याः ॥ अस्मिंस्तु श्रुति
वाक्ये षष्ठ्यन्तशब्दवाच्यदृष्ट्यादेरन्यदृष्ट्याततयाचैतन्यमनुभाव्यत्वोक्तेस्तदन्यादृष्ट्यादिस्वरूपप्रकाशकत्वेन द्रष्टृ

न चिद्धारयितुं शक्यमव्यभिचारात् ॥ ननु व्यभिचारो दर्शितो मया
सुषुप्ते न पश्यामीति न व्याहतत्वात् ॥ ॥

दिरूपा दृष्टिर्दृष्टेः ॥ साक्षी नित्यचैतन्यस्वभावः ॥ सिद्ध इत्युपसंहरति ॥ चैतन्यस्वरूपस्येति ॥ उक्तमेवार्थमुपपु
क्त्यंतरेणोपपादयितुं शङ्कामुद्भावयति ॥ नन्विति ॥ उत्तरं संग्रहेणाह ॥ नव्याहतत्वादिति ॥ व्याहतत्वमेव प्रपञ्चपूर्व १०
कं विवृणोति ॥ कथमित्यादिना ॥ न दिदृक्षितिपुनः ॥ शिष्यः प्रश्नः ॥ ॥

पेक्षिपये प्रमाणत्वेन तत्त्वेनिश्चयफलव्यापारात्मत्वं प्रमातृत्वे वा तादृग्व्यापाराश्रयत्वेन वा न प्रमाणापेक्ष्यापरमा
त्रपेक्षा वास्तीत्यर्थः ॥ अयं भावः ॥ अन्तःकरणवृत्तिविशिष्टं हि चैतन्यं प्रमाणमिष्यते वृत्तिमदन्तःकरणप्रतिबिंबि
तं प्रमातृ तदुभयं प्रमेयावभाससमयेनावभासमानं भवति तथा समानेति प्रमेयस्यैव स्वतः स्फुरणान्न काचपातादिदोष

यथा प्रकाशानमुद्रमत्वं वा जोहो द्रकादिषु परतोपेक्ष्यते अग्न्यादित्या
दिष्वेतत्स्वभावत्वान्नाग्न्यादित्यानां तदपेक्ष्या सर्वदा तत्स्वभावात् ॥

प्रसंगात् ॥ तदवभासकान्तप्रमात्रन्तरात्प्रमाणान्तराद्वा भवति ॥ अनवस्थाप्रसंगादनुपपत्तेश्चेत्यतः ॥ स्वप्रकाशात्
येव प्रमातृप्रमाणप्रमेयानामवभासकस्यात्मनः ॥ सिद्धिरिति ॥ तस्य सिद्धानित्यस्वप्रकाशाकटस्य चिदात्मतेति ॥ ॥

प्र.प.स. २९ अप्रकाशस्वभावत्वस्यैव प्रकाशकांतरापेक्षा न प्रकाशस्वभावस्येत्युक्तमर्थं दृष्टांतोक्त्या बुद्धिमारोहयति ॥ य गद्य.१
था प्रकाशनमिति ॥ ननु संविदः ॥ प्रमाणफलत्वप्रसिद्धेः ॥ कथं नित्यत्वमित्याशंक्य नित्यत्वं वेति ॥ अर्थावग
तिर्हि प्रमा न तस्य स्वरूपतो वा नित्यत्वे कल्पकमस्तीति समाधत्ते ॥ नावगतेरिति ॥ संग्रहं विवृणोति ॥ न हीति च स्तु

अनित्यत्वेन वा प्रमा स्यान्नित्यत्व इति चेन्नावगतेर्नित्यत्वानित्यत्व
योर्विशेषानुपपत्तेः ॥ न ह्यवगतेः

रादिद्वारकबुद्धिवृत्तिव्यङ्ग्याया अवगतेः ॥ प्रमात्वे प्रतीति नित्यायाः ॥ प्रमात्वं न भवत्यनित्याया एव भवतीति ॥ विशे
षो न हि गम्यते विनिगमनाभावादित्यर्थः ॥ तत्र विनिगमनाभावो सिद्ध इति शिष्याः शंकते ॥ अनित्याया इति ॥ ॥ १२

अवगतेर्नित्यत्वे कारकव्यापारवैयर्थ्यं स्यादित्येवं विशेष इत्यर्थः ॥ प्रमातुः स्वावगतेर्नित्यत्वे प्रमाणव्यापार
वैयर्थ्यमापाद्यते किं वा विषयावगतेर्नित्यत्वे ॥ नाद्य इत्युपपत्तेरित्याह ॥ सिद्धा तु हीति ॥ नित्यावगतिपक्षे प्रमाणने
रपेक्ष्यं चेत्तथापि नुमन्यते तर्हि प्रमातुरात्मनः ॥ स्वरूपस्यापि स्वतः ॥ सिद्धिः ॥ स्वप्रकाशत्ता प्रमाणनिरपेक्षतयैवा

प्रमात्विनित्यावगतिः ॥ प्रमाननित्येति विशेषो वगम्यते नित्यायां
प्रमातुरपेक्षाभावो नित्यायां तु यत्नान्तरितत्वादवगतिरपेक्ष्यत इति
विशेषः स्यादिति चेत्पिशानह्यात्मनः प्रमातुः स्वतः ॥ ॥ ॥

इत्यर्थः ॥ अदित्यस्यापि प्रकाशस्य च जडत्वादात्मत्वानुपपत्तेरित्यभिप्रायः ॥ तत्वात्म प्रमाणानित्यचाद्यदि प्र
माणानपेक्ष्या न हि प्रमाभावस्यैव तत्र नित्यत्वात्प्रमाणानपेक्ष्या किं न स्यादिति शंकते ॥ प्रमावेपीति ॥ ॥ ॥

उप·स· प्रमाभावेपीत्यर्थः॥ परिहरति॥ नावगतेरिति॥ अवगतेरात्मनिराद्भावादेव प्रमाणानपेक्षात्मह्यवगत्यभावत्वो गद्य·१
३० कार्योमहतस्यसंघातमात्रिणश्चिति॥ मत्वोपपादनादित्यर्थः॥ अथवा आत्मसिद्धिः॥ प्रमाणांतनापेक्ष्यतइति॥ वदु
ताप्रमाणाभावमपेक्षतइत्युक्तं॥ स्यादितिमत्वातदपेक्षोपितवनोपपद्यते॥ आत्मसिद्धेर्नित्यत्वादेवेति॥ नांकते

सिद्धिप्रमाणानिरपेक्ष्यतयैवेति अभावेप्यपेक्ष्याभावोनित्यत्वा
द्वेवेतिचेन्नावगतेरेवात्मनिसद्भावादितिपरिहृतमेतत्॥ ॥

अभावेपीति॥ स्वतःसिद्धिप्रमाणैनैरपेक्ष्यमाद्याभ्यांसर्वानपेक्षप्रकाशमानात्मस्वरूपस्यैवविवक्षितत्वान्ना ७३
त्रत्रांकावकाशइतिपरिहरतिनावगतेरिति॥ इदानींप्रमातुः॥

स्वसिद्धिर्निरपेक्षैवेत्येतद्विपक्ष्यबाधकोपन्यासेन साधयन्नित्यायाअपिप्रपमायाविवक्षावगातित्वसिद्धये
विषयस्यत्वंसंपादयितुंप्रमाणव्यापारोपेक्ष्यास्तीतिनिश्चयन्नन्तरमयाकरोति॥ प्रमातुश्चेदित्यादिना॥ अयम
र्थः॥ सर्ववस्तुज्ञाततयाज्ञाततयावासाक्षिचैतन्यस्यविषयएवइति॥ स्थितेकदाचिदज्ञातत्वेननिर्विकल्पकसाक्ष्य

प्रमातुश्चेत्प्रमाणापेक्षासिद्धिःकस्यप्रमित्यास्याद्यस्यप्रमित्या
सएवप्रमाताभ्युपगम्यते॥ तदीयाचप्रमितिःप्रमेयविषयैवनप्र
मातृविषया॥ ॥

वगतस्याज्ञातत्वव्यवहारसिद्धयेयस्यप्रमित्योत्पद्यते॥ सएवतदीप्रमाताप्रमाणव्यापाराश्रयइत्युच्यते॥ तत्र
प्रमातुः॥ स्वरूपसिद्धिश्चेत्प्रमाणापेक्ष्यास्यात्तदाकस्यप्रमित्यास्यात्तस्यैववान्यस्यवाप्रमातुर्मिह्याचस्वविषयान्य

उप॰स॰ ३१ विषयाता सर्वथापि नोपपद्यत इति॥ तत्रेच्छाश्रयस्येच्छागोचरत्वं निराकुर्वन्नस्य प्रमातृकत्वमात्मनो निराकरोति गद्य॰१
॥ तदीयाचेति॥ कर्मविषयान कृतौ विषये इत्यर्थः॥ कर्तृत्वकर्मादिकं न स्यादित्याशंक्यैकस्यां क्रियायामेकस्यैव गु-
णप्रधानभावेन कर्तृचिद्विरुद्धं इत्यर्थवैरूप्यप्रसंगान्नैवमित्यभिप्रेत्यानन्यप्रमातृकत्वेस्य यमसिद्धस्यान्यसा

प्रमातृविषयत्वेनवस्थाप्रसंगात् प्रमातृप्रमातुरीश्वरीच्छाया
स्याप्यन्यः प्रमाता तस्याप्यन्यः॥ इत्येवमेवेच्छायाः प्रमातृविषयत्वे॥

धकत्वानुपपत्तेरकरणस्य च निर्जीनतया साधकत्वासंभवात्स्यापि सिद्धावस्थापेक्षायां तस्यापि तथात्वमित्यन ७४
वस्थामाह॥ प्रमातृविषयत्व इति॥ प्रमातृरनवस्थामभिनयति॥ अप्यन्य इति॥ उक्तमनवस्थानि॥ १॥ इच्छामति
दिशति॥ एवमेवेति॥ २॥ ॥ ॥

आत्मनो प्रमेयत्वे हेत्वंतरमाह॥ प्रमातुरिति॥ एतदेव स्पष्टयति॥ लोके हीति॥ इच्छाजन्मव्यवहितमिष्यमाणं भवा
तेष्मृतिजन्मव्यवहितं स्मर्तव्यं प्रयत्नजन्मव्यवहितं च क्रियासाध्यं प्रयतितव्यं प्रमाकरणव्यापारोत्पत्तिकं॥ वहितं
प्रमेयमिति लोकप्रसिद्धमित्यर्थः॥ सिध्यतीति॥ निष्पत्तिप्रकाशयोर्निर्देशः॥ अन्वयमुक्त्वा व्यतिरेकमाह॥ नान्य

प्रमातुरात्मनोव्यवहितत्वाच्च प्रमेयत्वानुपपत्तेः॥ लोके हि प्रमेयं
नाम प्रमातुरिच्छास्मृतिप्रयत्नप्रमाणजन्मव्यवहितं सिध्यति नान्य
थावगतिः॥ प्रमेयविषया दृष्टा न च प्रमातुः॥

थेति॥ अवगतिर्ज्ञानं स्वप्रकाशप्राप्तिः॥ साधकरणमुखस्यापि प्रमेयसिद्धिप्रसंगादिति भावः॥ तर्हि प्रमातुरपि
सिद्धिरिच्छादिजन्मव्यवहितैव भवतु नेत्याह॥ न चेति॥ स्वयमेव प्रमाता स्वस्यैव चेत्॥ प्रमातुरिच्छादीनामन्यतमेनापि
व्यवहितः॥ कस्यापि तु न च केनचिदुच्यत इत्यन्वयः॥ तत्र हेतुमाह॥ स्मृतिश्चेत्यादिना॥ स्मृतीच्छयोः॥ ॥ ॥

उप॰स॰ स्वाश्रयविषयकत्वेबाधकत्वेबाधकमाह॥ स्मृतीच्छावद्विषयत्वेहीति॥ स्मृत्वाचइच्छावांश्चस्मृतीच्छावंतौतौविष गद्य॰१
३२ योपयोर्भावः॥ स्मृतीच्छावद्विषयत्वंतस्मिन्नितिव्यग्रहः॥ उभयोस्मृतीच्छयोरित्यर्थः॥ स्मृतुः॥ स्वरूत्तिव्याप्यत्वायो

स्म॰

प्रमातास्वस्यस्वयमेवेकेनचिद्व्यवहितःशक्यःकल्पयितुमिच्छादी
नानामन्यतेमेनापिस्मृतिश्चेतव्यविषयोनस्मृत्तविषयातयेवाप्या
द्दृष्टविषयत्वमेवनेच्छावद्विषयत्वं॥ स्मृतीच्छावद्विषयत्वेहतुभवोपो
रनवस्थापूर्ववदपरिहार्यास्यात्॥ ॥

तुस्मर्त्रंतरस्मृतिविषयतावक्तव्यात्याचैकस्मिन्नात्मनिस्मर्त्रंतराभ्युपगमेतस्यापिपूर्वप्रमातयोगत्वेमत ३५
यास्मृत्यनवस्थास्यादित्यर्थः॥ तुच्छमिच्छायाः॥ प्रयत्नस्येतिद्रष्टव्यं॥ ॥

तदेवमात्मनितप्रमाणव्यापारापेक्षत्वात्प्रमातुः॥ स्वविषयप्रमाणक्रियाश्रयत्वायोगात्प्रमात्रंतरकल्पना
वामनवस्थानादप्रमेयत्वात्मासिध्यति॥ तस्यचग्राह्यविषयावच्छेदायप्रमाणव्यापारापेक्षासंभवान्नतद्वैयर्थ्यमि
ति॥ चोक्त्यावगतेः॥ स्वतोनित्यत्वमाधितंइदानींप्रकारांतरेणतदेवसाधयितुंपूर्वपक्षयति॥ प्रमातृविषयेति॥

प्रमातृविषयावगत्यनुत्पत्तावनवगतएवप्रमातास्यादिति॥ चेन्ना
वगंतुरवगतेरवगतत्वाविषयत्वादवगतविषयत्वेचानवस्थापूर्ववत्॥
त्मादवगतिस्वात्मनिकूटस्थनित्यात्मज्योतिरत्यतोनपेक्षतेवसि
द्धिमात्मादित्याशुद्धप्रकाशावदितिपूर्वमेवप्रसाधितमतम्॥ ॥ ॥

यद्विषयावगतिरुत्पद्यतेसोवगतः॥ सिद्धइतिचोच्यते॥ प्रमातुस्त्वावगत्यानुत्पत्तौप्रमातानुपपन्नएवमसत्स्या
दित्यर्थः॥ तत्रद्विकिंखपुष्पसाम्यपरिहारायात्मनोवगतिविषयत्वंवक्तव्यमित्यभिप्रायः॥ किंवाखपुष्पसाम्यप
रिहारमात्रंवक्तव्यमिति॥ तत्राद्यइत्याह॥ नागंतुरिति॥

ऽवगंतुरवगतिविषयत्वे स्वात्मन्यावगति॥ व्याप्यत्वायोगादेव तंत्रे तदवगतिविषयत्वं वाच्यं तथा चानवस्थापू
र्ववत्स्मृतीच्छादिविषयत्ववत्स्यादित्यर्थः॥ द्वितीयं प्रत्याह॥ ऽवगतिश्चेति॥ ऽनुत्राय पुरुषः॥ स्वयंज्योतिरात्मैवा
त्मज्योतिरेवोऽस्येत्युपलोकः॥ न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्यादि॥ श्रुतेरात्मनोऽनित्यत्वप्रकाशस्वभावत्वा

वगतेश्चैतन्यात्मज्योतिषः॥ स्वात्मन्यनित्यत्वेऽप्यात्मनः स्वार्थ
त्वानुपपत्तिकार्यकारणसंघातवत्संहतत्वात्परार्थ्यदोषवत्त्वं
चावोचाम॥

वगमादयुक्तमप्रकाशत्ववदनुभवावगतिरूपेऽवगन्तुं त्वस्यापेक्षाभावान्न पुनः प्रनुत्पत्तानेत्येत्तिभावः॥ विपक्षे
चोक्तदोषं स्मारयति॥ ऽवगतेश्चैतन्यात्मज्योतिष इति॥ उक्तमेवानुपपत्तिप्रश्नपूर्वकमुपन्यस्यति॥ ॥ ॥

कस्मादित्यादिना स्मृत्यादेः स्मृतीच्छादिरूपाद्यवधानाद्धि तु सच्चैतन्यज्योतिषः॥ सांतरत्वमिच्छादिरूपसंतरपूर्व
कत्वमित्यर्थः॥ किं तत्र स्यात्तदाह॥ ततश्चेति॥ ऽआत्मावगतौ तु कश्चित्प्रकाशविषयः॥ स्यात्तदा संहतः॥ परा

कथं चैतन्यात्मज्योतिषः॥ स्वात्मन्यनित्यत्वस्मृत्यादेर्व्यवधानात्सांत
रत्वं ततश्चानस्य चैतन्यज्योतिषः प्रागुत्पन्नः॥ प्रध्वंसाभावो ह्यात्मन्या
भावाच्च हृदादीनामिव संहतत्वात्पारार्थ्यं स्यात्॥ यदा चैतदुत्पत्त
मात्मनि विद्यते नैवं संभवति तदात्मनः॥ स्वार्थत्वं तदा वा भावोपपद्य
ह्यात्मनात्मनो परार्थत्वस्वार्थत्वसिद्धिः

र्थस्य स्यादिंद्रियांतःकरणजालादिवदिति॥ फलितमाह॥ यदा चेति॥ चैतन्यज्योतिषः स्वार्थः॥ यदा चात्म
नि तदुत्पत्त्यादि विद्यते॥ तदा नैवमात्मनः॥ स्वार्थत्वमनवेतीत्यन्वयः॥ तत्र हेतुमाह॥ तद्भावेति॥ ॥ ॥

उ.प.स. २४ तत्प्रसंहतत्वस्वभावाभावो योगं तु कश्चित्प्रकारागमस्यानात्मत्वनियमान्तरस्य च पारमार्थिकद्विज इत्यत आत्मनित्य ग.घ्र.१
चैतन्यस्वस्वरूपावमत्सदेवावभासत इत्युपसंहरति॥ तस्मादिति॥ इदानीं नित्यचैतन्यस्वरूपत्वे प्रमातृत्वानु

तस्मादात्मनोऽन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धं॥ नन्वेवं सत्यपि
प्रमाश्रयत्वे कथं प्रमातृः प्रमातृत्वमुच्यते प्रमायां नित्यत्वे नित्यत्वे च रूपविशे
षाभावादवगतिर्हि प्रमातृस्याः स्मृतीच्छादिपूर्विकाया अनित्यायाः कूटस्थनित्या
यावान्न स्वरूपविशेषो विद्यते॥ ॥

पपत्तिं शंकते॥ नन्विति॥ जन्यप्रमाश्रयत्वान्नावपि प्रमातृत्वव्यपदेशोऽप्युपपद्यत इति परिहरति॥ उच्यत इत्या ७१
दिना॥ रूपविशेषः॥ स्वरूप॥ विशेषः संहैयग्रहं विवृणोति॥ अवगतिर्हीति॥ तत्र दृष्टान्तमाह॥ ययेति॥ ॥ ॥

निवृत्तिर्न चलत्वेऽपि नोपपद्यते॥ न च किंचिद्विकृतिपूर्वकमेवाचलं भवति॥ यथा जंगमजातं किंचिच्चलमेव सदा
यथा स्थावरजातं तु न प्रयच्छति इति व्यपदेशो नैव कश्चिद्विशेषो वगम्यते तथा प्रमातेति नित्यप्रमाश्रयत्वेऽपि व्यपदेशो
न विरुध्यत इत्यर्थः॥ फलप्रमान्या॥ द्वितीति फलस्वरूपे प्रमायां विशेषाभावादित्यर्थः॥ अयमाशयः॥ प्रमाणफ

यथा धात्वर्थस्थितिवृत्त्यादेः फलस्यागन्तुहि पूर्वकस्यानित्यस्यापूर्वस्थिति
त्यस्यावा स्वरूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टस्तिष्ठति मनुष्यास्तिष्ठति
पर्वता इत्यादि तथा नित्यावगतिस्वरूपेऽपि प्रमातरि प्रमातृव्यपदेशो न विरु
ध्यते फलप्रमाणोन्यादिति॥

तं हि प्रमासा च स्थितप्रकाशरूपा प्रमातृगतैव वक्तव्या अन्यथा विषयगतत्वे मयेदं विदितमिति॥ स्वात्म॥
निष्ठानतेयस्वं वं भानुभवानुपपत्तेः॥ जड इत्याचां तः॥ करणादेर्व्यापाराश्रयत्वेऽपि चिदा॥ अयत्वायोगात्प्रमात
त्वानुपपत्तेश्चिदात्मनस्तु कूटस्थत्वात् व्यापारवत्त्वायोगात्प्रमातृतिकर्तृत्वानु॥ ॥ श्रीरामायनमः॥ ॥

उप. स. पपत्तेर्मुख्यया वृत्त्या जडाजडयोरनयोरपि प्रमातृत्वव्यपदेशायोग्यत्वात्परस्पराध्यासेन व्यवहारप्रवृत्तेर्मिथ्यैवा ग. प्र. १
३९ त्मनो बाह्यविषयेपि प्रमातृत्वमिति॥ स्थितो स्वात्मनि स्वयंप्रकाशस्वभावे कृतः॥ प्रमातृत्वशंकावशेः॥ कुतस्तरामन
३५ वभासप्रसंगः॥ कुतस्तमां च प्रमाणापेक्षेति॥ एवं कूटस्थनित्यचैतन्यज्योतिषोतः॥ करणोपाधिसंबंधप्राप्तमोपाधि

अत्राह शिष्यो नित्यावगतिस्वरूपस्यात्मनो विक्रियत्वात्कार्यकरणैरसंहतस्य तद्दा
दिनामिव वास्यादिभिः॥ कर्तृत्वं नोपपद्यते॥ ॥

कं प्रमातृत्वमुपपाद्येदानीं कर्तृत्वमपि तथैवेति प्रतिपादयितुं चोद्यमुत्थापयति॥ अत्राहेति॥ तक्ष्यादीनामिवेति व्य १८
तिरेकदृष्टांतः॥ तक्षाकाष्ठवर्धकः॥ वासीतदायुधविशेषः॥ कस्मान्नोपपद्यत इत्यत आहासंहतस्वभावस्येति॥ तक्ष्या
दिदृष्टांतं विवृणोति॥ तक्षादीनां त्विति॥ ॥

अनवस्थानस्यादिति संबंधः॥ इति शिष्यः शंकासमाप्यर्थः॥ असंहतस्य कर्तृत्वादर्शनादात्मनोपि संहतत्वं सिसाधयि
षितं॥ किं वा वस्तुतस्तस्य कर्तृत्वाभाव इति वक्तव्यं॥ तत्राद्यः॥ पक्षे आत्मनः॥ कूटस्थत्वसाधनेनैवोपादितत्वादन
वसरदुस्थ इति॥ मत्वाद्वितीयपक्षं गीकरोति॥ असंहतस्वभावस्य करणानुपादाने इति॥ स्वातंत्र्येकर्तृत्वे सतीत्यर्थः

असंहतस्वभावस्य च कार्यकरणोपादानेनवस्था प्रसज्यते॥ तक्षादी
नां तु कार्यकरणैर्नित्यमेव संहतत्वमिति वास्याद्युपादानेनानवस्थास्या
दिति॥

॥ अयं भावः॥ कर्तृत्वं क्वचित्करणोपादानसाध्यं क्वचित्तु स्वसान्निध्यमात्रनिबंधनं तत्र करणोपादानसाध्ये
कर्तृत्वे वस्तुत आत्मनः करणोपादानासंभवात्कर्तृत्वाभावः॥ परमार्थिकः॥ तथापि लौकिकमायावीव द्वैज
क्वात्मनः॥ कर्तृत्वप्रतिभासो मायया प्रत्युपस्थापितोत॥ ॥

उप.स. करणविकाराविवेकादुपपद्यते॥ द्वितीयं तु तत्त्वज्ञस्यात्मनः॥ स्वतस्तावदिद्यापरवितत्त्वरूपे कर्तृत्वे सत्यमात्रसंनिध्या ग.ब.१
३६ तिरिक्तस्य करणादेरभावादात्मनोपि सकलकरणसाहितयासन्निधिमात्रेणैव कर्तृत्वव्यपदेशानुपपद्यत इति
॥ परमार्थतोकर्तृत्वमुपाध्यविवेकात्तत्त्वं व्यपदेशं स्वेति॥ न किंचिन्नावद्यमिति॥ तथा च पारमर्षसूत्रद्वयं कर्त्तात्मा॥

इहत्वसंहतस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति करण
मुपादेयं तदुपादानमपि विक्रियैव ति॥ तत्कर्तृत्वे करणांतरमुपादेयं
तदुपादानेप्यन्यदिति॥ ह्यामातुः स्वातंत्र्येनवस्थापरिहार्यस्यादिति॥

स्वार्थवत्त्वात्॥ यथा च तक्षोभयथेति॥ न ह्यसंहतं चेतनत्वं करिष्यन्त्या केतिकर्ममीमांसकमतमाशंक्य प्रत्याह॥ १८

न च क्रियेति॥ क्रियाशब्दः किं अयत्नवचनस्तद्धापयत्न अर्थवचनो वा तत्राद्यः पूर्ववचनो वेति॥ तिकल्पं दूषयन्
प्रत्याह॥ अनिर्वर्त्तिताया इति॥ न हि स्वयमपि दुः॥ परं साधयतीति न्यायादित्यर्थः॥ नतो ये विदितं निष्पाद्यं निपा
गारव्यमपूर्वविवक्षितमुत पूर्वनिर्वृत्तं यन्त्या धर्माख्यं नाद्यः॥ पूर्वोक्तदूषणानुवृत्तेः॥ न च लिंगादिश्रवणोसमनंत

न च क्रियैवात्मानं कारयति॥ अनिर्वर्त्तितायाः स्वरूपाभावात् यान्यदा
त्मानमपेक्ष्य क्रिया कारयतीति चेत्तन्यस्य स्वतः॥ सिद्धत्वाविषयत्वादा
नुपपत्तेः॥

रं प्रतीयमानाकारं नर्वतयत्यात्मानमिति वाच्यं॥ प्रतीतिकाले यद्यस्तीति बुद्धिस्तदा सिद्धत्व प्रतीते न कारयि
तृत्वं नास्तीति प्रतीतौ वंध्यासुतवन्न कारयितृत्वसाध्यारंभः प्रतीतो च यत्तन्निर्वर्त्तितं न वाच्य प्रेरकत्वसिद्धिरित्य
मि चैत्यद्वितीयमुत्थापयति॥ अपरेति॥ यदन्यत्स्वपूर्वसिद्धं तच्चेतनं चेतनं वा आद्ये न प्रेरकत्वं मनवदित्याह॥ ॥

उ०प०स०
३७

नेत्यादिना॥ आदिना शब्दानुश्वेरकत्वग्रहः॥ तथा चात्मनः॥ कर्तृत्वे सति जन्यत्वरूपस्यादृष्टस्येश्वरकर्तृत्वसिद्धितस्त गद्य०१
त्सिद्धावन्यसिद्धिरित्यन्योन्याश्रय इतिभावः॥ द्वितीयं प्रत्याह॥ नहीति॥ अहमेवचेतनमात्मात्मत्वाच्छब्दादिवदित्य
र्थः॥ स्वप्रमाणकत्वतः॥ सिद्धमितियावत्॥ अतः॥ स्वपक्षासुसंरात्मसापेक्षस्यकृतस्येश्वरकर्तृत्वसंभवेइतिभा

नह्यात्मनोन्यदचेतनंवस्तुस्वप्रमाणकं दृष्टं॥ शब्दादिसर्वमे
वावगतिफलावसानप्रत्ययप्रमितिसिद्धंस्यात्॥ ॥ ॥

वः॥ शब्दादीनामात्मसापेक्षसिद्धिकत्वं एकं वाक्यं स्मारयति शब्दादिसर्वमेवेति॥ एवं मीमांसकशंकां निराकृता ८०
इदानीं देवव्यतिरिक्तोपीश्वरोवगत्याश्रयः॥ ईश्वरकस्यास्तीति॥ ॥

नैयायिकाशंकामपाकुर्वन्नात्मान्यस्याचेतनत्वानुमाने व्यभिचारप्रसक्तिं वारयति॥ अवगतिस्थेदिति॥ ईश्वरो
वस्तुतः आत्मभिन्नो न भवति॥ अवगत्याश्रयत्वात् स्वरूपात्मवदित्यनुमानानुग्रहीतायाः अयमात्मा ब्रह्मेत्यादिश्रुतेरा
त्मनोन्योनचेतनोस्ति सच्चात्मभूत ईश्वरो देहादिभिरसंहरः॥ स्वार्थः॥ स्वातंत्र्योपपरतंत्र इति नक्रियाशेषोत आत्मानः

अवगतिस्थेदात्मनोन्यस्य स्यात्सोप्यात्मैवासंहतः स्वार्थः
स्यान्नपरार्थो॥ नचदेहेंद्रियविषयाणांस्वार्थतावगंतुराकु
लोवगत्यवसानप्रत्ययापेक्षसिद्धिदर्शनान्ननुदेह॥ ॥

॥कर्तृत्वं विश्वममात्रसिद्धमित्यर्थः॥ ईश्वरात्मनो जगत्कर्तृत्वमपि मायाद्वारकमेवेति न क्वापि कर्तृत्वं परमार्थमिति-
भावः॥ ननवगत्याश्रयत्वात् कथं न संहतत्वादिर्यतो देहादेः॥ संहतस्याप्यवगत्याश्रयत्वमस्तीति शंकायतमतमासंक्षा
हः॥

उप.स. नचेति॥ देहादिर्न्नविगन्तात्रयोवगम्यमानत्वाद्घटादिवदित्यर्थः॥ ननु कथं देहादेरवगन्तृत्वमानप्रत्ययापेक्षसिद्धि गद्य.१
३८ कत्वयावता मनुष्योहं पश्यामि जानामीत्यवगन्तृत्वमनुभूयत इत्याशंक्य॥ नन्विति॥ अनुभवमात्रमंगीकरोति॥ बाढ
मि॥ न्यायमनुभवे॥ स्वनिबंधनः॥ किंतु॥ देहात्मनोरविवेकनिबंधन इति प्रत्याययति॥ जाग्रत्सेवरावस्यादित्यादिना॥ य

स्यावमतौ न कश्चित्प्रत्यक्षादिप्रत्ययांतरमपेक्षते॥ बाढं जा
यग्रत्स्वेवावंस्यात्मतमुत्तयोस्तु देहस्यापि प्रत्यक्षादिप्रमाणा
पेक्षयैव सिद्धिः॥ ॥ ॥

दिर्देहः॥ स्वयंप्रकाशस्वभावः स्यात्तदा स्वसत्तायां प्रमाणनिरपेक्षस्वभावत्वात्॥ सुषुप्तिमरणावस्थास्यापि प्रमा ८१
णानपेक्षसिद्धित्वं स्यान्नचैवमस्ति तस्माद्देवेतनो देह इत्यर्थः॥ देहवदन्यायमिंद्रियादावतिदिशति॥ ॥श्रीराम॥

तथेंद्रियाणामिति॥ तथा देहवत्प्रमाणापेक्षयैवमितिरित्यर्थः॥ किंच॥ देहादिरनात्मा भौतिकत्वाद्बाह्यवदित्याहस्य
बाह्यएवहीति॥ नूतान्येव ग्राह्यग्राहककरणतया सयतनपत्वेन गुणप्रतेउपकार्योपकारकभावेन मिथः॥ संह
तानाम समानयोनित्वमितिपमाद्दिति भावः॥ ननु ते सिद्धिरिति निष्पन्निरुच्यते सा न प्रत्यक्षाद्यपेक्षेति तत्राह॥ सिद्धिरिति

तथेंद्रियाणां बाह्याणां बहिर्न्नाद्यो देहेंद्रियाकारपरिणता इ
ति प्रत्यक्षादिप्रमाणापेक्षयैव हि सिद्धिः सिद्धिरिति च प्रमाणफ
लमवगतिमवोचाम॥ सा चावगतिः कूटस्था स्वतःसिद्धात्मज्यो
तिःस्वरूपेति॥ अन्नादचोदकोवगतिः प्रमाणानां फलं कूटस्थ

चेति देहाकारपरिणतेषु भूतेषु मदराज्ञिव दवगतिरुत्पद्यत इति तस्या अपि भौतिकत्वमविशिष्टमिति लोकाय
तिकशंकामपाकुर्वन्नवगतिस्वरूपमाह॥ सा चेति॥ इति चावोमेत्यनुषंगः॥ अवगतिः॥ कूटस्थत्वे तस्याः॥ ॥

उप॰स॰ ३९ फलत्वप्रसिद्धिविरोधं शंकते॥ अत्राहेति॥ अकार्यरूपाया अपवगतेः॥ कार्यत्वं रूपकाराकार्यत्ववदुपचर्यतइ गद्य॰१
तिन फलत्वप्रसिद्धिविरोध इति परिहरति इत्युक्तवंतत्राह॥ न विप्रतिषिद्धमिति॥ उपचारनिमित्तं पृच्छति॥ कथंतर्ही

त्यात्मज्योतिःस्वरूपेति विप्रतिषिद्धमित्युक्तवंतत्राह॥ नविप्र
तिषिद्धं कथं तर्हि ह्युक्तं॥ टस्यानित्यापि सती प्रत्यक्त्वादिप्रत्ययांते लक्ष्य
ते॥ तादर्थ्यात् प्रत्यक्त्वादिप्रत्ययस्यानित्यत्वे अनित्येव भवति तेन
प्रमाणानां फलमित्युपचर्यते॥

तिउत्तरमाह॥ कूटस्थेति॥ तादर्थ्यादिति॥ प्रत्यक्त्वादिप्रत्ययस्य बुद्धिवृत्तेष यसंस्कृतयावगत्याभिव्यक्तत्वा ८२
दित्यर्थः॥ प्रथाहीति॥ एवं द्रष्टस्यापेक्षत्वेन मायामयत्वे॥

तदेवं कूटस्थावगतिरूपे आत्मनि प्रमातृत्वं कर्तृत्वं फलत्वं च कल्पनामात्रमित्युपपादितं॥ संहतस्य च देहादेर्वि
षयपर्यंतस्य पारार्थ्यं जाड्यं पराधीनसिद्धिकत्वं चोक्तं॥ इदानीमेवमात्मानात्मनोरवगमितं तत्वमेवगम्यप्राप्तिश्च स्वा
वगतमर्थं गुरुं प्रति निवेदयन्नद्वैतत्वं कूटस्थात्मनः॥ संभावयितुं द्वैतस्य मृषात्वं प्रकटयति॥ यद्येवं भगवन्नित्यादि

यद्येवं भगवन् कूटस्थानित्यावमतिरात्मज्योतिःस्वरूपैव स्व
यं सिद्धात्मनि प्रमाणनिरपेक्षत्वात् ततोन्यदचेतनं संहत्यकारित्वा
त्परार्थं॥ येन च सुखदुःखमोहप्रत्ययावगमः॥ ॥ ॥

ता॥ हे भगवन्॥ यद्येवं प्रत्यगात्मतत्त्वं कूटस्थत्वादिविशेषणावगत्यात्मकं तर्हि न प्रमातृत्वादिधर्मकं यतो
तः प्रमाणनिरपेक्षत्वात् परमार्थतः॥ प्रमातुरभावे प्रमाणस्याप्यभावात् निरपेक्षसिद्धिकं यतः॥ प्रत्यगात्मनोन्य
दचेतनं परस्परोपकार्योपकारकभावेन संहत्य व्यवहारप्रवर्तत्वात् परार्थं चैतन्यप्रचैतन्यः॥ ॥श्रीरामः॥ ॥

उप.स. ५० प्रतिभासमानं सिद्धं स्वप्नदृष्टवदनृतमित्यर्थः॥ ननु सुखदुःखमोहान्वयित्वेन दृश्यस्य सत्त्वरजः॥ तमोरूपप्रकृ- गद्य.१
तिकार्यत्वावगमात्कथमनृतत्वमिति सांख्याशंकामपाकरोति॥ येनेति॥ येन दृश्यमानाकारेण सुखदुःखमोह-
हेतुप्रत्ययावगतिरूपेण जडं परार्थं भोक्तृभोग्यवत्प्रतीयते तेनैव रूपेणात्मनः॥ स्वस्य दृश्यस्येति यावत्॥ अस्ति-

तिरूपेण परार्थं तेनैव स्वरूपेणात्मनोऽस्तित्वं नान्येन रूपांतरेण।
तो नास्तित्वमेव परमार्थतो॥ ॥

त्वं मज्ञावो नान्येन सत्त्वाद्यात्मना रूपांतरेण तत्र प्रमाणाभावादतः॥ परमार्थतो नास्तित्वमेव दृश्यस्येत्यर्थः॥ किं- ८३
च॥ विभंतजाग्रत्स्वप्नावस्थां दृश्यनामंगतिव्यतिरेकेण क्वचिदपि परमार्थसत् दृश्यत्वाज्जडत्वात्॥ वा रज्जुसर्-
पादिवदित्याह॥ यथाहीति॥ ॥

एवं दृश्यस्य मायोपेतत्वेन मायामयत्वे संभाविते दृष्टतत्त्वमद्वैतमनुभवारूढं मम संवृत्तमित्याह॥ एवमेवेति॥ एवं सतीत्य-
र्थः॥ नैरंतर्याभावादेवेत्येवकारो योज्यः॥ अथवा यथाद्वैतस्य दृश्यत्वेन रूपेण परमार्थतोऽसत्त्वमनुभूयते॥ मया त-
वमेव भगवन्नवगत्यात्मकस्य प्रत्यक्प्रकाशस्य कूटस्थ्यातिस्थताद्वैतभावस्थसयानुभूयत इत्यध्याहारः॥ कूटस्थ-

यथा हि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेणाभावो दृ-
ष्टः॥ एवं जाग्रत्स्वप्नद्वैतभावस्यापि तदवगतिव्यतिरेकेणाभावो युक्त एव
मेव परमार्थतः भगवन्नवगतेरात्मज्योतिषो नैरंतर्याभावात् कूटस्थति
त्यताद्वैतभावश्च॥ सर्वप्रत्ययभेदेष्वव्यभिचारात्॥ ॥ ॥

नित्यतायां हेतुर्नैरंतर्याभावादिति॥ उत्पत्त्यादिमात्तिण उत्पत्त्यादिविकारस्यांतरायस्यासंभवादित्यर्थः॥ अद्वैत-
भावे हेतुमाह॥ सर्वप्रत्ययेति॥ व्यावर्त्तमानेषु प्रत्ययेष्वव्यावर्त्तनेरित्यर्थः॥

उप॰स॰ ननु कुसुमेषु सूत्रवद्व्यावृत्तानुवृत्तावप्यवगत्यात्मनो नाद्वैतत्वसिद्धि॥ प्रत्ययानां कुसुमवद्व्यभिचरितत्वादित्या गद्य॰१
४१ शंक्यावगतिव्यावृत्तानामसत्त्वमेतत् सत्त्वे मानाभावान्नैवमित्याभिप्रेत्याह॥ प्रत्ययभेदाश्चेति॥ विमता जाग्रत्प्र

प्रत्ययभेदास्त्ववगतिं व्यभिचरंति यथा स्वप्ने नीलपीताद्याकारभेदरू
पाः प्रत्ययास्तद्वगतिस्वरूपं व्यभिचरंतः परमार्थतो न संतीत्युच्यंते॥ ए
वं जाग्रत्यपि नीलपीतादिप्रत्ययभेदास्तु स्वामेवागं वगतिं व्यभिचरंतोऽस
त्यरूपाः भवितुमर्हंति॥

त्ययाः॥ परमार्थतो न विद्यंतेऽन्यप्रकाशत्वव्यभिचारित्वाद्य एवं तदेवं यथा स्वाप्रत्ययास्तथा चेमे तस्मात्तथे ८४
ति॥ समुदायार्थः॥

द्वैतस्य मिथ्यात्वे तस्य दृश्यत्वं व्यभिचारित्वं च कारणमुक्तं तच्चैतन्यस्वरूपेऽप्यात्मनि नास्तीत्यात्मनः सत्यत्वं हृ
दयनित्यत्वं न सिद्धमित्याह॥ तस्याः स्वावगतेरिति॥ योवगंता सर्वावस्थास्विति तेरवगंतुरवगम्यमानत्वाभावादव
गम्यस्य चात्मनात्वाक्षरात्मोऽर्थः॥ एतेनात्मनो पादेयो न हेयश्चान्यस्य चाभावात्तु मिहं त्वं तं वा हा हि दर्शनी मसीति चे

तस्याः स्वावगतेरन्यो वगंता नास्तीति न स्वेन रूपेण स्वयमुपादातुं
हातुं वाशक्यतेऽन्यस्य चाभावान्न स्वयैवेत्यर्थो विद्यापन्निमित्तः सं
सारो जाग्रत्स्वप्नलक्षणस्तस्याः ऽविद्यापाविद्यानिवर्त्तकत्वेवं तम
पं प्राप्तो विनातः॥ परं जाग्रत्स्वप्नदुः

पः॥ एवं शिष्येणोक्तं गुरुरनुजानाति॥ तथैवेति॥ प्रकरणोपक्रमे एवं विद्याविद्यास्वरूपं तद्विभागं सप्रपंचमुप
संहरति॥ एषा विद्योत्पादिना॥ यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणः॥

उप॰स॰ णाविद्येतं त्यन्वयः॥ विद्यावेद्यां तमहावाक्यजन्यप्रत्ययाभिव्यक्तकूटस्थात्मप्रकाशरूपेत्यर्थः॥ तया च विद्यातद्वे गद्य॰१
४२ दानीं संवृत्तेति कृतकृत्यस्त्वमिति शिष्यं प्रत्याह॥ गुरुरित्येवमिति॥ गुरुणोक्तः शिष्योप्यनुमन्यतर्जुमितीति॥ इतिप्राह

स्त्वमनुभविष्यसि संसारदुःखान्मुक्तोसीत्योमिति॥ इति
ऽवगतिप्रकरणम्॥२॥

प्रकरणसमाप्तिद्योतनार्थः॥ इति कूटस्थाद्वयात्मबोधनामकं प्रकरणं विवृत्तम्॥ यथोक्तविद्यावतः॥ ॥ ॥ ८५

कृतकृत्यत्वान्न किंचिदुपदिश्यतोनुतेयमस्तीत्युपपादितं तत्र यद्येवं विज्ञानवतामपि केषांचिद्देहदर्शनं वासन
वशान्निवर्तस्य प्रदीपवन्निस्तब्ध विज्ञानमनवर्तितद्वा तेषां ज्ञानदार्ढ्याय परिसंख्यानं नाम वक्ष्यमाणमनुचिंतनमनु
ष्ठेयमुपदेष्टुमारभते॥ मुमुक्षूणामित्यादिना॥ मुमुक्षूणां परममुपन्नामपि च्युतामित्यर्थः॥ अविद्यामूलकत्वात्कर्मणा

मुमुक्षूणामुपात्तपुण्यापुण्यक्षपणपराणामपूर्वानुपचयार्थिनां परिसं
ख्यानमिदमुच्यते॥ अविद्याहेतवो दोषा वाङ्मनःकायप्रवृत्तिहेतवः प्र
वृत्तेश्चेष्टानिष्टमिश्रफ॥

तन्निवृत्तिमंतरेणात्यंतिकनिवृत्त्यसंभवात्पूर्वोपार्जितकर्मोच्छेदपूर्वकमनुपजनस्याविद्यानिवृत्त्यैवोपपत्तेः
इत्यविद्यानिवृत्तिद्वारा तदुभयमिच्छतामित्युत्तरविशेषणद्वयस्यार्थः॥ परिसंख्यानानुष्ठानप्रयोजनमाह॥ अवि
द्याहेतव इति॥ अविद्याहेतुर्निदानं येषां ते तथा दोषा रागद्वेषादयः॥

उप॰स॰ तेच वागादीनां व्यापारोत्पाद्यन्ते तत्तव्यापारास्य द्विविधं कर्मजातं शास्त्रीयं स्वाभाविकं च देवतिर्यङ्मनुष्यत्वप्रा गद्य॰१
५२ पचीयत इति॥ यतो तस्तन्नमो हार्थमविद्यारागादिनिबंधनकर्मतत्फलसंगतिरूपत्वमर्थं परिसंख्यानेकार्यमित्यर्थ

जानिकर्माण्युपचीयंत इति तन्मोहार्थं॥ तत्र शब्दस्य
शुद्धरूपसंसर्गधर्मानां विषयात्तो॥

ः॥ परिसंख्यानप्रकारं सोपस्करं निरूपयति॥ तत्रेत्यादिना॥ तत्र प्रथममात्मानात्मनोर्विविच्यानु ८६
सद्धीतेत्युपदिशंस्तद्विवेकप्रकारमाह॥ शब्दस्पर्शेत्यादिना॥ विषयत्वहेतुः॥ श्रोत्रादिग्राह्यत्वादिति॥॥

स्वात्मनि शब्दादिस्वरूपे परेषु वा घटादिषु विज्ञानाभावो विज्ञातृत्वाभावश्चैतन्याभावो वा निश्चेतो यस्मात्ततोऽथे
ष्टादीनां विषयाणां तथा तेषामेव शब्दादीनां तत्सूक्ष्माणां परिणतानां देहाद्याकारतामापन्नानां यथोक्तविज्ञानाभावोक्ति
स्वीयत इति योजना॥ विमता देहादयो न चेतनावंतो विज्ञानकर्मत्वाद् घटादिवदित्यर्थः॥ हेत्वसिद्धिं परिहरति॥ श्रोत्रा

श्रोत्रादिग्राह्यत्वात्स्वात्मनि परेषु वा विज्ञानाभावस्तेषामेव परि
णतानां यथा लोष्टादीनां॥ श्रोत्रादिद्वारैश्च ज्ञायंते येन च ज्ञायंते स
ज्ञातृत्वाद् अतज्जातीयस्ते हि शब्दादयोऽन्योन्यसंसर्गि॥ ॥

दीति॥ जायंते देहाद्याकारपरिणताः॥ शब्दादय इति शेषः॥ एवं देहेंद्रियमनोबुद्धिप्राणाहंकारपर्यंतस्य साह्यस्य
नात्मतयाहंत्वमुपदिश्याविशिष्टमहेयमनपायं पंचसाक्षिणमात्मानं दर्शयति॥ येन चेति॥ अशब्दाद्यनुभवे सति
सुखदुः॥ ख मोहरागाद्युत्पत्तिः प्रसिद्धेत्यर्थः॥ कर्मशब्दः॥ कार्यवचनः॥

उप.स. जातीयोभूतसंवातविलक्षणस्वभाव इत्यर्थः॥ विलक्षणस्वभावत्वमेव प्रकटयितुं विषयस्वभावमुपन्यस्यति गद्य.१
५४ ॥ते हीत्यादिना॥ जन्मग्रहणाद्देवतद्वनंतरास्तित्वं गृहीतं द्रष्टव्यं जन्मादयः॥ षड्भावाः॥ स्वरूपतिवर्धनादिविका
रात्संयोगविभागौ पुनर्लाद्यनुबंधनिबंधनौ आविर्भावतिरोभावशब्दावागंतुकप्रकारा विषयतयाजडत्वद्योत॥

त्वाजन्मवृद्धिविपरिणामापक्षयनाशसंयोगवियोगाविर्भावविकारविकारित्वेत्रबीजाद्यनेकधर्माणःसामान्येन च सुखदुःखाद्यनेककर्माणः॥

को॥ दर्शनादर्शने आविर्भावतिरोभावावित्यर्थः॥ विकारविकारीति व्रणगंडविस्फोटकाद्यवस्थोच्यते तेत्रबीज्येति ८७
॥ स्त्रीपुंत्र इत्यात्मकपरिणामभेदउक्तः॥ आदिपदादनुक्तावांतरभेदग्रहः॥ एवंविधानेकधर्मवंत इत्यर्थः॥

॥ सामान्येतेति॥ शब्दादिविषयमदवस्थामाह्लिणस्तद्विलक्षणस्वभावत्वमाह॥ तद्भिन्नत्वादेवेति॥ एवंसतिस
हानन्वयव्यतिरेकाभ्यामात्मानात्मानौ विविच्यात्मानमेव शुद्धमहंब्रह्मास्मीत्यनवरतमनुचिंतयेदितोदान्यप्रयु

तद्भिन्नत्वादेवमविज्ञाता सर्वशब्दादिधर्मविलक्षणस्तत्त्वशब्दादिभिरूपजन्यमनोहःपीड्यमानो वेदानेवपरिमचक्षीत्यत्राहमस्तु धनिसामान्यमात्रेणवाविशेषधर्मैर्वाखिद्वादिभिस्त्रियैःस्तुत्यादिभिर्वैरभिषेश्यामत्यवीनत्वपरिभवाक्रोशादिवनेर्यदिकुरुस्वभावमप्रसंसर्गीणमचजप्रेनिधनमनयमत्वात्तमस्य विषयं गोचरीकृत्य स्पृष्टं नेवाहमिति अत्र संसर्गित्वादेव ममयत एवंतत्राप्यनिमित्ताहानिर्वृद्धिर्वातो मां किं करिष्यति स्तुतिनिंदादिक्रियाप्रियत्वादिलक्षणशब्दो विवेकितं हिशब्दमात्मत्वेनगतेऽप्रियशब्दोवदये प्रवियमाद्दमस्य संपयेदविवेकित्वात्तु मम विवेकिनो वा जाग्रमात्र ममविवेकि॥

क्षराद्युपजननिमित्तविक्षेपउपस्थितो भवति॥ तद्दाहरूपानैधुर्यादिविकारोऽवयवपरिहारायानुचिंतनीय

उप॰स॰ मुपदिशतीति॥ तत्रशब्दादिभिरिति॥ उक्तमेवविषयं विभज्य व्युत्पादयति॥ शब्दस्त्विति॥ ध्वनिरव्यक्तवर्णविशेषोनादमात्र ग॰प्र॰१

४५ इत्यर्थः॥ विशेषधर्मैरित्यस्य व्याख्या स्तुत्यादिभिरिति त्वादेयादद्भूतमानावमित्यस्य विवरणं धर्मनिविशेषणान्यसंसारिणामित्या

नीतात्तमपिकर्तुमुपसंहतेऽस्येवमेवस्पर्शसामान्येन तद्विशेषैस्त्रीतोष्णमृदुकर्कशादिरूपैरोदरस्तुजन्मतणोऽस्मा
प्रियैरप्रियैश्चस्वशरीरसमवायिभिर्वीणागंतुकनिमित्तैस्त्वनममकाचिद्वृद्धिर्विक्रियावादाहादिजन्मनिवेदना॥ तथारूपसा
क्रियतेव्योम्नीवमुष्टिघातादिभिस्तथारूपसामान्येन तद्विशेषैस्त्रिप्रियाप्रियैः स्त्रीव्यंजनादिजन्यैरर्णोद्भूतत्वा॥
त्नममकाचिद्धानिर्वृद्धिर्वाक्रियते॥ तथारससामान्येन तद्विशेषैस्त्रिप्रियाप्रियैर्मधुराम्ललवणकटुतिक्तकषा
यैर्मूढबुद्धिभिः परिगृहीतैः प्रियाप्रियैररसात्मकस्यनममकाचिद्धानिर्वृद्धिर्वाक्रियते॥ तथागंधसामान्येनत
द्विशेषैस्त्रिप्रियाप्रियैः पुष्पाद्यनुलेपनादिजन्यैरगंधात्मकस्यनममकश्चिद्धानिर्वृद्धिर्वाक्रियते॥ अशब्दमस्प
र्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयदितिश्रुतेः॥ ८८

दीनि॥ उपसंहृतइतीत्यात्र परिसंचक्षीतेत्यनुषंगः॥ किंचयाएवेत्यर्थः॥ आकृतीयंपोस्यार्थः॥ ॥श्रीनाथजीः॥

एवंतावदुद्भस्यशब्दरूपरसंगंधैः सामान्यविशिषरूपैर्न्नहानिर्वृद्धिर्मामभवतितेरनभिनवमनुचिंतनीयमभिधायेवाद्री
णवंतावदुद्भस्यशब्दरूपरसंगंधैः सामान्यविशिषरूपैर्न्नहानिर्वृद्धिर्वाममेतिवैरनमिनवमनुचिंतनीयं॥ यएवेति॥ यएवशारीरेंद्रियाकारैः परिणम्यसंस्थितास्तएवांतः॥ करणवृ
त्तीनाम्ब्लानुभवेमनुचिंतनीयंदर्शयति॥ किंच॥ यएवेति॥ यएवशारीरेंद्रियाकारैः परिणम्यसंस्थितास्तएवांतः॥ सर्वक्रियासुसंहतत्वात्मेनू
त्रयतद्विषयसुखदुःखाद्यात्मनाचपरिणमंतइत्यभ्याहारः॥ तत्रहेतुरुपमाहान्योन्येति॥ सर्वक्रियासुसंहतत्वात्मेनू

किंच॥ यएववाह्याःशब्दादयः॥ शारीराकारेणसंस्थितास्तग्राहकैरस्योन्ना
धाकारैरंतःकरणवृत्त्यतद्विषयाकारेणचान्योन्यसंसर्गित्वात्संहतत्वाच्चैव
वक्रियासुतत्रैवंसतिविदुषोनममकश्चिच्छत्रुर्मित्रमुदासीनोवावास्तवःयदि
मिथ्याज्ञानाभिमानेनप्रियमप्रियंवावपुंपुंहेतन्क्रियाफलजन्यतन्मस्वेवप्र
पुंपुंसतिमः॥ तस्याविपर्यत्वामम॥ ॥ ॥

यकारित्वादित्यर्थः॥ ततःकिमित्यतआह॥ तत्रैवंसतीति॥ भूतभौतिकानामेवसक्रियत्वेसतिविदुषोममसर्वविका

उप॰स॰ रविकारिसंघातसाक्षिणो निर्विकारस्य न कश्चिच्छत्रुर्वादिविद्यते इति चिंतयेत्॥ यदि कश्चिन्मिथ्याज्ञाननिमित्ताहे गद्य॰१
४६ हाभिमानात्ममप्रियमप्रियंवा क्रियाफलत्वेन क्षणं प्रयुंजीत प्रयोक्तुमिच्छेत्तत्तन्ममैव प्रयुंजीतितस्याविषयत्वा

न्मम॥ अव्यक्तोयमचिंत्योयमिति श्रुतेः॥ तथा सर्वेषां पंचानामपि भूताना
मविकार्यो विषयत्वात्॥ अच्छेद्योयमदाह्योयमिति स्मृतेः॥ ॥ ॥

तत्प्रियाद्यगोचरत्वान्ममेति॥ चिंतयेदितियोजना॥ प्रियाद्यविषयत्वेमाह॥ अव्यक्तोयमिति॥ अविकारित्वं ९८
चात्मनश्चिंतयेदिति सप्रमाणमाह॥ तथा सर्वेषामिति॥ तन्वेवमनाधेयातिशयस्वेदात्मा कथं तर्हि तमुपदिश्यान्मे

षामुपकाराद्यर्थप्रवृत्तिमत्त्वाच्चाह॥ यापीति॥ शरीरसंस्थानमेव ते पश्यंति नात्मानं शरीरे च ममाभिमाना मा
प्रारात्मनश्चासंगादिलक्षणत्वान्ममपि न हृतोतिशयः॥ किं तु॥ तेषामेव यथाक्रियं यथाफलं लाभ इत्यर्थः॥ स्वात्मना
धेयातिशयत्वे प्रमाणमाह॥ नैनमित्यादिना॥ किंच॥ यद्यनात्मानाममस्यानहातहूतमप्रियं प्रियं वा भवेत्तत्तन्मम

यातिशरीरेंद्रियसंस्थानमात्रमुपलभ्य महक्कानां विपरीतानां च
प्रियाप्रियादि प्रयुंजानतञ्च धर्माधर्मादिप्राप्तिः सा तेषामेव न तु
मम यतेन यो नैनं कृताकृते तपातो न कर्मणा वर्द्धते लोकनीयोः

स्ति सर्वात्मत्वान्ममेति॥ चिंतयेदित्याह॥ अनात्मवस्तुनश्चेति कुतस्तस्यासत्त्वमित्यत्र हेतुमाह॥ आत्मनश्चेति॥ आ
त्मनश्चाद्वयत्वे प्रमाणं के मति॥ तद्विद्वद्वक्व्यद्वयस्यासत्त्वादित्यर्थः॥ उक्तार्थसाधके प्रमाणमप्यनुशीलनीयमि
त्याह॥

उप॰स॰ ५१ यानीति॥ ब्रह्मविद्याप्रतिपादकानि सर्वाणि वेदांतवाक्यानि विस्तरशो बहुशाख्योपसंहारेणपुनःपुनराज्ञोचयित गद्य॰१

त्सबाह्याभ्यंतरोह्यजोनलिप्यतेजोकुटुः॥ खेनवाह्य इत्यादिश्रुति
भ्योनात्मवस्तुनस्त्वासत्वाः इतिपरमोहेतुरात्मनश्चोदयस्यामत्वा
द्यानिसर्वाण्युपनिषद्वाक्यानिविस्तरशःसमाहितव्यानीतिसमा
हितव्यानीति॥५॥

व्यानीत्यर्थः॥ द्विरुक्तिर्गद्यबंधसमाप्तिद्योतनार्था॥ उपदेशसहस्र्याः॥ समद्यविंशोयथामति॥ व्याख्यातोरामतीर्थैः ८०
णाज्ञात्वाज्ञानसिद्धये

॥ ॥इतिश्रीमत्पदवाक्यमहावाक्यप्रमाणमर्यादाश्रीसहस्रोपदेशीव्याख्यायोगद्यबंधःद्वितीयःप्र

॥ ॥इतिश्रीसहस्रोपदेशीगद्यबंधःसमाप्तःद्वितीय
प्रकरणम्॥२॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥श्रीरस्तुः

करणम्॥२॥ ॥प्रकरणंद्वितीयंसमाप्तं॥२॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तुः॥ ॥

ज्य·स·
५८

गद्य·१

॥ ॥इतिश्रीगद्यबंधः समाप्तः॥२॥ ॥

८१

रहतुर्नो

।। ।।श्रीगणेशाय नमः।। ।।यत्राध्यस्तमिदं सर्गं मेयमात्राद्यविद्यया।। भाति नो भाति यद्...
...सच्चित्सुखं तद्देवं सर्वोपनिषदर्थसारसंग्रहं गद्यबंधप्रबंधेन संक्षेपतो युक्त्योपदिश्य पुनः...
...वार्थजातं पद्यबंधप्रबंधेन सोपस्करं विस्तारेणोपदेष्टुकामो भगवान् भाष्यकारः।। पद्यग्रंथारंभे ग्रं...
प्रतिपाद्यपरदेवतानमस्काररूपं मंगलं कृतं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति।। चैतन्यमिति।।

।। ।।श्रीकृष्णाय नमः।। ।।ॐ नमो भगवते वासुदेवाय नमः।। ।।

तस्मै सामान्यतः।। प्रसिद्धात्मने नमः।। प्रह्वीभावोस्त्वित्यर्थः।। तस्य विशेषणं जिज्ञासाजालक्षणमा
ह।। सर्वविदिति।। सर्वं वेत्तीति सर्ववित्तस्मै सर्वशब्देन भूतभवद्भविष्यदित्येतदात्मकं जगदुच्यते।। त
त्सर्वं सर्वविस्थं सर्वदा सवित तत्त्वं निधिसत्तामात्रेण प्रकाशयति सर्ववित् तन्हीदं जडं स्वसत्तास्फूर्त्यो
सतत्त्वं भवति।। अतो यदधीना सत्तास्फूर्तिमदिदं तदस्ति सर्वज्ञं सर्ववित् सर्वाश्रय इति।। ।।श्रीरामः।। १

तदस्य लक्षणं सिद्धं भवतीति भावः।। एवं जगत् प्रवृत्तिस्थितिसंहारनियामकत्वेन सन्मात्रतया तादृश्ये
न लक्षितस्य स्वरूपलक्षणं वदन् सर्वविषयवेदनाश्रयतया सर्ववित्त्वमिति।। वैशेषिकादिमताश्रं कांवा
रयति।। चैतन्यमिति।। यच्चैतन्यं चितिस्वभावं ज्ञानस्वरूपं तस्मै इति यच्छब्दयोः संबंधः।। विज्ञानमा
नंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिभ्यः न ह्यचित्स्वभावस्य चिद्धर्मकता युज्यते।। न खल्वनुष्ण

चैतन्यं सर्वगं

स्वभावकं जलमुष्णत्वधर्मकं भवतीति भावः।। चिदेकरसस्यापि सर्वज्ञत्वं मायोपाधिकं व्याव
हारिकमित्यनवद्यं।। ननु चेतनोणुपरिमाण इत्येकदेशिनो मध्यमपरिमाण इति दिगंबरा मन्यंते।। अत
स्तस्य सर्वविषयसंसर्गाभावे कथं सर्वज्ञत्वं।। प्रकाशो हि सवित्रादिः स्वसंसृष्टमेव प्रकाशयन् व्यवहारहेतुर्ना
संसृष्टं विषयमित्यत आह।। सर्वगमिति।। नित्यं विभुं सर्वगतं।। ।।

उप.स. २ र्थकाशवत्सर्वगतस्थनित्यः॥ सपर्यगाच्छुक्रमित्यादि॥ श्रुतिविरोधश्चाणुपरिमाणत्वादिकल्पनानवा चैं.अ. १
कानाइति॥ उत्क्रान्त्यादिलिङ्गोपाधिकत्वश्रवणात्तेन स्वाभाविकविभुत्वार्थकश्रुतिबाध इति दिक्॥ ननु
सर्वगमित्युक्ते सर्वमप्यत्र कृतं च ब्रह्मान्यदिति॥ तस्य वस्तुपरिच्छेदप्रतिभासात्तांख्यादिवादिमतवत्सजा
तीयविजातीयविजातीयभेदवत्त्वं प्राप्तमित्यत आह॥ सर्वमिति॥ सर्वं खल्विदं ब्रह्म॥ इदं सर्वं यदयमा

सर्वभूतसेवं॥

त्मा॥ आत्मैवेदं सर्वमित्यादिश्रुतिरित्यर्थः॥ अनेन सर्वोपादानत्वमुक्तं॥ उपादानं हि स्वकार्यं सर्वं व्याप्नुव २
द्व्यापकं भवति नानुपादानं॥ तद्ध्येकदेशेन संसज्यमानमव्यापकमेव भवतीत्यर्थः॥ सर्वोपादानत्वात्सर्व न
मित्यभिप्रायः॥ सर्वात्मकमपि ब्रह्म जीवाद्यात्मतं जीवस्य ब्रह्मणोभिन्नत्वान्नेह संसारी संसारिभावेन वि
रुद्धधर्मवतोरैक्यं संभवति॥ ॥

दहनवुहितवदित्यत आह॥ सर्वभूतगुहाशयमिति॥ सर्वभूतानां स्थावरजंगमानां गुहासु बुद्धिषु शेत ६
इति॥ सर्वभूतगुहायां यं गुहा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति॥ गुहा बुद्धिः॥ गुहते॥ संवर्ण्यर्थस्यकतोरिदं
रूपं सर्वप्राणिबुध्यंतः॥ साक्षितया स्थितया निर्विकारं वर्त्तत इत्यर्थः॥ तथा च श्रुतिः॥ यो वेद निहितं गुहा

गुहाशयं॥

यां परमे व्योमन्॥ हृद्यंतर्ज्योतिःपुरुषः॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमित्याद्याः॥ त
था च तत्सृष्ट्वा तदेवानुप्राविशदित्यादिना॥ स्वपुरेव ब्रह्मणो जीवरूपेण प्रवेशश्रवणादयमात्मा ब्रह्मे
त्यादितादात्म्यश्रुतेश्च नैव ब्रह्मणोन्यो जीव इत्यवधार्यते॥ विरुद्धधर्मसंसर्ग इतिभा॥ ॥श्रीरामः॥ ॥

उप॰स॰ सन्नूपाधिनिबंधनोन स्वरूपनिबंधन इतिभावः॥ एतेनजीवोनाम ब्रह्मणोंशोविकारोवास्वतंत्र एव चै॰प्र॰
३ वेतिभेदाभेदभेदाभेदवादिपक्षानिराकृतावेदितव्याः॥ ननुसर्वभूतगुहाशये ब्रह्मणो मानसवेद्यत्वंस्या १
त्तथासर्वात्मत्वे प्रपंचात्मत्वप्राप्तिरितिशंकायामाह॥ यत्सर्वविषयातीतमिति॥ सर्वमविद्यातत्कार्या
त्मकंविषयमतीत्य व्यवस्थितमित्यक्षरार्थः॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमित्यादि

यत्सर्ववि॥

श्रुतेः॥ परमेश्वराधिष्ठितमायाविवर्त्तत्वाजगतःसर्वस्यमायायाश्चानिर्वचनीयत्वान्नपरमार्थंकि
मपिब्रह्मणोभिन्नमस्तीति॥ तथासर्वांतःकरणतत्प्रचारसाक्षिणोनमानसवेद्यत्वंसंभाव्यते॥ नहि ३
मिथ्यादृष्टिग्राहीतेन मरीच्युदकादिनामृग्याद्युदकादिमत्परमार्थतोभवति॥ नवाकाशेनाग्निः॥ ॥

प्रकाश्यतेदृश्यतेवा॥ अतोयुक्तंसर्वविषयातीतत्वमितिभावः॥ तथाचश्रुतिः॥ नेहनानास्ति॥ किंचि
॥ नयतोवाचोनिवर्त्तंते अप्राप्यमनसासहेत्याद्याः॥ अत्रचैतन्यमित्यादि॥ विशेषणत्रयंतत्वंपदार्थ
साधारणंसर्वभूतगुहाशयमिति॥ चक्षुरादिसाक्षीत्वंपदार्थउक्तः॥ सर्ववित्पदेनतत्पदवाच्यब्रह्मो

षयातीतं॥

च्यते॥ सर्वविषयातीतमिति॥ तत्पदलक्ष्यमुक्तं॥ यत्तच्छब्दयोः॥ सामानाधिकरण्यादैकार्थवृत्तित्वे
सति॥ तत्त्वंपदार्थयोरैक्यमखंडवाक्यार्थस्तात्पर्यवृत्त्याप्रतिपादितोभवति॥ तदेवंमंगलाचरण
व्याजेनवेदांतशास्त्रीयविषयाद्यनुबंधोप्यत्रप्रपंचितोस्यतत्प्रकरणद्योतनाय॥ तथाहि॥ ॥ ॥

उप॰स॰ उक्तवाक्यार्थविषयस्यैतन्यं सर्वविषयातीतमिति॥ सच्चिदात्मनः॥ सर्वानर्थसंसर्गरहितात्मावोक्ते चै॰प्र॰ १
४ रत्नीषानर्थनिवृत्त्युपलक्षितं निरतिशयानंदाविर्भावात्मकं ब्रह्मैव प्रयोजनमुक्तं॥ अर्थात्तत्कामो

तस्मैसर्वविदे नमः॥१॥ ॥

धिकारी सूचित एव भवति॥ उक्तविशेषणानां वेदांतेष्वेव प्रसिद्धेः॥ तान्त्र ब्रह्मैक्योः॥ प्रतिपाद्यप्र ४
तिपादकसंबंधो बाध्यनितः॥१॥ ॥

एतं देवतानमस्कारव्याजेन वेदांतप्रतिपाद्यपरदेवतातत्त्वमुपक्षिप्तमिदानीं वेदांतानां तत्परत्वं प्र ६
तिपादयितुं कर्मकांडनिर्वृत्तमर्थमनुद्यतेन ज्ञानकांडाख्यवेदांतानां संगतिमभिदधानस्तेषामगता
र्थत्वमनन्यशेषत्वं च तावदाह॥ समापय्येति॥ श्लो॰॥ वेद इदानीं ब्रह्मविद्यां वक्तुं प्रक्रमत इत्यन्वयः
॥इदानीमिति॥ जिज्ञासोदूपस्थितिसमय उक्तः॥ अथेति॥ जिज्ञासाप्रवृत्तिप्रयोजकहेतुसाधनं च

समापय्य क्रियाः सर्वा॥

तुष्टयसंपत्त्यानंतर्यमुच्यते॥ तथा च विवेकवैराग्यशमादिसाधनसंपत्त्यमुमुक्षुत्वैर्मुमुक्षोः साध
नब्रह्मविद्यां साक्षात्प्रतिपादयितुं॥ ज्ञानकांडात्मको वेदः॥ प्रवर्त्तत इत्यर्थः॥ कुतोऽस्य साधनसं
पत्तिरित्यपेक्षायां कर्मकांडोक्तकर्मानुष्ठानजनितबुद्धिशुद्धित इत्यभिप्रेत्याह॥ समापय्येत्यर्द्धेन॥ ॥

द्वाराग्न्याधानपूर्विका इति॥ विहितक्रियामात्रोपलक्षणं नित्यनैमित्तिकप्रायश्चित्तोपासनारूपाः॥
सर्वाश्रमप्रयुक्ता विधिविहिताः॥ सर्वाः क्रियाः॥ समाप्यासमाप्तिं प्राप्य कर्मकाण्डात्मना अनुष्ठेय
कर्माणि प्रतिपाद्य स्थितो वेद इति संबंधः॥ अयं भावः॥ वेदो हि स्वतः॥ प्रमाणभूतः सर्वार्थप्रकाश
को नित्यनिरतिशय॥ पुरुषार्थमर्थयमानस्य तदुपायं मार्गयतः॥ सर्वोत्साहं प्रयतमानस्यापि

द्वाराग्न्याधानपूर्विकाः॥

तमलभमानस्य तादृक्पुरुषार्थसाधनं प्रत्यक्षादिभिरनवगम्यमानमुपदिष्टुं प्रवर्त्तते नित्यनिरति
शयपुरुषार्थश्च मोक्ष एव नान्य इति॥ मोक्षोपायं प्रतिपादने वेदतात्पर्यमवगम्यते॥ श्रुतिस्मृती ५
चात्र भवतः॥ सर्वे वेदा यत्पदमामनंति॥ सर्वे वेदा यत्रैकं भवंति॥ स मानसीन आत्मा जनानामिति॥

वेदैश्च सर्वैरहमेव वेद्य इति च मोक्षसाधनं च साक्षादात्मतत्त्वज्ञानमेव तमेव विदित्वातिमृत्युमे
ति॥ नान्यः पंथा विद्यतेऽयनायेति च श्रुतेस्तज्ज्ञानाशुद्धांतष्करणस्योपदेशं युक्तं तस्य तद्ग्रहणसामर्थ्या
भावात्॥ श्रुतिश्च भवति॥ नाविरतो दुश्चरितान्नाशान्तो नासमाहितः॥ नाशान्तमानसो वापि प्रज्ञाने
नैवमाप्नुयादिति॥ अतस्तस्य ज्ञानोत्पत्तिप्रतिबंधकदुरितक्षयाय यानि नित्यानि कर्माणि प्रथम

ब्रह्मविद्यामयेदानीं॥

विद्यंते॥ तानि च संयोगपृथक्त्वोदनासमाख्यानामविनियोगेन सर्वज्ञापापप्रत्ययन्यायेनेति कर्तव्यांगक
लापपरिमाणाधिकारिविनियोगोक्तिपूर्वकमनुष्ठापयेति॥ धर्मेण पापमपनुदति॥ न कर्म लिप्यते न
रे॥ अविद्यया मृत्युं तीर्त्वेत्यादिश्रुतेः॥ दुरितक्षय एव धर्मानुष्ठानस्य परं प्रयोजनं॥ ॥श्री रामः

उ.प.स. परंपरया परमपुरुषार्थोपयोगित्वान्न तु कर्मणा पितृलोक इत्याद्युक्तेः॥ पितृलोक इत्यादिः श्रयो चै.प्र.
६ जनं॥ तस्य तु यादिदोषदुष्टतया हेयत्वात्॥ आनुषंगिकं हि तत्कर्मफलं भवति॥ भवदपि नेदं १
चित्तशुद्धिप्रतिबंधकं॥ तदुक्तं सुरेश्वराचार्यैः॥ नित्येषु बुद्धिः प्राधान्याद्भोगोऽप्यप्रतिबंधकः भो
गमं गुरमीस्यं तेबुद्धिशुद्धिस्तु रोचतइति॥ काम्याभिचारादिकर्मविधानं तु पुरुषवशीकरणेन स्वा

वक्तुं वेदः प्रचक्रमे॥२॥ ॥

भाविकप्रवृत्तिनिवारणार्थमित्येवमादिकं॥ तथा च॥ चित्तशुद्धेः॥ प्रथमापेक्षितत्वात्॥ तदर्थं कर्म
विधानं प्रथमं प्रवृत्तते॥ पश्चाद्ज्ञानोपदेश इति कर्मज्ञानकांडयोरर्थद्वारा हेतुहेतुमद्भावेन पौर्वाप ६
र्यसंबंध उक्तो ज्ञानकांडस्य साक्षात् फलार्थविषयत्वात् कर्मभिरनपेक्षितत्वात् तागतार्थत्वमन
न्यशेषत्वं च तस्य सिद्धमिति॥२॥ ॥

ननु कर्माणि कृतानि कर्तुः॥ फलप्रदानि लोके दृष्टानि॥ यथा पित्रादिभिरूपादिष्टविषयाणि इष्टफ
लानि तेनिषिद्धविषयान्यनिष्टफलानि तद्वद्शास्त्रविषयाणि देवाधीनतयोभयार्थानि तथा वेदविहित
नि कर्माणि इष्टफलानि निषिद्धान्यनिष्टफलानि विहितप्रतिषिद्धव्यामिश्रकर्माणि इष्टानिष्टव्यामिश्रफ
लानि भवंति तथा च सूत्रं॥ अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति॥ एवं च कर्मभिर्णां फ

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये॥ ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः॥३॥ ॥

लाव्यभिचारान्मोक्षस्य च फलविशेषत्वात् कर्मविशेषसाध्यत्वोपपत्तेः॥ न विद्ययाकृतमस्तीति न
तदर्थानि ज्ञानकांडानि मुमुक्षुणा विचारणीयानि॥ किंतु॥ कर्माण्येव कानिचिज्ज्ञातुमस्यादीन्यतय
फलार्थीन्यनुष्ठेयानीति कर्मजडानां प्रत्यवस्थानमित्याशंक्याह॥ कर्माणीति द्वाभ्यां॥ श्लो॰॥ कर्मफलं हि
जात्यायुर्भोगलक्षणं तच्च देहसंबंधविना नोपपद्यत इति कर्माणि देहयोगार्थमेवेत्यर्थः॥ ॥श्रीः॥ ॥

उप॰स॰ देहयोगेच संसारो दुर्वार इत्याह॥ देहयोग इति॥ देहसंबंधे सति प्रियाप्रिये सुखदुःखे पोयं ध्रुवे स्या चै॰ अ॰ १
७ तामेवं तामेवं॥ न ह वै सशरीरस्य सतः॥ प्रियाप्रिययोरपहतिरस्तीति श्रुतेः॥ ततः सुखदुःखयोस्तत्सा
धनयोश्च यथासंख्यं रागद्वेषौ सेवानारूपौ स्यातां ततो रागद्वेषाख्यान्निमित्तात्क्रियावाङ्मनः कायचे
ष्टाः स्युरित्यर्थः॥ ३॥ अज्ञस्य प्रत्यगात्मतत्त्वं ब्रह्माजानतो अहंकारपारवश्यस्य ततः॥ क्रियाभ्यो विहि
तप्रतिषिद्धरूपाभ्यो धर्माधर्मौ पुनर्भवेतां पुनस्ततो देहयोगस्ततः॥ प्रियाप्रिय इत्येवं संसारो जन्ममर

धर्माधर्मौ ततो तस्य देहयोगस्तथा पुनः॥ एवं नित्यप्रवृत्तोयं संसारश्चक्रवद्भृशं॥ ४॥ ॥

णकर्मकरणतत्फलभोगजन्मरणकुलालचक्रवद्भ्रामत्यर्थं अविश्रमं यथा स्यात्तथा नित्यप्रवृत्तोना
दिकालमारभ्य प्रवृत्तते॥ अयं प्रत्यक्ष इत्यर्थः॥ तस्मादैहिकार्थानां कर्मणां अनित्यफलत्वस्य लोके दृष्ट
त्वादामुष्मिक॥ फलार्थानामपि कर्मत्वादनित्यफलतानुमानात् तद्यथेह कर्मजितो लोकः॥ क्षीयत एव ७
मेवामुत्र पुण्यजितो लोकः॥ क्षीयत इति॥ वस्तुबलाबलं श्रुतेश्चा क्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतमि
त्याद्यर्थदस्तुत्यर्थवादत्वेन कर्मफलस्यानित्यत्वानुमानकार्येति भावः॥ ४॥ ॥

नन्वेवमपि न मोक्षार्थिनो ज्ञानेन प्रयोजनमस्ति॥ कृतकर्मणां संसारनिमित्तानां फलभोगानंतरं
नाशोसति निमित्ताभावान्नैमित्तिकाभाव इति॥ न्यायादयत्नलभ्यत्वान्मोक्षस्येत्याशंक्याज्ञानमूलत्वा
त्कर्मणस्तस्मिन्सति तदनुपरमान्मैवमित्याह॥ अज्ञानमिति॥ यद्वा॥ अज्ञस्य कर्मप्रवृत्त्यविरमात्सं
साराविरमः॥ कृतकर्मफलभोगसमयेपि विकर्मप्रवृत्त्यवश्यंभावात्पुनर्भोगसंतानाविच्छेदश्चेत्

अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते॥ ॥

कथं तर्हि कर्मनिवृत्त्या मोक्षसिद्धिरिति विवक्षयामाह॥ अज्ञानमिति॥ नीहारेण प्रावृता जल्प्या चासुत
पाउक्थशासश्चरंति॥ एकः शत्रुर्न द्वितीयोस्ति शत्रुरज्ञानतुल्यः॥ पुरुषस्य राजन्॥ येनावृतः॥ कुरुते
कार्यतेच घोराणि कर्माणि सुदारुणानीत्यादि॥ श्रुतिस्मृतिभ्यो अज्ञानं तस्य पूर्वोक्तस्य कर्मतत्फल
जन्मलक्षणस्य संसारस्य मूलं स्यादिति॥ ॥

उप.स. हेतोस्तस्याज्ञानस्य हानमात्यंतिकोपरम इष्यते यत्नेन संपादनीयतयाभिप्रेत्यनेन मूलोन्मूलनमंत चै.प्र.
८ रेण पुरोहादिच्छेदादित्यर्थः॥ तरति शोकमात्मवित्॥ यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः॥ तदा १
देवमविज्ञाय दुःखस्यांतो भविष्यति॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः॥ तेषामादित्यवज्ज्ञा

ब्रह्मविद्यातस्त्वारब्धात्ततो निःश्रेयसं भवेत्॥५॥ ॥

नं प्रकाशयति तत्परमित्यादिश्रुतिस्मृतिभ्यो यतो विद्यैवाज्ञानहाने हेतुरवतातो ब्रह्मविद्यारब्धा॥
ततो ब्रह्मविद्यायाः निःश्रेयसं कैवल्यं भवेत्तदुदये नांतरीकतया ज्ञाननिवृत्तौ केवलात्मस्वरूपाव ८
स्थानरूपो मोक्षो लब्धोऽवभवेदित्यर्थः॥५॥ ॥

ननु कर्मणां विचित्रशक्तित्वादिरण्वद्यमृतत्वं भजंत इत्यादिश्रुतेश्च कर्मणैव हि संसिद्धिमा
स्थिता जनकादय इत्यादिस्मृतेश्च कर्मभिरेव मोक्षसिद्धेः॥ किं कृतं ब्रह्मविद्ययेति शंकामपाकुर्वन्न
तं तरोक्तमर्थमुपपादयति॥ द्वाभ्यां॥ विद्यैवेति॥ संसारमूलाज्ञानहानाय विद्यैव समर्थेत्यध्याहारः॥
एवकारार्थमाह॥ न कर्मेति॥ तत्र हेतुरप्रतिकूलत इत्यविरोधादित्यर्थः॥ विद्यैव प्रकाशरूपत्वात्प्रका

विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः॥ नाज्ञानस्य प्रहाणे हि रागद्वेषक्षयो भवेत्॥६॥

शरूपामविद्यां तत्कार्यं च निवर्तयति॥ यथा रज्ज्वावरणाविद्यां तमविषितत्कल्पितसर्पाद्याकारं
च रज्जुतत्त्वज्ञानप्रदीपो निवर्तयतः स्वभावविरोधात्॥ कर्म तु नाज्ञानतमो निवर्तकं तदविरोधीत्वा
त्प्रकाशात्मकत्वाद्धानीहारस्तमवदित्यनुमानेनान्वयः॥ पंथा विद्यतेयनाय इत्यादिश्रुतिभ्यश्चाविरो
धमद्विरापदाइत्यादौ वापेक्षिकममृतं पर्यवस्यति॥ ॥

उप॰स॰ ९ कर्मणैव हीति स्मृतिः॥ न कर्मणा न प्रजयेति श्रुतिविरोधेन परे त्वतो न तद्बलात्कर्मनिरतानहान चै॰प्र॰ १
त्रोके स्वभिप्रायः॥ विद्यां विना मोक्षासंभवाभावेऽस्येदं स्वयार्थमेव विद्यान्विष्यतां॥ तत्कार्यस्य तु प
रमार्थत्वाद्विद्यया नाशानुपपत्तेस्तन्नाशे हेत्वंतरमन्वेषणीयमित्यत आह॥ नाज्ञानस्येति॥ अज्ञा
नस्याप्रहाणे रागादिक्षयो न स्याद्विवेकपूर्वकत्वस्य रागाद्यन्वयव्यतिरेकसिद्धत्वादज्ञानप्रथा

रागद्वेषक्षयाभावे कर्मदोषोद्भवं ध्रुवं॥ तस्मान्निःश्रेयसार्थाय विद्यैवात्र विधीयते॥७॥

रागादयो न परमार्था इत्यज्ञाननिवृत्त्यैव निवर्त्तंत इति न तत्र हेत्वंतरान्वेषणेत्यर्थः॥६॥ रागाद्यनि
वृत्तौ का हानिरिति तत्राह॥ रागद्वेषेति॥ दोषा रागद्वेषमोहास्तदुद्भवतद्धेतुकं कर्म ध्रुवं पुनः स्या
देवेति पुनः संसारो दुर्वार इत्यर्थः॥ उपपादितमर्थमुपसंहरति॥ तस्मादिति॥ अत्रैवेदांतेष्विति विधी ९
यते प्रकाश्यत इत्यर्थः॥७॥ ॥

तदेवमज्ञानमूलत्वात्संसारस्याज्ञानमेव तन्निवर्त्तकं मोक्षहेतुर्न कर्मेत्युक्तं॥ तत्र यदि कर्मणोऽस्वातं
त्र्येण मोक्षहेतुत्वासंभवे तर्हि ज्ञानेन समुच्चये सति तद्धेतुता स्यादिति॥ समुच्चयवादिमतमुत्थापयति
॥ ननु कर्मेति॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्॥ कार्यते ह्यवशः कर्म सर्वः प्रकृतिजै
र्गुणैरिति स्मृत्युक्तन्यायेनावश्यं तावज्जीवता पुरुषेण कर्म कर्त्तव्यमेव विद्याया यथा तथा नित्यं कर्मा कार्यं

ननु कर्म तथा नित्यं कर्त्तव्यं जीवने सति॥ विद्यायाः सहकारित्वं मोक्षं प्रति हि तद्भजेत्॥८॥

कर्त्तव्यं यावज्जीवमित्यादिश्रुतिविहितत्वादित्यर्थः॥ उपयोगाभावान्मुमुक्षुणा नित्यं कर्म न कर्त्तव्यमि
त्यत आह॥ विद्याया इति॥ विद्याया मोक्षं प्रति कारणभूतायाः॥ सहकारित्वमिति॥ कर्त्तव्यभावं हि य
स्मात्तत्कर्म भजेत्प्राप्नुयादतस्तत्कार्यं मुमुक्षुणेत्यर्थः॥ विद्ययामृतमश्नुत इति तीयपाज्ञानस्य
मोक्षकरणत्वावगमात्करणस्य चेतिकर्त्तव्यतासापेक्षत्वादस्य॥

उप.स. १० चेतिकर्त्तव्यस्यात्मानात्कर्मभिरेव प्रयाजादिभिर्दर्शादीव फलोपकार्यंगैस्तानिं समुच्चीयत इति भावः॥ वै.त. १
॥८॥ कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते॥ तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः॥ इत्यादिस्मृतेर्मु
मुक्षुभिः॥ कर्म न कर्त्तव्यमिति चेत्तत्राह॥ यथा विद्येति॥ यथा विद्या मुमुक्षुभिः॥ कार्या तथा कर्मापि कर्त्त
व्यं कुतः॥ विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति॥ समुच्चयविधिनाऽविशेषेण चोदितत्वादित्यर्थः॥ किं

यथा विद्या तथा कर्म नोदितत्वाविशेषतः॥ प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः॥ ९॥

च॥ अकुर्वन्विहितं कर्म निंदितं च समाचरन्॥ प्रसंजंश्चेंद्रियार्थेषु नरः॥ पतनमृच्छति॥ इत्यननुष्ठाने
प्रत्यवायस्मृतेश्च कर्म कार्यमित्यर्थः॥ तथा चोदाहृतश्रुतिस्मृतिविरोधे तस्मात्कर्म न कुर्वंति यतयः प १०
तीयमपस्मृतिर्ज्ञानप्रशंसार्था वा भविष्यतीति भावः॥ ९॥ ॥

अत्र सिद्धांती विद्यायाः सहकार्यपेक्षित्वमुक्तमाक्षिपति॥ नन्विति॥ ब्रह्मविद्या सह॥ कारिनिरपेक्षा ध्रु
वफलत्वाद्भूतादिज्ञानवदित्यर्थः॥ पूर्ववादिव्यभिचारेण परिहरति॥ नेति॥ अवश्यभाविफलोऽप्यग्निष्टो
मो यथोक्तीयकाम्यादितः तदेवताज्ञानसहकारिकमपेक्षते॥ तथा विद्यापीत्यर्थः॥ १०॥ पूर्वपक्षमुपसंह

ननु ध्रुवफला विद्या नान्यत्किंचिदपेक्षते॥ नाग्निष्टोमोपयथैवान्यत् ध्रुवकार्योऽप्यपेक्षते॥ १०॥
तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते॥ इत्येवं केचिदिच्छंति न कर्म प्रतिकूलतः॥ ११॥ ॥

रइति॥ इत्येवं केचिदिच्छंतीति॥ सिद्धांतं वक्तुमुपक्रमते॥ नेत्यादिना॥ विद्या स्वकार्ये न कर्मापेक्षते तत्प्र
तिकूलत्वात्तद्विरोधित्वादिति यावत्॥ न हि स्वप्रतिकूलः स्वसहायो भवति॥ भानुस्तिमिरतेजसः॥ सहाय
भूतमित्यर्थः॥ ११॥ कर्मणो विद्याप्रतिकूलत्वं उक्तं साधयति॥ विद्याया इत्यर्द्धेनः हिंसाब्दः॥ ॥श्रीरामः

उप.स. ११ प्रसिद्धश्चैवेद्वेद्योतकः साभिमानत इति॥ ब्राह्मणाद्यभिमानसहितपुरुषनिर्वर्त्यत्वात् कर्मणो विद्याया चै.प्र. १
श्चकूटस्थात्माकारतया जात्याद्यभिमानहीननिष्ठत्वात् प्रसिद्धो विद्याकर्मणोर्विरोध इत्यर्थः॥ हि शब्दद्यो
तितां प्रसिद्धिमुपपादयति॥ निर्विकारेति नाहं कर्त्ताभोक्ता किंतु॥ कूटस्थब्रह्मैवास्मीत्येवमात्माकारांतःक

विद्याया प्रतिकूलं हि कर्म स्यात्साभिमानतः॥ निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्त्तिता॥१२॥

रणवृत्तिर्विद्येति॥ इह वेदांतेषु विद्वद्भिः॥ प्रकर्षेणोक्तेत्यर्थः॥ कर्मत्वहं ब्राह्मणोस्य कर्मणः॥ कर्त्ताममे
दं कर्मसाध्यं फलं भविष्यतीत्यभिमानपूर्वकं प्रवर्त्तत इति प्रत्यक्षमतः स्फुटो विरोध इत्यर्थः॥१२॥ ॥ ११

ज्ञानकर्मणोरंतर्मुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्पत्तितोपि विरोधमाह॥ वस्त्वधीने
ति॥ प्रमाणवस्त्वधीना विद्या यथाप्रमाणं यथावस्तु च जायते॥ न तत्र पुरुषस्वातंत्र्यं संभवतीत्यर्थः॥ वि

अहं कर्त्ता ममेदं स्यादिति कर्म प्रवर्त्तते॥ वस्त्वधी
नाभवेद्विद्या कर्त्रधीनो भवेद्विधिः॥१३॥ कारकाण्यु
पमृद्नाति विद्याबुद्धिमिवोखरे॥ इति तत्सत्यमादाय
कर्म कर्तुं व्यवस्यति॥१४॥

धिर्विधेयं कर्म कर्त्रधीनं पुरुषेण कर्त्तुमन्यथा वा कर्त्तुं
शक्यमतः पुरुषस्वातंत्र्यास्वातंत्र्यरूपविरुद्धहेतुजन्यत्वात्कर्मज्ञानयोः समुच्चय इत्यर्थः॥१३॥ ॥ ॥

उप.स. १२ किंच॥ विद्यायां सत्यां कर्मणो निराश्रयतया स्वरूपालाभान्न ज्ञानसहकारितेति॥ विध्यंतरेण विरोधमा चै.त्र. २
ह॥ कारकाणीति॥ उखरदेशजातामुदकबुद्धिं यथोखरत्वभावावलंबिनी विद्योपमृद्नाति॥ तथात्मवि
द्याध्यस्तकारकबुद्धिमात्मत्वभावावलंबिनी विद्योपमृद्नात्येवेत्यर्थः॥ इतिवदसत्यमित्यर्द्धश्लोकः॥ पू
र्वेणैवान्वेति॥ उपमृद्नातियतो तस्ततत्कारकजातं सत्यमादाय कर्म कर्त्तुं ज्ञानी कथं व्यवस्यतीति कथंश

विरुद्धत्वादतः शक्यं कर्म कर्त्तुं न विद्यया॥ सहैव विदु
षा तस्मात् कर्म हेयं मुमुक्षुणा॥ १५॥

ब्दाध्याहारेणायं योजनीयः॥ १४॥ विरुद्ध
त्वकृतं समुच्चयासंभवं फलितमाह॥ विरुद्धत्वादिति॥ अतो विरुद्धत्वादिति सामानाधिकरण्यं विद्यया १२
सह कर्म कर्त्तुं विदुषा न शक्यमेवेत्यन्वयः॥ समुच्चयनिराकरणफलमाह॥ तस्मादिति॥ १५॥ ॥श्रीरामः॥ ॥

ननु ज्ञात्वा कर्म समाचरेदित्येवैत्यादिवचनात्॥ स्वर्गकामादिविध्यन्यथानुपपत्तेश्च देहादिव्यतिरिक्ता
त्मज्ञानवतः कर्माधिकारात् ज्ञानकर्मणोर्विरोधे च तद्योगादधिकार्यभावेन कर्मकांडस्याप्रामाण्यं प्रामाणि
त्यानां च कर्मस्वरूपभेदांगविशेषप्रयुक्तिक्रमाधिकारादिविशेषज्ञानेस्य देहादिव्यतिरेकात्मज्ञानस्य चक
र्मविशेषाधिकारिण्यपेक्षितत्वेपि न परमात्मतत्त्वज्ञानं तत्रापेक्षते तदनुपयोगादधिकारिविरोधाच्चेत्यभिप्रे

देहाद्यैरविशेषेण देहिनो ग्रहणं निजं॥ ॥

त्य समाधत्ते॥ देहाद्यैरिति॥ यद्वा॥ यद्यौपनिषदं ज्ञानं कर्मकारकभेदोपमर्दकं स्यात्तर्हि ज्ञानकांडेन कर्म
कांडस्य निर्विषयीकरणाद्बाधितविषयं कर्मकांडमप्रमाणं स्यात्तच्चानिष्टं स्वाध्यायाध्ययनविधिविरोधश्चे
दित्याशंक्य किमात्मतत्त्वज्ञानात्प्रागूर्ध्वं वा तदप्रामाण्यापत्तिरिति॥ विकल्प्याद्यं निराकरोति॥ देहाद्यैरिति॥

१३ देहाद्यैरिति॥ देहिनः आत्मनो देहाद्यैर्देहेंद्रियमनोबुद्धिप्राणतद्धर्मैरविशेषेणाविवेकेन ग्रहणं तद्भिन्नि
तयैवात्माभिमानरूपं निजं स्वभाविकं नयो विद्यादावप्यादिभावबुद्धिवद्धिध्यधीनं यदेवं विधं प्राणिनामा
त्मतत्त्वं तदविद्योत्थमनाद्यतानजन्मोतिमस्कारो त्वोसर्वसाधारणत्वद्यावदेवं ब्राह्मणोहं ग्रहस्थोहं सक
लेंद्रियवानहं सकामो बजवानहमित्यादिज्ञानमनुवर्त्तते॥ तावत्कर्मविधिः॥ कर्मकांडं प्रमाणं भवेदित्यर्थः

प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत्॥१६॥ ॥

प्रमितिजनकं हि प्रमाणं भवति॥ अधिकारिणः प्रमितिजनको वेदो नानधिकारिण इति स्थितेः॥
कर्मप्रवृत्तिपर्यंतं प्रमिति॥ जनकस्य विधिकांडस्योक्ताधिकारिणाभावात् ब्रह्मात्मतत्त्वविद्योदयात् प्राग १३
प्रामाण्यप्राप्तिरिति॥ नाध्ययनविधिविरोध इतिभावः॥१६॥ ॥

द्वितीयं विकल्पमिष्टापत्त्या प्रत्याचष्टे॥ नेति नेतीति॥ नेति नेतीति॥ नेति नेतीति विप्रार्थया श्रुत्या
देहादीन्मिथ्याद्दृष्ट्या आत्मीयभावेन गृहीतानशेषानपोह्य प्रतिविध्य प्रतिवेध्य विविधिभूतः आत्मैव
शेषितः॥ सत्यस्य सत्यमित्यादेः किमर्थमित्यत आह॥ अवशेषात्मबोधार्थमिति॥ अवशेषश्चासा

नेति नेतीति देहादीनपोह्यात्मावशेषितः॥ ॥

वात्मा चेति॥ तस्य तथा बोधे निर्विशेषचित्सदानंदस्वभावाविर्भवस्तदर्थमित्यर्थः॥ परागर्थप्रपो
हितेषु तदवधित्वेन प्रत्यगात्मैवावशिष्यते॥ इति प्रत्यक्तत्त्वबोधार्थमित्युक्तं भवति॥ बोधे सति किं
स्यात्तदाह॥ नेनेति॥ ॥

यन्निबंधो देहाद्यात्माभिमानः ॥ कर्माधिकारहेतुः ॥ साविद्या तेन बोधेन निवर्त्तिता बाधितेत्यर्थः ॥
अतो निमित्ताभावान्नैमित्तिकाभाव इति ॥ न्यायेनात्मतत्त्वज्ञानवतो न कर्मविधिप्रतिपत्तिरिति ॥ तं प्रतिप

अवशेषात्मबोधार्थं तेनाविद्या निवर्त्तिता ॥१७॥ ॥

त्तिफलवद्विज्ञानजनकत्वाभावात्कर्मकांडस्य तदानीमप्रामाण्यमपीष्टमेव निवर्त्ततीत्यक्तोध्यं प्रति
अभिचारविधिशास्त्रवदिति सर्वमनवद्यं ॥१७॥ ॥

ननु निर्विकारेणात्मबोधेन सकृन्निवर्त्तिताप्यविद्या पुनरुद्भविष्यति ततः ॥ कर्माधिकारहेतुसंभ
वात्कर्मविधिः स्याच्छुक्तितत्त्वावगमात्तदज्ञाननिवृत्तावपि पुनस्तत्समयांतरे रजतभ्रमोदयोपलंभा
दि ॥ त्याशंक्याह ॥ निवृत्तेति ॥ प्रमाणतो निवृत्ता प्रमाणोत्थेनादग्धा साविद्या भूयः पुनः कथं प्रसूयेत जाय
त ॥ न हि सम्यग्दग्धा च नायपुनः ॥ प्रसवायोग्य भवति तद्वदित्यर्थः ॥ अविद्यांतरे जायेतेति चेन्नन्नवक्तव्यंकि

निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः ॥ असत्येवाविशेषेपि प्रत्यगात्मनि केवले ॥१८॥

निवृत्ता सा कथं भूयः पुनर्निमित्ता जायेत निमित्ताद्वा ॥ नाद्यः ॥ अकारणकार्योत्पत्तावतिप्रसंगाद्वितीये किमात्मनि
मित्तमनात्मा वा नाद्य इत्याह ॥ असत्येवेति ॥ अविशेषे केवले इत्यनयोर्व्याख्यानव्याख्येयभावः ॥ यद्वा
॥ विशेष इत्युक्ते मर्त्यादिकतिपयविशेषाभावेपि विशेषांतरशंका स्यादत उक्तं केवल इति ॥ तावत्युक्ते एका
किनोप्यात्मनः प्रयत्नादिगुणयोगित्वविशेषशंका स्यात्तन्निवृत्तये विशेषा इत्युक्तं तथा चाविशेषे केवले

प्रत्यगात्मनि संवलिते परमार्थवस्तुनि साविद्या सती एव न सत्तां लभते॥ असहायस्यात्मनः कूटस्थस्य
कर्तृत्वानुपपत्तेः अविद्यांतरसहायाभ्युपगमे चान्योन्याश्रयेऽनवस्था वा प्रसज्येतेत्यर्थः॥ अविद्याद्वैतं
द्वांतरं निरस्यते॥ अनात्मन्यप्यसत्येवसाविद्या कार्यस्यानात्मनो विद्याहेतुत्वानुपपत्तेरित्यर्थः॥ शक्तिवादे
तु रजतादिविक्षेपापादानो ब्रह्मणैवाविद्याशक्तिभेदस्य तानेन निवृत्त्यभ्युपगमात्॥ मूलज्ञानस्य तादृगनंत
शक्तिमातो विद्यमानत्वात्तद्वशात्पुनर्बंधापत्तेर्दृष्टांतो विषम इति द्रष्टव्यं॥१८॥ अविद्यायाः पुनरनु

न चेन्मूयः प्रसूयेत कर्त्ताभोक्तेति धीः कथं॥ सदस्मीति च विज्ञाने तस्माद्विद्या सहायिका॥१९॥

त्पत्तिमवसाधानफलमाह॥ न चेदितियादव्ययेन॥ सदेव ब्रह्मैवाहमस्मीति विज्ञाने विशिष्टज्ञाने परोक्षज्ञानुभवेसः
तिभूयः पश्चान्न चेदविद्या प्रसूयेतेति कर्त्ताभोक्तेति धीः कर्माधिकारनिमित्तभूता कथं स्यादेवेत्यर्थः॥ च
कारः कर्तृत्वादेः पारमार्थिकत्वशंकानिवृत्त्यर्थः॥ कर्तृत्वादेः पारमार्थिकत्वे विद्यानिवर्त्यतायोगाद
निर्मोक्षप्रसंग इति भावः॥ ज्ञानकर्मसमुच्चयनिराकरणमुपसंहरति॥ तस्मादिति॥ यस्माद्विद्यायामुत्प
न्नायां कर्मासंभवः॥ सिद्धस्तस्मादसहायैव केवलैव विद्या कैवल्यहेतुरित्यर्थः॥१९॥ ॥श्रीनाथजी॥ ॥

विद्यायाः सहकारिनिरपेक्षत्वेनैव मोक्षहेतुत्वमिति युक्त्योक्तेऽर्थे श्रौतलिंगमुपोद्बलयति॥ अत्यरेचयदि
ति तैत्तिरियोपनिषत्सु सत्यं परं परं सत्यमित्युपक्रम्य सत्यतपआदिमानसांतानि कर्माणि श्रेयःसाधनत्वेन
निर्दिश्य तानि वा एतान्यवराणि तपांसि तेषां फलाफलत्वेन निर्दिश्य न्यास इति ब्रह्मेत्युक्तो न्यास ए
वात्यरेचयदिति तत्वज्ञानांतरंगभूतः संन्यासस्तूयते। तस्माल्लिंगदित्यस्यानुपादेयत्वात्तस्य चोपादेयत्वात्क

अत्यरेचयदित्युक्तो न्यासः श्रुत्या तत एव हि॥ ॥

र्मसापेक्षत्वे मोक्षस्य संन्यासविधानानुपपत्तेः सर्वसंन्यासमात्मज्ञानमेवामोक्षसाधनं गम्यत इत्यर्थः॥ अ
त एव हीति ज्ञानस्य स्वफले कर्मनिरपेक्षत्वादेवेत्यर्थः॥ लिंगांतरमाह॥ एतावदिति॥ वाजिनाममृतत्वंश्रु
तमिति॥ वाजसनेयिनामुपनिषत्सु आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमित्युपक्रम्याद्वयम
त्मतत्त्वं दुंदुभ्यादिदृष्टांतप्रबंधेनोपपाद्योक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति ज्ञानस्यैवामृतत

उप.स. साधनत्वावधारणं श्रुतं तस्य कर्मनिरपेक्षतायां लिंगमन्यथैतावदित्यवधारणार्थवचनानुपपत्तेरित्यर्थः ॥ अ वै.प्र.
१६ मृतत्वस्य तु नान्यः पन्था विद्यतेऽयनायेति च तत्रोक्तेर्विद्यासाध्यस्य कर्मणोऽमृतत्वसाधनत्वाभावे लिंगमनुसंधेयं ॥ न १
च विद्यां चाविद्यां चेति समुच्चयविधानविरोधः ॥ तस्य देवतोपासनस्थानेन कर्मसमुच्चयविषयत्वादन्यथा हिर
ण्मयेन पात्रेणाग्ने नय सुपथेति मार्गयाचनाद्यनुपपत्तेरिति सर्वमनवद्यं न कर्मणा न प्रजया धनेन त्यागे

कर्मण्यो मानसो तेभ्य एतावदिति वाश्रिता ॥२०॥ ॥

नैके मृतत्वमानशुः त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमं ॥ त्यजतैव हि तज्ज्ञेयं त्यक्तुः ॥ प्रत्यक्परं पदमि
त्यादिस्मृत्याद्युक्तस्त्यागोपलक्षितमात्मज्ञानमेव मुक्तिसाधनं तस्मादिति ॥ प्रकृतार्थमुपसंहरति ॥ तस्मा
त्त्याज्यं कर्म मुमुक्षुभिरिति ॥ मुमुक्षुभिः ॥ साधनचतुष्टयसंपन्नैरात्मतत्वजिज्ञासुभिरित्यर्थः ॥ विविदिषोरपि १९
नास्ति ॥ कर्मावसरः ॥ कुतो विदुषः इत्यभिप्रायः ॥ अत्रार्द्धश्लोको वैधिकः ॥ प्रागुक्ताधिकाद्देनसंख्येयः ॥२०

तदेवं मुमुक्षुणा सर्वकर्मसंन्यासपूर्वकं ज्ञाननिष्ठेन भवितव्यमिति न्यायेनोपपाद्येदानीं परोक्तं दृष्टांतमनू
द्य दूषयति ॥ अग्निष्टोमवदिति ॥२१॥ अर्द्धश्लोकेन दूषणमुच्यत इति प्रतिज्ञाय श्लोकेन दूषणमाह ॥ नैकेति
॥ कर्मणोऽग्निष्टोमादेरनेककारकसाध्यत्वान्निपतद्द्रव्यमंत्रतंत्रप्रयोगसाध्यत्वादिति यावत् ॥ तथा फला

अमृतत्वं श्रुतं तस्मात्त्याज्यं कर्म मुमुक्षुभिः ॥ अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते ॥२१॥ नै
ककारकसाध्यत्वात्फलान्यत्वाच्च कर्मणः ॥ विद्या तद्विपरीतातो दृष्टांतो विषमो भवेत् ॥२२॥ ॥

न्यत्वात् फलभेदवत्वाद्यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतेर्विद्याद्वा
रा वीर्यवत्तरफलविशेषसंभवाच्चोपयुक्ताग्रह कार्यपेक्षेत्यर्थः ॥ नैवं विद्यायामाह ॥ विद्येति ॥ तद्विपरीता कर्म
स्वभावविपरीतस्वभावेति यावत् ॥ यथावस्त्वधीनप्रमाणनिबंधनाया निरतिशयमोक्षैकफलाया विद्या

उप.स. याऽन्यसहकार्यपेक्षा युक्तेत्यर्थः॥यतएवं स्वभावभेदः॥कर्मविद्ययोरतोऽग्निष्टोमदृष्टांतो विषमो दार्ष्टांति चै.प्र.
५ कानुरूपो न भवेदित्यर्थः॥२२॥वैषम्यमेवोपपादयति॥कृष्यादिवदिति॥अग्निष्टोमः॥सातिशयः साध्य १
फलार्थत्वादन्यकर्मोपबृंहणमन्यैः॥कर्मभिः॥सहकारिभिर्विहितो दीक्षादिगसंश्रितोपासनादिरूपैर्ह

कृष्यादिवत्फलार्थित्वादन्यकर्मोपबृंहणम्॥अग्नि
ष्टोमस्त्वपेक्षेत विद्या नान्यत्किमपेक्षते॥२३॥ ॥

पचयमपेक्षेतेतियोजना तत्र दृष्टांतः॥कृष्यादिवदिति॥कृषिवाणिज्यादौ फलोपचयार्थं साधनविशे
षोपचयः॥प्रसिद्ध इत्यर्थः॥विद्या तु निरतिशयफलत्वादन्यत्सहकारिभूतं वस्त्वपेक्षते न किमपी १७
त्यर्थः॥२३॥ ॥

यदुक्तं॥अकुर्वन्विहितं कर्मेति॥प्रत्यवायस्य तस्येति तत्राह॥प्रत्यवायस्त्विति॥अस्य कर्मणोऽहंक
र्तृत्वेन तत्कृतं इदं फलं भोक्ष्य इति॥यस्याहंकार इष्यते इष्टो भवति॥स्वाभाविको वर्तते इति यावत्॥तस्याधि
कृतस्य विहिताकरणे प्रत्यवायो भवेदित्यर्थः॥आत्मवेदिन आत्मतत्त्वज्ञाननिष्ठस्य तु अहंकारफलार्थि

प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते॥अहं
कारफलार्थित्वे विद्येते नात्मवेदिनः॥२४॥ ॥

त्वे न विद्येते विषयाभावादितो निमित्ताभावाच्च प्रत्यवायस्तस्येत्यर्थः॥२४॥विद्यैवाज्ञानहानाय न क
र्माप्रतिकूलत इत्युपक्रम्योयतावग्रे पेन कर्मणः॥स्वर्धं तत्रोणवाज्ञान सहकारितया वा सर्वथा न साज्ञाननि
वृत्तिहेतुत्वमस्तीत्युपपाद्य अस्य विद्यामयेदानीं वक्तुं वेदः॥प्रचक्रम इति॥परमप्रकृतमुपसंहरति॥ ॥

उप.स. तस्मादिति॥ विद्यायाः॥ कर्मनिरपेक्षित्वं तच्छब्दार्थः॥ अज्ञानहानायानाद्यज्ञाननिरासासिद्धये पेक्षित चै.प्र.
१८ ब्रह्मविद्यां विधातुं संपादयितुं मियं परोपनिषद्वेदांतभागः॥ प्रारब्धेति योजना॥ अज्ञानहानस्य विन्ते १

तस्मादज्ञानहानाय संसारविनिवृत्तये॥ ब्रह्म
विद्याविधानाय प्रारब्धोपनिषत्त्वियं॥२५॥ ॥

यणां संसारवित्तिनिवृत्तय इति॥ संसारस्य वित्तिर्वृत्तिः॥ सम्यङ्निवृत्तिर्यस्मादिति विग्रहः॥ अजीवत्वमा १८
र्थं॥ अत्रोपनिषच्छब्दः॥ लक्षणया वेदांतग्रंथेषु प्रयुक्तः॥२५॥

तर्हि कोस्य मुख्योर्थ इति विविक्षायां ब्रह्मैव विद्यायां शब्दसामर्थ्यं दर्शयन्नुपनिषच्छब्दव्युत्पादनेनापि स्व
तंत्रैव विद्या मोक्षहेतुरिति सूचयति॥ सदेरिति॥ षद्लृविशरणगत्यवसादनेष्विति॥ धातोरूपनीत्युपसर्गद्
यपूर्वकस्य क्विप्प्रत्यये तस्योपनिषदिति॥ रूपं॥ अस्यात्र धात्वर्थत्रयं॥ तथाहि ये मंदबुद्धित्वविदस्तेषां
गर्भजन्मजरादिकमुपनिषादयति शिथिलीकरोतीत्युपनिषदित्येकोर्थः॥ जिज्ञासोर्ब्रह्मोपसमीपे निश्चये

सदेरुपनिपूर्वस्य क्विपि चोपनिषद्भवेत्॥ मंदीकरणभावाच्च गर्भादेः शातनात्तथा॥२६॥ ॥इ
ति श्रीसहस्त्रोपदेशीचैतन्यप्रकरणं प्रथमं समाप्तम्॥१॥ ॥कल्याणमस्तु॥ ॥श्रीरस्तु॥ ॥ ॥

न ब्रह्मगमयतीति द्वितीयः॥ तत्त्वविदां तु गर्भादिनाशयत्येवेति तृतीयः॥ एवं सम्यग्धात्वर्थयोगादिद्ध्यैवो
पनिषच्छब्दवाच्या॥ तादर्थ्याद्ग्रंथोप्युपनिषदुच्यते॥ लांगुलं जीवनमितिवदित्यर्थः॥२६॥ ॥इति श्रीसह
स्त्रोपदेशीचैतन्यप्रकरणं प्रथमं समाप्तः॥१॥ ॥इत्युपोद्घातविवृतं॥१॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥
॥ ॥श्रीजयोस्तु॥ ॥श्रीरस्तु॥ ॥श्री अवाजीसत्यचेः॥ ॥

॥ ॥इतिश्रीचैतन्यप्रकरणंसमाप्तं॥१॥ ॥

॥ ॥ॐ नमः॥ ॥चैतन्यप्रकरणमिति टीकांतरे॥ तदेवं मुमुक्षोर्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्त
ये वेदांतार्थं न उपपद्यत इति स्थिते पुनराशंक्यते॥ ननु विद्योदयाय वेदांतार्थं न स्तदोपपद्यते यदि विद्योद
यः॥ संभाव्येत स इहात्मनि संसारित्वग्राहकप्रत्यक्षादिविरोधशक्यान्न तेनापि नोत्पादयितुं शक्यते॥ अ
संजातविरोधितया प्रत्यक्षादेर्बलवत्त्वात्तदुपजीविनश्चागमस्य दुर्बलत्वात्कथंचिदुत्पन्नापि विद्याय॰

॥ॐ श्लोकः॥ प्रतिषेद्धुमशक्यत्वान्नेति नेतीति शेषितं॥ इदं नाहमिदं नाहमित्यद्धा प्रतिपद्यते॥१॥ ॥

दिप्रमाणसिद्धं संसारं बाधेत तर्हि प्रत्यगात्मनोपि ब्रह्मरूपत्वं कथं प्रत्यक्षानुमानेन बाधेतेति अत उत्तरं
वदति॥ प्रतिषेद्धुमिति नेति नेतीति वीप्सया सकलस्यापि प्रतिषेधेनोषितमुर्वरितं यदात्मतत्वं तस्य प्रतिषेधावधि
त्वेन प्रतिषेद्धुः॥ स्वरूपत्वेन प्रतिषेधसाक्षितयावस्थितं यतोतः॥ प्रतिषेद्धुमशक्यत्वादद्धा साक्षात्प्रतिप १
द्यते निः॥ संदिग्धमुपलभ्यत इति योजना॥ ॥

उपलंभप्रकारमभिनयति॥ इदं देहं रूपं नाहमात्मा इदमिंद्रियजातं मनोबुद्धिप्राणतदुपादानाचेतन
पर्यंतं नाहं किं त्वेषां प्रकाशकमव्यभिचारि स्वयंप्रकाशं कूटस्थमक्षरं यस्मिन्नेतत्सर्वजगदाश्रये व्याकृताका
शमोतं च प्रोतं च तदेवाहं परममक्षरमिति प्रतिपद्यत इत्यर्थः॥ अनेन न विद्यानोदेतीत्येषाशंका निराक
ता प्रतिषेद्धुमशक्यत्वादित्यनेन तुर्यपादव्याख्यातेन बाधायोग्यत्वं दर्शितमिति विवेक्तव्यं॥१॥ नन्वहं ब्रह्मे

इदं धीरिदमात्मोत्थावाचारंभणगोचरा॥ ॥

तिज्ञानमुक्तविधयोत्पन्नमपि न प्रतिष्ठां लभेत॥ देहेंद्रियाद्यभिमानस्यानवरतमनुवृत्तेरित्याशंक्यात
स्य प्रमाणमूलत्वाभावाद्बाधितानुवृत्तिमात्रत्वेनैवत्वान्न विद्याप्रतिपक्षत्वमित्यभिप्रेत्य वाक्योत्थज्ञान
स्य प्राबल्यमुपपादयति॥ इदं धीरिति॥ देहाद्यनात्मन्यात्मबुद्धिरिदं धीरित्युच्यते॥ साहंकर्तुरिदमंश
त्पूर्वपूर्वाहंकारवासनावासितांतःकरणरूपादिदमात्मनः॥ ॥

सकाशादुत्थिता ध्यासात्मिकेत्यर्थः॥ स्वरूपतो स्या दौर्बल्यं मुक्त्वा विषयमेदर्शयति दाह॥ वाचारंभणे
गोचरेति॥ निरूप्यमाणे स्वतः सत्ताहीनमपि परस्परोत्त व्यवहारगोचरतया मस्ते तद्वाचारंभणमन
तजडानात्मरूपं तदेव गोचरो विषयो यस्याः सा तथाय एवमतो नेति नेतीति श्रुत्या निषिद्धो बाधितश्चा

निषिद्धात्मोद्भवत्वात्सानानुपुनर्मतितां व्रजेत्॥२॥

त्मास्वरूपमुद्भवः॥ कारणं यस्याः॥ सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तस्मादिति वि-
ग्रहः॥ सा पुनरिदं धीरात्मयाथात्म्यज्ञानानंतरं मानतां प्रमाणत्वं न व्रजेन्न लभेत॥ अवस्तुत्वादवस्तुन
त्वादवस्तुविषयत्वाच्च सत्त्वज्ञावस्था विनूपज्ञानवदित्यर्थः॥ अतो वाक्योत्थज्ञानमेव प्रबलं नेतरदि २
तिभावः॥२॥ ॥

इदानीं पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति॥ न्यायेन प्रथमोत्पन्नाया अपि कर्त्राभोक्तेति धियम् उत्तरेण
ब्रह्मात्मज्ञानेन बाध्यत्वमुपपादयति॥ पूर्वबुद्धिमिति॥ न हि शुक्तिज्ञानजन्यां रजतबुद्धिमबाधित्वा शुक्ति
धीरुत्तरोत्पद्यते॥ एवं कर्त्रादिबुद्धिमबाधित्वा नात्मतत्त्वज्ञानमुत्तरमुत्पद्यते॥ अतः॥ प्रसक्तनिषेधात्मक

पूर्वबुद्धिमबाधित्वा नोत्तरा जायते मतिः॥ ॥

त्वाद्बाधस्य पूर्वसमये उत्तरप्रसक्त्यभावान्न पूर्वेणोत्तरस्य बाधः॥ किंतु॥ परेण पूर्वस्य प्रसक्तस्य बाध इत्य
नवद्यं॥ पदार्थबोधेऽन्यस्य मानांतरसापेक्षत्वेपि तद्वाक्यार्थबोधे तदपेक्षा पदार्थबोधेपि व्यवहारमात्र
स्येवापेक्षणात् पूर्वबुद्धेर्व्यवहारांगत्वात् तस्या उत्तरेण मज्ञानेनाबाधनाच्च नोपजीव्यविरोधश्चेति दृष्टव्यं॥ ॥

उप.स. ३ किंचौपनिषदात्मज्ञानमेवतत्त्वावेदकमत्यंतबाध्यमर्थत्वादित्याह॥ दृष्टिरिति॥ ब्रह्मात्माकारांतःकरणवृ उ.वि.
त्तिप्रतिफलितापरोक्षस्फूर्त्तिर्दृष्टिरित्युच्यते॥ सचैकः पराभावेनोपलक्षितो द्वितीयइतियावत्॥ स्वयंसिद्ध २
॥ परनिरपेक्षसत्तास्फूर्त्तिकः॥ सनबाध्यतेउक्तैर्विज्ञेयप्रमाणैर्बाधयोग्यत्वात्प्रमात्फलत्वाच्च॥ नहिफलंबाध्य

दृष्टिरेकःस्वयंसिद्धःफलत्वात्सनबाध्यते॥३॥ ॥

तेतस्यसर्वज्ञानसाधारणत्वात्सर्वव्यवहारहेतुप्रकाशत्वाच्चेत्यर्थः॥ नित्यसिद्धस्याप्यस्यफलत्वंविष
याकारवृत्तिव्यंग्यत्वापेक्षयोपचर्यतइतिभावः॥३॥ ॥ ३

एवंब्रह्मात्मज्ञानस्यवाक्यादनुत्पत्तिशंकामुत्पन्नस्यप्राबल्योपपादनेनपूर्वप्रवृत्तप्रत्यक्षादिभिर्बाध्य
र्त्वशंकांचोन्मथ्येदानींकथमिदमुत्पद्यतामिति॥ विविदिषायांपदार्थपरिशोधिनेनेति॥ श्रौतदृष्टांतेनोपपाद
यति॥ इदंवनमिति॥ इदंशरीरमेववनमिववनंरागद्वेषशोकमोहादिभिर्व्याघ्रतस्करादिस्थानीयैर्दूषित

इदंवनमतिक्रम्यशोकमोहादिदूषितं॥ ॥

मात्क्रांतमतिक्रम्यदृग्मात्रमाचार्यादवगम्यान्वयव्यतिरेकालोचनया पदार्थशोधनेनदेहादिकमनात्म
नःततयास्वस्वात्त्वमात्मानंसर्वानुस्यूतमनयोह्यंप्रतिपद्यते॥ अहंब्रह्मास्मीत्यौपनिषदंपुरुषमवगच्छती
त्यर्थः॥ यथागांधारकोगांधारदेशवासीपुरुषोबद्धचक्षुरेवतस्करैरानीयमहावनेनिक्षिप्तः॥ ॥श्रीरामः

सबंधमोक्षार्थितत्राक्रोशं कुर्वन् केनचित्कारुणिकेनोपलब्धस्तेन मोचितबंधो दर्शितस्वदेशमार्गो
ग्रामाद्ग्रामं पृच्छन् पंडितो मेधावी वनात्स्वदेशं प्रतिपद्यते॥ तथायमपि संसारी अविद्यारागादितस्करैः
मिथ्याज्ञानपटेन विवेकदृष्टिमाच्छाद्य स्वदेहारण्यं प्रवेशितो बंधमोक्षार्थी कदाचित्केनचित्कारुणिकेन।

वनात्संधारकोयद्वत्स्वात्मानं प्रतिपद्यते॥४॥ ॥इतिश्री
आत्मतानोत्पत्तिविधिप्रकरणं द्वितीयं विवृतं॥२॥ शुभं भवतु॥

आचार्येण ब्रह्मविदात्माजितमिथ्यादृष्टिपटः॥ प्रतिबोधितस्वदेशब्रह्ममार्गोन्वयव्यतिरेकाभ्यां स्वयमू
ह्मानः स्वमात्मानमधिगच्छतीत्यर्थः॥४॥ ॥इतिश्री प्रतिबोधप्रकरणं॥ ॥आत्मतानोत्पत्तिविधिप्रक ४
रणं नाम द्वितीयं विवृतं॥२॥ ॥शुभं भवतु॥ ॥श्रीरस्तु॥ ॥

॥ॐ नमः॥ प्रतिबोधप्रकरणमेतन्मत्र॥ येयं ब्रह्मविद्या प्रतिपादिता तस्यां प्रकाराग्रमात्रं ब्रह्म किंप्रत्यगा
त्मनो भेदेन प्रत्येतव्यं तदभेदेन वेति द्वासुपर्णा सयुजेत्यत्र भेदश्रवणादयमात्मा ब्रह्मेत्यभेदश्रवणाच्च संदे
हे निर्णयकारणं श्रौतं दृष्ट्वा यन्वाक्यविषयमर्थं संक्षिपति॥ ईश्वर इत्यादिना॥ ईश्वरो जगत्कारणत्वेनोपल
क्षितः॥ परमात्मा सत्यज्ञानानंतानंदरूपः स चेदात्मभिन्नो मे वा हि वद्विषभूतः॥ यदि सोऽवास्यान्तदा सावीश्व
रोहमस्मीति मुमुक्षुर्न धारयेदात्मानं तत्वतो न प्रतिपद्येत ततस्तत्वमस्यादिवचनैर्विरोधः स्यादात्मेति तु

ॐ नमः॥ ईश्वरेदनात्मास्यान्नासावस्मीति धारयेत॥ आत्मा चेदीश्वरोस्मीति विद्यासान्यविनिवर्त्तिका॥१॥

पगच्छेति ग्राहयंति चेति न्यायविरोधः स्यादित्यर्थः॥ ईश्वरश्चात्माहमस्मीनान्य इति चेद्धारयेद्विजानीयात्तदा
न श्रुतिन्यायविरोध इति योज्यं॥ सा विद्या तिरोहितभेदाकारप्रत्यग्ब्रह्मैक्यावबंधिनी अन्यस्या अविद्याया नि
वर्त्तिका समूलसंसारनिवर्त्तिकेत्यर्थः॥ ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुतौ ब्रह्मज्ञानस्य प्र १
साव फलश्रवणादन्यत्वपक्षेपि तस्य न इष्यत्वान्यस्यान्यभावानुपपत्तेरैक्यज्ञानमेव फलवदिति तत्रैव शास्त्र

तात्पर्यं न भेदे॥ ततज्ञानस्याफलत्वादन्योसावन्योहमस्मीति न स वेदेति भेददर्शनस्य निंदितत्वाच्च भेदश्रुतेस्त्व
नाद्यविद्याकल्पितभेदानुवादपरत्वान्न स्वार्थे तात्पर्यमिति भावः॥१॥ इतश्चाभेदे वेदतात्पर्यमाह॥ आत्मन इति
॥ अस्थूलत्वादयो धर्माः॥ प्रत्यगात्मतोन्यस्य भिन्नस्य चेन्मता इष्टाः स्युस्तदा सेश्वरस्यानात्मभूतत्वादज्ञेयत्वे
सति॥ मुमुक्षोरस्थूलत्वादिभिः तैः॥ श्रुतैर्धर्मैः॥ किं स्यान्न किमपि स्थूलोहं कृशोहमित्यादिस्वगतभ्रांत्यनिवृत्ते

आत्मनोन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः॥ अज्ञेयत्वेस्य किं तैः स्यादात्मत्वे त्वन्यधीह्रुतिः॥२॥

रित्यर्थः॥ यदा त्वस्थूलत्वादिधर्मक ईश्वरोहमस्मीति ज्ञायते तदा तस्यात्मत्वे सति प्रतीचोन्यधीह्रुतिः॥ स्वा
त्मन्येव गृहीताः॥ ऊरास्थूलत्वादिवियोमोहमूलायाबाधसिद्धिः॥ फलं स्यादित्यर्थः॥२॥ कस्मिन्नात्मन्यतः
प्रीतश्चेति कार्यकारणात्मके जगदाश्रयप्रश्नोत्तरत्वेनान्तरस्योपक्रमादेतस्या वा अक्षरस्य प्रशासने गार्गि इ
ति॥ जगदीश्वरतयाभ्येपरामर्शादहं दृष्टेत्यादिना तत्स्वभावकथनपूर्वकं मतेचैतस्मिन्नु खल्वक्षरे गा

उप.स. २

गप्रकाशः॥ अथैनमस्य प्रोतस्येत्युपसंहारादीश्वरपरतां प्राप्तस्य वाक्यस्याशेषस्यावधारितात्तत्र नान्यदतोऽस्ति दृष्टृ प्र.वि. ३
श्रोतृमंतृविज्ञातृ इति च इत्युक्तावुपलक्षितस्य प्रत्यगात्मनोऽक्षरब्रह्माभेदस्यावधारितत्वादितीश्वरात्मनोरभेद
एव शास्त्रार्थो यतस्तस्मात्प्रत्यगात्मन्यध्यस्तस्थूलत्वादिप्रतिषेधपरमिदं वाक्यमास्थेयमित्यभिप्रेत्याह॥
मिथ्येति॥ ततस्तस्मान्मिथ्याध्यस्तस्यात्मनः स्थूलत्वनिषेधार्थं निवृत्त्यर्थं अस्थूलादि प्रत्यगात्मविशेषणत्वे

मिथ्याध्यस्तविवेकार्थं ततोऽस्थूलादि गृह्यतां॥ परत्र चेन्निषेधार्थं शून्यतावर्णनं हि तत्॥३॥

नगृह्यतां॥ विपक्षे दोषमाह॥ परत्रेति॥ अस्थूलादिवाक्यं परत्र प्रत्यगात्मनोऽन्यत्र स्थूलत्वादिनिषेधार्थं चे
त्स्यात्तदा हि निश्चितं शून्यतावर्णनमेव तत्स्यात् दात्मनोऽन्यस्य जडत्वात्तस्य च स्थौल्यादिधर्मयोगान्निषेध्यातः
पातित्वे सतीश्वरस्येश्वरत्वायोगान्निषेधमात्रपरमेव वाक्यं स्यादित्यर्थः॥ तस्मादस्थूलादिधर्मकस्यानात्म २
त्वायोगादीश्वरमभ्युपगच्छता तत्रैवायमभ्युपगंतव्य इति भावः॥३॥ ॥

किंच॥ प्रत्यगात्मनोऽन्यत्र स्थूलत्वादिप्रतिषेधे च अप्राणप्रतिषेधोऽनिष्फलस्स्यात् पेद्येतेति दोषांतरमा
ह॥ बुभुत्सोरिति॥ यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बोद्धुमिच्छोः संसारित्वेनाभिमताद्यात्मन इति यावत्॥ त
दन्यत्र देहेंद्रियप्राणमनस्तद्धर्मनिषेध इष्यते॥ तदाऽप्राण इत्यादिवचनमनर्थकं निर्विषयं स्यादन्यत्रप्रा

बुभुत्सोर्यदि चान्यत्र प्रत्यगात्मन इष्यते॥ अप्राणो ह्यमनाः शुभ्र इति चानर्थकं
वचः॥४॥ ॥इति श्रीउपदेशसहस्र्यां ईश्वरात्मप्रकरणं तृतीयं विवृतिसमाप्त
म्॥३॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥श्री अंबाजी सत्य छे॥ ॥

णादि प्रसक्त्यभावात्प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थः॥४॥ ॥इति श्री उपदेशसहस्र्यां ईश्वरात्मप्रकर
णं तृतीयविवृतिसमाप्तम्॥३॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥श्री अंबाजी सत्य छे॥ ॥

॥ ॥इतिश्रीईश्वरात्मविवृतिंसमाप्तं॥३॥ ॥

उप.स. १ ॥ र्द्धनमः ॥ ननु यदिदमीश्वरार्पणेनात्मनो ज्ञानं मोक्षसाधनमुक्तं तन्नोपपद्यते ॥ संचितानेककर्मसद्भा- प्र.वि. ४
वात्कर्मणां च फलानामनुपभोगावशिष्यमाणैः प्रतिबन्धसंभवादिति तत्राह ॥ अत्रमिति ॥ अहमिति प्रत्ययोऽहं-
कारेणात्मन्यात्माभिमानलक्षणः स बीजं कारणं यस्य कर्मणस्तदहंप्रत्ययबीजः ॥ अहमिति प्रतीयतेऽत्रा-
त्मा यस्मिंल्लिंगशरीरे सामानासेतदहंप्रत्ययवत्तस्मिन्नहंप्रत्ययवति स्थितं संचितं यत्कर्मजातं तत्राहं कर्त्रा

अहंप्रत्ययबीजं यदहंप्रत्ययवत्स्थितं ॥ नाहंप्रत्ययवद्प्लुष्टं कर्म तत्कं प्ररोहति ॥१॥ ॥

भोक्ता ॥ किंतु ॥ ब्रह्मैवाहमस्मीति यः ॥ प्रमाणजनितः ॥ प्रत्ययः ॥ स एव वह्निस्तेनो प्लुष्टं दग्धं कर्म यं पुनः प्ररोह-
ति फलोन्मुखं जायते इति योजना ॥ तथा च श्रुतिस्मृती ॥ क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ज्ञानाग्निः स-
र्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति ॥ ज्ञानोदयेनांतरीयकतया मूलाज्ञानस्य विरोधादेव निवृत्तिसंभवात्त- १
दानत्कार्यतच्छरणस्याविनिवृत्तेराश्रयाभावे कर्मणामयोगात्कुतस्तेन मोक्षप्रतिबन्धशंकेत्यभिप्रायः ॥

ननु यथा ज्ञानवतोऽपि भिक्षाटनादिकर्म सफलमुपलभ्यते ॥ तथा तस्याऽदृष्टफलमपि कर्म सफलं स्यादिति
कल्प्यत इति शंकते ॥ दृष्टवच्चेत् प्ररोहः स्यादिति ॥ परिहरति नान्यकर्मास इष्यत इति ॥ नेति निषेधार्थः ॥
स भिक्षाटनादिविदुषो व्यापारोऽन्यकर्मा अन्यत्प्रारब्धफलं कर्म कारणं यस्य सोऽन्यकर्मा इष्यते ॥ ज्ञानविरो-

दृष्टवच्चेत्प्ररोहः स्यान्नान्यकर्मास इष्यते ॥ तन्नि-
रोधे कथं तत्स्यात्प्रश्नमो वस्तदुच्यतां ॥२॥ ॥

धी त्वारब्धफलकर्मनिबन्धनं हि भिक्षाटनादि विदुषो नैवं विधिलक्षणं तस्य ज्ञानविरोधित्वादित्यर्थः ॥ प्रथ
ननु ज्ञानादज्ञाननिवृत्त्या तन्मूलाहंकारनिवृत्तिद्वारेण तदाश्रयकर्मनिवृत्तौ कथमारब्धमपि कर्म तिष्ठे-
द्यन्निमित्ता विदुषो भिक्षाटनादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववादी ॥ तन्निरोध इति ॥ कर्माश्रयः स तद्भा-
र्थः ॥ कर्मद्वितीयतद्भावार्थः ॥२॥ ॥

उप·स· २ उत्तरमाह॥ देहादीति॥ सद्विषयं प्रमाणजनितत्वेन तत्प्रबलमपि ब्रह्मात्मविषयं ज्ञानं अभिभूय प्र·वि·
२ विदेहकैवल्यरूपात्फलात् प्राच्याव्य कर्म प्रारब्धफलं लक्षणं स्वफलं देहाभासजगदाभासरूपं त्वपि ज्ञानव ४

देहाद्यारंभसामर्थ्यात् ज्ञानं सद्विषयं त्वपि॥ अभिभू
य फलं कुर्यात्कर्मेति ज्ञानमुद्भवेत्॥३॥ ॥

त्यपि कुर्यादेव कुतः देहाद्यारंभसंपत्तिसमर्थत्वात् ते प्रारब्धकर्मफलभोगावसाने सति ज्ञानं प्रतिबंध २
रहितं समुद्भूतं दुद्भूतं भवति वर्त्तमानकार्यसंपादकाविद्याजेन्नामप्यपवाध्य विद्वांसं स्वराज्ये स्थापयती
त्यर्थः॥३॥

ननु प्रारब्धकर्मवज्ज्ञानज्ञानिनोपि भोगः स्यान्नत्वनारब्धकर्मतत्फलयोस्तस्मिन्नवस्थितिरिति॥ क
थं मुपपद्येत ज्ञानकार्यत्वाविशेषात् सर्वस्य ज्ञाननिवृत्तौ च पुनराश्रयाभावेनावस्थानाभावस्य समत्वा
दित्याशंक्य विशेषमाह॥ प्रारब्धस्येति॥ भोगो ज्ञानं चेत्येते हि यस्मात्प्रारब्धस्य कर्मणः फले तस्तयोर विरो
धे युक्तः इतरस्यत्वनारब्धफलस्य संचितस्य क्रियमाणस्य वा कर्मणो वैधर्म्यं वैपरीत्यं एवेत्यक्षरार्थः॥ अ

प्रारब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः॥ ॥

यं भावः॥ ज्ञानं हि स्वकारणाज्जायमानं शरीरादिसापेक्षमेव जायते॥ अशरीरस्यागंतुकज्ञानासंभवा
च्छरीरादिकं तु न ज्ञानकारणादुत्पद्यते॥ अन्यकारणस्यान्यहेतुत्वायोगात्॥ कैश्चित्कर्मविशेषैः॥ शरीर
विशेषैः॥ शरीरविशेषे ज्ञानोत्पत्तियोग्ये स्वफलदातया॥ ॥

उ॰प॰स॰ ३ रब्धे सति तमाश्रित्य ज्ञानहेतुकर्मणि ज्ञानमारंभं तदित्यभ्युपगंतव्यं ॥ तथा चारब्धे देहे तद्भोगप्रदकर्मा प्र॰वि॰ ४
रब्धशरीरमाश्रित्य स्वहेतुसमासादितं ज्ञानं स्वफलमज्ञाननिवृत्तिं कुर्वद्विनश्यद्भोगैकनाश्यदेहारंभकक
र्मणि स्वाविद्यालेशानिवृत्तेर्यत्युपजीव्यविरोधित्वाभावादिति ॥ नारब्धफलकर्मज्ञानयोर्विरोधस्तेनारब्धफला

अविरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु ॥ ४॥ ॥

नानुकर्मणोः सकर्तात्मतत्त्वज्ञानोदयविरोधादेव कर्तृत्वभावनिवृत्तावाश्रयाभावादभावोपपत्तेर्न ज्ञानेन ३
सहावस्थानमुपपद्यत इत्यस्ति विशेष इति ॥ ४॥ ॥

ननु ज्ञानिनोपि चेद्भोगो देहारंभककर्मनिबंधनोस्ति तर्हि तस्य कदाचित् देहात्माभिमानं संभवात्तदुद्भूत
दुरितप्रतिबंधवशान्मोक्षानुपपत्तिरिति चेन्नेत्याह ॥ देहात्मज्ञानवदिति ॥ यथा विवेकविज्ञानस्य लौकि
कस्य देहे मनुष्योहमित्यात्मज्ञानं निः॥ संदिग्धमुपलब्धं तथा मुख्यात्मन्येव देहाद्यहंकारपर्यंतसाक्षिण्या

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं ॥ ॥

त्मन्येव यस्य देहात्मज्ञानबाधकमाह ॥ यस्मिन्परं ब्रह्मैतत्त्वेन रूपं निः॥ संदिग्धं भवेत्स यथोक्तज्ञानबलाद
नर्थराशेरपनीतत्वान्मुक्तिमनिच्छन्नपि बलान्मुच्यत एवेत्यर्थः ॥ तथा चाविर्भूतात्मतत्त्वस्य पुनर्देहाभिमा
नहेत्वाभावान्न मोक्षे कोपि प्रतिबंध इति भावः ॥ तथा च श्रुतिः ॥ ॥

उप॰स॰ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरइत्याद्याः ॥ तथा चस्मृ च॰वि॰
४ तयोपि ॥ बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः ॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनः ॥ यथा पर्वत ४

ध्यात्मन्येवं भवद्यस्यसनेछन्नपि मुच्यते ॥५॥ ॥

मादिन्नं नाश्रयंति मृगाद्विजाः ॥ तद्वत् ब्रह्मविदो दोषा नाश्रयंते कदाचन ॥ मंत्रौषधबलैर्यद्वज्जीर्यते भक्षितं वि ४
षं ॥ तद्वत्सर्वाणि कर्माणि जीर्यंते ज्ञानिनः ॥ क्षणादिति ॥५॥ ॥

ज्ञानिनः कर्मणां प्रतिबंधाभावमुपपादितमुपसंहरति ॥ ततइत्यर्द्धश्लोकेन ॥ सर्वमिदमिति ॥ प्रा
रब्धकर्माविरोधित्वोक्तिः ॥ सिद्धं श्रुत्युक्तप्रमाणसिद्धमित्यर्थः ॥ प्रयोगउपपत्तिः ॥६॥ ॥इतिश्रीउ ४

ततः सर्वमिदं सिद्धं प्रयोगोस्माभिरीरितः ॥६॥ ॥इ
तिश्रीउपदेशसहस्रीतत्वज्ञानस्वभावप्रकरणंचतु
र्थं विवृतं ॥४॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥श्रीरस्तु॥

पदेशसहस्रीव्याख्याप्रकरणं ॥ इतितत्वज्ञानस्वभावप्रकरणंचतुर्थविवृतंसमाप्तम् ॥४॥ ॥कल्या
णमस्तु॥शुभंभवतु॥श्रीरस्तु॥ ॥

उप.स.
५

॥इतिश्रीचतुर्थविवृतंप्रकरणंसमाप्तः॥४॥ ॥

च.वि.
४

५

॥ॐ नमः॥ यद्दिग्भ्रमगुरूक्त्या ब्रह्मात्मतात्मानममृतं त्वंगमये त्किमिति सर्वैरहं ब्रह्मास्मीत्यात्मरूपं न गृह्य
ते निसर्गत एव सर्वेषां परमपुरुषार्थापित्वादिति तत्राह॥ मूढानामिति॥ अत्रेयमाख्यायिका॥ उदंको नाम
कश्चिद्दृषिर्भगवंतं महाविष्णुं तपसा तोषयित्वा देवरक्षितममृतं प्रार्थितवांस्तदा भगवता देवेंद्रं प्रत्युक्तममृ
तमस्मै दीयतामिति॥ इंद्रस्तु विष्णोराज्ञां पालयन् अमृतकलशं नीत्वा मातंगवेषमास्थाय स्ववस्तिं दर्शितवा
न्मामुपनिधायोदंकाय दातुमारेभे॥ अस्य पयामा भवतस्यामृतपानमिति मन्यमानस्तदुदंकोऽपि चंडालमूत्र

ॐ नमः॥ मूढानां कोऽयथार्थं कोनाम गृह्णीयादमृतं यथा॥ कर्मनाशभयाज्जंतोरात्मज्ञानाग्रहस्तथा॥१॥ ॥

मिं कथा न जग्राहेति॥ उदंको मूत्रान्नांकः सन्यथाभूतमेव प्रत्यक्षोपलब्धमप्यमृतं यथा नाग्रहीन्मदभिल
षितममृतमिदमिति न गृहीतवान् ज्ञातिनाशभयादिति योजना॥ तथा जंतोर्लोकस्य वर्णाश्रमोपाधिविहित
कर्मनाशभयादात्मज्ञानस्य यथोक्तस्याग्रहस्तस्मिन्नादर इत्युत्तरार्द्धयोजना॥ पदार्थस्वरूपापरिज्ञानं विप १
रीतज्ञानं च श्रुत्युक्तात्मस्वरूपाग्रहणकारणमिति भावः॥१॥ ॥

ननु दृष्टांते देवेंद्रस्य वैपरीत्यममृतकलशस्य च मूत्राशयस्यानिवेदनं च जातं तत्र मूत्रभ्रमोत्पादने
नामृताग्रहणकारणमासीन्न तथात्मनो ब्रह्मभूतस्य भ्रमकारणमस्तीत्यत आह॥ बुद्धिस्थ इति॥ अनाद्यवि
द्ययात्मात्मन्यध्यस्तबुद्धौ लिंगशरीरेऽभिमानित्वेन स्थित आत्मा तस्यां बुद्धौ चलंत्यां चलतीव दृश्यते॥ न व
स्तुतश्चलत्यविक्रियत्वात्॥ तथा तस्यां ध्यायंत्यां निश्चलीभूतायां ध्यायतीव निश्चल इव दृश्यते प्रतिभासते

बुद्धिस्थश्चलतीवात्मा ध्यायतीव च दृश्यते॥ नौगतस्य यथा वृक्षास्तद्वत्संसारविभ्रमः॥२॥ ॥

न वस्तुतो ध्यायति च जननाभावेन तत्प्रतियोगिकस्य नैश्चल्यस्याप्यभावादित्यर्थः॥ विकारवंतबुद्ध्यविवेका
दात्मैव संसार्यहमस्मीति विपरीतनिश्चयदोषाद्युत्यादिभिरीर्यमाणमप्यात्मनो ब्रह्मत्वं न गृह्णातीति श्लोकस्या
भिप्रायः॥ अविवेकादन्यथाप्रतिपत्तौ दृष्टांतमाह॥ नौगतस्येति॥ तद्वदिति॥ दार्ष्टांतिकोक्तिः॥२॥ ॥राम॥

उप.स. २ उक्तमेव प्रपंचयति॥ नौस्थस्येति॥ जलस्थायां चलन्त्यां नावि स्थितस्य जनस्य यथा नौगतिर्दृग्वैपरीत्येन त प्र.वि. ५
टस्थायतीरस्थानां नगानां वृक्षादीनां गमनं विभाव्यते॥ उपाध्यविवेकात्तद्वत् संसारित्वोप्यात्मनः॥ संसृतिर

नौस्थस्य गातिता दृष्टा नगानां गमनं यथा॥ आत्मनः
संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः॥३॥ ॥

नुभूयत इत्यर्थः॥ उक्तार्थानुवादिनीं श्रुतिं पठति॥ ध्यायतीवेति हि श्रुतिरिति॥ स समानः सन्नुभौ लोका २
वनुसंचरति॥ ध्यायतीव लेलायतीवेति श्रुयत इत्यर्थः॥३॥ ॥

प्रपंचितदृष्टांतानुगुण्येन दार्ष्टांतिकं प्रपंचयन्नुदाहृतश्रुत्यर्थमाह॥ चैतन्यप्रतिबिंबेनेति॥ चैत
न्यप्रतिबिंबश्चिदाभासस्तेन व्याप्तो हि यस्माद्बुद्धेर्बोधो विषयाकारा बुद्धिर्जायते॥ अतः स्वाभासाविवेका
च्छब्दादिभिर्बुद्धिवृत्तिव्याप्तविषयैरित्थंभावे तृतीया॥ विषयभूतदेहाद्यात्मनाभासोभासनं स्फुरणं भासमानो

चैतन्यप्रतिबिंबेन व्याप्तो बोधो हि जायते॥ ॥

भवतीति शेषः॥ यदि बुद्ध्यादिनिर्भास इति पाठो लभ्यते॥ तदा बोधविशेषणं॥ शब्दादेर्विषयस्य निर्भासो
यस्मिंस्तथेति सुगमं॥ येनैवमेकस्यां बुद्धिवृत्तौ देहादिविषयचैतन्ययोः॥ संश्लेष इव भवति॥ तेनान्योन्यावि
वेकनिमित्तेन जगत्॥ जनो मोमुह्यतीत्यर्थः॥ यथा नौस्थः॥ पुरुषो नावश्चलनेनानुभवति॥ ॥श्रीराम॥ ॥

उप.स. अप्रचलत्सुखदुःखेष्वचलनमनुभवति॥ उपाधिसामर्थ्यादेवं बुद्धिस्थदेहात्मैक्याभावमिनापन्नश्चात्मा तद्दी प्र.वि.
३ यव्यापारं तेनैव गमनमनुभवति॥ तदाभासाविवेकाच्चिदात्मनि विकारमारोपयन्ननुभवति ध्यायतीवेत्यतिनन्तृष्या ५

बुद्धेः शब्दादिनिर्भासस्तेन मोमुह्यते जगत्॥४॥ ॥

यतीवेत्यादिश्रुत्योच्यते॥ अतउपाधिसामर्थ्यात्संसारित्वविभ्रमं ददात्यभिप्रायः॥४॥ ॥श्रीअबाजी॥ ॥ ३

एवमविवेकाधीने संसाराध्यासे विवेकपदार्थस्य वाक्यादहं ब्रह्मास्मीति बुद्धिसमुदये मुक्तिः॥ फलितम्
आतः॥ पदार्थविवेकवतामान्यं मुमुक्षुणोऽत्यभिप्रेत्याह॥ चैतन्याभास्यतेति॥ अहमो हंकारस्य चिदचिद्ग्रंथि
रूपस्य पक्षे चैतन्याभास्यता दृश्यता पक्षे तादर्थ्यं चिदात्मनो विषयोपस्थापकत्वेन तच्छेषत्वमस्ति तदुभयमस्या
हंकारस्य संबंधितस्मिन्निदमंशस्य ग्रहाणे विवेके सति न भवत्तस्मादिति योजना॥ तत्र योनुभवः साक्षी परो

चैतन्याभास्यताहमस्तादर्थ्यं च तदस्य यत्॥ ॥

ऽप्रिः स परः परमात्मा वाक्यार्थभूतो भवेदित्यर्थः॥ यद्वा॥ स्याहमो हंकारस्य चैतन्याभास्यता जडता तादर्थ्यं
च तच्छेषत्वं च यद्यस्मादस्ति तत्तस्मादयमहंकारो नात्मेति विवेकोऽशग्रहाणेन तस्मिन्नस्य दर्शत्वाभिमानतया
गतयोनुभवः॥ सर्वांतरोनुभवो हमो हंकारस्येदमंशाग्रहात्पर आत्मेति निश्चयवान्भवेदिति योजना॥ अ
थवा सर्वास्य वाक्यार्थविषयः परः॥ सर्वांतरोनुभवो हमो हंकारस्येदमंशाग्रहाणेन पृथक्करणे भवेदिति सं
बंधः॥

उप॰स॰ ४ इदमनिदमात्मकस्याहंकारस्य संबंधीयइदमंशस्तस्य साक्षिसाक्ष्यान्वयव्यतिरेकाभ्यामपायितदेवं व्यान्व ५
यव्यतिरेकालोचनतद्रूपेणमननेनावबोधे सति अविशिष्टं यो न योह्यात्मेत्यनुभवो भवेदित्यर्थः॥ नन्व
हमित्यवभासे इदमंशाएवनचकास्तियस्य प्रहाणेन परोनुभवोभवेदित्याशंकायामाह॥ चैतन्यभास्यताता
दात्म्यं चेति॥ सुषुप्त्यादावात्मनिभासमानेप्यहंकारस्यानवभासादनात्मत्वे निश्चिते सतितामरिताश्चायांतु

इदमंशप्रहाणेन परः सोनुभवो भवेत्॥५॥ ॥

कृत्वाश्चैतन्यभास्यतातस्य सिद्धाः॥ अतः प्रतिभासतइदमंशाभावेपिचैतन्यभास्यत्वेन उत्पणोनास्तीद
माकारतात्पर्यः॥ तथातादर्थ्यमप्यस्ति आत्मनिकर्तृत्वभोक्तृत्वादिव्यवहारनिर्वाहकतया आत्मनोपत्वम ६
स्तियद्यस्मादेवं तत्तस्मादप्यनात्मत्वजणइदमंशोविद्यते॥ अतस्तत्प्रहाणेन ब्रह्मात्मानुभवो भवेदिति
सर्वंसमंजसं॥५॥ ॥

कप्रकरणंबुध्यपरा
:॥ ॥इतिश्रीमत्पदमहावाक्यप्रमाणमर्यादाउपदेशसहस्त्रीनाममूत्रार्थकप्रकरणंबुध्यपरा

॥ ॥इतिश्रीउपदेशसहस्त्रीनाममूत्रार्थकप्रकरणंबुध्य
पराधप्रकरणंपंचमंविवृतंसमाप्तम्॥५॥ ॥कल्याणमस्तु
॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥श्रीअबाजीसत्यदे॥ ॥

धप्रकरणंपंचमंविवृतंसमाप्तम्॥५॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥ ॥श्रीअबाजीः

654

उप॰स॰
५

॥इतिश्रीमूत्राशंकप्रकरणेपंचमंविरतंसमाप्तं॥५॥ ॥

श्र॰वि॰
५

५

उप. स. ॥ॐ नमः॥ पदार्थविवेकवतो वाक्याद् अहं ब्रह्मेति ज्ञानं भवतीत्युक्तं॥ तत्रोज्ञाहमित्यत्रेदमंशप्रहाणेन साक्षितत्त्वस्य शोधन प्र. वि. ६
१ प्रकारः॥ सप्तमेऽध्याये निर्दिष्टः॥ तत्रास मर्थं प्रतिष्ठन्नोपायेन पदार्थशोधनप्रकारमुपदेष्टुं प्रकरणमारभते॥ तत्र यत्त्व
रूपप्रहाणमंतरेणाहंतुं न शक्यते॥ यथा स्वशरीरे स्थितं स्वस्वरूपत्वादेव न विशेषणतां पैति तथापि तथाविधस्य कि
ञ्चिद्विशेषणत्वव्यवहारः॥ कश्चित्तमेदमाश्रित्येति स्थिते आत्मनि सति सत्त्वाचैतन्यानंदानामनपायान्न तेषां विशेषणत्व

ॐ नमः॥ छित्वात्यक्तेन हस्तेन स्वयं नात्मा विशिष्यते॥ तथा शिष्टेन
सर्वेण येन येन विशिष्यते॥१॥

किंतु स्वरूपत्वमेव कृशः स्थूलः॥ कृष्णो गौरोऽहं मनुष्यः॥ श्रोता द्रष्टा वक्ता कामी क्रोधी ज्ञानी कर्मी भोक्ता सुखी दुःखी से
वं विधानि विशेषणानि तानात्मने॥ सत्त्वादिवत्स्वरूपभूतानि सत्यप्यात्मनि सुषुप्त्यादौ तेषामभावादित्येवमात्मनः॥ पृ
थगुपलब्धस्य तस्य कृतस्य तावद्येयेत्यनित्वेत्य पृथग् न तस्य विशेषणत्वाभावो दृष्टान्तमाह॥ छित्वात्यक्तेनेति॥ यथायं १
दृष्टान्तस्तथा येन मनुष्यत्वादिना विशिष्यते न तेन सर्वेण॥

शिष्टेन त्यक्तहस्तादिति शिष्टेन पादादिना वा स्वयमात्मा न विशिष्यते॥ यथा हस्तच्छेदानन्तरं हस्तवानहमिति न विशिष्ट
प्रत्ययः क्रियते॥ एवमेव पादादिमान् मनुष्योऽहमित्यादि विशिष्टप्रत्ययो न कार्य इत्यर्थः॥ ॥ देहद्वयसमवायिध
र्माणां आत्मनि व्यभिचाराद्वैरात्मा विशिष्यत इत्येतद्युक्तमनूद्य फलितमाह॥ तस्मादिति॥ अनात्मत्वेन त्य

तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणं॥ अ
नात्मत्वेन तस्मात्तन्मुक्तः सर्वविशेषणैः॥२॥

क्तेन हस्तेनेति संबंधः॥ विमतानि विशेषणानि नात्मस्वभावभूतानि विशेषणत्वात् छित्वा त्यक्तहस्तवदित्यर्थ
॥ यस्मादेवं तस्मात्तज्ज्ञातानवान सर्वविशेषणैर्मुक्तश्चिदात्मा सदानंदमात्रात्मकत्वाद् विशिष्यत इत्यर्थः॥२॥

उप.स. त्युक्तन्यायेन विशेषणानामनात्मत्वेपिनात्मनस्तद्विवेकोक्तिः आगमापायाभ्यां संबंधनैरंतर्यादित्याशंक्याह॥ वि प्र.वि.५
२ शेषणमिदं सर्वमिति॥ इदं सर्वं विशेषणं यथालंकरणमलंकार्यसंबंधेपि न तत्तादात्म्यं तद्वदत्र बुद्धिविषयस्तथा
साधुत्वमनेनयुक्तमितियावत्॥ इतरथा आगमापायानुपपत्तेरित्यर्थः॥ तर्हि कुतो मनुष्योहमित्यादौ तादात्म्याव

विशेषणमिदं सर्वं साध्वलंकरणं यथा॥ अवि
द्याध्यासतः सर्वं ज्ञाते त्वात्मन्यसद्भवेत्॥३॥

भासस्तत्राह॥ अविद्याध्यासतइति॥ मोहादेवतथावभासइत्यर्थः॥ यस्मादविद्ययाध्यस्तमेवात्मनीदं सर्वं विशे २
षणमतोज्ञाते आत्मन्यविद्यानिवृत्तावसद्बाधितं कालत्रयेप्यविद्यमानं भवेत्तथा निश्चितं भवेदिति योजना॥३॥

उप.स. आत्मनो हंप्रत्ययग्राह्यत्वाभावे चक्षुरादेरप्यविषयस्य कुतः॥ सिद्धिरिति मुग्धानां शंकां दृष्टांतेनापाकुर्वन्नात्मनोऽन्यनि प्र.वि.६
३ रपेक्षत्वं ततः॥ सिद्धिं साधयति॥ यावदिति॥ अहमित्यनया धीस्थश्चिदवभासस्तत्त्वं ज्ञानं तदहंसंज्ञोयोऽहंकारादिर्यत्र विशेष
णं यथा दृष्टिर्नत्वानुगतत्वतिनायेप्रत्यगात्मनि विशेषव्यवहारहेतुत्वात्प्रत्यगात्मान्यो विशेषणत्वेनाभिमतास्त्वहं
कारादिः॥ परोविशेषप्रत्यक्तयस्य च वैषां विशेषाणां प्रत्यक्तया ख्यातिर्नपदित्यलमिति॥ अत्युक्तेनिर्विशेषस्याऽवंदपःस्व

याचात्मादिरसंज्ञोयः सन्यतोन्यो विशेषणं॥ विशे
षणत्वयोपत्वसिद्धोत्मश्चित्रगुर्यथा॥५॥ ॥ ॥

तः॥ विशेष्यनिरपेक्षत्वसिद्धिः॥ अस्य उरत्ववर्जितेऽतिपदयोजना॥ यथा हि देवदत्तो विशेषणान्तरायां चित्रगोरन्यत्वं तं
वं धुन्यागोव विहीनपित्रगोः॥ संबंधस्वसिद्धिप्रत्यपेक्षते॥ तथात्माप्यहंकारादिसंबंधात्प्रागेवस्वमहिम्नासिद्धो ३
नाहंकारादिकं स्वसिद्धावपेक्षतइति दृष्टांतदार्ष्टांतिकसंगतोर्थः॥५॥

ज्ञातर्य्यात्मनीत्युक्ते तेषत्वमात्मन एकमिति शंका स्यात् ॥ तेषत्वे च विशेषणादिवद्नात्मप्रसंगात् इत्याशंक्याह
॥ ज्ञातैवेति ॥ तेषमुत्सृज्य दृश्यांशापोहं कृत्वा यो ज्ञाता सदा सर्वस्य सर्वदा त्मा नयाह्यो ग्राह्य इति ग्राह्यो ध्येवेयः ॥ किंज
ह्रेणः केवलो ज्ञाता त्वविशेषणेनापि रहित इत्यर्थः ॥ ज्ञातृत्वाद्युपलक्षितं चिन्मात्रमंशुत एवकारः स्वभावतया पर्वानुस्यू

ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः ॥ अह-
मित्यपि यद्ग्राह्यं व्यपेतांगसमं हि तत् ॥ ४ ॥ ॥

तं वस्त्वात्मेति विवेकवतो निश्चितप्रत्ययो भवेदिति भावः ॥ अहमित्यनुभूयमानत्वात्कथं ज्ञातैवात्मेत्युच्यत इत्यत आ-
ह ॥ अहमित्यपीति ॥ यदपि इदमहमिति ग्राह्यमात्मरूपं मन्यसे तदपि व्यपेतांगसमं छिन्नहस्ततुल्यं हि एतत्सुषुप्त्यादावा-
त्मन्यवभासमानेप्यहमित्यनवभासनादहमोव्यभिचारित्वेन त्वात्मरूपतयात्मत्वायोगादित्यर्थः ॥ ४ ॥ ॥ ॥

ननु अहमो नात्मत्वे कथमहं ब्रह्मेति तादात्म्यश्रुतिरुपपद्यते इत्याशंक्याध्यस्ताहंकारस्य मूलनिकृष्टस्य निकृष्टस्यार्थश्रुतिना-
हंकारस्यात्मत्वप्रतिपत्त्यर्थेति परिहरति ॥ इदमंशोहमिति ॥ अहमित्यत्राहंकारांशवभासे य इदमंशः स नात्मा दृश्यत्वादि-
ति निश्चित्य पंडितैर्न्यास्यस्तस्मिन्नात्माभिमानो न कार्य इत्यर्थः ॥ तर्हि कथं श्रुतिनिर्देशस्तत्राह ॥ अहमिति ॥ अहं ब्रह्मे-
ति वाक्यार्थनिष्ठायां योहंकारांशस्त्यज्यते स भूतपूर्वगत्या तेनेहतो भवेत् ॥ भूतामजातापूर्वगतिः ॥ आविस्तस्या इति विग्रहः

इदमंशोहमित्यत्र त्याज्यो नात्मेति पंडितैः ॥ अहं ब्रह्मेति शिष्टांशो भूतपूर्वगतेर्भवेत्
वेत् ॥ ६ ॥ ॥ इति छित्वा प्रकरणम् इति श्रीविशेषापोहप्रकरणं षड्विंशतमम्
॥ ६ ॥ श्रीरस्तु ॥ शुभं भवतु ॥ ॥ श्रीरामायनमः ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ॥

॥ अहंकारलक्ष्यं वस्तु तत्स्वाभिरूपमहमिति श्रुत्योच्चिरव्यत इत्यर्थः ॥ ६ ॥ ॥ इति श्रीछित्वाप्रकरणं इति विशेषापोह
प्रकरणं षड्विंशतमम् ॥ ६ ॥ कल्याणमस्तु ॥ शुभं भवतु ॥ श्रीरस्तु ॥ ॥ श्रीरामायनमः ॥ ॥ श्रीकृष्णायनमः ॥ ॥

॥ ॥इतिषष्ठंप्रकरणंविवृतंसमाप्तं॥६॥ ॥

उप.स.
१

॥ ॥ श्रीकृष्णाय नमः ॥ ॥ एवं कृतान्वयव्यतिरेकस्य परिशोधितपदार्थतत्त्वस्य वाक्याद्वाक्यार्थज्ञानमुपपद्यत उ.वि.७
इति ॥ उपपत्त्या निर्धारितमर्थं स्वानुभवावष्टंभेन तस्य दृढीकर्तुं प्रकरणांतरमारभते बुद्ध्यारूढमित्यादिना ॥ यस्मिन्नध्यास
वेन मध्यात्ममधिभूतमधिदैवमित्यादि ॥ लक्षणं यत्र तत्र वा जाग्रत्स्वप्नयोरिहलोकपरलोकयोर्वा बोधितं प्रत्यक्षादित

॥ श्रीकृष्णाय नमः ॥ ॐ नमः ॥ बुद्ध्यारूढं सदा सर्वं दृश्यते यत्र
तत्र वा ॥ मया तस्मात्परं ब्रह्म सर्वज्ञश्चास्मि सर्वगः ॥ १ ॥ ॥

ः स्वतो वा परतो वा यदुपलभ्यमस्ति तत्सर्वं बुद्ध्यारूढं बुद्धिवृत्तिक्रोडीकृतं सदा दृश्यं तेन प्रकाश्यते तस्मादहं सर्वदृश्यविल
क्षणत्वात्परं प्रपंचातीतं ब्रह्मास्मि सर्वज्ञः सर्वार्थप्रकाशकः ॥ सर्वगोऽपरिच्छिन्नश्चास्मीत्यर्थः ॥ १ ॥ ॥ ॥ १

ननु कथमेतावता सर्वज्ञत्वं पुरुषांतरबुद्ध्यारूढेऽर्थे पुरुषांतरस्यानुभवस्मरणयोरसंभवादेकस्यात्मनः सर्वा
र्थप्रकाशकत्वासिद्धेरित्यत आह ॥ यथात्मेति ॥ आत्मनि सर्वव्यवहारप्रवर्तकतया आत्मत्वेन बंधिनी बुद्धिरात्मबुद्धि
स्तस्याः प्रचारो हृत्येषु आत्मबुद्धिचाराः प्रत्यक्षत्वादिदृष्टं वस्तु जनस्त्वद्देहात्मकास्तेषां साक्षी स्फोरकोऽहं यथा तद्व
त्तथा परेषु परकीयबुद्धिचारेषु अहं साक्षी साक्षिभेदे प्रमाणाभावात् ॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं ॥ मयि

यथात्मबुद्धिचाराणां साक्षी तद्वत्परेष्वपि ॥ नैवापोढुं न वादातुं श
क्यस्तस्मात्परो ह्यहं ॥ २ ॥ ॥

सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहमित्यादिश्रुतेर्ययोर्वैकस्मिंश्चिदेकरसे आत्मनि सर्वप्रमातृत्वदृढितत्प्रचार
गोचरस्य प्रपंचस्य कल्पितत्वावगमाच्च युक्तमहं सर्वज्ञत्वादीत्यर्थः ॥ यस्मादेवमहं सर्वसाक्षित्वेन सर्वाधिष्ठानत्वेन च
सर्वज्ञः ॥ सर्वगतश्च तस्मादपोढुमपनयं दृष्टान नवमस्य नान्यतीतिवानिराकर्तुं नैव शक्यः ॥ ॥ श्रीरामाय नमः ॥ ॥

उप.स. केनचिन्नैवाशातुं ज्ञानेनेन्द्रियद्वारा वा प्रकाशयितुमुत्पादयितुं वाशक्यं स्वयं प्रकाशको हि यस्मादहं ग्राह्यग्राहकादिप्रपं प्र.वि.१
२ चविलक्षणोस्म्यतः परमात्मैवेत्युपसंहारः॥ ननु बुद्ध्यादिरूपेणैव प्रकाशत एतेषु तेन तद्दर्शनक्रियाकर्तृ
त्वादिकारित्वादिदोषप्राप्तेरस्य परमात्मत्वप्रसंग इत्याशंकां निरस्यति॥ विकारित्वमिति॥ आत्मनो नविकारित्वमु

अविकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः॥ अशेषबुद्धि
साक्षित्वाद्बुद्धिवच्चाल्पवेदना॥३॥ ॥ ॥

याग्र॥ द्धिवत्साक्षित्वाभावात्सर्वविकारसाक्षित्वाच्च॥ तथैवमात्मनोऽशुद्धत्वं किं योगित्वमस्ति मलजलक्रिया
वद्दृश्यसाक्षित्वाच्च॥ नापि भौतिकत्वमात्मनो रूपादिहीनत्वात्॥ किं चात्मनो बुद्धिवदल्पवेदना॥ यथा बुद्धेर्बुद्धित २
त्वसंसर्गाद्विविधावेदनास्ति॥ नैवमात्मनोऽशेषबुद्धिसाक्षित्वात्सर्वबुद्धिस्वरूपतद्विकारादिसाक्षित्वादित्यर्थः॥३॥

यदि निर्विकार एवात्मा कथं तर्हि सर्वार्थप्रकाशक इत्युच्यते इत्याशंक्य लोकप्रसिद्धदृष्टान्तेन निर्विकारस्यैव प्रकाशक
त्वमुपपादयति॥ मणाविति॥ मणौ स्फटिकादिके जपाकुसुमादिरूपाकारत्वाद्याकारता यथातपे सूर्यालोके सत्येव प्र
काश्यते गृह्यते यद्वत्तथा मयि चैतन्ये आदित्यस्थानीये विद्यमाने स्फटिकादिस्थानीयायां बुद्धौ जपाकुसुमादिरक्तादि

मणौ प्रकाश्यते यद्वद्रक्ताद्याकारता तपे॥ मयि संदृश्यते
सर्वमातपेनेव तन्मया॥४॥ ॥ ॥

स्थानीयसर्वविषयजातं संदृश्यते॥ तत्र यथातपेनेवेति प्रकाशमयेन मया सर्वं प्रकाश्यते॥ न बुद्धिवद्विकारवत्त्वमपि बु
द्धिरेव द्रष्टी॥ न चैवं सति बुद्धेरनुपयोग एव चैतन्यस्य विषयविशेषाकारत्वायादनायतदुपयोगादिति॥४॥ ॥ ॥

इदानीं प्रत्यगात्मनो द्वितीयत्वमुपपादयंस्तस्य च शुद्धत्वं स्पष्टयति॥ बुद्धाविति॥ जाग्रदादौ बुद्धौ सत्यां स्वाविद्ययाध्यस्तायां
बुद्धौ समारूढं सत्त्वे प्रमाणाभावाद्विस्तृतं द्वयं द्वैतमवेद्यद्भवेत्॥ नास्ति विपर्यये सुषुप्त्यादौ सत्यां स्वापादौ द्वयं नास्ति जडत्वा
न्नेति सत्त्वे प्रमाणाभावादित्यर्थः॥ इदं तु साक्षी सदा स्वयं प्रकाशमानत्वात्पूर्ववन्न द्वयं पृथक्त्वसत्त्वं व्यभिचरति॥ यस्मादेवं यत

बुद्धौ द्वयं भवेद्बुद्धौ सत्यां नास्ति विपर्यये॥ द्रष्टा यस्मात्स
दृग्द्रष्टा तस्माद्द्वैतं न विद्यते॥५॥ ॥

॥ एकाकारमानत्वाव्यभिचारस्तदव्यभिचारिणश्च सत्त्वानुपपत्तिस्तस्माद्द्वैतं न विद्यत इति नित्यशुद्ध एव प्रत्यगात्मेत्यर्थः॥ ३

यद्यपि द्वैतसंसर्गरहितमशुद्धत्वमात्मनो नास्ति इति स्याभावात्तथापि विद्याविद्याभ्यां संबंधात् शुद्धिर्भविष्यतीत्याशंक्य बु
द्ध्ये वाविद्याविद्यैतात्मनस्तत्संसर्ग इति शुद्ध एवात्मेत्याह॥ अविवेकादिति॥ न विद्यते विवेको भेदाभासमानं तथा यस्मिन् सोऽवि
वेकोऽहं देहादावात्मबुद्धिर्विपर्ययज्ञानमिति यावत्तस्मादविवेकात्परस्यासंसारिणः सर्वसाक्षितया विविक्तस्याभावेन विद्यामा
नताया बुद्धिरेवाविद्यावती॥ अत्र बुध्यध्यासादेव चिदात्मनो विभ्रान्तियोगात्स्याभासा बुद्धिरेवाज्ञानविपर्यासाश्रयेद
त्यंगीकृत्य यथा बुद्धिरेवेदित्युक्तमिति द्रष्टव्यं॥ तथा विवेकात् अनात्मापवादेनात्मनः स्वभावनिर्धारणाद्विवेकस्तस्मा

अविवेकात्पराभावं यथा बुद्धिरविद्यया॥ विवेकात्तु परादन्यः स्वयं चापि न विद्यते॥६॥ ॥इति
श्रीबुध्यादर्शप्रकरणं समस्तं विवृतं समाप्तं॥७॥ ॥कल्याणमस्तु॥शुभं भवतु॥श्रीरस्तु॥ ॥

द्विवेकादूर्ध्वं परादसंसारिणः परमात्मनो जीवः संसारी न विद्यते स्वयं चापि आभासा बुद्धिरपि न तिष्ठतानानविद्यते॥ तत्र प्रत्य
ग्ब्रह्मत्वात्सर्वस्येत्यर्थः॥ तथा च ज्ञातिसम्यग्ज्ञानयोर्विद्याविद्यारूपयोरपि बुद्धिरविद्यमानत्वान्नात्मनोऽशुद्धिर्णोपप
त्तिभावः॥६॥ ॥इति श्रीबुध्यादर्शप्रकरणं विवृतं समस्तं समाप्तं॥७॥ ॥कल्याणमस्तु॥शुभं भवतु॥श्रीरस्तु॥ ॥श्रीराम॥
॥श्रीगोपीजनवल्लभाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीरामाय नमः॥ ॥श्रीरामचंद्राय नमः॥ ॥श्रीरामभद्राय नमः॥ ॥

॥ ॥इतिश्रीसप्तमंविवृतंसमाप्तः॥७॥ ॥

उप.म. ॥ ॥श्रीकृष्णायनमः॥ ॥ननु विद्यायोर्यद्विबुद्धिमतत्वं न हि सांख्यसिद्धांतप्रसंगस्ते हि बुधिरेव पुरुषस्यापवर्गार्थं उ.वि.८
१ भोगार्थं च ज्ञानाज्ञानरूपतां मां चरतीती त्याशंक्यामपनुदन्पूर्वं स्वानुभवानुरोधेन साधितमेव ब्रह्मात्मज्ञानमात्मनः स्वा
दात्म्यकेन प्रकरणांतरेण द्रढयति॥ चितिस्वरूप इति॥ रसादियोगाद्रागादिनिबंधनो मोहकृत्वादिसंबंधः॥ मोहो विवेकः
॥फलितमाह॥ अतो नेति॥१॥ यस्मात्सर्वविशेषराहित्यात्तव चेष्टितेन ममानाध्येयातिशयस्य किमपि फलं नास्ति तस्मा

॥ॐ नमः॥ चितिस्वरूपे स्वत एव मे मतेः रसादियोगात्स्ववमोहकारितः॥ अ
तो न किं चित्तवचेष्टितेन मे फलं न वेत्यर्थविशेषहानतः॥१॥

त्तवोपशमाय प्रयत्न इत्याह॥ विमुच्येति॥ मायामयकार्यतां मिथ्या चेष्टितं विमुच्यासदीहितान्निरर्थकप्रयासात्प्र
शांतिं प्रशाममिह मयि प्रत्यगात्मनि आयाहि प्राप्नुहि॥ अत्र मायामयचेष्टितासदीहितशब्दाभ्यां अविद्यानिबंधनत्व १
स्य सूचितत्वात्सांख्यमतशंका निरवकाशीकृता वेदितव्या॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनमः॥ ॥श्री॥ ॥

ननु क्लिष्टमिति प्रत्यगात्मनि मननेऽपि प्रयुज्यते सत्यं ज्ञानादिजन्तुओ ब्रह्मण्येव कथमात्मोच्यत इत्याशंक्याह॥ यदा अहं
परं ब्रह्मेति॥ यतः सदैवाहं ब्रह्मैव तथा सति सदा विमुक्तः सन्मुक्तः स्वीक्ष्मी॥ ननु मे मुक्तिर्बंधाभावादिति॥ योऽजनानित्यजत्वंवि
शेषणं जन्मादिसमस्तविकारप्रतिषेधार्थः॥ अतएव सदैकरूपमित्यर्थः॥ सजातीयभेदरहितं वाद्वयवर्जितं विजातीं

विमुच्य मायामयकार्यतामिह प्रशांतिमायाह्यसदी
हितात्सदा॥ ॥ ॥

यभेदहीनमित्यर्थः॥ अतो मय्येकान्ततं ब्रह्मैवैतदेकान्तमिति॥ स्थिते न परे व्ययैपर्वण कोनवर्ततीति श्रुतिवि
रोधः॥ इति भावः॥ अपरायोजनाहेमे मते अपसत्सुखतः॥ स्वरूपज्ञानेषु देहेंद्रियविषयेषु यदीहितमभिलषितं तद्
रूपमदृष्टं वा फलं तस्मादसदीहितात्तस्वायवशाज्जाग्रद्रजाया॥ ॥

उप.स. मपिव्रुक्तांतिं उत्तममायाहितदर्थं व्यापारं परित्यर्थः॥ उपन्नांतापित्वंनैवात्मानं धारयेत्याह॥ विमुच्यते॥ कार्यतां अ.वि.८
२ बुद्धिरूपकार्यात्मतां विमुच्यविहायमायाकारणाद्रूपमयन्नुपगच्छतहात्मिकामव॥ नहितरूपेणास्थित्वापुनरूद्धवि
व्यामीतिचेत्तत्राह॥ इहेति॥ इहमेतत्स्वरूपएवांतरपेप्रक्रियाकारणाद्रूपतां विहायतत्मायैः पीनोदकविंदुवन्मद्रूपय

अहं परं ब्रह्म सदा विमुक्तवत्तथाजमेकं द्वयवर्जितं यतः॥२॥ ॥

स्तान्नवेत्यर्थः॥ कथमहंमुखांतःकरवजीकृतब्रह्मांडकोटिमयेरतस्ततश्चाब्य्यमानेतत्त्वयाग्रस्तास्यामितिचेन्नाहं
कादुपिचाजयितुंतत्त्वयानृकयस्तज्ञांतिमात्रमेतदित्यभिप्रेत्याह॥ अहंपरंब्रह्मेति॥ यतोहंसदापरंब्रह्म अयमात्मा २
ब्रह्मेतिश्रुतिरितियोज्यंविमुक्तवदितिब्रह्मविशेषणं स्वार्थेतद्धितः विमुक्तंनित्यमुक्तमेवेत्यर्थः॥ तथायथाश्रुत्युक्तं
तथेत्यर्थः॥ व्याख्यातमन्यत्॥२॥ ॥

नन्वजत्वादिप्रतिपादकशास्त्राद्ब्रह्मणोनिर्विशेषत्वपनित्यमुक्तत्वेपिकथमात्मनोदेहादिषत्त्वितस्यनिर्विशेषत
याब्रह्मरूपतांगनवइत्यतआह॥ सदाचभूतेष्विति॥ चशब्दोवधारणार्थः॥ हं केवलोविद्यातत्कार्यरूपविशेषेणरहित
ःसर्वेषुभूतेषुसमएवास्मिउपाधिपरामर्शांतरेणमयिविशेषोदृत्वेखाभावादित्यर्थः॥ सर्वानुस्यूतव्याप्यसंगस्वभावतया
निर्विशेषत्वेदृष्टांतमाह॥ यथाचखमिति॥ आकाशव्यापगत्वादेः॥ प्रसिद्धत्वान्नतस्मिन्नुकोकौर्येतिचशब्दार्थः॥ सर्व

सदाचभूतेषुसमोस्मिकेवलोयथाचखंसर्वगमम्बरंशिवं॥ निरंतरंनि
ष्कलमक्रियंपरंततोनमेस्तीहफलंतवेहितैः॥३॥ ॥

गमित्यादीनिविशेषणानिब्रह्माकाशयोः समानियतः आकाशवत्केवलोहंसर्वभूतेषुसमोतः आकाशस्याभावोपनि
तसर्वगमित्यादिविशेषणं परंब्रह्मैवास्मीतियोज्यं॥ उपपादितेब्रह्मात्मैक्येफलितमाह॥ ततइति॥३॥ ब्रह्माभूतस्यतवमदी
हितैः॥ फलानावेपिकपंचिन्मलेपयात्वतत्संबंधिनस्तत्प्रतिगुणान्भूतस्यप्रधानभूतस्यवाकस्यचिदर्थस्यकश्चिदुपया
गोमविष्यतीत्याशंक्यसोपिमयिदुःसंपादइत्याह॥ अहममेकइति॥ ॥

उप. स.
३

ाकतायाहं चित्स्वरूपस्य मम परमार्थतः॥ सजातीयविजातीयस्वगतभेदप्रमाणाभावान्नतो मम गुणभूतं किंचिन्न प्र.वि.८
त्तोस्ति दृश्यते गृह्यते॥ तथा कस्यापि प्रधानभूतस्याहं गुणभूतो नास्मि कुतः॥ असंगत इति प्यादिष्यादिना तिशयो
नाधेयातिशयत्वादित्यर्थः॥ यतो हमेवं गरूपो तो न मे त्वया कृतेन किमपि प्रयोजनमस्ति॥ किंच॥ त्वमेव नास्ति

अहं ममैको न तदन्यदिष्यते तथा न कस्याप्यहमस्म्यसंगतः॥ असं
गरूपोहमतो न मे त्वया कृतेन कार्यं तव चाद्वयत्वतः॥ ४॥ ॥ ॥

कुतस्तत्त्वे हितं तत्फले चेत्याशयेनाह॥ तव चेति॥ मत्स्वरूपाज्ञानकल्पितायास्तवाधिष्ठानभूतमत्स्वरूपव्य ३
तिरेकाभावाद्भेदे चोपकार्योपकार्योपकारकत्वासंभवाद्विकल्पनया प्रश्नोत्तैवनवेत्यर्थः॥ ४॥ ॥ ४

इदानीं कृतार्थस्याप्याचार्यस्य स्वानुभवसिद्धार्थविष्कारकप्रकरणनिर्माणप्रवृत्तौ निमित्तं दुःखिजनदर्शन
संजातकरुणैव न स्वार्थत्वादीत्यभिप्रेत्याह॥ फले चेति॥ अयं जनो हेतुफलात्मके संसारे विनोदेन सक्तवानिति प्रस्थि
त्वाविमर्शनादृग्जनस्याज्ञकस्यातः सांसारादि मोक्षणमोक्षार्थं मे हमिमं मस्तात्मसंवादरूपं ग्रन्थं प्रयुक्तवान् प्रणि

फले च हेतौ च जनो विषक्तवानिति प्रचिंत्याहमतो विमोक्षणे॥
जनस्य संवादमिमं प्रयुक्तवान् स्वरूपतत्त्वार्थविबोधकारणं॥ ५॥

तवानस्मि॥ किमनेन संवादग्रंथनेन जनस्य भवेदिति॥ तदर्थं तं विशिनष्टि॥ स्वरूपेति॥ स्वस्यात्मनो रूपं नित्य
चैतन्यस्वभावत्वस्य तत्त्वार्थं ब्रह्मत्वं तस्य विस्पष्टं बोधकारणमित्यर्थः॥ ५॥ एतेन विशिष्टेयं संवादस्तस्मात्साध्य
साधनपर्यावर्त्तलक्षणात्संसारान्मुमुक्षुभिरयमनुचिंतनीय इत्यभिप्रेत्याह॥

उप.स.
४

संवादमेतदिति॥ अज्ञानकृतात् महाभयागमात् संसारादित्यर्थः॥ यद्वा॥ महाभयस्यागमो यस्मात्तन्महाभ
यागमं तज्ज्ञानं तस्मादिति॥ अज्ञाने विग्रहः॥ भयहेतुज्ञानाद्विमुच्यते इत्यर्थः॥ कारणेति कृत्वा कार्यतिवृत्तिमाह॥ वि
मुक्तकाम इत्यादि चरति जीवन्नेव बंधप्रतिभासरहितः सन्॥ ब्रह्मण्येव चरति॥ कृतकृत्यो भवतीत्यर्थः॥ सुगममन्य प्र.वि.८

संवादमेतं यदि चिंतयेन्नरो विमुच्यते ज्ञानमहाभयागमात्॥ विमु
क्तकामस्त्वथ जनः महाचरत्यसौ कृतः सन् आत्मवित्सुखी॥ ६॥
॥इति श्रीचितिस्वरूपप्रकरणं मतिविज्ञापनेनाष्टमं विहितं॥ ८॥

त्॥ ६॥ ॥इति श्रीमत्परवाक्यमहावाक्यप्रमाणमर्यादा चितिस्वरूपप्रकरणम्॥ मतिविज्ञापनप्रकरणमष्टमं ४
विहितम्॥ ८॥ ॥कल्याणमस्तु॥ ॥श्रीरस्तु॥ शुभं भवतु॥ ॥श्रीरामाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीराम॥

उ.प.स. ॥ॐनमः॥ ॥चितिस्वरूपप्रकरणमितिवा॥ यस्यप्रत्यग्ब्रह्मणोवाक्योत्थज्ञानेनाज्ञाननिवृत्त्यामुक्तिरुक्ता॥ तेन प्र.टि.१
१ स्यसर्वांतरत्वेननिरतिशयसूक्ष्मत्वंव्यापित्वंचयथाचरवमित्यंवसूचितमुपपादयितुंप्रकरणांतरमारभते॥ सूक्ष्म
तेत्यादिना॥ गधुग्रावः पृथिवीपर्यायार्थः॥ पृथिव्यवादिलक्षणात्कार्यात्पूर्वस्मात्॥ उत्तरोत्तरंकारणतयास्थितेषुप्र
त्यगात्मावसानेषुसर्वांतरात्मपर्यंतेषुपदार्थेषुयथाक्रमंपूर्वपूर्वग्रहाणतः कार्यकारणापोहेनसूक्ष्मताव्यापिताव्यच
विज्ञातव्याकार्यकारणान्वयव्यतिरेकाभ्यांचनासंभावनीयेत्यर्थः॥ कार्येषुविद्यमानमपिकारणस्वरूपंतत्कार्याकारति

॥ॐनमः॥ ॥श्रीकृष्णायनमः॥ ॥सूक्ष्मताव्यापितेज्ञेयेगंधादेरुत्तरोत्तरं॥ ॥

रोहिततयानस्वरूपेणावभासतइतिसूक्ष्ममुच्यते॥ नपुनः कार्यपरिमाणान्न्यूनपरिमाणयोगात्तथासकलस्व
विकारानुगतस्यैवोपादानकारणत्वात्कार्यापेक्षयाधिकदेशवृत्तित्वेनव्यापितत्वंचकारणस्य॥ तथाहि॥ चतुर्विधभूत
ग्रामोपादानरूपापृथिवीतावन्नमनग्रामेषुघटोमालेपुघट्टेते॥ तत्रतत्तद्व्यवहारादर्शनाद्लोकस्यचअवतस्त
दपेक्षयासूक्ष्मा॥ तद्व्यासदेशवृत्तित्वाद्व्यापिकाच॥ ॥

तच्चतत्तत्कार्योपादानभूताः पृथिव्यंशाभिन्नाइतिनोपादानस्यव्यापकतेतिवाच्यंकार्यकारणभेदव्यतिरेकेणमृत्स्व
रूपभेदेप्रमाणाभिदूपणाद्न्यथातडाकांतप्यमृच्छिन्नमिति॥ सूक्ष्मत्वगधांगुणदेशोमहान्मनाविजयाभावप्रसंगादुपा
दानादन्यत्रकार्यजयानुपपत्तेश्चप्याप्तस्वकार्यापेक्षयापृथिवीतावत्सूक्ष्माव्यापिकाचेतिसिद्धंतथाद्रिव्यापिनापृथिवी॥ त
द्युदपोपार आपोत्तत्समहत्सतवापृथिव्यनवदिति॥ नृतान्तजपरिणामविशेषस्यनारत्राद्बवाच्यसदृधिमंडुकारस्य

प्रत्यगात्मावसानेषु॥ ॥

पृथिव्यात्मत्वम्प्रवणात्मोह्यत्रवणादेः॥ पर्वताग्रहितयामंतरमनोचसर्वत्रोपलंभात्॥ रसस्यचसलिलासाधार
णगुणस्यपृथिव्यांसर्वत्रोपलंभात्तस्यैकत्वेपिकटतीक्ष्णत्वादिभेदः॥ परिणामविशेषोपाधिनिबंधनइति॥ तस्माज्जं
जकातापृथिवीवपरिणामेतिजजंपृथिव्याःत्व्यात्कस्तस्यैवप्रागुक्तयुक्त्यासिद्धं॥ तथामपृथिवीजलंतेजसाच्छकारणे
नव्याप्तंसर्वत्रोपलंभात्सायोगीजकारणयोरिणपुच्छोदकस्यजयेदर्शनाद्व॥ ॥

उ.प.स. २ तथा चैवं तेजसोऽञ्जनाख्यापकत्वं सूक्ष्मत्वं च प्रसिद्धं तद्द्विवायुना ग्रस्तं यत्तस्मादेति सूर्योऽस्तं यत्र च गच्छतीति॥ प्राणा प्र.दि.१
द्वा एष उदेति प्राणेऽस्तमेति इति श्रुतेः॥ प्राणाद्यूर्ध्वाचीना यो जयेश्वरणात् ज्योतिरूपस्य च वह्नेर्वायुधीनवृत्तिरिति वृ
त्तिर्दूर्ध्वानाद्यु वायुस्थानाद्गृहीत ग्रस्तः इति प्रसिद्धं ग्रैवेतत्॥ सूक्ष्मत्वं तु व्याख्यातमेव सर्वत्र॥ एतेन सर्वपेक्षया सूक्ष्मत्वं व्या
प्तमेवानुभूयत इति॥ सच्चिन्मात्रं सर्वस्योपादानं तस्य चापोर्थांतरेणानुगमाद्दूर्ध्वानात्मिरूपोदानकत्वे सिद्धे निरपेक्ष॥

पूर्वपूर्वग्रहणतः॥१॥ ॥

व्यापकत्वं प्रागुक्तपरिपाट्या निरतिशयसूक्ष्मत्वं च सिध्यति॥ तदनेन सच्चिन्मात्रेण सर्वस्य हृदयराशेर्ग्रस्तत्वान्न त
तः॥ पृथक्कश्चिदपि वस्तु विद्यत इति॥ तस्य परमसूक्ष्मता व्याप्तितेति निश्चित्य सोऽहमसंगकूटस्थाद्वयात्मेति सदा भावये २
दिति तात्पर्यार्थः॥ ॥

ननु नैतावतात्मनत्रूकरूपत्वज्ञानसिद्धिरध्यात्माधिदैवतयोः॥ पृथिव्यादेर्भेदेन प्रथमानत्वादित्यत आह॥ शारीरे
ति॥ यावद्बाह्यपृथिवीप्रमाणतः॥ परिमाणतो भवति तावत्प्रमाणा शारीरपृथिवीत्येतित्संबंधः॥ तथाबादीनि चतत्त्वा
नि तानि कृत्स्नशो निरवशेषतया तावत्प्रमाणानि ते यानि यावच्छारीरा बाह्या च पृथिवीति योजना॥ एतदुक्तं भव
ति॥ अध्यात्माधिभूताधिदैवात्मना विभक्तानां पृथिव्यादीनामेकात्मनविज्ञितत्वादेकप्रयत्नेन विज्ञापनोपपत्तेः॥

शारीरपृथिवी तावद्यावद्बाह्यप्रमाणतः॥ अबादीनि च तत्
त्वानि तावत् ज्ञेयानि कृत्स्नशः॥२॥

सर्वत्र प्रत्यक्त्वानुगमात्मावसानमेवाध्यात्मादिरूपं तेन व्याप्तं न ततः॥ पृथगस्तीति प्रत्यक्त्वेन धार्यमाणो बाह्या
ध्यात्मिकादिभेदः प्रवृत्तेर्नवकाशात् प्रत्यगात्मप्रत्यतावन्मात्रमेव सर्वमवशिष्यत इति भेदेन प्रागुक्तात्मतत्त्वज्ञानं सिद्ध
मिति॥ ॥ ननु त्वं पर्यमार्थस्यापत्वे कथमात्मनः॥ प्रत्युक्तं सर्वगतत्वमित्याशंक्य परात्तस्य परमाचीनविकारापेक्षत्वादतः
॥ कथं पराचो प्रत्यगात्मावसानत्वमित्याशंक्याचिन्मात्रस्वरूपस्यैवापूर्वाहिंसाजन्मास्य प्रत्यगादिनाहेतुत्वाद्रत्नस्यमोग

उप. स.
३

हष्ट्याया मारोपितपरमार्थापेक्षायामपि स्वरूपस्यान्यानपेक्षत्वाद्युक्तं सर्वस्य तत्त्वमात्मावसानत्वावधारणमिति प्र. वि. १
दृष्टान्ततो दर्शयति॥ वाय्वादीनामिति॥ स्पष्टोऽर्थः॥ ३॥ ननु कथं मायोपाधिकदेहकरणवानात्मा सर्वात्मैव भवेत्॥ ब्रह्मादिभेदे-
नात्मनामनेकत्वस्य विभाव्यमानत्वात् पौर्वेतन्यमात्रत्वं चानुपपन्नं रागादिदोषसंसर्गोपलब्धेरित्याह॥ ब्रह्माद्या

वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा॥ अहमेकः सदा
सर्वश्चिन्मात्रः सर्वगोऽद्वयः॥ ३॥ ब्रह्माद्याः स्थावरान्ता ये प्रा-
णिनो मम पूः स्मृताः॥ कामक्रोधादयो दोषा जायेरन्मे कुतो-
ऽन्यतः॥ ४॥ ॥

इति॥ ममैव चिदात्मनः॥ सर्वे प्राणिनः॥ पूः पुरं शरीरभूताः॥ स्मृता निश्चिता इत्यर्थः॥ तथा कामक्रोधादयो दोषा ३
आत्मनो मेन स्वाभाविका व्यभिचारित्वात्॥ परतोऽपि तेन संभवन्तीत्याह॥ जायेरन्मे कुतोऽन्यत इति॥ अन्यथा स्वाभा-
विकादित्यर्थः॥ ४॥ ॥ ॥

प्रत्यगात्मनो निर्दोषत्वमसिद्धं संसारदोषस्य प्रत्यक्षत्वादित्याशंक्याकाशकार्ष्ण्यवत्सर्वदात्मनि दोषदृष्टेर्भ्रमत्वान्मैव-
मित्याह॥ भूतदोषैरिति॥ अस्पृष्टमिति छेदः॥ सर्वभूतेषु स्थितस्यापि तद्दोषैरस्पृष्टत्वमीश्वरत्वादिति हेत्वर्थं विशेषणमीश्व-
रमिति॥ सर्वस्येशितारं कारणमिति यावत्॥ न हि कारणं कार्यधर्मैः स्पृश्यत इत्यर्थः॥ स्पष्टमन्यत्॥ ५॥ यदुक्तं॥ ब्रह्माद्याः

भूतदोषैः सदास्पृष्टं सर्वभूतस्थमीश्वरम्॥ नीलं व्योम य-
था बालो दुष्टं मां वीक्षते जनः॥ ५॥ ॥

॥ स्थावरान्ता प्राणिनः॥ एकस्यात्मनः॥ शरीरभूताः॥ इति तत्रोपपत्तिमाह॥ यच्चैतन्यमिति॥ सर्वतस्सर्वविभासकस्या-
तएव विपाप्मनो दृश्यदोषसंसाररहितस्य ममात्मनः॥ सर्वे प्राणिनः॥ पूः शरीरं कुतः॥ सर्वप्राणिधियां॥ सदा मच्चैतन्याव-
भास्यत्वादिति योजना॥ यो मे विज्ञानमयः॥ ॥ ॥

उप.स. प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति श्रुतेः॥ बुध्यन्त॥ साक्षितया प्रकाशमानस्य चैतन्यज्योतिषस्तु सर्वप्राणिनामात्मत्वावगमात्त अ.वि.०
४ स्य चेद्बुद्धितत्स्थाभासमेदमन्तरेणास्य रूपतामेवानिरूपणात्वितुरिवोदकपात्रतत्स्थाभासव्यतिरेकेणेति॥ सिद्धमेकस्यात्म

मय्येवं तस्यावभासत्वात्सर्वप्राणिधियां सदा॥ पूर्वम
प्राणिनः सर्वे सर्वज्ञस्य विपाप्मनः॥६॥ ॥

नः॥ सर्वाणि भूतानि शरीरमिति भावः॥ तथा च श्रुतिः॥ यस्य सर्वाणि भूतानि शरीरं यः॥ सर्वाणि भूतान्यन्तरो यमयत्येष त ४
आत्मान्तर्याम्यमृत इति॥६॥ ॥

तर्हि नात्मप्राणिनस्तद्बुद्धीनां सत्त्वाद्द्वैतमस्तीति चेत्तत्राह॥ जनिमदिति॥ जनिमज्ज्ञानविज्ञेयं॥ यज्जनिमज्ज्ञानविज्ञेयं यत्॥ कार्यं
जडं तत्स्वप्नमिथ्येष्यते॥ यथा स्वप्नज्ञानं तथा जाग्रदपि कार्यं हि नूनं चेति॥ मिथ्येति द्वैतं न विद्यते यस्मात्॥ तस्मात्तेषामवस्तुत्वात्
ज्ञानं नित्यं सदा निर्विषयं विषयं निरूप्यं न भवति॥ यद्वा॥ नित्यमविनाशि सर्वविनाशसाक्षित्वादिति योजना॥ न ह्यध्यारोपितेन द्वैते
न परमार्थमद्वैतं विहन्यते॥ न खल्वारोपितेन तोयादिना तदाधारमरुम्यादि सद्वितीयं दृष्टमिति भावः॥७॥ स्वरूपज्ञानस्य निर्विष

जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते॥ नित्यं निर्वि
षयं ज्ञानं तस्माद्द्वैतं न विद्यते॥७॥ ॥

यत्वं नित्यत्वं चोक्तं श्रुत्योपपादयति॥ ज्ञातुरिति॥ सुषुप्ते त्वन्यस्य पश्यतेऽप्यस्या सत्त्व अदर्शनपूर्वकं ज्ञातुरात्मनो ज्ञातेः॥ स्वरूपभूता
त्रि नित्येति श्रुत्योच्यते हीत्यर्थः॥ तथा च श्रुतिः॥ यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वा
न्नितु॥ ततद्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदित्यादिका॥ यद्यपि सुषुप्ते निर्विषयं ज्ञानं विषयाभावात्स्वरूपतो नाशाभावाच्च तत्त्वा
भावाच्च नित्यं श्रुतिसिद्धं॥ तथाप्यवस्थान्तरे सविषयमुपजन्यत इति ज्ञातुर्ज्ञातिरनित्या स्यादित्यत आह॥ ॥श्रीरामाय नमः॥ ॥

उप॰स॰ ५ जाग्रदिति॥ यतः श्रुतिरिदं नित्यं निर्विषयं ज्ञानं स्मृतः॥ कारणात् जाग्रत् भाति विषयद्वैतात्मिका विद्याव्यतिरिक्तात्मनो निर्विकार उ॰वि॰१
तया साक्षीकर्तृत्वायोगात् ह्यतः॥ करणस्य च जडत्वाद्देवतानाश्रयत्वानुपपत्तेरं ध्यस्तमेवमविषयं ज्ञानं तद्ग्राह्यं च विषयं जातमसद्रूप
रमार्थमिथ्यातां स्वीक्रियतामित्यर्थः॥ जागरितादौ विषमाकारबुद्धिवृत्तीनां स्फुरणावगुंठितत्वात्॥ सर्ववृत्तुसन्निधिस्थितिविनश्वा

सा तु ज्ञाति हि नित्योऽसौ सुषुप्ते त्वन्यथान्यतः॥ जाग्रद्भा
तिस्त्वविद्यातत्तद्ग्राह्यं चासदिष्यतां॥८॥

साक्षितया स्फुरणस्यैकस्य नित्यस्यान्यस्यावृत्त्याश्रयणीयत्वाज्जाग्रत्यप्याप्तत्वचैतन्यं नित्यमेव तथा विषयाणां वृत्तिसमका ५
लमेव स्फुरणाद्विषयव्यभिचारेपि स्फुरणाव्यभिचाराच्च विषयानिरूप्यत्वान्निर्विषयत्वं च सिद्धमिति भावः॥८॥ ॥ ॥

नन्वात्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इति श्रुत्यैवात्मनो दर्शनादिकर्मत्वोक्तेर्दृश्यत्वान्नानाभुजंगादिवदसत्व
प्राप्तिरित्याशंक्य॥ अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् नेन चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तप
साकर्मणा वेत्यादिश्रुतिविरोधाद्रूपादिहीनस्य दर्शनाद्यविषयत्वाद्द्रष्टव्य इत्यादिश्रुतिरहो येन तत्वेन योगाद्दर्शनाय हस्तौ पद
नामुखेनानात्मप्रवणतात्याजनार्थेत्याह॥ रूपवत्त्वादीति॥ यथा द्रष्टव्य इत्यादिवसान्नतानेकमर्थत्वमेवं पञ्चनोन्यत्वस्यति नान्मे

रूपवत्त्वाद्यसत्त्वान्न दृष्ट्यादेः कर्मता यथा॥ एवं विज्ञानकर्मत्वं न
ह्यात्मनास्तीति गम्यते॥९॥ ॥इति श्रीसत्तत्त्वप्रकरणं नवमं विवृतं
समाप्तः॥९॥ ॥

ज्ञानोतिनान्यद्विजानाति समृमेत्यत्रापि प्रागुपन्यस्तश्रुतिविरोधाद्यन्नान्यत्पश्यत्या
त्मानमेव पश्यतीति ह्यात्मदर्शनविधिपरत्वकल्पनायोगाद्ब्रह्मणो विज्ञानकर्मत्वं नास्तीति गम्यते निश्चीयत इत्यर्थः॥९
॥ ॥इति श्रीसत्तत्त्वव्याख्यापिप्रकरणं नवमं विवृतम्॥९॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥ श्रीरस्तु॥ श्रीरामायनमः॥ ॥
॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीकृष्णायनमः॥ ॥

॥ ॥इतिश्रीसूक्ष्मताप्रकरणंनवमंविवृतम्॥९॥ ॥ ॥

उप. स.
१

॥ ॥ ॐ नमः ॥ इदानीं पूर्वप्रकरणेषूक्ताव्यवस्थापितमात्मनो निर्विषयज्ञानस्वभावत्वं स्वानुभवाभिनयेन प्रकटयन्निर्विष प्र. वि. ११
यत्वेनैवात्मज्ञानेन भवतीति दृढयितुं प्रकरणांतरमारभते ॥ दृशिस्वरूपमिति ॥ सकृद्विभातमेकरूपेणैव विस्फुरितं सदैवस्वभासमान
मितियावत् ॥ यदेवंविधमक्षरं ब्रह्म तदेवाहं सततं भवामि अतो विमुक्तः ॥ ॐमित्यभ्यनुज्ञार्थ ओंकारः ॥ उक्तस्वरूपमोंकारद्वारामु
मुक्षुष्वभिव्यक्तं भवतीति सूचयितुं ॐकारनिर्देशः ॥१॥ ननु नाकाशवदलेपकत्वं दृशेः संगच्छते दृश्यसंबंधाद्बुद्धिविक्रियादिदोष

॥ ॐ नमः ॥ दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं ॥ अलेपकं
सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तॐ ॥१॥

संभवादित्याशंक्य दृशेरात्मस्वरूपत्वात्तस्य चानित्यगुहत्वादेः ॥ अत्स्वेव निर्धारणात्मैवमित्यभिप्रेत्य श्रुतिसिद्धमर्थं प्रकटयति ॥ दृ
शिस्तु शुद्ध इति ॥ अहं तु दृशिः ॥ ज्ञानस्वरूप इत्यन्वयः ॥ अतः परमार्थतः ॥ शुद्धो बुध्यादेरज्ञाननिबंधनत्वात्तस्य चाभावत्वादिति भावः
॥ शुद्धमपापविद्धमिति मंत्रवर्णात् ॥ यतश्चाविक्रियात्मकः ॥ विक्रियात्मकात्प्राणादेरन्यो यः प्राणो ह्यमनाः ॥ शुभ्रो ह्यस्थूलमनणवहस्व १
मदीर्घमित्यादिश्रुतेरतो विशुद्ध इत्यर्थः ॥ न तदश्नाति किंच ॥

न न तदश्नाति कश्चनेति श्रुतेर्नात्मनो विषयसंसर्ग इत्याह ॥ न मेऽस्तीति ॥ स्वभावतः परमार्थतः ॥ अनेन विक्रियाहेतुविशेषाभा
वादप्यविक्रिय इत्युक्तं भवति ॥ विषयाभावेनाद्वयात्मत्वेऽस्य वाक्यशेषमर्थतः पठति ॥ पुरस्तिरश्चेति ॥ स भगवः कस्मिन्प्रतिष्ठित इ
ति स्वे महिम्नि यदि वा न महिम्नीति स्वरूपावस्थानमनन्याधीनमुपन्यस्य तदुपपादनार्थमहंकारास्पदं सर्वं पृथ्व्यादि विभागेनाधरोत्तर
दिविभेदेन चोपलभ्यमानं ममैवेति प्रतिपाद्याहंकारास्पददृश्यदेहादिबुद्धिपर्यंतस्य तर्हि भूम्नो भेदकतिनां कायामहं बुद्धिग्राह्यमवि

दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः स्वभावतः ॥ पुरस्ति
रश्चोर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वजमात्मनि स्थितम् ॥२॥ ॥ ॥ ॥

ममैवेति मध्ये निर्दिश्य इदमनिदमात्मकमप्यसर्वस्य भूम्नोऽन्यत्वाभावेनेदंकारांवात्मत्वमात्मैव भूमेत्यात्मैवेदं सर्वमित्यं तेन स
हस्यमग्राह्यं दोष्येनिर्दिष्ट इत्यर्थः ॥ अजोऽहमाविर्भाववर्जितो यत आत्मनि स्वे महिम्नि स्थितो नान्याधीन इत्यर्थः ॥२॥ ॥ ॥

उप.स. आत्मनो जन्मजरादिविक्रियाभावेन कूटस्थाद्वयस्वभावप्रतिपादनपराः श्रुतीः॥ स्वरूपतोऽर्थतश्च पठति अजोऽमर इति॥ प्र.टि.१०
२ तथा च श्रुतयः॥ अजो नित्यः॥ शाश्वतोऽयं पुराणः॥ स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्मेति॥ अत्रायं पुरुषः स्वयंज्यो
तिः॥ तं देवा ज्योतिषां ज्योतिः॥ नित्यं विभुं सर्वगतं सुसूक्ष्मम्॥ एको देवः॥ एकमेवाद्वितीयमिति॥ तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्य
मित्यादिश्रुत्यर्थमाह॥ न कारणं कार्यमिति॥ निर्मलो निरंजनः परमं साम्यमुपैति इति श्रुतेः॥ एकतृप्तः॥ एकेन निजानन्देनैव तृप्त इत्य

अजोऽमरश्चैव तथाजरोऽमृतः स्वयंप्रभः सर्वगतोऽहमद्वयः॥ न कारणं कार्य
मतीव निर्मलः सदैकतृप्तश्च ततो विमुक्त ॐ॥३॥ ॥ ॥

र्थः॥ आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन॥ आनन्दरूपममृतं यद्विभाति इत्यादिश्रुतिभ्यः॥ विमुक्तश्च विमुच्यते इति श्रु
तिमाश्रित्याह॥ ततो विमुक्त इति॥ यत एवं जन्मादिरहितस्ततो विमुक्त एव॥ सदेति पदं सर्वत्रानुषंजनीयं॥ यदाचार्योक्तं मम स्वरूपं त २
त्तथैवेति शिष्योऽनुमन्यते ओमिति पदेनेत्यर्थः॥३॥ ॥ ॥

ननु यथात्र येन यथा तथा त्वयात्मनः कूटस्थमविक्रियात्मकत्वमित्यत आह॥ सुषुप्तेति॥ सुषुप्तस्वप्नजाग्रच्च न चासौ स्वयमसु
षुप्तजाग्रत्स्वपन्तस्य सुषुप्तजाग्रत्स्वपतो मे मम स्वनिकायमपि वेहेत्यवहारे किंचिद्दर्शनं नास्ति स्वप्नवत्स्वरूपभूतमिति वा॥ किंतु
॥ मोहनमविवेकाविद्याध्यारोपितं जाग्रदादिदर्शनमिति योजना॥ तत्र हेतुमाह॥ स्वतश्चेति॥ तेषां जाग्रत्स्वप्नसुषुप्तिदर्शनानां जा
ग्रदाद्यवस्थारूपाणां वास्तवं तच्च परतोऽप्यसत्त्वतो मत्वादित्यन्तरयोजना॥ न हि तेषां स्वतोऽन्यनिरपेक्षसत्त्वं संभाव्यते च कारा

सुषुप्तजाग्रत्स्वपतश्च दर्शनं न मेऽस्ति किंचित्स्वमिवेह मोहनं॥ स्वतश्च ते
षां परतोऽप्यसत्त्वतस्तुरीय एवास्मि सदा दृगद्वयः॥४॥ ॥ ॥

तत्स्फुरणं च आगमापायित्वेन रज्जुसर्पवदारोपितत्वनिश्चयात्परतोऽपि नासत्त्वं स्फुरणं च संभाव्यते परं चैतन्यं स्वात्मन्
हि तेनात्मनात्मना सत्त्वादिकमेषां संभवति॥ तत्स्फुरणतद्भावेन विरुद्धस्वभावयोस्तादात्म्यानुपपत्तेस्तत्कल्पनायामव्यवस्थेति
मात्रत्वादित्यर्थः॥ ज्ञातृज्ञेयज्ञानविभ्रम इत्येतत्त्रयमवस्थावत्त्वेन भासमानाः॥ न मम स्वरूपमिति भावः॥ तर्हि किं स्वरूपमात्मेति

तदाह॥ तुरीय एवास्मीति॥ विश्वादित्रयापेक्षया परतो गम्यमानत्वाच्चतुर्थ इत्यर्थः॥ इतरस्य ज्ञत्वं॥ सदाहमिति॥ सर्वविश्वों
दृष्टेत्यर्थः॥ विश्वादीनां स्वस्वावस्थामात्रदृष्टृत्वाद्यं ततो व्यतिरिक्तः॥ व्युत्क्रमेण विविच्यात्वेषणं तत्रायो विश्वादिस्यात्तत्र
यापोहेनावसीयमानत्वात्तुरीय इत्युच्यते॥ न पुनर्वस्तुतस्तुरीयत्वमस्तीति द्योतयन्नाह पुनरिति निर्विशेषत्वादहमस्मीत्यर्थः॥
॥४॥ कथमात्मनो निर्विशेषत्वं शरीरादिसंबंधप्रत्यक्षत्वादित्यत आह॥ शरीरेति॥ शरीरादिसंततेर्नाम भ्रान्तत्वमद्वीयत्वं वा परमा

शरीरबुद्धीन्द्रियदुःखसंततेर्न मे न चाहं मम निर्विकारतः॥ असत्त्वहेतोश्च
तथैव संततेरसत्त्वमस्याः स्वपतो हि दृश्यवत्॥५॥ ॥

र्थतोऽस्तीत्यर्थः॥ तत्र हेतुर्मम निर्विकारत इति॥ न ह्यविक्रियं वस्तु आगमापायि शरीराद्यात्मना परिणमते संसृज्यते वा येन त
त्स्वरूपता तद्धर्मता वा न भवेदित्यर्थः॥ हेत्वंतरमाह॥ असत्त्वहेतोश्च तथैव संततेरिति कुतोऽसत्त्वमित्यत आह॥ असत्त्वमस्या इति
॥ स्वपतः स्वप्नावस्थायां यथा दृश्यं मिथ्या तथास्याः॥ संततेर्दृश्यत्वादेवासत्त्वमित्यर्थः॥ हिशब्दः स्वप्नदृश्यस्य मिथ्यात्वप्रसिद्धि
द्योतनार्थः॥५

शरीरादिसंततेर्दृश्यत्वेन चेन्मिथ्यात्वं तर्हि शुद्धत्वाविक्रियत्वादेरपि दृश्यत्वान्मिथ्यात्वं किं न स्यादित्यत आह इदं त्विति॥ म
म विक्रिया नास्ति न मे विकारहेतुरप्यस्ति ततः पूर्वनिरूपिताद्वयाद्वयाभावादेतत्स्वतः परतो वा ममात्मनो विक्रिया नास्तीति
यदिदं तत्सत्यमित्यर्थः॥ तुशब्दः शंकाव्यावृत्त्यर्थः॥ अविक्रियत्वादिना विक्रियाभावादुपलक्षितस्वरूपस्यापि प्रेतत्वाच्छक्ति
श्चहेत्वपि च न शंकावकाश इत्यर्थः॥ कर्मवातत्फलं वा ततश्चसौ वा कर्मादिसाधनं वा विक्रियाहेतुर्भविष्यतीति कुत इयत

इदं तु सत्त्यं मम नास्ति विक्रिया विकारहेतुर्न हि मेऽद्वयत्वतः॥ न पुण्य
पापे न च मोक्षबंधने न चास्ति वर्णाश्रमता ह्यशरीरतः॥६॥ ॥ ॥

मित्याशंक्याह॥ न पुण्येति॥ पुण्यादिनेति प्रतिज्ञायां हेतुरशरीरत इति॥ अशरीरत्वं तु पूर्वश्लोके प्रतिपादितमेवेत्यर्थः॥ ६॥
ननु यद्यपि शरीरोपादानत्वेन तद्धर्मकत्वेन चात्मनः॥ शरीरवत्त्वाभावस्तथापि शरीरेणास्ति संबंध उपजन्य उपजनकभा
वलक्षण इति कथमशरीरतेत्याशंक्यानेतावतामशरीरत्वेन कर्मादियोगितेत्यभिप्रेत्य पुण्यापुण्यादिसंबंधनैर्धुर्यमुक्तमुप
पादयति॥ अनादित इति॥ यत्कर्मममवापितदादिमद्दृश्यथा रथशरीरादि॥ ॥

उ॰प॰स॰ ४ नन्वपरमात्मनः सोरनैक्यांतो मनसः उत्पत्तिश्रवणात्परिकच्छितरमाणवनंगीकाराच्च यथा यत्कर्मसमवायितत्त्वगु ग्र॰वि॰१॰
णादृष्टपथोक्तमेवोदाहरणं ॥ तथा च सगुणत्वसादित्वं च व्यापकं प्रत्यगात्मनो व्यावर्त्तमानं ॥ तस्य क्रियावत्त्वं स्वव्याप्यमादा
यानिवर्त्तत इति भावः ॥ कर्मपुण्यादि जन्यं तत्फलं तेन्द्राध्येतृसुखदुःखादिरूपं फलं च न मेऽस्तीत्यन्वयः ॥ तस्मादहं परमुत्तमम
॥ संसारिभ्यो विलक्षणः ॥ अद्वयो निर्विशेषः क्रियावत्त्वाभावात्तेषां ध्यपुण्याद्यसंभव इति ॥ विलक्षणत्वमुपपादयति ॥ यथे

अनादितो निर्गुणतो न कर्म मे फलं च तस्मात्परमोऽहमद्वयः ॥ यथा
नभः सर्वगतं न लिप्यते तथा ह्यहं देहगतोऽपि सूक्ष्मतः ॥७॥ ॥ ॥

ति देहगतो देहे प्राप्तः ॥ तत्रोपलभ्यमानोऽपीत्यर्थः ॥ सूक्ष्मतो मूर्त्तत्वादित्यर्थः ॥ तथा चाह भगवान् ॥ अनादित्वान्निर्गुणत्वा ४
त्परमात्मायमव्ययः ॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्राव
स्थितो देहे तथात्मा नोपलिप्यते इति ॥७॥ ॥

नन्वपलब्ध्यधिष्ठानानां देहादीनां वैषम्यदर्शनात्तत्रोपलभ्यमानस्यात्मनोऽपि तत्कृतवैषम्यसंभवात्कुतः ॥ परमात्मत्वं
परिपूर्णानां चेत्यानां कर्तारं तामसप्रतिभासो विद्याविजृंभितो न परमार्थ इत्याह ॥ यदा चेति ॥ ईश्वर इत्यनेन नोपाधिवश्यत्वा
भावं सूचयति ॥ अतो न मे देहादिकृतवैषम्यमित्यर्थः ॥ ईश्वर इत्युक्तेनापेक्षितव्यापेक्षत्वात्तदुपपत्त्यर्थं कीदृशस्त्वमत आह ॥ क्ष

यदा च नन्ते पुरमोहमीश्वरः क्षराक्षराभ्यां परमो ह्यथोत्तमः ॥

राक्षराभ्यामिति ॥ अथवा ईश्वरत्वमेव साधयति ॥ क्षराक्षराभ्यामिति ॥ द्वितीयस्मात्क्षराक्षराभ्यां परमो यतस्मादहमुत्त
म इत्यन्वयः ॥ क्षरति नश्यतीति क्षरः कार्यवर्गः ॥ न क्षरतीत्यक्षरं कारणं मायाशबलितं चिद्वस्तु ताभ्यां परमो व्यतिरिक्तः ॥
कार्यकारणादिभेदकल्पनाधिष्ठानमत इत्यत उत्तमपुरुषोत्तमः ॥ इत्यर्थः ॥ यत उत्तमोऽतः ॥ ॥श्रीरामायनमः॥ ॥ ॥

परेषामात्मनोतत्त्वं स्वरूपमस्मिन्निति परात्मतत्त्वमहमेव सर्वात्मा चेत्यर्थः॥ एवंविधस्वैरात्मकथं तद्धितं तत्त्वविपरी
तद्रूपप्रतिभासइत्यत आह॥ तथाद्वयोपि सन्निति॥ उक्तोक्षरमेतद्विद्याविजृम्भितत्वाद्विपर्ययइत्यर्थः॥ तथा च भगवतोक्तं
॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च॥ क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते॥ उत्तमपुरुषस्त्वन्यः॥ परमात्मेत्युदाहृत

परात्मतत्त्वस्तथाद्वयोपि सन्विपर्ययेणाभिमतस्त्वविद्यया॥८॥

तः॥ योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः॥ अतोस्मि लोके वेदे च प्रथितः
पुरुषोत्तम इति॥८॥

तर्हि किमविद्यापं वं धोवर्त्ततेनेत्याह॥ अविद्ययेति॥ अविद्याम् ज्ञानं भावनं तत्कृतो देहाद्यभिमानः कर्माणि तत्पूर्वका
णि पुण्यपापजन्यानि तैर्विबद्धस्तत्संपर्कानुगतः कुतो यस्माद्व्यवधिर्व्यवधानं वस्त्वंतरकृतोवच्छेदस्तद्रहितोव्यवधिः॥
अयमाशयः॥ चित्प्रकाशस्तावदात्मेति श्रुतिस्मृतीतिहासपुराणन्यायसिद्धं॥ अविद्या च जडाप्रकाशात्मिका अतस्तयोर्वि
रुद्धस्वभावयोः परमार्थतः संबंधो दुर्घटस्तथेति स्थितेनैवच्छिन्नचैतन्यमात्रतावन्नाविद्याश्रयः उपपद्यते॥ तथा सत्यणुमात्र

अविद्ययाभावनया च कर्मभिर्विबद्ध आत्मा व्यवधिः सुनिर्मलः॥ दृ
गादिशक्तिप्रचितोहमद्वयः स्थितः स्वरूपेण गगनं यथाचलं॥९॥ ॥

स्यापि प्रकाशानुपपत्तिप्रसंगात॥ नापि केनचिदवच्छिन्नभागविशेषमविद्याव्यतिरिक्तस्य कल्पनायाः अनिबंधनत्वात्त
स्माद्विद्यातिरिक्तव्यवधानाभावादव्यवधित्वमतिदिवोधपरिकल्पितोधकारवदात्मन्यविद्यादिकल्पनमिति॥ अतएव
सुनिर्मलः॥ सर्वाविक्रियतेदोषरहितइत्यर्थः॥ एवंविधः आत्मनिकथं तद्राश्रीतामंलावोइत्यादिव्यवहारइत्याशंक्याविच
द्योध्यस्तांतःकरणपरिणामरूपदृगादिशक्तिसंबंधोदेवेत्याद्यु॥ ॥

उप·स·
६

प्रत्ययप्रतिभासो न परमार्थ इत्याह॥ दृगादीति॥ स्पष्टमन्यत्॥९॥ एवंविधात्मतत्त्वपरिज्ञानेन तिकैवल्यं फलमित्याह॥ अ प्र·वि·१०
हं परं ब्रह्मेति॥ अहं परं ब्रह्मेति निश्चयेनात्मनि दृढज्ञानं यस्य स तथोक्तः सम्यक्॥ पुनर्न जायते शरीरवान्न भवति इति श्रुतेर्वची
विद्वान् इति शेषः॥ तथा च श्रुतिः॥ स तु तत्पदमाप्नोति यस्माद्भूयो न जायते॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति॥ अथ

अहं परं ब्रह्म विनिश्चयात्मदृङ्न जायते भूय इति श्रुतेर्वचः॥ न चैव बीजे
त्वसति प्रजायते फलं न जन्मास्ति ततो ह्यमोहता॥१०॥

सोऽभयं गतो भवति ब्रह्म वेद ब्रह्मैव भवतीति च श्रुतिः॥ इदेऽर्थे युक्तिमप्याह॥ न चैवेति॥ उक्तं सामान्यन्यायं प्रकृते योजयति॥ न ज ६
न्मास्तीति॥ हि यस्मादमोहता॥ प्रागुक्तवर्त्मना मोहराहित्यं ततो हेतोर्न जन्मास्तीति योजना॥ मोहपदवाच्याविद्याबीजत्वाज्जन्मा
दिविकारस्य तदभावे भावाद्वेत्यर्थः॥१०॥

मोहकार्यत्वात्संसारस्य मोहनिवृत्त्या निवृत्तिरेवेत्युक्तं॥ तत्र किं मोत्मकं मोहकार्यमित्यपेक्षायां तदाह॥ ममेदमिति॥ प्रथमं
देहद्वयेऽहंकारस्ततस्तद्ग्राह्यार्थकल्पनमिदमिति॥ तत्र शोभनताशोभनताद्यध्यासः इत्थमिति॥ प्रथमं देहद्वयेऽहंकारस्ततो ममेद
मस्त्वेदृशं तथा न ममेदमित्यादिकल्पना तथा परोप्येवं नैवमन्यथा वा नास्तीति वा अस्तीति वा इति विमूढतो मम परस्य वानुगतताच
तथा च इत्येवं जनस्य जन्मादियोगिनोनाद्यज्ञानतिरोहितात्मस्वभावस्य या एवंविधा कल्पना सा सदा समे ब्रह्मण्यद्वये शिवेप

ममेदमित्यहं च तथेदमीदृशं तथाहमेवं न परो न चान्यथा॥ विमूढतैवं
न जनस्य कल्पना सदा समे ब्रह्मणि चाद्वये शिवे॥११॥ ॥

रमानंदस्वरूपेण च नास्त्येवेत्यर्थः॥११॥ एवं विचित्रस्य संसारस्यात्मतत्त्वज्ञानेन तदज्ञाननिवृत्त्या निवृत्तिमुक्तां स्फुटयति॥ य
द्वयमिति॥ अद्वयमिति॥ अद्वयमद्वयात्माकारमतीव निर्मलमसंभावनाविपरीतभावनादिप्रतिबंधरहितं यज्ज्ञानं तन्नत
स्मिन्सति महात्मनां ब्रह्मज्ञानां शोकमोहनासंभावित्वं नास्त्येवेत्यर्थः॥ तथा च मंत्रः तत्र को मोहः कः शोक एकत्वमनुपश्य
त इति॥ तयोः शोकमोहयोरभावे तदुपलक्षितस्य तत्कारणस्याज्ञानस्य निवृत्तौ बीजाभावे फलाभावन्यायेन जन्मादि पुनर्नैहि भवे

उप.स.
७

दिति वेदांतविदां विनिश्चय इत्यर्थः॥ तथा च श्रुतिः॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृ प्र.वि.१०
ष्टे परावरे॥१४॥ एवं मुक्तस्यात्मविदः स्वरूपमाह॥ सुषुप्तवदिति॥ जाग्रति विश्वाचास्यायामिदं द्वैतप्रपंचं प्राग्वासनावशात्प
श्यन्नपि बुद्धिस्थमपि विशेषतो न पश्यति॥ किंतु सुषुप्तवत्प्रविलीनप्रपंचं प्रत्यगात्मस्वरूपेणैव पश्यतीति योजना तत्र हेतुर

यदद्वयं ज्ञानमतीव निर्मलं महात्मनां तत्र न शोकमोहता॥ तयोरभावे
न हि कर्मजन्म वा भवेदयं वेदविदां विनिश्चयः॥१२॥ सुषुप्तवज्जाग्रति यो
न पश्यति द्वयं तु पश्यन्नपि चाद्वयत्वतः॥ तथा च कुर्वन्नपि निष्क्रियश्च
यः स आत्मविन्नान्य इतीह निश्चयः॥१३॥ ॥श्रीकृष्णाय नमः॥ ॥

द्वयत्वत इति॥ द्वैतस्य बाधितत्वादित्यर्थः॥ तथा च पूर्वं स्नानशौचभिक्षाटनादि कुर्वन्नपि निष्क्रियो निर्विकारोऽकर्त्रात्मस्वभा
वाविर्भावाद्भवति एवंविधः॥ स आत्मवित्त्वविदां परमहंसानामप्यप्रच्युतात्मरूपो याथात्म्यदर्शित्वात् ब्रह्मविदामुत्तमोऽयमेव नान्यः॥ ७
शास्त्रार्थतोऽपि यो व्यवहारकाले तात्त्विककर्तृत्वाद्यभिमानवानित्यर्थः॥ इतीदृशमिह विदां तत्त्वज्ञानिविनिश्चयः॥१३॥ ॥ ॥

शास्त्रन्यायानुसारेणास्यानुभवं प्रदर्शयेदानीमस्मिन्दर्शने परिनिष्ठितस्य कृतकृत्यता भवतीति॥ दर्शयन्परानुग्र
हाय प्रकरणनिर्माणे प्रवृत्तिरिति सूचयति॥ इतीदमुक्तमिति॥ वेदांतविनिश्चितमित्युक्तदर्शनस्य परमार्थविषयत्वे प्रमाण

इतीदमुक्तं परमात्मदर्शनं मयाहि वेदांतविनिश्चितं परं॥ विमु
च्यतेऽस्मिन्यदि निश्चितो भवेन्न लिप्यते व्योमवदेह कर्मभिः॥१४॥ ॥
इति श्रीमच्छंकरोपदेशात्मस्वरूपपरमार्थदर्शनप्रकरणं विवृतं दशमं स
माप्तम्॥१०॥ कल्याणमस्तु॥ शुभं भवतु॥ श्रीरस्तु॥ श्रीरामाय नमः॥

मुक्तः॥ व्योमवदेवेति विभिन्नघ्निवृत्तिकारणार्थः॥१४॥ ॥इति श्रीउपदेशात्मस्वरूपपरमार्थदर्शनप्रकरणं विवृतं नाम दश
मं समाप्तम्॥१०॥ ॥कल्याणमस्तु॥ शुभं भवतु॥ श्रीरस्तु॥ ॥श्रीरामाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीनाथजी सत्य छे॥

॥ ॥इति श्रीदशमं प्रकरणम् समाप्तं॥१०॥ ॥

॥ॐ नमः॥ ब्रह्मात्मैक्यज्ञानमात्रनिःश्रेयसहेतुरुच्यत इति तदुक्तं॥ तन्नोपपद्यते कर्मसाध्यत्वान्मुक्तेः॥ कर्मसहितं तज्ज्ञानसा-
ध्यत्वाद्वा॥ तथा ज्ञानस्य वेदांतविनिश्चयत्वमुक्तं तदपि संदिग्धमनुमानादिना प्युपपन्ने रित्याशंकां परिहर्तुं प्रकरणांत-
रमारभते॥ ईक्षितृत्वमित्यादिना॥ तत्रादौ ज्ञानादेव मुक्तिर्ज्ञानं च वेदांतमहावाक्यादेव नानुमानादिनेत्येतत्साधयति॥ अ-
न्यत्वं सदसीति निवर्त्यत इति॥ त्वं तत्सत्याद्दर्शितं ब्रह्मैवासि न संसारीति वाक्योपदेशेनैव सद्य एवार्थाद्ब्रह्मणोऽन्यत्वं जीव

॥ॐ नमः॥ ईक्षितृत्वं स्वतः सिद्धं जंतूनां च ततोन्यता॥ अज्ञानादि
त्यतोन्यत्वं सदसीति निवर्त्यते॥१॥

स्य निवर्त्यत इत्यर्थः॥ संसारिणो जीवस्याकृष्यक्षं तद्विपरीतब्रह्मत्वं संभाव्यत इत्यपेक्षायामाह॥ ईक्षितृत्वमिति॥ प- १
वेषामेव जंतूनां प्राणिनां चिद्रूपमेवेक्षितृत्वं तत्स्वतः॥ सिद्धं स्वाभाविकं रूपं च कारः शंकानिवृत्त्यर्थः॥ कर्तृत्वभोक्तृत्वा-
देरविस्वाभाविकत्वशंकानकार्यास्वरूपव्यभिचारादित्यर्थः॥ कुतो ज्ञानादेवान्यत्वनिवृत्तिरूपा मुक्तिरित्यत आह॥

अज्ञानादित्यत इति॥ इतियतोन्यतान्यत्वमज्ञाननिबंधनं नपरमार्थेत इत्यर्थः॥ अज्ञानकल्पितत्वाद्ब्रह्मविपरी-
तरूपत्वस्य तस्मिन्मात्रस्वभावत्वाद् ज्ञानेनिवृत्तिरसत्त्वात्स्वमोदस्यतस्य च तत्त्वज्ञानमात्रापेक्षणात्॥ ज्ञानस्यो-
चयथोक्तवाक्याद्वैतस्तेनमानांतरं साधनांतरं वापमृग्यं तदितिभावः॥ कर्मणोमोक्षहेतुत्वं कल्पनं ज्ञानस्य सहायत्वे

न तावन्मात्रतत्त्वं न किंचिदन्यत्सहायकं॥ ज्ञानस्येति श्रु
वत्त्वात्संसत्रिगं कर्मबाधते॥२॥ ॥

ननोपपद्यते॥ श्रुतियुक्तिविरोधादित्याह॥ न तावद्धीति॥ न तावद्दूरेत्वन्मतत्वमित्येतदमृतत्वसाधनमात्मज्ञानमे-
वैतन्मात्रमेवोद्धेनोद्धरयंतीतिश्रुतिः॥ ज्ञात्वैवमुच्यते॥ तत्ज्ञानस्य किंचिदन्यन्नसहायभूतमस्तीति श्रुवत्वसत्रिगंस साधन
कर्मबाधत इतियोजना॥ ॥ ॥

उप॰म॰ २ अद्वैतात्मज्ञानादूर्ध्वं कर्महेतुजात्याद्यभिमानाभावे कुतः॥ कर्मयत्नज्ञानस्य मोक्षफलेऽसहायत्वं तन्न वेदितव्यमाहुः॥२ प्र॰वि॰११
॥इदानीमीप्सितत्वमित्यत्रोक्तं॥ स्वाभाविकं चिद्रूपत्वं च पंचयत्नज्ञानिनः॥ कर्मनष्टे तद्दृत्यैतदुपपादयति॥ सर्वेषा
मिति॥ विशेषः॥ कर्तृत्वादिजन्मो विहितकर्मसाधनजात्याद्यभिमानजन्मान्वस्य र्थः॥ कथं चनेत्यादेः पार्थे न कथंचन

सर्वेषां मनसो वृत्तमविशेषेण पश्यतः॥ तस्य मे निर्वि
कारस्य विशेषः स्यात्कथंचन॥३॥

मे विकारः॥ स्यादित्यर्थः॥ कुत इत्यत आह॥ अविशेषेणेति॥ अभिमानशून्यतया केवलं साक्षिमात्रेण पश्यत २
इत्यर्थः॥३॥

कथं मनोवृत्तं पश्यत्यविशेषेणात्मेत्यपेक्षायां दृष्टान्तपूर्वकं तदुपपादयन्निद्विदेकरसत्वमात्मनो निगमयति॥ म
नोवृत्तमिति॥ स्वप्नदशायां सवृत्तिकं मन एव पश्यत्यात्माद्यथा बोधो विषयाभावाच्च तथा जाग्रत्यपि जागरणदशायाम
नोवृत्तमतः॥ अचारं मनश्च वस्तुताममप्यपश्यतः कः पविशेषः॥ स्यादिति पूर्वश्लोकेनान्वयः॥ जाग्रद्दशायामपि विषयाका
रवृत्तिमन्मनोव्यतिरेकेणानात्मनाकिमपि रूपतया मतः इति भावः॥ तदेवं विधमनोदर्शनमेव स्वाभाविको विशेषः

मनोवृत्तं मनस्यैव स्वप्ने वस्त्वव जायते तु॥ संप्रसादे द्वयासत्वाच्चिन्मात्रः सर्व
गो व्ययः॥४॥ स्वप्नः स्मृत्या यथा बोधो जाग्रद्दृष्टं त्वत्तथैव च॥

त्यत आह॥ संप्रसाद इति॥ संप्रसादे सुषुप्तिदशायां द्वयस्य सवृत्तिकस्य मनसो असत्त्वात् तद्दर्शनमपि स्वाभाविकं॥ न
नु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति श्रुतेः॥ तथा चात्मा चिन्मात्रः सर्वगोऽपरिच्छिन्नो व्ययो नित्य इति सिद्ध इत्यर्थ
॥४॥ ननु पश्यद्योवंतदा बाह्याभ्यन्तरद्वैतस्याभावात्वेति युक्तं स्यात्तन्नोपपद्यते प्रत्यक्षादिप्रमाणविरोधात् लौकिकवैदि

उ॰प॰स॰ ३ कव्यवहारविलोपप्रसंगाद्धेति चेन्नेत्याह ॥ स्वप्नइति ॥ यथा स्वप्नो बोधात्प्रबोधपर्यंतं स्वप्नः सत्यो लौकिकवैदिकव्याव उ॰वि॰ ११
हारास्पदत्वाद्भाव्यते ॥ तथैव जाग्रत्जाग्रदवस्थापि आमविदेहात्मत्वं प्रत्यक्षादेः प्रमाणत्वं च सर्वव्यवहारांगत्वात् ॥ कि
मत्यर्थं तमित्युत आह ॥ आत्मवेदनादिति ॥ आत्मवेदनादिति पदच्छेदः ॥ आत्मतत्त्वसाक्षात्कारात्प्राग्वै सर्वव्यवहारोऽस्ति
स्मिन्नस्तीति व्यवहाराभावः ४॥ एवेति भावः ॥५॥ अव्यवहार्यस्वरूपमाविष्करोति ॥ व्योमवदिति ॥ द्वाभ्यां ॥ चेता चिद्रूपः

प्रत्यक्षादेः प्रमाणत्वं जाग्रत्स्याद्वात्मवेदनात् ॥५॥ व्योमवत्सर्वभूतस्थो भूत
दोषैर्विवर्जितः ॥ साक्षी चेता गुणैः शुद्धो ब्रह्मैवास्मीति केवलः ॥६॥

साक्षीति भूतदोषराहित्ये हेतुः ॥ व्योमवत्सर्वभूतस्थ इत्यसंगत्वमुक्तं सर्वभूते घटहमाकारवृत्ताव भिव्यक्तापेक्षया ३
सर्वभूतस्थ इत्युच्यते ॥ एतच्चाहं मनुष्यत्व सर्पश्चेतिवत्सर्वात्मत्वाभिमानवामदेवाभिमानवत्तथा यस्तिष्ठति ॥ शुद्धो
ज्ञानरहितः ॥ केवलो वस्थान्तररहितः ॥ ब्रह्मैव पूर्णवास्मीत्यर्थः ॥६॥

केवलत्वं व्यनक्ति ॥ नामरूपेति ॥ वाच्यवाचकतद्व्यापारात्मकप्रपंचविहीन इत्यर्थः ॥ सुगममन्यत् ॥७॥ कथम
द्वयत्वमात्मनः संगच्छते ॥ अहं ब्रह्मास्मीतिवदहं कर्तास्मीति चानुभवस्य प्रमाणभूतत्वादिति ॥ ज्ञानकर्मसमुच्चय

नामरूपक्रियान्योन्यो नित्यमुक्तः स्वरूपवान् ॥ अहमात्मा
परं ब्रह्म चिन्मात्रोऽहं सदाद्वयः ॥७॥ अहं ब्रह्मास्मि कर्ता च भोक्ता
चास्मीति ये विदुः ॥ ते नष्टा ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः ॥८

वादिनो भेदमतानुसारिणः स्मार्तकर्मस्थ यन् अद्वैतात्ममतं दूषयति ॥ अहं ब्रह्मास्मीति ॥ विरुद्धार्थप्रतिपादकत्वाद्वे
मातच्छास्त्रस्य विरुद्धत्वमवगच्छतां कर्मकांडात् ज्ञानकांडाच्च बहिर्मुखत्वान्नास्तिकत्वमेव तेषां फलिष्यतीत्यर्थः ॥८

उप॰स॰ ४ मनुतिंदामात्रेणैव कथमद्वैतमतमिति हिप्सितत्र प्रमाणत्वासंभवादित्यत आह॥ धर्माधर्मेति॥ आत्मनो धर्माधर्मफलैः॥ सु प्र॰वि॰ ११
खदुःखादिरूपैर्योगः॥ संबंधः॥ प्रमाणांतरेण दृष्टोऽविद्यया आत्मा देवपुण्येन वैपुण्येन कर्मणा भवति पापः॥ पापेन इत्यादिश्रु
गीकृतः आत्मा धर्मविद्भिरितिशेषः॥ तथास्यात्मनो ब्रह्मत्वं ज्ञानादेव मोक्षश्चेति ब्रह्म वेद ब्रह्मैव भवति॥ तमेव विदित्वातिमृ

धर्माधर्मफलैर्योगः दृष्टोऽदृष्टोऽप्यथात्मनः॥ आत्मा ब्रह्मत्व
मप्यस्य मोक्षो ज्ञानान्न चेष्यते॥ ८॥

त्युमेति नान्यः॥ पंथा विद्यतेऽयनायेत्यादिश्रुतिभ्यो विदिष्यतां॥ तथा च भेदकर्मणोर्निंदितयोः॥ आत्मज्ञो तात्पर्यविषयत्वायो ४
गात् द्वाभ्याम् अनुशासनीयं यथार्थं मर्थः॥ प्रतिपत्तव्य इति भावः॥ ८॥

ननु आत्मनो धर्माधर्मफलयोगः॥ मोक्षो ज्ञानानंतरविरोधाभावात्प्रथैवेति युज्यते॥ तथा ते आत्मनो ब्रह्मत्वं॥ प्रत्यक्षादृष्ट
त्वादिविरोधादतः॥ श्रुत्यनुभवयोर्विरोधेऽपि भेदाभेदाबाधादरणीयाविति चेन्नैवं॥ कर्तृत्वादिप्रतिभासस्याध्यासत्वात्
श्रुत्युक्ताद्वैतप्रतिपन्नत्वानुपपत्तेरितिमदृष्टांतमाह॥ यामहारजनाद्यादि॥ तस्याहैतस्य पुरुषस्य रूपं यथा माहारजनं वा
सः इत्यारभ्य यथा सकृद्विद्युत्तमित्यंते न श्रुत्युक्ता या वासनास्ताः॥ स्वप्नदर्शिनिरनुभूयंताऽवयथोत्पन्नहरयोजना॥ महार

यामहारजनाद्याम्नावासनाः स्वप्नदर्शिभिः॥ अनुभूयंतऽवेह
तनोऽन्याः केवलो दृशिः॥ १०॥

जनहरिद्रातपार्जितवस्त्रादिमहारजनं स्वप्नदृश्या यांजाग्रद्वासनावासितस्य मनसो वातविक्षेपदूषितरव दू
षितात्प्रिय अनुगतस्याहृत्पादिमुद्राधितानेकवासनातयाजाग्रतदृष्टार्थाकारेण परिणममानस्य हरिद्रारंजितमहा
दिरूपदृशानयामासमानस्याद्रष्टृदृश्यदर्शनेतत्कारणादिभावेन नित्यस्वप्नदृष्टेः लभ्यमानत्वात्स्वप्नदृश्या सामहा
हारजनादिसदृशावासनाःयोलिंगात्मसहिताभ्योद्रष्टाव्यावृत्तिस्वभावो विज्ञेयो ज्ञायते॥ ॥श्रीकृष्णायनमः॥ ॥

उप॰स॰ ५ तथा कर्तृत्वादीनां दृश्यत्वादनात्मधर्मत्वमेवेति निश्चितमेहमात्मस्वरूपव्याख्यानमपि ततः कर्तृत्वादिधर्मकाल्लिंगादन्यः प्रवि॰ ११
॥ केवलः ॥ शुद्धो दृष्टिरात्मेत्यर्थः ॥ १० ॥ आत्मनः स्वभावस्यापि दृश्यविलक्षणत्वेन प्रतीतिमेव दृष्टान्तेन स्पष्टयति ॥ को
शादिवेति ॥ इव शब्दो यथार्थः ॥ असिरिवेति संबंधः ॥ यथा शब्दो यथावदित्यर्थः ॥ यथासिः खड्गः कोशात् पृथक्कृतः
स्वरूपेण दृश्यते तद्वद्देहे बोधात्मा कार्यकारणवर्जितः ॥ कार्यकारणाकारमनसो लिंगात् पृथग्भूतः ॥ स्वप्ने य

कोशादिव विकृष्टः कार्यकारणवर्जितः ॥ यथासिर्दृश्यते स्वप्ने
तद्वद्बोधः स्वयंगतः ॥ ११ ॥

थावद्दृश्यते ॥ दृश्यते तु स्फुटं विषयवत् दृश्यत्वान्मिथ्यात्वमित्याशंक्य विशिनष्टि ॥ स्वयंप्रभ इति ॥ स्वमहिम्नैव प्रथ
ते न विषयतयेत्यर्थः ॥ यद्वा ॥ कथमवगम्यते स्वप्ने कार्यकारणवर्जित इति वीक्षायामत्रायं पुरुषः स्वयंज्योतिरिति ५
श्रुतिप्रमाणमित्याह ॥ स्वयंप्रभ इति ॥ स्वयंप्रकाश इति श्रुत्या निर्णीत इत्यर्थः ॥ उपाधेः पृथक् स्वरूपेणावभासमा
नैरपि दृष्टान्त इति नैष प्रसंगो वा कार्य इति द्रष्टव्यं ॥ ११ ॥

आत्मनः कर्तृत्वादिप्रतिभासप्रसंगं प्रतिभासवत्त्वमिथ्यात्वाच्छुद्ध एवात्मा अद्वैत इति शास्त्राद्दृविशेषैनैव प्रत्येतुं शक्यत्वा
त्तं भेदाभेदकल्पनया मतः ॥ स्वैनीदेयमिति सिद्धे सोपक्रमं वाक्यं प्रमाहेणमाह ॥ आपेषादिति ॥ तं पाणिनापेषबोधयां च
कारमहोत्पाविति श्रुतौ मुनपुरुषो ब्रह्म स्मोऽरवामः ॥ सोमराजन्नित्यादि श्रुत्या मन्त्रिरा मन्त्रितो नोत्थितः ॥ पाणिना त्वविष्य
मानेनुत्थित इति निरधारितस्तेन प्राणादिन्द्रियादिरूपलिंगसंघातविलक्षणः स्थूलसंघातादप्यन्यत वात्मेति प्रतिपन्नमतः

आपेषात्प्रतिबुद्धस्य तस्य स्वात्मा विकंपदं ॥ नेक्षनेत्यादिवा
क्येन कल्पितस्यापनेतृणा ॥ १२ ॥ ॥

वज्जुविलक्षणत्वात् ॥ त्मानस्वभाव ॥ तस्यापेषात्प्रतिबुद्धस्य तस्य तत्पदार्थस्य स्वात्माविकंपदं परंब्रह्म लक्षणमुक्तं ॥
प्रतिषेधकेन नेत्यादिवाक्येन ॥ अथात आदेशो नेति नेतीरं भवत्यस्य सत्यमिति श्रुत्या ॥ तेनेत्थं तेषामेव सत्यमित्यं तेन वा
क्येनेत्यर्थः ॥ किं विषयेण वाक्येन ॥ कल्पितस्याध्यस्तस्य मूर्तामूर्तलक्षणस्य नामरूपस्यापनेतृणा प्रतिषेधकेन नेति नेती
ति विषयायामनकारणकार्यात्मकोपाधिप्रतिषेधद्वारा स्वं स्वे ब्रह्मणि पर्यवसितेनेत्यर्थः ॥ १२ ॥ ॥ श्रीरामायनमः ॥ ॥

उप.स. नेतिनेत्यादिनाशास्त्रेणानिषिध्यमानस्यकल्पितत्वंश्रुत्यैवोपपादितमित्याह॥ महाराजादयइति॥ स्वप्ने स्वाप्नावस्थायांमहारा उ.वि.११
६ जादयोलोकायद्वन्मयिदृगात्मनिप्रकल्पितास्तद्वदेवजागरितेपियास्मिन्नाश्रितपासह इदंरूपंमूर्तंचैवामूर्तंचमयिकल्पितंविद्या
त्॥ तथाचश्रुतिः॥ यत्रैषएतत्सुप्तोनस्वप्नान्पश्यतिज्ञानमयः॥ पुरुषइत्युपक्रम्यसयत्रैतत्स्वप्न्यया चरति॥ तेहास्यलोकास्तदुतेव
महाराजोभवत्युतेवमहाराजोभवत्युतेवमहाब्राह्मणउतेवोच्चावचंनिगच्छतीति इवशब्देनमहाराजत्वादेः स्वप्नदृश्यस्या

महाराजादयोलोकामयियद्वत्प्रकल्पिताः॥ स्वप्नेतद्वद्रूपंवि
द्याद्रूपंवासनयासह॥१३॥ ॥

सत्त्वंमध्येनिर्दिश्यैवमेवैषएतत्प्राणान्गृहीत्वास्वेशरीरेयथाकामंपरिवर्ततइत्युपसंहरंतीशरीरमध्यएवप्रा ६
णान्गृहीत्वाचलिंगोपाधिर्महाराजाद्यात्मतयागृहीत्वास्वेशरीरेगच्छंचरतीतिदर्शयति श्रुतेनस्वप्नोपलब्धपरमार्थः॥ तथा
चवासनाश्रयलिंगशरीरसहितस्यमूर्तामूर्तरूपस्यस्थूलशरीरस्यापिदृगात्मनिकल्पितत्वंतद्दृश्यत्वादुपपन्नमेवेतियुक्त
मितितात्पर्यार्थः॥१३॥ ॥

स्वप्नप्रपंचवज्जाग्रत्प्रपंचस्यापिदृगात्मनिकल्पितत्वेसिद्धेप्रत्यक्त्वामितस्यकर्मविंनवः सिद्धइत्याह॥ देहलिं
गेति॥ क्रियाःकर्माणिदेहलिंगात्मनात्मास्थूलसूक्ष्मदेहरूपेणतदभिमानेनततदात्मतामापन्नेनात्मनाकार्याः अनुष्ठेयाः॥ न
पुनस्तद्विरूपेणतदभिमानरहितेन आत्मनवादित्यर्थः॥ किंजन्मनोनवासनानारूपिणाधाससनाः रूपयितुंसंचेतुंशीलम

देहलिंगात्मनाकार्यावासनारूपिणाक्रियाः॥ नेतिने
त्यात्मरूपत्वान्नमेकार्याक्रियाक्वचित्॥१४॥ ॥

स्तीतिवासनारूपिणेनपुनः॥ पुनः॥ कर्मप्रवृत्तिनिमित्तेनाविद्यान्तेनेत्यर्थः॥ इदानीमेममनेतिनेत्यादिनोक्तात्मस्व
रूपत्वा देहद्वयाभिमानानाबान्नक्वचित्स्वप्नेवाजागरेवानक्रियाकार्याकर्तव्या॥ स्वभावतोविधितोवेत्यर्थः॥१४॥

ऋतज्ञान॰॰विजयितदेहाभिमानादेव कर्मेतिकर्त्तव्यताज्ञानमूलत्वविदितमोक्षानाकर्त्तव्येत्याह॥ न तत इति॥ ततस्तस्मा
त्कर्मणोहितोरमृततायामोक्षभावस्यानाः ज्ञानं पुनस्तत्त्वविकृतो ज्ञानहेतोर्ज्ञानहेतुकत्वादविवेकपूर्वकत्वात्कर्मणो ऽमृत
र्थः॥ जडयोर्ज्ञानकर्मणोर्विरोधभावान्नाज्ञाननिवृत्तिरूपमोक्षकर्मज्ञानकार्यत्वमात्मनो ऽवस्थानरूपस्य च परमार्थ

न ततो मृततास्ति कर्मणो ज्ञानहेतुतः॥ मोक्षस्यज्ञा
नहेतुत्वान्न तदन्यदपेक्षते॥१५॥ ॥

विपर्यय॰॰ज्ञानस्य मोक्षस्य चतुर्विधक्रियाफलविलक्षणत्वान्न तत्रापि कर्मापेक्षेति भावः॥ कर्मणः स्वतो मोक्षहेतुत्वा ७
भावे ऽपि मोक्षहेतुज्ञानसहितयोर्यतातद्धेतुर्भविष्यतीत्याशंक्याज्ञाननिवृत्तौ ज्ञानमात्रस्य समर्थत्वान्न तत्र कर्मसहायता
पेक्षतेनापीतरेतरतस्यस्वतःसिद्धत्वादित्यभिप्रेत्याह॥ मोक्षेति॥१५॥

यदि कर्मणाप्यमृतत्वं स्यात्तर्हि स्वर्गादिवत्कृत्यादिपरिच्छिन्नमनित्यं संभवं च स्यात्तच्चानिष्टमपवर्गप्रतिपत्तिविरोधि इत्यम
यद्रूपत्वश्रुतिविरोधादतो ऽन्यसर्वमितिमोक्षस्वरूपादन्यदार्त्तमतो ऽत्यात्स्यानार्त्तत्वपर्यवसानस्य च नविरोधश्रुतेत्यपि प्र
यद्रूपत्वश्रुतिविरोधादतो ऽन्यस्यार्त्तत्वोक्त्यात्स्यानार्त्तमित्यर्थः॥ यद्यपि ब्रह्मरूपममृतत्वमुक्तं न स्वरूप
त्याह॥ अमृतं चेति॥ इक्षितृत्वप्रकरणं च ग्राह्यत्वर्थः॥ अमृतत्वमयेतार्त्तमित्यर्थः॥ यः प्रियोन्यथादि
मकर्मणाध्येतथाविजीवोन्यस्तत्कर्मणोवलभतेत्याशंक्य जीवस्य ब्रह्मणोन्यत्वाभावात्सैवमित्याह नेतीति॥ यः प्रियोन्यथादि
प्रीत्यास्पदतयाविभाव्यते॥ मममात्मस्वरूपभूतो नेनजीवेनात्मनानुप्रविश्येत्यादिश्रुतेः॥ सचेनेतीत्यपोहशेषविशेष

अमृतं चाभयं नार्त्तं नेतीत्यात्माप्रियो मम॥ विपरीतमतो न्यद्यत्त्यजेत्तत्स
क्रियं ततः॥१६॥ ॥इतिश्रीक्षितृत्वप्रकरणमेकादशं विवृतं समाप्तम्॥११॥

इतिमद्रूपत्वान्नतस्य कर्मप्राप्यममृतत्वमित्यर्थः॥ अतउक्ताद्धात्मस्वभावाद्यदन्यद्देहबुध्यादिदृश्यमात्रं विपरीतह॰
त्यमनात्मभूतं तत्क्रियावहितत्त्यजेत्तदिमाने परित्यजेत्तस्मात्कारणादित्युपसंहारार्थः॥ नचायमात्मतत्त्वविधिस्त
त्त्यजेत्याकारणं तत्क्रियावहितत्यजेत्तदभिमाने परित्यजेत्तस्मात्कारणादित्युपसंहारार्थः॥ इतीह विधिप्रत्ययनिर्देशादिति द्रष्टव्यः॥१६॥ ॥
स्याविनियोज्यत्वात्प्रत्यगुत्रवादमात्रं बाधकस्य पुनरूपमुज्यते नियोगः इतीह विधिप्रत्ययनिर्देशादिति द्रष्टव्यः॥१६॥ ॥
॥इतिश्रीक्षितृत्वप्रकरणमेकादशं विवृतं समाप्तम्॥११॥ ॥श्री अवाजीवत्यहो॥ ॥कल्याणमस्तु॥ ॥शुभंभवतु॥श्रीरस्तु

॥ ॥इतिश्रीएकादशप्रकरणंविवृतंसमाप्तः॥११॥ ॥

उप॰स॰ १ ॥ॐ नमः॥ ननु यदि लोकाद्विलक्षणो लोको निर्विशेषब्रह्मस्वरूप एव तर्हि सर्वलोकोऽहमहमित्यात्मानमनुभवन्नपि ब्रह्माहमि उ॰वि॰१२
ति कथं नानुभवतीत्याशङ्कायां पदार्थतत्त्वपरिशोधनाभावापराधादेवेति तत्त्वपदार्थशोधनप्राधान्येन प्रकरणमारभमाणः ॥ सोऽय
मानः ॥ करणाविवेकाद्यथात्मनः स्वात्मानं न प्रत्येति सर्वो लोक इति प्रथमस्य दृष्टान्तमाह ॥ प्रकाशास्थमिति ॥ यथायं जनः प्र
तालोकमध्यगतस्थूलदेहं ततो विलक्षणमपि तेनालोकेन व्याप्तत्वात्सालोकमालोकमालोकविशिष्टमभिमन्यते ॥ तथा दृष्टा

॥श्रीकृष्णाय नमः॥ प्रकाशास्थं यथा देहं सालोकमभिमन्यते ॥ दृष्टाभासं तथा चि
त्तं द्रष्टाहमिति मन्यते ॥१॥ ॥

भासं चित्तं साक्षिचैतन्यव्याप्तमन्तःकरणं सचेतनं मन्यमानोऽहं द्रष्टेति साभासं चित्तमेवात्मानं मन्यते न तद्व्यतिरिक्तं जा
नातीत्यर्थः ॥ अयं भावः ॥ यथा विशेषेण सर्वत्र प्रसृतमालोकं देहसंपर्कविशिष्टाकाराकारितमिव स्वरूपमानं देहाभेदेन पश्य १
ति लोकस्तथा सदा स्वरूपेणानवच्छिन्नप्रकाशस्वभावोऽप्यात्मान्तः॥

करणसंपर्काद्विशिष्टाकाराकारितं स्वभासते इत्यहंकारादिसाक्ष्येव लोकस्यैवमन्तःकरणस्वभावविशिष्टमेवात्मानमनुभवति
लोको न शुद्धमिति ॥१॥ एवमानः साभासान्तः ॥ करणाविवेकमुक्त्वा तद्द्वारेण देहपर्यन्तमविवेकं दर्शयित्वात्मा प्रतिपत्ति
मेव लोकस्य दर्शयति ॥ यदेवेति ॥ यदेव साभासचित्ताविविक्ततयाहंकारास्पदं प्राणेन्द्रियस्थूलदेहपर्यन्तं दृश्यते तेनुभूयते

यदेवं दृश्यते लोके तेनाभिन्नत्वमात्मनः ॥ प्रपद्यते ॥
ततो मूढस्तेनात्मानं न विन्दति ॥२॥

लोके व्यवहारनूमाविति यावत् ॥ तेन प्राणादिदेहान्तेनात्मनोऽभिन्नत्वं तादात्म्यं प्रपद्यते ॥ चित्तादिदेहपर्यन्तं चिदाभा
सप्रतीतं तद्देहविवेकाद्यध्यात्मपेवात्मानं मन्यत इत्यर्थः ॥ एवं ततस्तस्मान्मूढो देहादेरात्मनस्त्वात्मनोऽन्यमध्यासकर्तृत्वम
त्वेन मोहेन हेतुनात्मानं ब्रह्मत्वेन न विन्दति न प्रत्येतीत्यर्थः ॥२॥ ॥

उप॰ स॰
२

त्कृत्स्नमर्थं दृष्टं तेन साधयति ॥ दशमस्येति ॥ दशाहि माणवकाः क्वचित्तन्नदीं तीर्त्वा पारे गताः ॥ स्वं तो गणयामासुः ॥ कति प्र॰ वि॰ १२
वयंस्म इति ॥ तत्र गणयितृत्वात्स्वात्मानं विहाय नवैव वयं गणयतिस्मेति प्रसिद्धिः ॥ तत्र यद्वत्स्वयं दशमस्यात्मनो माणव
कस्य गणयितुरविवेकान्नवात्मप्रतिपत्तिः ॥ तद्वदन्योन्यमात्मानं न विदृति न वेद वयं दशमो नास्तीत्यात्रांतिरूप जन्यत इ

दशमस्य नवात्मत्वप्रतिपत्तिर्यथात्मनः ॥ दृश्येषु
तद्वदेवायं मूढो लोको न चान्यथा ॥३॥

त्यर्थः ॥ तद्वत्तथैवायं लोको बुध्यादिषु दृश्येषु वानात्मताद्यप्रतिपत्त्या मूढः शास्त्राचार्योपदेशहीनः ॥ स्वात्मानम
न्यथा प्रतिपद्यते ॥ न चान्यथा वैपरीत्येन बुध्याद्यपोहेन ब्रह्मास्मीति स्वरूपयाथात्म्यान वेत्तीत्यर्थः ॥३॥ ॥ ॥ २

ननु प्रत्यक्षानुभवस्यानुतेस्याविरोधाय प्रत्यगात्मन एव कर्तृत्वादिधर्मवत्वं ब्रह्मरूपत्वं चास्तु किमविवेककल्पन
यामूढत्वमाश्रीयत इत्यत आह ॥ त्वं कुर्विति ॥ यद्या ॥ शास्त्राचार्योपदेशहीनत्वान्नो बुध्यादिवैपरीत्येनात्मयाथात्म्यं न
जानातीति तस्य पदार्थविवेकाभावान्मोहो मोपपद्यत इति सूचितं तत्र किं पदार्थविवेकेन कृतं शास्त्राद्यात्मत्वे प्रतिपन्नेस
ति पन्ने ब्रह्माहमस्मीति प्रसंख्यानादेवात्मयाथात्म्यापरोक्ष्यान्मोक्ष उपपद्यत इति ॥ प्रसंख्यानविध्यवसरमाशंक्य परिह
रति ॥ त्वं कुर्विति ॥ एकनीडोएकस्मिन्विषये रूढौ प्रत्ययौ एककालिकावस्यावेकाभाजौ कथं स्यातामिति न्यायतो युक्तितो

त्वं कुरु त्वं तदेवेति प्रत्ययावेककालिकौ ॥ एकनीडौ कथं
स्यातां विरुद्धौ न्यायतो वद ॥४॥

वदेत्यन्वयः ॥ तथा चैकस्मिन्नात्मनि कुरु तदेव त्वमिति कर्तृत्वाकर्तृत्वप्रकारकविरुद्धबुध्योः ॥ समसमययोर्मध्ये तादृशामी तो
दमबुद्धिवदन्यतरबुध्यान्यतरबाधएव पुंसो नोभयोः ॥ प्रामाण्यमित्यभिप्रायः ॥४॥ तर्हि दुःखित्वाद्यभिमानेन प्रत्यक्षा
नुभवेन शास्त्रस्य ज्ञानस्याबाधात्वोपपत्तेस्तद्दीयस्थैर्यार्थं प्रसंख्यानविधिः ॥ स्यादित्यत आह ॥ देहेति ॥ यदि दुःखित्वादिकमात्मनः
स्वाभाविकं स्यात्तर्हि तन्न ज्ञानाभ्यासकृतेनापि निवर्तयितुं शक्यते ॥

उप०स० ज्ञानस्याज्ञानमात्रविरोधित्वात्तथा च तद्विधिरनर्थकः॥ यद्वात्वविद्याप्रयुक्तदेहाद्यभिमाननिबंधनं दुःखित्वादि तदविद्यानि- प्र०वि०१२
३ वृत्त्यैव तन्निवृत्तेर्विद्यानिवृत्तेश्च ज्ञानमात्राधीनत्वान्न कर्मविध्यवकाश इति श्लोकतात्पर्यार्थः॥ नादेहस्य देहाभिमानरहितस्येत्य-
र्थः॥ तत्र हेतुः॥ स्वभावत इति॥ अदेहत्वमात्मनः॥ स्वाभाविकं रूपमित्यत्र नियामकमाह॥ स्वापवदिति॥ पद्य॥ नादेहस्येत्यनेन दे-

देहाभिमानिनो दुःखं नादेहस्य स्वभावतः॥ स्वापवत्तत्प्रहा-
णाय तस्यामि त्युच्यते दृशेः॥५॥

हाभिमानव्यतिरेकेणान दुः॥ खमस्तीत्युक्तं व्यतिरेकमाह॥ स्वापवदिति॥ सुषुप्ताविवेत्यर्थः॥ दृशेरात्मनस्तत्प्रहाणाय तद- ३
भिमानतिवर्त्तये तस्यामिति श्रुत्योच्यते॥ एकमात्रं बोध्यते न कर्मेत्यक्षरार्थः॥५॥

तत्त्वमस्यादिवाक्याद्देहादिव्यतिरिक्तमात्मानमवगच्छतोऽपि दुःखमहमिति प्रतीतेरनुवृत्तेर्नाभिमाननिबंधनं दुःखमित्याशं-
क्य तद्विशिष्टात्मदर्शिनस्याभासत्वान्नैवमित्याह॥ दृशेरिति॥ दृश्यतीति दृशिस्तं दर्पणादितस्मिन्मुखछायामुखाभासो मुखप्रतिबिं-
रूपा यथा आरूढा भवति तद्दृशेः॥ प्रत्यगात्मनश्छाया आभासो यदारूढा यस्मिन्नहंकारे तेन भवति तं प्रत्ययं प्रत्याययतीति प्रत्ययो
हंकारस्तं साभासमंतः॥ करणं पश्यन्नहमित्युपजायमानो योगी अग्रहणाविद्यादियोगवान्पुमानात्माहं दृश इति मन्यते॥ यथा

दृशेश्छायायदारूढा मुखछायेव दर्पणे॥ पश्यंस्तं
प्रत्ययं योगी दृष्ट आत्मेति मन्यते॥६॥ ॥ ॥

कश्चिद्दर्पणमुखस्वभावाविवेकाद्यथादर्शदर्पणोदोषमालिन्यान्यत्वादि विशिष्टमेव स्वमुखं मन्यते तथायं महारजनउपाधि-
दोषैरात्मकं दिनमिव तदविवेकाहात्मानं पश्यन्नहं कर्ता दुःखीत्यभिमन्यत इत्यर्थः॥ तथा चाहमिति॥ दर्शनस्य कल्पितात्मवि-
षयत्वाद्युक्तं दुः॥ खित्वस्याविवेकाभिमाननिबंधनत्वमिति तिन सम्यगात्मानं वाक्यादवगच्छतो दुः॥ खित्वाद्यनुवृत्तिरुपपद्यते
॥ कदाचित्प्रतिभानस्य बाधितानुवृत्तिमात्रत्वादिति भावः॥६॥ ॥ ॥

यदि साभासाहंकारमात्मानं मन्यसे नसम्यग्दृश्यमीक्षसे हि सम्यग्दृष्टी त्वपेक्षायामाह॥ तं चेति॥ तमुपाधिभूतं प्रत्ययमहंकारं मूढं च मोहात्मकमविवेकमन्यं चोपाधिगतमाभासं दुःखादिकं वा यदि वेत्ति साक्ष्यमेवेदं सर्वमिति॥ साक्ष्यत्वेनैव जानाति॥ न दृशेरात्मनः साक्षिणः॥ संबंधी त्वेव नेवेति यएवं विवेकमतिः॥ स एव योगिनां पूज्यते नेनेति योगस्तत्त्वज्ञानं तद्धि युतेयेषां ते योगिनस्तेषां श्रेष्ठ

तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः॥ स एव
योगी नाद्दृष्टो नेतरः स्यान्न संशयः॥७॥ ॥ ॥

॥ प्रियतमः॥ सम्यग्दृष्टिरित्यर्थः॥ नेतरः॥ पूर्वोक्तसाहंकारात्मदृष्टिः॥ न संयोगः॥ संशयोऽत्र न कर्त्तव्यः॥ अत एवास्य दृष्टान्तस्य संशयात्माविनश्यतीति॥ भगवद्वचमादित्यर्थः॥७॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः॥ गुरुरेक परं ब्रह्म तस्मै श्रीगुरवे
नमः॥१॥ ॥ ४

सर्वस्य लोकस्यात्मत्वेनभासमानोऽप्यहंकारश्चेदनात्मत्वेनत्यज्यते तर्हि तत्त्वमस्यादिवाक्यस्य त्वंपदार्थस्याहंकारनाशस्त्वमस्यादिवाक्यस
निरालंबनत्वापत्तिरित्याशंक्याहंकारादिविवेकस्यतत्त्वमर्थस्य प्रत्यक्षो पपादितत्वान्नैवमित्याह॥ विज्ञातेरिति॥ न हि विज्ञातुर्विज्ञातेर्वि
परिलोपो विद्यते न विज्ञातेर्विज्ञातारं विजानीया इति श्रुतौ प्रसिद्धां तस्माद्दनिर्दिष्टां यां बुद्धिवृत्तिरूपायां विज्ञातेरनित्याया विज्ञातारं नि
त्यविज्ञप्तिरूपेण ज्ञातारं त्वं न विजानीया इति॥ यस्तु विज्ञातेर्विज्ञातिरूपो विषयभूतः सर्वसाक्षी प्रतिपत्तिः॥ सर्वविभासक एव

विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः॥ स स्यादनु
भवस्तस्य ततोऽन्योऽनुभवो मृषा॥८॥

त्वमिति त्वंशब्दोऽनतत्वमसिवाक्येऽच्यते॥ नाहंकारात्मतयायतो यस्मात्तस्तत्त्वमेवलंब्यतत्त्वमस्यादिवाक्यप्रवृत्तेर्न निरालं
बनत्वशंकावकाश इति भावः॥ तस्य त्वंपदार्थस्य स एवमुक्तप्रकारेणानुभवः॥ स भगवान् भवः स्यात्ततोऽन्यो बुद्धि॥ ततस्याभास
विशिष्टरूपतयानुभवो मृषा मिथ्याध्यास इत्यर्थः॥८॥ ॥

उप.स. नन्वविषयस्येशात्मनः सुखानि वेद्यते कथं तर्हि तस्यानुभवोनुभवरूपत्वात्तस्यानानुभवो पेहेतिचेन्न॥ अन्यत्वानुभाव्यानुभवयोर्भे प्र.वि.१२
५ द दर्शनादित्याहुः क्वाजेड त्वजउत्वाभ्यां विशेषोपपत्तेर्भेव मित्याह॥ दृशिरूपेति॥ यस्यस्वसत्तायां प्रकाशाव्यभिचारस्तस्यागंतुकह
नसापेक्षत्वाद्वस्यानांतानागमापायनिबंधनेदर्शनादर्शने स्यातां मद्दृशिरूपे ज्ञानस्वरूपे मयि सत्योनित्ये न्यनिरपेक्षसत्ताके

दृशिरूपे सदानित्ये दर्शनादर्शने मयि॥ कथं स्यातां नान्य
इष्यतेनुभवस्ततः॥९॥

स्वरूपतो ज्ञानतश्चनित्ये इतियावत॥ दर्शनादर्शनेकथं स्यातां न कथमपीत्यर्थः॥ ततस्मोस्तितत्कारणाज्ञतः॥ स्वरूपादन्योनु ५
भवोनेष्यत इतियोजना॥९॥ ॥ ॥

उक्तमेव नित्यदृग्रूपत्वमात्मनः स्फुटयति॥ यत्स्थस्ताप इति॥ यद्वा सुखदुः॥ खादिषुक्तत्वेनात्मनो भानान्न नित्यदृशि
मात्रत्वमित्याशंक्याह॥ यस्यस्ताप इति॥ रवेस्तापो देहे भवन्नपि तस्योपत्स्ये देशस्थितो न भवति सतापो यथा स्वाश्रयप्रदेशं विशि
ष्ठएव दृशोरात्मनो विषयस्तद्देहे देहव्यवहारकाले सत्वस्थोऽतःकरणस्थ एव भवति सुखदुःखादिरूपस्तापस्तथात्मात्रयात
:करणसहित एव दृशो विषयो न दृगात्मसमवेत इत्यर्थः॥ अतस्तापस्यान्यधर्मत्वेनैवानुभवादात्मा नित्यचैतन्यमात्रस्वभा
व एवेतिभावः॥ अथवा देहे भवन्नपि रवेस्तापो यस्त्वो यस्मिन्देहे दृशोस्थितः सदेह एव तापविशिष्टस्तत्तोह॥ मितिमन्यमानस्य

यत्स्थस्तापो रवेर्देहे दृशेः स विषयो यथा॥ सत्वस्थस्त
द्देहे दृशेः स विषयस्तथा॥१०॥

दृशो लौकिकस्यात्मनो विषयो यथा तद्वदेव विषयसंपर्कजनितः सुखदुः॥ खादितापः सत्वस्थोऽतः॥ करणस्य इति सोऽतःकर
णाख्यः॥ सुखादितापविशिष्टस्तथैव दृशेः साक्षिणो विषय इत्यर्थः॥ तथा चसुख्यहमित्याद्यभिमानस्य देहतापेन तद्ध्यासात्प्रसि ॥
हमित्यभिमानवत्॥ स्वदृश्योऽतःकरणाध्यासनिबंधनत्वाद्विवेकिनो दुःखादिमत्तयात्मावकाशपिन भासत इतिभावः॥१०॥

उ.प.स. ६ आत्मनः सुखादियुक्तां ततः॥ करणसंबंधाभावं स्फुटयन् विविक्तस्वरूपमनुसंधत्ते॥ प्रतिबिंबेति॥ स्पष्टार्थः॥११॥ यस्मादेवं प्र.वि.१२
विचार्यमाणोऽहं ब्रह्मैव तस्मान्न साक्षिरूपस्य मम कुत्रापि स्वरूपभेदोऽस्तीत्यद्वयात्मत्वमाविष्करोति॥ विज्ञातुरिति॥ सर्वविज्ञातृक
पाद्यात्मनो अन्यो यतः॥ परो व्यापको विज्ञाता नैव संभवति॥ अतोऽहमेव परो विज्ञाता सर्वभूतेषु स्थावरजंगमेषु सदा सर्वदा एव

प्रतिबिंबेद्दृश्यमंतोऽतः स्वभिवैकरसोऽद्वयः॥ नित्यमुक्तस्तथा शुद्धः सोऽहं ब्रह्मा
स्मि केवलः॥११॥ विज्ञातुर्नैव विज्ञाता परोऽन्यः संभवत्यतः॥ विज्ञाताहं परो मु
क्तः सर्वभूतेषु सर्वदा॥१२॥ यो वेदालुप्तदृष्टित्वमात्मनोऽकर्तृतां तथा॥ ब्रह्म
वित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः॥१३॥

विविक्तेय तद्धर्मरहितत्वान्मुक्तश्चेत्यर्थः॥१२॥ ननु ब्रह्मविद
हमस्मीत्यभिमानात् आपि ब्रह्मवित्त्वं मुक्त्वा ब्रह्मविदहमस्मीत्यभिमानं त्यक्त्वा यथोक्तं तथात्मनोऽलुप्तचिन्मात्रतया दृष्टृ
त्वं तथा कर्तृतां च वेद स आत्मज्ञः॥ आत्मतत्त्वब्रह्मविन्नो चेतरो योऽभिमानेनात्मानमभिजानीते इत्यर्थः॥१३॥ ॥श्रीकृष्णायनमः॥ ६

ननु ब्रह्मात्मतानस्यात्मनि विद्यमानत्वात्कथं ब्रह्मवित्त्वाभिमानत्यागो तेनात्यंतं निर्विशेष आत्मेत्यत आह॥ ज्ञातैवेति॥ ज्ञातैवाहमित्य
दिरूपो यो विवेकी विवेकवान् विविक्तात्मनि वृत्तियावत् प्रत्ययो बुद्धेर्बोध्यो ग्राह्यो दृश्यो रूपः॥ सद्रूपत्वात् साक्षिसाध्यत्वान्नाशवानूना
त्यत्वं च यतो यस्मान्नास्ति ब्रह्मविदोऽभिमानेनाशाप्यव्यवकाश इत्यर्थः॥ यथा कतकबीजरजः॥ कलुषिते जले प्रक्षिप्तं जलगतमलकज र
जो विलापयत् स्वयमपि विलीयमानं सलिलं अनाविलं करोति॥ तथा यथोक्तविवेकबुद्धिर्हि निरवयवे प्रत्यगात्मनि संनिहिता तत्तत्

ज्ञातैवाहमविज्ञेयः शुद्धो मुक्तः सदेत्यपि॥ विवेकी प्रत्ययो बुद्धेर्दृश्यत्वान्नाशवान्यः
तः॥१४॥ अलुप्तात्वात्मनो दृष्टिर्नोत्पाद्या कारकैर्यतः॥ दृश्यया चान्यया दृष्ट्या जन्य
तायाः प्रकल्पिता॥१५॥ ॥

कजविशेषमुन्मूलयंती स्वयमप्युन्मूलिता प्रत्यगात्मानं निरस्तसमस्तविशेषमनाविलमापादयतीति भावः॥१४॥ नन्वात्मचैतन्य
प्रतिभासो विनाशवानात्मप्रकाशत्वात्प्रकृतबुद्धिप्रत्ययवदिति चेन्नैवं॥ कारकाधीनात्मलाभत्वस्योपाधित्वादित्याह॥ अलुप्तेति॥ उ
पाधेः साधनव्यापकत्वमाशंक्य प्रत्याह॥ दृश्यया चेति॥

अस्या आत्मस्वरूपापादकत्वेऽजन्यतां तु दर्शयत्यान्यथाबुद्धिवृत्तिरूपया स्वरूपदृष्टेर्विरोधाकाराभिव्यक्त्युपाधिभूतया प्रकल्पिता आरो
पिता घटजन्मना घटाकाशजन्मवदिति नास्यातः साधनव्यापकत्वमित्यर्थः॥१५॥ तदेवमात्मस्वरूपव्यभिचारात्स्थितिप्रकाशस्य नित्यत्वाद्यो
वेद्यालुप्तदृष्टित्वमित्यत्रोक्तं नित्यदृष्टिरूपत्वमुपपाद्याकर्तृतां तथैवोक्तं निर्विकारत्वमुपपादयति॥ द्वाभ्यां॥ देहात्मबुद्धीति॥ देहात्मबु

देहात्मबुध्यपेक्षत्वादात्मनः कर्तृता मृषा॥ नैव किंचित्क
रोमीति सत्या बुद्धिः प्रमाणजा॥१६॥ ॥

द्धि मि॥ ध्याबुद्धिस्तत्पूर्वकत्वात्कर्तृत्वादिरात्मनो मृषा नैव किंचित्करोमीति अकर्त्रात्मबुद्धिर्निष्कलं निष्क्रियं शांतमित्यादि॥ ७
प्रमाणजातः॥ सत्या देहात्मबुद्धेरप्रमाणजाया बाधिकेत्यर्थः॥१६॥

इतोपि कर्तृत्वमात्मनो न परमार्थमित्याह॥ कर्तृत्वं कारकापेक्षमिति॥ असंगे निरवयवे आत्मनि कारकसंसर्गस्य परमार्थतोऽनुपपत्तेरकर्तृत्वस्य स्वाभाविकत्वात्कर्ता भोक्तेति विज्ञानं मृषैव न परमार्थ इति सुनिश्चितं नित्यनिर्मलावाक्यैरित्यर्थः॥१७॥ तदेवं परिशोधितपदार्थतत्त्वस्य वाक्यादेवाहं ब्रह्मास्मीति निरपवादे विज्ञाने जाते सति नियोज्योऽहमिति बुद्धेरुन्मूलितत्वान्न प्रसंख्यानविधि

कर्तृत्वं कारपेक्षमकर्तृत्वं स्वभावतः॥ कर्त्ता भोक्तेति विज्ञानं मृषैवेति सुनिश्चितं॥१७॥ एवं शा
स्त्रानुमानाभ्यां स्वरूपेऽवगते सति॥ नियोज्योऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत्॥१८॥ यथास
र्वांतरं व्योम व्योम्नोऽप्यंतरो ह्यहं॥ निर्विकारोऽचलः शुद्धोऽजरो मुक्तः सदाद्वयः॥१९॥ ॥इति
प्रकाशप्रकरणं द्वादशं विवृतं समाप्तं॥१२॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनमः॥ ॥

वकाश इत्याह॥ एवं शास्त्रानुमानाभ्यामिति॥ शास्त्रं विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यत इत्यत्रदर्शितं॥ यत्स्यस्तापोरवेदेहइ
त्यत्रोक्तमनुमानं ताभ्यामित्यर्थः॥१८॥ अत्र विद्वे नियोज्यत्वादिबुद्धिर्नैव भवतीत्यत्र निर्विकारत्वादिकं हेतुं वदन् प्रकरणार्थमुपसंहरति
॥यथासर्वांतरमिति स्पष्टं॥१९॥ ॥इति श्रीप्रकाशप्रकरणं द्वादशं विवृतं समाप्तः॥१२॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामायनमः॥ ॥

उप.स.
८

प्र.वि.१२

॥ ॥इतिश्रीप्रकरणंद्वादशंसमाप्तः॥१२॥ ॥

८

॥ॐ नमः॥ तदेवं पदार्थतत्त्वपरिचयाभावादेव वाक्यार्थप्रतिपत्तिर्नास्येति तत्त्वपरिचयमात्रादेव वाक्यात्तद्वाक्यार्थया
थात्म्यावभाससंभवे प्रसंख्यानादिविधिरनर्थकोऽनुपपन्नश्चेत्युक्तमिदानीं पूर्वप्रकरणांते निर्विकारोऽचलः शुद्ध इति यदुक्तमा
त्मनः शुद्धत्वमचलत्वं च तत्स्फुटीकर्तुं प्रकरणांतरं प्रस्तौति॥ अचक्षुष्ट्वादिति॥ दृष्टिशब्देन चक्षुरिंद्रियद्वारकबुद्धिवृत्तिर्वि
हिः॥ अस्तु तां रूपादिविषयोपरंजितानानातिक्रियात्मिकोच्यते॥ सा दृष्टिर्न मेऽस्ति मे द्विकारतया मद्धर्मभूता सा न भवतीत्यर्थः॥ तत्र हे

॥श्रीकृष्णाय नमः॥ अचक्षुष्ट्वान्न दृष्टिर्मे तथाश्रोत्रस्य का श्रुतिः॥
अवाक्त्वान्न तु वक्तिः स्यादमनस्त्वान्मतिः कुतः॥१॥ ॥ ॥

तुरचक्षुष्ट्वादिति॥ चक्षुर्हि देहे देशाश्रितं भौतिकं करणं न मदाश्रितमित्यन्वयव्यतिरेकाभ्यां निश्चितमिति॥ न हेत्वसिद्धिरित्यर्थः॥ १
एवं काश्रुतिरित्यादिषु॥ योज्यं॥ तथा च तत्तदिंद्रियद्वारकबुद्धिवृत्तिरूपदृष्ट्यादिक्रियाहीनत्वात्सिद्धमात्मनो चलत्वं चेति भावः॥

तथा कर्तृत्वहातत्त्वविकारहेतुप्राणबुद्ध्योरभावादपि शुद्ध इत्याह॥ अप्राणस्येति॥ चिन्मात्रज्योतिषः सदाशामानच्छिदेकर
सस्य विद्याविद्ये ज्ञानतदभावौ ज्ञानक्रिये वा न स्तस्तयोरपि बुद्ध्यवस्थाविशेषत्वादात्मनश्च बुद्ध्यभावादिति सिद्धा शुद्धत्वेत्यर्थः
॥२॥ अक्षुधर्मज्ञातस्यात्मस्वभावेन शुद्ध्यादिसिद्धावशरीरत्वमेव हेतुरित्यभिप्रेत्य चिन्मात्रज्योतिः॥ स्वरूपविशेषणोर्विना
दयति॥ नित्यमुक्तस्येति॥ विद्याविद्ये न स्त इति पूर्वेणान्वयः॥ शुद्धत्वान्नित्यमुक्तत्वमविचालित्वात्कूटस्थत्वमक्षरत्वाद

अप्राणस्यानकर्मास्ति बुद्ध्यभावेन वेदिता॥ विद्याविद्ये ततो न स्तश्चिन्मा
त्रज्योतिषो मम॥२॥ नित्यमुक्तस्य शुद्धस्य कूटस्थस्याविचालिनः॥ अमृत
स्याक्षरस्यैवमशरीरस्य सर्वदा॥३॥ जिघत्सा वा पिपासा वा शोकमोहौ जरा
मृती॥ न विद्यन्तेऽशरीरत्वाद्व्योमवद्व्यापिनो मम॥४॥

मृतत्वमिति॥ विशेषणानां योजना॥ त्रिष्वपि हेतुरशरीरस्येति॥ न हि शरीरसंबंधमंतरेणात्मनो बुद्धिचलनहरणानि निरू
पणापपद्यंत इति॥ अतः सर्वदैवाशरीरत्वात्सर्वदा शुद्ध इत्यादि योज्यं॥३॥ आत्मनः षडूर्मिसंबंधाभावादपि सिद्धा शुद्धते
त्याह॥

उप.स.
२

जिघत्सेति॥ खादितुमिच्छा जिघत्सा पातुमिच्छा पिपासा॥ अन्यत्स्पष्टं॥ अशरीरत्वादित्युपलक्षणं अप्राणत्वादमनस्त्वा प्र.वि.१३
च्चेत्यर्थः॥ तथा चोक्तं॥ प्राणस्य क्षुत्पिपासे द्वे मनसः शोकमोहकौ॥ जरामृत्यू शरीरस्य षडूर्मिरहितः शिव इति॥४॥ इदानीं
मनुक्तसमस्तेंद्रियवृत्तिप्रतिषेधोपलक्षणं तथा स्पर्शरसनसंबंधप्रतिषिध्याविर्भावतिरोभावहीनतया विशुद्धचिद्रूपत्वमु
क्तमुपसंहरति॥ अस्पर्शत्वादिति॥ स्पर्शनेंद्रियरहितत्वादित्यर्थः॥५॥ आत्मनो दृष्ट्यादयो न संतीत्युक्ते पुनरुपपत्तिमाह॥

अस्पर्शत्वान्न मे स्पृष्टिर्नाजिह्वत्वाद्रसज्ञता॥ नित्यविज्ञानरूपस्य ज्ञा
नाज्ञाने न मे सदा॥५॥ या तु स्यान्मानसी वृत्तीश्चाक्षुषा रूपरंजिता॥ नि
त्यमेवात्मनो दृष्ट्या नित्यया दृश्यते हि सा॥६॥ ॥

या तु स्यादिति॥ चाक्षुषा चक्षुर्द्वाराजनिता रूपरंजना रूपाकाराकारिता या तु मानसी वृत्तिः स्यात्तस्यास्तज्ज्ञो भवतीत्यर्थे ए २
वंविधा वृत्तिरस्ति सा आत्मरूपया नित्यया दृष्ट्या चैतन्यप्रकाशलक्षणया नित्यमेव दृश्यते॥ प्रकाश्यते हि प्रसिद्धमनुभवसि
द्धमेवैतदित्यर्थः॥६॥ ॥

तथा च न दृष्ट्या दर्शनक्रियात्मिका यास्तु दृश्यत्वाद्यो येन दृश्यते न स तदीयो यथा रूपादिरिति सिद्धमात्मनो दृष्ट्यादिराहित्ये
नमुद्धत्वादीत्यपि वेत्यचक्षुर्द्वारकवृत्तावुक्तन्यायं वृत्त्यंतरेष्वतिदिशति॥ तथेति॥ विषयांजना विषये बाधिकाः विषयाका
रा इति यावत्॥ या च केवलांतर्बहिरादिद्वारनिरपेक्षांतर्मनसि शरीरांतर्वर्तिनि चित्ते स्मृतिः रागादिरूपा सापि पूर्वोक्तयात्मदृ
ष्ट्या दृश्यत इत्यन्वयः॥७॥ किंच॥ स्वप्नावस्थायां विद्यमाना मनःपरिणामरूपा विषयाकारा वृत्तयस्ततो व्यतिरिक्तस्यैव द्रष्टुर्दृ

तथान्येंद्रिययुक्ता या वृत्तयो विषयांजना॥ स्मृती रागादिरूपा च केवलांतर्मनस्य
पि॥७॥ मानस्यस्तद्वदन्यस्य दृश्यंते स्वप्नवृत्तयः॥ द्रष्टुर्दृष्टिस्ततो नित्या शुद्धानंता
च केवला॥८॥ अनित्या साविशुद्धेति गृह्यतेऽत्राविवेकतः॥ सुखी दुःखी तथा चा
हं दृश्ययोपाधिनित्यया॥९॥ ॥

श्या यथासंभवतिपन्नास्तथा जाग्रद्दृश्या अपि दृश्यत्वात्तद्व्यतिरिक्तस्यै
व द्रष्टुर्दृश्या इत्याह॥ मानस्य इति॥ मानस्यः स्वप्नवृत्तयोऽन्यस्य साक्षिणो दृश्यंते दृश्यत्वेनाविपरिवर्तत इत्यर्थः॥ तदुक्तमर्थद्वय
इति शेषः॥ सर्वदृष्टीनां कूटस्थदृष्टिसाक्षित्वे सिद्धे फलितमाह॥ द्रष्टुरिति॥८॥

अ.प.स. ३

कूटस्थाचेतात्मदृष्टिरित्याकथं तत्राप्यथ प्रथेत्याशंक्य दृत्तिमद्भतः॥ करणा विवेकादेवेत्याह॥ अनित्येति॥ अविशुद्ध इति च्छेदः॥ उ अ.वि.१३
पाधिभूतया दृश्यया दृष्ट्या सहाविवेकतोविवेकाग्रहाद्यत्र व्यवहारभूमौ सा नित्या शुद्धा चात्मदृष्टिरनित्या विशुद्धेति च गृह्यते इति यो
जना॥ तथाहं सुखी दुःखीति च मन्यते इत्युत्तरश्लोकगतेनान्वयः॥९॥ अविवेकनिबंधनान्मिथ्याभिमानादेव संसारप्राप्तिरित्यु

मूढया मूढ इत्येवं शुद्धया शुद्ध इत्यपि॥ मन्यते सर्वज्ञो कोऽयं येन संसारमृच्छति॥१०॥ अ
चेतुस्पृहादिनाश्लोकैः कस्बाह्याभ्यंतरं ह्यजं॥ नित्यमुक्तमिहात्मानं मुमुक्षुश्चेत्सदा स्मरेत्
॥११

क्तमेव स्फुटयति॥ मूढयेति॥ स्पष्टं॥१०॥ कथं तर्हि संसारनिवृत्तिरित्यपेक्षायां तदुपायं ब्रुवन्मुमुक्षुं शिक्षयति॥ अचलेत्यादीति
॥ इह ज्ञात्वा नाम यो ध्यायेत्कश्चिन्मुमुक्षुश्चेत्स्यात्स तर्हि स्वमात्मानं मुक्तरूपं सदा स्मरेत्॥ श्रुत्वाचार्योपदिष्टमनवरतमनुसंदधी ३
नेति॥ योजना॥११॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीरामचंद्रायनमः॥ ॥

यदात्मनश्चक्षुरादिराहित्यं प्राकृसिद्धवदुक्तं तत्र प्रमाणमाह॥ अचक्षुष्टादीति॥ अचक्षुष्कमश्रोत्रमवागमन इत्यादिना बृहदार
ण्यके यथात्मस्वरूपमुक्तं तथा मुंडकेप्युक्तमित्याह॥ अप्राण इति॥१२॥ आत्मनो निर्विकारत्वे श्रुत्यंतरमुदाहरति॥ शब्दादीनामिति॥ अश
ब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत्॥ अनाद्यनंतं महतः परं ध्रुवं॥ निचाय्य तं मृत्युमुखात्प्रमुच्यते इति काठ
के श्रूयत इत्यर्थः॥ उक्तप्रमाणमनूद्य फलितमाह॥ अप्राण इति॥ एतदचक्षुष्ट्वादेरप्युपलक्षणं॥१३॥ अविकारित्वनिश्चयफलमा

अचक्षुष्ट्वादिनास्त्यस्त्वनेंद्रियाणि सदा मम॥ अप्राणो ह्यमनाः शुभ्र इति
चार्थवेतोर्वचः॥१२॥ शब्दादीनामभावश्च श्रूयते मम काठके॥ अप्राणो
ह्यमनाय स्मादविकारी सदा ह्यहं॥१३॥ विक्षेपो नास्ति तस्मान्मे न समा
धिस्ततो मम॥ विक्षेपो वा समाधिर्वा मनः स्याद्विकारिणः॥१४॥ ॥ ॥

ह॥ विक्षेप इति॥ तस्मादविकारित्वादित्यर्थः॥ ततो विक्षेपाभावादित्यर्थः॥ विक्षेपवृत्तिरूपत्वात्समाधेस्तदभावे तदभावः॥ क
स्यात्तर्हि समाधिविक्षेपाविति अपेक्षायां विकारवत एवेति वदन् अविकारिणस्तदभावं द्रढयति॥ विक्षेपो वेति॥१४॥ ॥ ॥

अ०प०स०
४

मनोवद्धिकारित्वाद्विकारिमनस्त्वाशत्व्याद्याविवेक्षेपसमाधी आत्मनिसंभाव्येयातांतदुभयाभावान्नैनस्त इत्याह॥ अमन अ०वि०२३
स्कस्येति॥ शुद्धस्याविकारिण इत्यार्थः॥ कथममनस्कत्वमविकारित्वंचेत्यत आह॥ अमनस्त्वाविकारित्वे इति॥ विदेहव्यापी
व्यापिचेति॥ विदेहव्यापीतस्येतिविग्रहः॥ विदेहत्वादमनस्कत्वंव्यापित्वादविकारित्वंचेत्यर्थः॥१५॥ कथंतर्हिजिज्ञासावस्था

अमनस्कस्यशुद्धस्यकथंतत्स्यात्द्वयंमम॥ अमनस्त्वाविकारित्वे
विदेहव्यापिनोमम॥१५॥ इत्येतद्यावदज्ञानंतावत्कार्यंममाभवत्॥ नि
त्यमुक्तस्यशुद्धस्यसर्वस्यचसदामम॥१६॥ ॥

यांसमाध्यादिकंकर्तव्यमितितेबुद्धिरासीदितितत्राह॥ इत्येतदिति॥ सदानित्यमुक्तबुद्धस्यापिममयावत्स्वयंतमेत्वंन्नित्यशुद्धत्वा ४
दिविषयमज्ञानमासीत्तावन्ममकार्यंसमाधानादिकर्तव्यमभवत्तेदानीतज्ञानतःकृत्यमस्तीत्यर्थः॥१६॥ ॥श्रीराम॥ ॥

इदानींकस्मात्समाधानादिनकर्तव्यमित्यपेक्षायांतद्धेतुंभावादित्याह॥ समाधिर्वेति॥ कुतोभवेन्मयेतिशेषः॥ कुतोनभ
वेदित्यत्रहेतुमाह॥ मांहीति॥ हियस्मान्मांप्रत्यगेकरसंब्रह्मध्यात्वाविचार्यबुध्वासाक्षात्कृत्यतांमन्यंते॥ मुमुक्षवइतिशेषः
तथाचश्रुतिः॥ एषनित्योमहिमाब्राह्मणस्यनकर्मणावर्धतेनोकनीयानिति॥ यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः॥
आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते इतिस्मृतेश्च॥ तस्मादज्ञानाभावान्नास्तीदानींकिमपिकर्तव्यमित्यर्थः॥१७॥ ननु

समाधिर्वासमाधिर्वाकार्यंवान्यत्कुतोभवेत्॥ मांहिध्यात्वाचबुध्वा
चमन्यंतेकृतकृत्यतां॥१७॥ अहंब्रह्मास्मिसर्वोस्मिशुद्धोबुद्धोस्म्यतः
सदा॥ अजःसर्वतएवाहमजरश्चाक्षयोमृतः॥१८॥ ॥ ॥

यद्यपियथोक्तात्मविदः॥ समाध्यादिकर्तव्यंनास्तितथाप्यात्मनोब्रह्मत्वंसंपाद्यंप्रपंचस्यचविलयः॥ कर्तव्योवशिष्यत
इत्याशंक्यब्रह्मरूपत्वस्यनित्यसिद्धत्वात्प्रपंचस्याज्ञानमात्रविजृंभितस्यतन्निवृत्तिसमयएवचाधिष्ठानात्मनाविलीन
त्वान्नातदनुष्ठेयमवशिष्यतइत्यभिप्रेत्याह॥ अहंब्रह्मास्मीति॥

सदेति॥ अहं ब्रह्मास्मीत्यादिषु सर्वेषु विशेषणेषु योज्यं॥ अत एव तेषां धर्मानां सर्वत इति च पदमजोऽनपद्त्यु भयत्र योज्यं॥
जन्मक्षयहेतुरहित इत्यर्थः॥१८॥ ननु प्रतिदेहं चैतन्यभेदभासमाने कथं ब्रह्मास्मीति प्रतीचः पूर्णतानुभव इत्यत आह॥ मदन्य
इति॥ उक्तेर्थे प्रमाणमाह॥ कर्माध्यक्ष इति॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवा

मदन्यः सर्वभूतेषु बोधः कश्चिन्न विद्यते॥ कर्माध्यक्ष
श्च साक्षी च चेता नित्यो गुणोदयः॥१९॥ ॥

सः साक्षी चेता केवलो निर्गुणश्चेति श्रुतावेकस्यैव सर्वभूतान्तरात्मत्वोपपादनाद्देहप्रतिभानस्याकाशभेदभानवदुपाधिनि ५
बंधनत्वान्नात्मान्तरशंकेति॥ युक्तं पूर्णब्रह्मात्मानुभवनमित्यर्थः॥१९॥ ॥

अहं ब्रह्मास्मीत्यनेनैकमात्मनो ब्रह्मत्वमुपपादितं सर्वोस्मीत्युक्तं तु वाध्यासामानाधिकरण्याभिप्रायमित्युपपादयति॥ न स
त्वाहमिति॥ सत्त्वरजस्तमांसि प्रधानेनाहं न भवामि विकारित्वादनात्मत्वादहमेवेद
तपरिणामात्मकशरीरसंस्थानरूपतत्त्ववर्णनाहमित्युक्तेने तिनेतीति ... निविद्धत्वात्मदन्यत्वमपि चासत्त्वादहमेवेद
तपरिणामात्मकशरीरसंस्थानतत्त्ववर्णनाहमित्युक्तेनेतिनेतीति मध्ये वारोप्यानि विद्धत्वान्मदन्यत्वमपि चासत्त्वादहमेवेद
सर्वमितियुक्तमेवोक्तमित्यर्थः॥ केवलः सर्वविशेषशून्यः शिवो निस्त्रैगुण्यः॥ संध्यादिकालविशेषयोगात्कथं केवलत्वमित्य

नमस्काहं न चास्मत्तो न यं केवलः शिवः॥ न मे संध्या न रात्रिर्वा नाहर्वा सर्व
दादृशः॥२०॥ सर्वमूर्तिविमुक्तं यद्यथा खं सूक्ष्ममद्वयं॥

त आह॥ न मे संध्येति॥ तत्र हेतुः॥ सर्वदादृशेरिति॥ अलुप्तप्रकाशात्मत्वादित्यर्थः॥ यद्वा॥ संध्यादिशब्दैः॥ क्रमेण स्वप्नसु
षुप्तिजागरणान्युच्यन्ते सदैवैकरूपेण प्रकाशमानस्य स्वरूपावरणविक्षेपरूपावस्थाः कुतस्त्या इत्यर्थः॥२०॥ तस्याखिलदेहता
त्म्यात्मनो निर्विशेषस्य युक्तं ब्रह्मरूपेण पूर्णत्वमिति सदृष्टान्तमाह॥ सर्वमूर्तीति॥ यथाकाशं सर्वस्मात्परिच्छिन्नाकारादिजह
णमितिसूक्ष्ममाजन्तं तेनैवेदं ब्रह्मपरिपूर्णमस्त्यंतत्संदेहः॥

उप०स० ताभावो प्रजहति तमिच्छिनेत्तस्माद्ब्रह्मणोद्वितीयत्वादात्मतदनन्यत्वाद्ब्रह्मैवास्मीत्यर्थः॥ तर्हि ब्रह्मात्मकार्ययोरुपमेयभावेन भेदा श्र०वि०१३
६ त्कथं ब्रह्माद्वितीयमित्यत आह॥ तेनापीति॥ तेनाकाशेनापि विनाभूतं विविक्तं ब्रह्मास्मि व्यवहारदृष्ट्योपमानादिभेदेपि परमार्थ
तस्तद्भावान्नाद्वैतहानिरित्यर्थः॥ एकमद्वयपदमाकाशेनसंबध्यतेऽद्वितीयं ब्रह्मणेत्यपौनरुक्त्यं॥२१॥ पूर्वमाकाशदृष्टां
तेन पूर्णत्वनिरूपणात्परमार्थतः॥ परिच्छेदाशंकानिराकृतेदानीं तेनैव दृष्टांतेन भेदपरिच्छेदप्रतीतिर्गतिमाह॥ ममा॥

तेनाप्यस्मि विनाभूतं ब्रह्मैवाहं तथाद्वयं॥२१॥ ममात्मात्वत्तथान्यात्मेति भे
दो व्योम्नो यथा भवेत्॥ एकस्य सुषिभेदेन तथा मम विकल्पितः॥२२॥ ॥

त्मेति॥ ममतातुरात्मा स्वरूपं ब्रह्मेति स्वतः स्वस्यात्मेति च योयमात्मात्मीयभावेन भेदप्रतिभासः॥ स एकस्य ममांतः॥ करणा
द्युपाधिकृतभेदपरिच्छेदापेक्षयाविकल्पितः॥ आरोपितो भवेद्यथैकस्य व्योम्नः सुषिभेदेन छिद्रभेदेनाकाशस्याभावरूपो भेदो वि ६
कल्पितो भवति तद्वदित्यर्थः॥२२॥ ॥

तस्माद्विद्यादृशा यां भेदव्यवहारेपीदानीमवगतात्मतत्त्वस्य सोपि नास्तीति सिद्धमित्याह॥ भेदोभेद इति मय्येवैकस्मिन् पूर्वं भे
दो भेदश्चविकल्पितो व्यवहृतः॥ तथा एको नाना चेति चाहमेव विकल्पितो न पुनर्ज्ञाता गतिः॥ फलं गतो फलप्राप्तिकर्त्तासो क्रेति चा
हं विकल्पित इति योजना॥ एतत्सर्वं कुतो भवेद्विचार्यमाणेन भवेदेवेत्यर्थः॥२३॥ ननु तथापि संसारित्वे हेयं ब्रह्मत्वं चोपादेय
मिति॥ न निर्विघ्नोपत्वमात्मन इति चेन्नेत्याह॥ न मे हेयमिति॥ तत्र हेतुमाह॥ अविकारीति॥ यतो यस्मादहमविकारी॥ कुतो वि

भेदोभेदस्तथा चैको नाना चेति विकल्पितं॥ ज्ञेयं ज्ञाता गतिर्गंता मय्येकस्मि
न्कुतो भवेत्॥२३॥ न मे हेयं न चादेयमविकारी यतो ह्यहं॥ सदा मुक्तस्तथा
शुद्धः सदा बुद्धोऽगुणोऽद्वयः॥२४॥

कारीत्यपेक्षायां तत्र प्रमाणं हिशब्देन सूच्यते॥ अविकार्योयमुच्यत इति स्मृतेरित्यर्थः॥ कलितमाह॥ सदा मुक्त इति॥ सदै
व बंधसंसर्गशून्य इत्यर्थः॥ तथा शुद्धस्तद्धेतुविद्यासंबंधरहितो यतः॥ सदा बुद्धः॥ तर्हि किं बोधगुणो नेत्याह॥ अगुणो बो
धरूपत्वेत्यर्थः॥ तथा शुद्धत्वविद्यासंबंधे पतर्हि बोध्यं किंचिदन्यदस्ति नेत्याहाद्वय इति॥ ४॥ ॥श्रीरामायनमः॥ ॥

उप.स. तदेवमुक्तलक्षणमात्मतत्त्वं शास्त्राचार्यप्रसादाच्छ्रवणमनननिदिध्यासननिष्ठाभ्यासः सन् सदा मुमुक्षुरहं ब्रह्मास्मीत्यनुसंद प्र.वि.१२
७ ध्यादिति मुमुक्षुं प्रोत्साहयति॥ इत्येवमिति॥ सर्वं पूर्वमुक्तं वेदनफलमाह॥ विदित्वेति॥ कुविः॥ सर्वदृक्॥२५॥ उक्तं तत्त्वविदस्तु
क्तामुक्तिं प्रदर्शयति॥ कृतकृत्यश्चेति॥ स ब्राह्मण इति श्रुतेर्मुख्यो ब्राह्मण एव च भवेदिति संबंधः॥ एवं निष्ठाहीनस्य प्रत्यवायमा

इत्येवं सर्वदा तस्मान्नविद्यात् सर्वं समाहितः॥ विदित्वा मां स्वदेहस्थमपि मुक्तो
ध्रुवो भवेत्॥२५॥ कृतकृत्यश्च सिद्धश्च योगी ब्राह्मण एव च॥ य एवं वेद तत्त्वा
र्थमन्यथा ह्यात्महा भवेत्॥२६॥ ॥

हा॥ अन्यथेति॥ उक्तं श्रीभागवते भगवता॥ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं॥ मयानुकूलेन नभस्वतेरितं पुमा ७
न् भवाब्धिं न तरेत् स आत्महेति॥२६॥ ॥ ॥

उक्तस्य प्रकरणार्थस्य प्रामाणिकत्वं दर्शयेत्॥ प्रतिपत्तिसौकर्यमाह॥ वेदार्थ इति॥ इति अच्युतप्रकरणं॥ अस्यग्र
हणे मुख्याधिकारिणो दर्शयति॥ संन्यासिभ्य इति॥ न केवलं प्राप्तसंन्यासाश्रममात्रेभ्यः॥ किंतु॥ शांतेभ्यः॥ शमादिसाधनसंप
न्नेभ्य इत्यर्थः॥ उपदेष्टारं विशिनष्टि॥ शिवबुद्धिनेति॥ शास्त्राचार्यास्तु शिवबुद्धिनेत्यर्थः॥२७॥ ॥इति श्री अच्युतप्रकरणं

वेदार्थो निश्चितो ह्येष समासेन मयोदितः॥ संन्यासिभ्यः प्रवक्तव्यः॥
॥शांतेभ्यः शिवबुद्धिना॥२७॥ ॥इति श्री अच्युतप्रकरणं त्रयोद
शं विवृतं समाप्तः॥१३॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥ ॥श्रीरस्तुः
॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीनाथजी॥

त्रयोदशं विवृतं समाप्तं॥१३॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥ ॥श्रीजयोस्तु॥ ॥श्रीरस्तुः॥ ॥श्रीनाथजी सत्य छे॥ ॥
॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामचंद्रायनमः॥ ॥श्रीरामभद्रायनमः॥ ॥

॥ ॥इतिश्रीत्रयोदशप्रकरणंविवृतंसमाप्तः॥१३॥ ॥

उप. स. १ ॥ॐ नमः॥ पूर्वस्मिन्प्रकरणेंतःकरणाविवेकादात्मनि संसारित्वप्रतीतिर्न स्वत इति शास्त्रप्रामाण्याद्धिगतात्मानप्रका प्र. वि. १४
र्यो ब्रह्मरूप एवात्मेति निर्धारितं ततः॥ करणस्यापरोक्षत्वात्संसारप्रतिभासस्य चापरोक्षत्वात्तत्प्रतिभासो ऽ इदानीमतः
करणबुध्याविवेककृत इत्याशंक्याह॥ करणस्यापरोक्षत्वप्रतिपादनपूर्वकं पूर्वोक्तशास्त्रार्थयुक्तिप्रदर्शनपरं प्रक
रणं प्रक्रमते॥ स्वप्नस्मृत्योरिति॥ हि यस्मात्स्वप्नस्मृतौ च घटादेर्विषयजातस्य रूपाभासः आकाराभासो दृश्यते अनुभू

॥ॐ नमः॥ स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते॥ पुरानू
नं तदाकाराधीरीदृगित्यनुमीयते॥१॥

यते तस्मात्पुरा पूर्वं जाग्रदवस्थायामनुभवावस्थायामपि नूनमवश्यं तदाकारा घटाकारा धीरंतःकरणवृत्तिर्दृष्टा भासा १
दनुभूयते त्वनुमीयत इत्यक्षरार्थः॥ स्वप्नस्मृत्योर्दृष्टार्थविषयत्वनियमात्पूर्वदृष्टस्य बाह्यार्थस्य चाज्ञाभावात्स्वप्नस्मृत्योर्
पलभ्यमानो विषयोपाधिकारवृत्तिमदंतःकरणमेवेति जाग्रत्पूर्वानुभवयोरप्यंतःकरणमेवार्थाकारवृत्तिमदपरोक्षमनु
भूतमिति कल्प्यते॥ तस्मात्सर्वास्वप्यवस्थासु वृत्तिमदं॥

तःकरणस्यापरोक्षत्वात्तद्गतचिदाभासाविवेकादात्मनः॥ संसारित्वावभासोऽपरोक्षो युक्त इति भावः॥१॥ एवमंतःकर
णस्यापरोक्षत्वे निरूपिते किमायातमात्मन इत्यपेक्षायामाह यस्मादंतःकरणादिसंघाताद्विवेकसिद्धिरायाते ति स दृष्टांतमा
ह॥ भिन्नामिति॥ मुखस्यपतेः॥ स्वप्ने भिन्नामटन्नदृश्यो यो देहः सस्वयं द्रष्टा न भवति॥ यथा तद्देहात्मत्वमभिमन्यमानोऽपि त
द्रात्मको न भवति॥ तथा जाग्रद्दृश्यादपि देहात्मत्व आत्मान्य एव द्रष्टृत्वादित्यर्थः॥ देहपदमुपलक्षणमिंद्रियांतःकरणयोर

भिन्नामटन्यथा स्वप्ने दृश्यो देहो न स स्वयं॥ जाग्रद्दृश्यत्वतो देह
द्रष्टृत्वादन्य एव सः॥२॥ मूषासिक्तं यथा ताम्रं तन्निभं जायते त
था॥ रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवं॥३॥ ॥ ॥

पि॥ तथा च प्रयोगो विमतो देहादिर्नात्मा दृश्यत्वात्स्वप्नदृश्यदेहादिवदिति॥२॥ बुद्धिरेव सर्वास्ववस्थासु अर्थाकार
दृश्यत इत्युक्तमर्थं दृष्टांतेन स्पष्टयति॥ मूषेति॥ मूषा तः सुषिरा मृत्प्रतिमा यथाग्निसंपर्कात् द्रवीभूतं ताम्रं मूषायां नि
षिक्तं निषिक्तं सत्तन्निभं जायते तत्समानाकृति भवति॥ ॥

उप॰स॰ तथा चित्रमपि रूपादीन् विषयान् व्याप्नुवन्न भिन्नं दृश्यते॥ तदाकारं जायते इत्यर्थः॥३॥ ननु रूपादिविलक्षतामन्वस्यकथं न प्र॰वि॰१४
२ रूपाभिद्यातेन रैस्यापन्नौ तदाकारापत्तिरिति युज्यते चित्तस्य त्वमूर्त्तत्वाद्विषयव्याप्तावपि कथं तदाकारापत्तिसंभव

व्यंजको वा यथालोको व्यंग्यस्याकारतामियात्॥ सर्वार्थव्यं-
जकत्वाद्धीरर्थाकारा प्रदृश्यते॥४॥ धीरेवार्थस्वरूपा हि पुं-
सां दृष्टा पुरापि च॥ न चेत्स्वनेकधं पश्येत् स्मरतो वा कृतिः कुत
:५॥

इत्यात्रांकायदृष्टांतांतरमाह॥ व्यंजकोवेति॥ व्यंजको ग्यादिरयं॥ विज्ञादेरालोको वा घटादेस्तथार्थः॥४॥ बुद्धेरन्वयमुखे ॥ ॥ २
नेत्वन्नस्मात्साटि स्यन्तोपपादितमपरोक्षत्वमनूद्य व्यतिरेकमुखेनोपपादयति धीरेवेति स्पष्ट॥५॥

प्रजोकादिवत् व्यंजकत्वात् बुद्धेर्व्यंग्याकारत्वमुक्तं स्पष्टयति॥ व्यंजकत्वमिति॥ अस्या बुद्धेर्यद्रूपाद्याकारेण दृश्यता
दर्शनयोग्यता प्रसिद्धा तदेव विषयव्यंजकत्वमित्यर्थः॥ चैतन्यं हि विषयादभासो विषयश्च न बुद्धेरस्वत्वात तत्र स्फु-
रति॥ तथा च बुद्धेर्विषयाकारत्वाभावे चैतन्यस्य विषयात्मना स्फुर्त्तिरनुपपन्नेति विषयाभिव्यक्त्यर्थं तयात्तदाकारा

व्यंजकत्वं तदेवास्या रूपाद्याकारदृश्यता॥ दृष्टत्वं च दृ-
शोस्तस्य व्याप्तिः स्याद्विषयं प्रति॥६॥

प्तिरेव बुद्धेर्व्यंजकत्वमित्यभिप्रायः॥ यथा रूपाद्याकारेणावभासमानत्वमेव धियो रूपादिव्यंजकत्वं तथा दृशोः स्फु-
त्मनो धियप्रज्ञावे धर्माधर्मविज्ञा दृष्टत्वेसत्यातस्याति स्तदात्मनास्फुरणमेव दृष्टत्वेन परिणमनमित्याह॥ दृष्टत्वं चे-
ति॥ यद्यपि धियो विषयव्याप्तिः परिणामभेदेन भवति विषयदेशे तस्याः

उप॰स॰ २ प्रागेवासत्त्वात्तथापि चैतन्यात्मना धीवृत्तिव्याप्तौ न परिणामापेक्षा चिदात्मन्येवतत्प्रकाशककवलितायाएवधियः॥ प्र॰वि॰२४
सद्भोतन्त्रेरितिभावः॥ ६॥ बुद्धितद्वृत्तिसाक्षित्वेन चिदात्मनः परिणामाभावेपि नतस्य ब्रह्मरूपतयैकत्वयुक्तं॥ प्रतिदेहंत
त्तद्बुद्धिसाक्षिभेदादिभेदादित्याशंक्य प्रमाणाभावोत्सेवमित्याह॥ चिन्मात्रेति॥ यथैकस्मिन्शरीरेबुद्ध्यवभासाविकृति

चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः॥ मया॥ यस्मा
त्प्रकाश्यन्ते सर्वस्यात्मा ततो ह्यहं॥ ७॥

चिज्ज्योतिमात्रस्तथा सर्वशरीरगतबुद्ध्यवभासकृतिभास्यबुद्धिभेदेपि न तद्‌वभासस्वरूपभेदः॥ प्रमाणपथमवतरि २
ति॥ भेदस्याविसाक्ष्यत्वेन साक्षिधर्मत्वाभावात् न साक्षिभेदशंकावकाश इत्यर्थः॥ ७॥

चैतन्यस्य सर्वत्रैकत्वेपि दृश्यस्य बुद्ध्यादेरनेकत्वान्नाद्वयब्रह्मात्मतासिद्धिरित्याशंक्य सकलदृश्यस्यानात्मनिर्वि
च्याविद्याविलासबुद्धिमात्रत्वाच्चैतन्यस्याद्वयब्रह्मत्वमविरुद्धमित्युपपादयति॥ करणमिति॥ यथा क्रियाकारकफलानि
स्वप्ने धीरेव बाह्यार्थस्य तदानत्राभावादिति निश्चितं॥ एवमेजाग्रति॥ जाग्रदवस्थायां च यतो धीरेव क्रियाकारकफल
रूपादृष्टानधीयो बहिः॥ पदार्थसत्त्वमवगतं तया सति सुषुप्तावपि तदाकारविशेषस्फुरणं कदाचित्स्यात्तस्माद्विषये

करणं कर्म कर्ता च क्रिया स्वप्ने फलं च धीः॥ जाग्रत्येवं यतो दृष्टा द्रष्टा तस्मा
द्‌तोन्यथा॥ ८॥ बुद्ध्यादीनामनात्मत्वं हेयोपादेयरूपतः॥

॥ सहैवात्मनि बुद्धेरध्यस्तत्वात्तस्याध्यासितत्वेन मिथ्यात्वात् द्रष्टात्मा ततो बुद्धेरन्यथान्यादृशः सत्योस्वंद्वैकरस्
त्यर्थः॥ ८॥ प्रत्येयेत्युक्तं स्फुटयति॥ बुद्ध्यादीनामिति॥ बुद्ध्यादयो हानोत्मस्वरूपधर्मा आगमापायित्वाद्घटादिवदित्युक्ते
चिदात्मनि चारमाशंक्य परिहरति॥ हानोपादानेति॥ बुद्ध्यादेर्हानोपादानयोर्विषयविक्षेपतः॥ कर्तृत्वात्तदधिष्ठानत्वमा
त्मेणकर्तृत्वमुच्यते॥ सतेकेनचित्साज्यो न विलोप्यो न चैग्राह्यस्तेन विक्षिप्यते॥

उप.स.
४

आत्मनः सर्वाधिष्ठानत्वं तस्य चाधिष्ठानांतराभावादित्यर्थः॥९॥ आत्मनः स्वरूपेण हेयानुपादेयत्वे पितृतत्संबं प्र.वि.१५
धित्वेन आत्मस्य बाह्यस्य वस्त्राभरणादेरांतरस्य च योगाध्यानादेरुपादेयत्वं च भविष्यतीति॥ न विशुद्धिरात्मन इत्याशं
क्याह॥ स बाह्येति॥ बाह्यमभ्यंतरसहितं बाह्यमाभ्यंतरं चात्मैव॥ न ततः पृथगस्तीत्यर्थः॥ यतः शुद्धः केवलोतो बाह्याभाव
:॥ यतश्च प्रज्ञानैकरसोतोनांतरमपि पृथगस्ति॥ एकरसत्वं स्पष्टयति॥ घन इति॥ सैंधवघनवदित्यानघन इत्यर्थः॥

हानोपादानकर्तात्मा न त्याज्यो न च गृह्यते॥९॥ स बाह्याभ्यंतरे शुद्धः प्र
ज्ञानैकरसो घनः॥ बाह्यमाभ्यंतरं चान्यत् कथं हेयं प्रकल्प्यते॥१०॥ ॥

हेयमित्युपलक्षणं॥ एवंभूते आत्मनि कथं हेयमुपादेयं वा कल्प्यत इत्यर्थः॥ सत्तास्फूर्तिमात्रेणाधिगतस्य बाह्यस्याभ्यंत
रस्य चोदितस्य विधुमशक्यत्वात् पोत्सात्मस्वरूपत्वान्न ततो बहिरंतर्वा किमप्यस्ति परमार्थतो यदुपादेयं हेयं वा भवेदिति ४
॥नात्मनो विशुद्धिसंकोचावकाश इति भावः॥१०॥ ॥

वस्तुस्वभावानुसारेण विचार्यमाणे नात्मनि हेयोपादेयत्वे सत्यपि इदानीं विद्वदनुभवेनाप्ययमर्थोवगम्यत इत्याह॥ य
आत्मेति॥ ब्रह्मविदो ज्ञानिनः॥ आत्मास्वरूपं कथं यतेत कृतकृत्यत्वादित्यर्थः॥११॥ एवंविधमात्मतत्वं न परानुभवमप्य
पितु स्वयमेवात्मविदा शास्त्राचार्योपदेशानुसारेण विधेयत्वमित्यर्थत्याह॥ अज्ञानोपाधीति पिङ्गर्भिरहितमित्यर्थः॥१२॥ ए
वं विमर्शे प्राप्ते प्रापणीयमिति कर्तव्यबुद्धिरेव न भवेदिति दृष्टांतेनाह॥ पारग इति॥ नद्याः पारं परतीरं गतो यथा तत्त्वः प

य आत्मा नेति नेतीति परापोहेन शेषितः॥ स चेद्ब्रह्मविदात्मैष यतेतातः परं कथं
॥११॥ अज्ञानापाद्यतिक्रांतं ब्रह्मैवास्मि निरंतरं॥ कार्यं वात्मा कथं चाहं विमुक्तोऽहं व
पंजरात्॥१२॥ पारगस्तु यथा नद्यास्तत्स्थः पारं पियासति॥ आत्मतत्त्वे तथा कार्यं क
र्तुमन्यदिहेच्छति॥१३॥ आत्मतत्त्वापिपासस्याद्धानोपादानता यदि॥ न मोक्षार्हः स म
वितेयो वाऽतासी ब्राह्मणो ध्रुवं॥१४॥ ॥

रतीरस्य एव तमेव पारं पियासतियातं प्राप्नुमिच्छतिचेदित्य
न्वयः॥ तथापयोक्तात्मतोन्यत्कार्यं कर्तुमिह श्रेयो मार्गेऽच्छतीति योजना नैव पियासति नेवमिच्छति चेत्यर्थः॥१३॥ यः पु
नरात्मतोपि कार्यवान् स्यात् समेन समग्रपरादृष्टीति तं निरृति॥ आत्मतत्त्वापीति॥ स्पष्टार्थः॥१४॥ ॥श्रीरामाय नमः॥

उप॰स॰ ५ अज्ञानागतांतु ये पूर्वामनसस्तां तु पश्चिमां॥ संध्यां नोपासते विद्वांसस्ते ते कथं ब्राह्मणाः स्मृता इति स्मृते ब्रह्मविदोपि विप्र प्र॰वि॰१४
संध्यावंदनमस्ति कार्यमित्याशंक्य श्रुतिकल्पायेन निराकरोति॥ सादित्यमिति॥ आदित्यः सूर्यस्तत्सहितमिदं जग
त् सर्वं हि यस्मात्प्राणो हिरण्यगर्भस्तस्मात्प्राणात्स्यापि प्राणो हमस्मीति प्राणात्मभावमापन्नस्याप्युपासकस्योदितयाव
त्॥ अहर्निशं वा न स्यातामुदयास्तमयरहितसूर्यरूपत्वान्नास्याहोरात्रे न स्यातामित्यर्थः॥ तथा च श्रुतिः॥ न ह वा अस्

सादित्यं हि जगत्प्राणस्तस्मान्नाहर्निशे व वा॥ प्राणत
स्यापि न स्यातां कुतो ब्रह्मविदो द्वये॥ १५॥ ॥ ॥

स्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवतीति॥ तथा च प्राणस्यापि प्राणविदोपि नेदृदर्शिनो यद्यहर्निशे न ५
स्यातां तदास्य ब्रह्मविदो मुख्यभूतब्रह्मभूतस्याद्वयेस्वत्वबद्वैताभासरहितेस्वरूपे सति ते कुतः॥ स्यातां न कुतोपीति काज
नेदृदर्शिनो भावादेवतन्निमित्तकर्तव्याभाव इत्यर्थः॥ १५॥

ब्रह्मविदो वाह्यक्रियाभावेपि संध्यासमाधावात्मन्याचरेदिति श्रुतेः॥ स्वात्मनि विस्मृतिं परित्यज्य मोक्षापस्मृतिः॥ क
र्तव्येत्यत आह॥ न स्मरतीति॥ स्मरति योगात्षष्ठीद्वितीयार्थे स्मरणयोरभावे हेतुरनुसन्धिदिति॥ यद्यप्यात्मा ह्यात्मनः
स्मरणविधातुं न युक्तं॥ तर्हि तत्त्वज्ञानादूर्ध्वमाविर्भावतिरोभावादिविकारशून्यतये मनसा वात्मानं स्मरेदिति विधिः स्यादि
त्यत आह॥ मनोपीति॥ मनसोचेतनत्वात्स्मर्तृत्वानुपपत्तेर्मनः स्मरतीति ज्ञानमप्यज्ञानहेतुजमविवेकविलसितमित्य

न स्मरत्यात्मनो ह्यात्मा विस्मरेद्वाप्यलुप्तचित्॥ मनोपि स्मरतीत्येतज्ज्ञा
नमज्ञानहेतुजम्॥ १६॥ ज्ञातुर्ज्ञेयः परो ह्यात्मा सोविद्याकल्पितः स्मृतः॥ अप
पोढे विद्यया तस्मिन् रज्ज्वां सर्प इवाद्वयः॥ १७॥ ॥

र्थः॥ तथा चासम्यग्ब्रह्मविदः आत्मव्यतिरेकेण मनःप्रभृतः संध्यासमाधाविति विधिर्न सम्यग्ब्रह्मविद इति भावः॥ १
६॥ यद्यप्यात्मा लुप्तचिद्रूपत्वादात्मानं स्मरति॥ तथापि परमात्मानं स्मरेदेवेत्याशंक्याह॥ ज्ञातुरिति॥ यदि परमा
त्मा ज्ञातुर्ज्ञेयो विषयः स्यात्तदा सोविद्याकल्पितः॥ स्वाज्ञानकल्पितो हि निश्चितः स्मृतो ज्ञातो विद्वद्भिः॥ ज्ञानविषये स्परज्जु
सर्पवदविद्याकल्पितत्वनियमात्स आत्मैव न भवतीत्यर्थः॥

तथाच तस्मिन्नात्मनः॥ परत्वहेयत्वादिके विद्यया आत्मविद्ययापोढे बाधिते सति ज्ञातृज्ञेयविभागाभावादद्वयए
वात्मा भवतीत्यर्थः॥ तत्र दृष्टान्तो रज्ज्वां सर्प इवेति॥ यथा रज्जुविद्यया सर्पे बाधिते रज्जुरेवावशिष्यते तद्वदित्यर्थः॥१७
॥ प्रत्यगात्मनो वस्तुतोऽद्वितीयत्वेऽपि तस्मिन्ममाहमित्यादिसंसारप्रतिभासस्तन्निवृत्त्यै किमपि कर्तव्यं भविष्यती-
त्यत आह॥ कर्तृकर्मेति॥ कर्तृकर्मफलभेदाभावात् सबाह्याभ्यन्तरमजमेवात्मस्वरूपं हि यतोऽतस्तस्मिन्नात्मनि ममाह-

कर्तृकर्मफलाभावात्सबाह्याभ्यंतरं ह्यजं॥ ममाहं चेति यो भावस्तस्मि-
न्कस्य कुतो भवेत्॥१८॥ आत्मा ह्यात्मीय इत्येष भावो विद्याप्रकल्पि-
तः॥ आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलं॥१९॥ ॥ ॥

मित्यादिरूपो यो भावप्रतिभासः॥ स कस्य भवेत् कुतो वा हेतोर्भवेत् कुतो वा हेतोर्भवेन्न भवेदेवेति योजना॥ तस्मात् ६
ज्ञानोत्पत्तेः॥ प्रागेव सर्वकर्तव्यता नोर्ध्वमिति भावः॥१८॥ आत्मविदो देहादावहंकारममकाराभावे हेतुमाह॥ आ-
त्मा ह्यात्मीय इति॥ आत्मैकत्वज्ञाते सतीति शेषः॥१९॥

केन प्रमाणेन तदात्मैकत्वं ज्ञातुं शक्यमित्यपेक्षायां वेदान्तवाक्यप्रमाणबलादित्याह॥ दृक्श्रोत्रिति द्वाभ्यां॥ यत् दृक् दृ-
श्रोतृ मन्तृ विज्ञातृ प्रसिद्धं प्रत्यग्रूपं तदक्षरमेव सर्वाधिष्ठानं ब्रह्मैवेति योजना॥ तथा च श्रुतिः तदक्षरं गार्ग्यदृष्टं दृष्टृ अश्रुतं
श्रोत्रमतं मन्त्रविज्ञातं विज्ञात्रिति॥ तथा नान्यदतोऽस्ति दृष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रिति उ-
त्तरवाक्यार्थमाह॥ दृष्ट्यादीति॥ तत् दृष्ट्यादिप्रत्यक्स्वरूपं तस्मादक्षरादन्यन्न भवतीत्यर्थः॥ यस्मादेवमविषयभूतमे-

दृक्श्रोतृ तथा मन्तृ विज्ञात्रेव तदक्षरं॥ दृष्ट्याद्यन्यन्न तद्यस्मात्तस्माद्दृष्टाह-
मक्षरं॥२०॥ स्थावरं जंगमं चैव दृश्यत्वादिक्रियायुतं॥ सर्वमक्षरमेवातः स-
र्वस्यात्माक्षरं त्वहं॥२१॥ अकार्यशेषमात्मानमक्रियात्मक्रियाफलं॥ ॥

वाद्वयमात्मतत्त्वं श्रुतिसिद्धं तस्मात् दृष्टाहमक्षरमित्युपसंहारः॥२०॥ प्रत्यगात्मनोऽक्षरब्रह्मात्मत्वेऽपि कथं सर्वात्मत्वं
साधयति॥ स्थावरमिति॥ उपाधिरूपविहितमुपाध्यध्यारोपेति सर्वमक्षरमेवातोऽहमक्षरं सर्वस्यात्मस्वरूपमेव सदन्यक्कि-
मप्यस्तीत्यर्थः॥२१॥ स्थावरादि सर्वमक्षरमित्युक्ते सप्रपंचमेवाक्षरमात्मेति प्रतिभासनिवारयन्नागमिक॥ ॥

ऊ०प०स० मात्मज्ञानं स्फुरद्यत्यकार्यसंशोषमिति॥ अकार्यश्चैव त्वमकर्तत्वं तत्र हेतुरक्रियात्मेति॥ क्रियास्वरूपतत्फलविल अ०वि०१४
७ क्षणमित्यर्थः॥ क्रियात तत्फलसंसर्गशून्यमिति वा कुतो यतो निर्ममं तदपि कुतो निरहंकारं एवंविधमात्मानं यः॥ सम्प
क्पश्यति स एव तत्त्वदर्शीत्यर्थः॥२२॥ आत्मविदो हंकाराद्यभावादकर्मिणो पि त्वमुक्तं प्रपंचयंस्तस्य कृतकृत्यता मा

निर्ममं निरहंकारं यः पश्यति स पश्यति॥२२॥ ममाहंकारयत्नेभ्यः शू-
न्या एव स्वभावतः॥ आत्मानमीति यद्विज्ञात माध्वस्य स्याः किमीहितैः॥२३

॥ममाहंकारेति॥ आत्मनि स्वभावतः शून्या एवाविद्यायुक्तदेहाद्यभिमानेन विना तं संतीत्यर्थः॥ हे मुमुक्षवो यद्येवं ज्ञा
तं तर्हि स्वस्य निवृत्ति॥ संत आखंति एतत्किमीहितैः॥ कर्मभिः कृतं ज्ञानेनैव कृतकृत्यत्वात्तत्कर्मणां तिनधिकृतानां ७
विफलत्वादित्यर्थः॥२३॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनमः॥ ॥श्री॥ ॥ ॥

देहाद्यतिरिक्तात्मज्ञानवतः॥ सर्वेषु पारलौकिककर्मस्वधिकाराभ्युपगमादस्यात्मविदोपि स्वफलं कर्मत्याज्यं कथं तस्या
त्मतत्त्वविस्त्वमेवनास्तीत्याह॥ योहं कर्तारमिति॥ कस्तर्हि आत्मविदित्यत आह॥ योन्यथात इति यो कर्तारमज्ञातारम
भोक्तारं चात्मानं जानाति स आत्मतत्त्वविदित्यर्थः॥२४॥ किमिति कर्त्रात्मेति जानतो नात्मवित्त्वमात्मन्येव कर्तत्वादिश्रुति

योहं कर्तारमात्मानं तथा वेत्तारमेव च॥ वेत्यनात्मतया वासौ यो
न्यथातः स आत्मवित्॥२४॥ यथान्यत्वेपि तादात्म्यं देहादिष्वात्मनो
मतं॥ तथा कर्तुरविज्ञानात् फलकर्मात्मतात्मनः॥२५॥ ॥ ॥

न्नासादिस्थानां क्व कर्तत्वविवेकनिबंधनो यं भ्रम इत्याशंक्याह॥ यथान्यत्वेपीति॥ यथा परमार्थतो देहादिभ्यो न्यत्वेप्या
त्मनस्तेषु तादात्म्यमाध्यासिकं मतमिष्टं तथा कमर्तुरभोक्तुरविज्ञानादात्मनः॥ फलकर्मात्मता भोक्तृकर्मात्मता मता यथाध्य
ज देहात्मनोरभेदाध्यासान्मनुष्यत्वाद्यभिमानस्तथाहंकारप्रधाने लिंगदेहाविवेकात्कर्तृत्वाद्यभिमानो मिथ्याबुद्धिरि
त्यर्थः॥२५

उप॰स॰ नन्वहंकारस्यैवात्मत्वात्कथमहंकारात्मनोरविवेक इत्युच्यत इत्यत आह॥ दृष्टिरिति॥ दृष्ट्यादिशब्दैः श्रोत्रादिद्वारकां प्र॰वि॰१४
८ तः॥ करणवृत्तयो निर्दिश्यंते॥ तास्तु स्वप्ने च जाग्रति दृष्टाः॥ सवृत्तिकस्यांतःकरणस्य स्वप्ने चैव द्वौ कारत्वात्तद्दृष्टिरात्मस्वरूपसा दृष्टि
सिद्ध इत्यभिप्रायः॥ किंच॥ तासां दृष्ट्यादीनामात्मस्वरूपत्वादित्ययमर्थः॥ सुषुप्ते सवृत्तिकस्यांतःकरणस्याविद्यामात्रत

दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टाश्च जागरैः सदा॥ तासामात्मस्व
रूपत्वादतः॥ प्रत्यक्षतात्मनः॥२६॥ ॥

यात्मन्यस्तमयादात्मनश्चानस्तमयात्स्वतस्तस्याद्वितीयापरोक्षचिन्मात्रतयावभासमानत्वाद्युक्तांतः॥ करणाद्
हंकारादिरूपाद्दात्मनो व्यतिरेकसिद्धिरिति॥ यत एवमतश्चात्मनः॥ प्रत्यक्षतासाक्षिमात्रेण स्वप्रकाशमानतया नि ८
त्यापरोक्षब्रह्मरूपतास्तीत्यर्थः॥२६॥

एवमशेषप्रमातृसाक्षिभूततया प्रत्यगात्मनो ब्रह्मत्वापादने जाग्रदृष्टिनृपो न्यथा तः॥ सच्चात्मविदित्यत्रोक्तमात्मवि
त्वं स्पष्टीकरोति॥ परलोकभयमिति॥ यस्य परलोकभयपरलोकनिमित्तं भयं किमहं साधु नाकरवं किमहं पापमकरवमि
त्यादिरूपं नास्ति नैनं कृताकृते तपत इति श्रुतेः॥ तथाय स्य मृत्युभयं मरणभयं नास्ति न जीवो म्रियत इति श्रुतेः॥ आत्मव्यति
रिक्तस्याद्वितीयस्यास्फुरणात्॥ द्वितीयदर्शननिमित्तं हि भयं द्वितीयाद्वै भयं भवतीति श्रुतेः॥ तस्यात्मज्ञस्य ब्रह्मेन्द्राद्या अपि ता

परलोकभयं यस्य नास्ति मृत्युभयं तथा॥ तस्यात्मज्ञस्य शोच्याः स्युः
सब्रह्मेन्द्रा अपीश्वराः॥२७॥ ईश्वरत्वेन किं तस्य ब्रह्मेन्द्रत्वेन वा पुनः॥
तृष्णा चेत्सर्वतश्छिन्ना सर्वदैन्योद्भवाशुभा॥२८॥ ॥ ॥

नैश्वर्यसंपन्नतया ईश्वरा अपि शोच्याः शोचनीयाः स्युरहो एते ऐश्वर्यासक्ततया व्यग्राः कथं स्वस्थाः स्युरिति॥ तस्मादयं
परलोकमरणनिमित्तव्यग्रताहेत्वहंकारादिसंघातधर्मत्वनिवृत्तः॥ स एवात्मविन्नविपरीत इति सिद्धं॥२७॥ ब्रह्मेन्द्रादिभा
वस्य सर्वैः॥ प्रार्थ्यमानत्वात्कथं शोच्यत्वं ते स्यादित्याशंक्य ब्रह्मात्मज्ञानादूर्ध्वं न किमपि प्रार्थ्यमस्तीत्यभिप्रायेणाह॥ ईश्वरत्वेनेति॥ ॥

सर्वत्र दैन्यस्योद्भवो यस्मात्॥ सा तथा अत एवाशुभा पापप्रवृत्तिद्वारत्वात्तस्मात् समाचैतन्यवतः॥ सर्वात्मना समूलेन छित्त्वे
त्यर्थः॥ तथा च श्रुतिः॥ यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः॥ अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति॥२८॥ निर्म
मनिरहंकारस्य॥ पश्यति स पश्यतीत्युक्तस्य एवंलक्षणस्याहमित्यादिनाह॥ अहमितीति॥ यस्य न्यात्मीयापन्नुगृहीतस्य

अहमित्यात्मधीर्यावन्ममेत्यात्मीयधीरपि॥
अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा॥२९

पदार्थद्वयविवेकवतोहं ममेति चात्मात्मीयविषयधीरा यावद्यभूत्ये प्रयोजनभूत्येपदाद्यातां ततद्वयुक्तं व्यवहारहीनः॥ पु ९
मानयद्विस्यादित्यर्थः॥ तदा स आत्मविद्भवेद्देहादौ तदनुबंधे च व्यवहारकालेपि पूर्ववद्वस्तुत्वोद्रेखरहित तया आत्ममात्र
दृष्टी सम्यग्गात्मविदित्यर्थः॥२९॥

यदैवमात्मज्ञानं वा कश्चिद्भवति तदा कृतकृत्यत्वान्न तस्य कार्यं शेषता संभवतीति प्रागुक्तमकार्यशेषत्वं प्रपंचयति॥ बुध्या
दाविति॥ जाग्रत्स्वप्नयोर्बुध्यादावुपायो भवति तथा सुषुप्तावसति च यस्यात्मनो विशेषता चेतज्ञाता चेद्यद्वोसंदेहेपि संदेहं वच
नाद्वेदस्थैव प्रमाणमिति वृत्तस्याविशेष्यात्मा कार्यं कथं भवेत् न कथं चिदित्यर्थः॥३०॥ आत्मविदो नास्ती कार्यमित्य
त्र हेत्वंतरमाह॥ प्रसन्न इति॥ व्योम्नि व्यासे भेदशेष प्रसन्ने स्वतो भेदरहिते विमले आगंतुकमलवर्जिते उक्तविशेषणद्वयसाधकं

बुध्यादौ सत्सुपायौ च तथासत्यविशेषताः॥ यस्य चेदात्मनो ज्ञाता तस्य कार्यं कथं
भवेत्॥३०॥ प्रसन्ने विमले व्योम्नि प्रज्ञानैकरसेद्वये॥ उत्पन्नात्मधियो ब्रूत किम
न्यत्कार्यमिष्यते॥३१॥ आत्मानं सर्वभूतस्थमसिद्धं चात्मनोपि यः॥ ॥ ॥

कमेणाविशेषणद्वयं प्रज्ञानैकरसेद्वय इति॥ एतस्मिन् ब्रह्मण्युत्पन्ना आत्मधीरात्मेति मतिरेवंविधं ब्रह्मैवात्मेति बुद्धिर्यस्य
तस्यात्मस्वरूपज्ञानादन्यत् किं कार्यमिष्यते तद्ब्रूत न किमपीत्यर्थः॥३१॥ ननु ज्ञात्वा यथासाददेवत्वेवगम्यमानं विश्वे यो
मार्गप्राप्ति प्रतिबंधकस्य नाशोः संभवात्तस्य परिहारार्थं किमप्यनुष्ठेयं स्यादिति चेन्नेत्याह॥ आत्मानमिति॥ ॥ ॥ ॥

उप. स. ॥ यथोष्णस्वभावस्य विभावसोः शीतस्वभावतापादनं न संभाव्यते तथा सर्वभूतात्मभूतस्य प्रत्यगात्मनोऽविद्यादिसंभावना दुःसंपाद्ये प्र. वि. १४
१० ति नानुशेयकल्पनावसर इत्यर्थः ॥३१॥ आत्मनः कर्मशेषत्वं किं सोपाधिकस्येष्यते निरुपाधिकस्य वेति विकल्प्याद्यमंगीकृ
त्य द्वितीयं दूषयति ॥ प्रज्ञेति ॥ प्रज्ञा बुद्धिः ॥ प्रज्ञाभासमनुकर्तुं शीलमस्यास्तीति प्रज्ञाभासानुकारी प्रज्ञाभासोपाधिक इत्य
र्थः ॥ छायेव सूर्यादिप्रतिबिंबमिव जले दृशादिगोचरः ॥ इन्द्रियतद्द्वारकवृत्तिषु प्रतिबिंबितः आत्मा तदविवेकात्करोतीवेति ॥

प्रयत्निष्ठत्पसौ नूनं शीतीकर्तुं विभावसुः ॥३२॥ प्रज्ञाभासानुकार्यात्मा छायेवा
त्र दृशादिगोचरः ॥ ध्यायतीवेति चोक्तो हि शुद्धो मुक्तः स्वतो हि सः ॥३३॥ ॥श्रीरामः॥

ध्यायतीव लेलायतीवेति श्रुत्योक्तः स्वस्योद्गायां कर्मशेषत्वमभ्युपगतोऽपि स्वतः शुद्धो मुक्तश्च हि सः आत्मा भवति ॥ उदकानु १०
गतत्वेन सूर्यस्य कंपादिमत्त्वभासमानत्वेऽपि न परमार्थतः सूर्यः कंपादिमान् भवति ॥ तथा चोपाधिविगमे भेदविपर्यासादि
विगमाद्द्वारहीनं कर्मात्मेतत्त्वविदं नद्योकत इत्यर्थः ॥३३॥ ॥

निरुपाधिकस्यात्मनो न कर्मशेषत्वमित्युपपादयन् प्राणायामानुष्ठानं चरेदित्यादिन्यायाद्विहितधर्मविधिशेषतापि तास्या
स्तीत्याह ॥ अप्राणस्येति ॥ क्रियाशक्तिः प्राणः तद्रहितस्य ज्ञानशक्तिर्मनो हीनस्य स्वभावतोऽसंसर्गिणोऽसंगस्य व्योमवदपरिच्छिन्नस्य स्व
तश्चलनशक्तिरहितस्येति यावत् ॥ दृशेश्चिदेकरसस्यैवंविधस्य मम कथं कार्यं भवेन्न कथमपीत्यर्थः ॥३४॥ तत्रैकाग्रं मनः कृत्वा
यतचित्तेन्द्रियक्रियः ॥ उपविश्यासने युञ्ज्यादित्यादिना भगवद्वचनात्मनः ॥ समाधानानुष्ठानेनात्मशुद्धिं वा प्राप्यावशिष्यत इत्याशंक्याह तस्य प्र

अप्राणस्याऽमनस्कस्य तथाऽसंसर्गिणो दृशेः ॥ व्योमवद्व्यापिनो ह्य
स्य कथं कार्यं भवेन्मम ॥३४॥ असमाधिं न पश्यामि निर्विकारस्य स
र्वदा ॥ ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्धि पाप्मनः ॥३५॥ ॥ ॥

गेव सिद्धत्वान्नो हानीमस्यावसर इत्यभिप्रेत्याह ॥ असमाधिमिति ॥ विकारो हि असमाधिर्न मत्तद्रूपाधिशून्यत्वात्तथास
दा निर्विकारस्य तन्न पश्यामि ब्रह्मत्वान्न त्वस्यात एव सर्वदा विशुद्धस्य प्रागेव विपाप्मनो नित्यनिवृत्तकल्मषस्य शोध्यं चान्यन्न
पश्यामीत्यर्थः ॥३५॥

उप.स. नन्वन्यत्र पश्यामीत्ययुक्तं गंतव्यब्रह्मलोकादेर्गमनसाधनस्यार्चिरादिमार्गस्य च ब्रह्मविदोपि ज्ञातव्यत्वादित्याशंक्य अ.वि.१४
११ सगुणब्रह्मविदस्तथात्वेपि निर्गुणब्रह्मविदस्तथात्वमिति सहेतुकमाह॥ गंतव्यमिति गंतव्यमिति भावकर्मणोस्तव्यप्र-
हणं तथा च सर्वगत्वेन चलनासामर्थ्यात् गंतव्यं नैव पश्यामि गमनं धात्वर्थेनैव पश्यामीत्यर्थः॥ तथा गंतव्यगस्य प्राप्यदे-
शस्यानविशेषं न पश्यामि कुतः इत्यत आह॥ नोर्ध्वमिति॥ तिर्यगिति॥ पुरस्तात्पश्चाद्दक्षिणे चोत्तरे च नैव पश्यामीत्यनुषंगः

गंतव्यं च तथा नैव सर्वगस्याचलस्य च॥ नोर्ध्वं
नाधस्तिरो वापि निष्कलस्यागुणत्वतः॥३६॥ ॥

॥कुतो देशभेदाभाव इत्यत आह॥ निष्कलस्येति॥ पूर्णस्येत्यर्थः॥ कुतो निष्कलत्वं ज्ञानसुखादिगुणात्मकावयवयोगादित्यत ११
आह॥ अगुणत्वत इति॥ ज्ञानसुखयोः॥ स्वरूपत्वात्सर्वगुणस्य चासंगे मय्यसंभवाद्गुणतो विविभागशून्यस्य न गंतव्यं प्राप्यं
गतिः॥ प्राप्तिर्वा विद्यत इति न तत्साधननिष्ठाविधानावकाश इत्यर्थः॥३६॥ ॥ ॥

किंचाज्ञानोपाधिं विनात्मनि नित्यमुक्ते कस्यापि विशेषस्योत्प्रेक्षितुमशक्यत्वादज्ञानस्य च ज्ञानस्वभावे वस्तुतोसं-
भाव्यमानत्वान्न कदाप्यात्मनः॥ क्रियायोग्यतेति स्थिते कुत इदानीं ज्ञानप्रतिभासस्याप्यभावे कर्मविधिशेषता स्या-
दित्यभिप्रेत्याह॥ चिन्मात्रेति॥ तस्मिन्नात्मनि ततः॥ स्वरूपतः प्रतिभासतोपि न विद्यते कुतस्तिन्मात्रज्योतिषः॥ ज्योतिषु-

चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते॥ कथं कार्यं
मयैवाद्य नित्यमुक्तस्य शिष्यते॥३७॥ अमनस्कस्य का चि-
न्ता क्रिया वानिंद्रियस्य का॥ अप्राणो ह्यमनाः शुभ्र इति सत्यं श्रु-
तेर्वचः॥३८॥

तत्पद इति भावप्रधानो निर्देशः॥ सुगममन्यत्॥३७॥ किंच॥ ज्ञानाभावे बाह्यांतः॥ करणतत्संसर्गाभावात् तं विना प्रवृत्त्यभावा-
न्नमे कर्मावसर इत्याह॥ अमनस्कस्येति॥ प्राणमनोविहीनत्वे प्रमाणमाह॥ अप्राणो हीति॥ श्रुतेर्वचः॥ सत्यं सत्यार्थं निर्दृ-
ष्टतयास्वतः॥ प्रमाणत्वादित्यर्थः॥३८॥

उप. स. १२ अपरत्वादिकालस्य विवक्षुत्वादिदेशस्य प्राच्यादिदिग्विशेषस्य मनोविक्षेपरहितस्य राहुपरागादिनिमित्तस्य च प्र. वि. १४
वती ह्याया आत्मचिंतने कर्त्तव्यत्वात् कथं कार्याभावप्रत्याशंक्याह ॥ अकालत्वादिति ॥ सदात्मानं ध्यायतो यतो नैव का

अकालत्वाद्देशत्वाद्दिक्त्वादनिमित्ततः ॥ आ
त्मनो नैव कालादेरपेक्षा ध्यायतः सदा ॥२१॥ ॥

लादेरपेक्षास्तीति ॥ योजना ॥ तत्र हेतुरात्मनः कालत्वादित्यादि ॥ आत्मस्वरूपस्य कालाद्यनिबंधनत्वान्न तद्ध्याने १२
तदपेक्षेत्यर्थः ॥ तथा चाह ॥ भगवान् सूत्रकारः ॥ यत्रैकाग्रता तत्राविशेषादिति ॥२१॥ ॥ श्रीकृष्णाय नमः ॥ ॥ ॥

ब्रह्मविदो देशकालादिसव्यपेक्षे कर्मण्यपेक्षाभावे पि प्रयागादितीर्थस्याद्पेक्षा गंगातीरे वसेन्नित्यं पित्तमोक्षपु
रायणः इत्यादिस्मृतिविहितत्वादित्याशंक्याह ब्रह्मात्मज्ञानरूपे तीर्थे साक्षान्मुक्तिहेतौ स्नातस्यात्मविदो न तीर्थांतरापे
क्षास्तीत्याह ॥ यस्मिन्निति ॥ यस्मिन् ब्रह्मात्मस्फूर्त्तिरूपे देवास्तत्तीर्थस्थानविशेषाधिष्ठातारो भवविश्वेश्वररामे

यस्मिन् देवाश्च वेदाश्च पवित्रं कृत्स्नमेकतां ॥

श्वरत्रिविक्रमादयः ॥ पूजादर्शनस्पर्शनस्मरणादिभिर्भक्तपावनाः प्रसिद्धास्तथा वेदाश्च ऋग्यजुः ॥ सामाथर्वाख्याः
प्रज्ञायत ब्रह्मयज्ञपारायणानुष्ठानादिभिः ॥ पावयंति तथा कृत्स्नं पवित्रं पावनं तीर्थं त्रिवेणीहरनामोच्चारणादि ॥ एतत्
सर्वमेकतामेकत्वं व्रजेद्यस्मिन् सरित इव सागरे तन्मंवंतीत्यर्थः ॥

उ.प.प. १३ सर्वात्मकब्रह्माविर्भावरूपत्वादिति॥ परमोहेतुरत्रानुसंधेयः॥ तन्मानसं मनसि वेदांतमहावाक्यजनितांतःकरणवृत्ति प्र.वि.१४
रूपे समुद्भवितं मानसं तीर्थं संसारपापमूलाविद्यातारकं तीर्थत्वस्य दृश्यति॥ यस्मिन्निति॥ यस्मिन्स्नात्वा निमज्ज्यादरूकरा
ज्ञानिनिष्ठ श्रीरकविंदुवत्तद्देकतां प्राप्य अमृतो भवेन्निर्विशेषनित्यात्मरूप एव भवेत्तस्मिंस्तीर्थेति तस्मिन्मग्नस्य न तीर्थांतरा

व्रजेत्तन्मानसं तीर्थं यस्मिन्स्नात्वामृतो भवेत्॥ ४०॥

पेक्षेतिभावः॥ तथाच श्रुतिः॥ यातं गंगाकालिय त्रैकं भवंति॥ सर्वे वेदा यत्रैकं भवंति॥ सर्वे होतारो यत्रैकं भवंति॥ समान १३
सीनस्य आत्मा जनानां इति॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति॥ एवं मुनेर्विजानतः॥ आत्मा भवति गौतमे
ति च॥ ४०॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीरामायनमः॥

एवं कृतार्थत्वापादकं तानतीर्थं केनोपायेन प्राप्यमित्यपेक्षायां पूर्वोक्तिः॥ पदार्थविवेक एव तद्धत्तोपायइति वक्तुं प्रथ
मं स्थूलदेहान्यत्वमात्मनो विशोदयति॥ न चास्तीति॥ शब्दादिर्गंधांतो विषयः॥ अनन्यवेद्यो न चास्ति स्वयंप्रकाशत्वा
वत्वात्स्वीस्वर्थः॥ तथा परस्परेणापि शब्देन स्पर्शेन शब्दस्त्वेवं परस्परेणापि न चैव दृश्यते उक्तत्वादेवेत्यर्थः॥ दर्शनम

न चास्ति शब्दादिरनन्यवेद्यस्तु परस्परेणापि न चैव दृश्यते
परेण दृश्यास्तु यथा रसादयस्तथैव दृश्यत्वत एव दैहिकाः॥ ४१

तरेण व्यवहारानुपपत्तेर्दर्शनस्यच परस्परतस्त्वाभावे पञ्चस्विंद्रियेष्वात्परेण स्वविजातीयेनाजुर्तेन प्रकारत्रयाएव
तु शब्दोवधारणार्थः॥ तथा च दैहिका अपि रसादयः॥ परेण दृश्याः॥ दृश्यत्वाद्यथा बाह्यारसादयस्तथैवेमेतस्मात्तथै
वोत्तरार्थः॥ ४१॥ ॥

उप.स. तदेवं पंचभूतात्मकात्स्थूलाद्देहाद्द्रष्टारमात्मानं विविच्य सूक्ष्मादपि देहान्तं विविनक्ति–अहं ममेति॥ अहमहंकारः उ.वि.१४
१४ ॥ तद्वत्प्रयत्न विक्रियास्सुखादयः॥ कामप्रयत्नकर्तृत्वभोक्तृत्वसुखदुः॥ खमोहद्वेषादयो ममेति निर्दिश्यमाना मनोवृत्त
यस्तद्वत्घटादिवन्नानन्यवेदना॥ कुतः॥ इहव्यवहारभूमौ प्रदृश्यतो दर्शनकर्मत्वात्ते परस्परेणापि दृश्यतां न यांति

अहं ममेत्येव च यत्नविक्रियाः सुखादयस्तद्वदिहाध्यवस्यतः॥
दृश्यत्वयोगात्तु परस्परेण ते न दृश्यतां यान्ति ततः परो भवान्॥५२

न धातुर्वैतिदृश्यत्वयोर्वैतैग्यादेव परिशेषाच्चैषां द्रष्टा ततस्तेभ्योऽहंकारादिभ्यस्तत्संघातरूपाल्लिंगदेहादिति॥ यावत्॥ भ १४
वानात्मापरोऽन्य इति योजना॥५२॥ ॥

यद्यप्येवं देहद्वयग्राहकत्वान्न दृतिरिक्तत्वात्मा तथापि तत्संबंधवत्त्वात्तस्य न तिष्ठ मुक्तरूपतेत्याशंक्याह॥ अहंक्रि
याद्या हीति॥ अहंक्रियाहंकरणमहं ममेत्येव माद्यास्समस्तविक्रियाश्चितिस्वरूपेण चैतन्यप्रकाशात्मनार्कवदर्कतो वसंप्र
ततः प्रकाश्यमाना हि यतोऽतः आत्मनोऽसितताबधितासिद्धा विक्रियासंबंधस्यापि दृश्यत्वाद्दृग्धर्मत्वानुपपत्तेर्न मुक्तिविरो

अहंक्रियाद्या हि समस्तविक्रिया सकर्तृका कर्मफलेन संहता॥ चितिस्वरूपेण समंत
तोर्कवत्प्रकाश्यमानो ह्यतः॥५३॥ दृशिस्वरूपेण हि सर्वदेहिनां वियद्यथा व्याप्य समस्त
स्यवस्थितः॥ अतो न तस्मादपरोऽस्ति वेदिता परोऽपि तस्मादत एव ईश्वरः॥५४॥ ॥

धकृत्वर्थः॥५३॥ एवं देहद्वयविविक्तस्याप्यात्मनः॥ अतिदेहं परिच्छिन्नत्वात्मना पूर्णताविरोध इत्याशंक्याह॥ दृशि
स्वरूपेणेति॥ वियत इव॥ आत्मा सर्वदेहिनां मनसि दृशिस्वरूपेणैवाकाशो घटादीनिव वियद्वत्स्थितो न परिच्छिन्नरूपेण
॥ अतस्तस्मादात्मनश्चितिस्वरूपादपरोऽन्यो वेदिता नास्ति तथा परईश्वरोऽपि तस्मादन्यो विदिता नास्ति चितिस्वभावः॥

उप॰स॰ १५ त्वाविशेषात्तस्मादेकएवात्मेत्यर्थः॥ आत्मानस्वरूपभेदवानुपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वादाकाशवदिति प्र॰वि॰१४
भावः॥ ४४॥ देहद्वयसाक्षीब्रह्मस्वभावस्वेदात्मा कथंतर्हि तस्य नास्तितामाशंकाके पांचिदित्याशंक्यस्वदोषवशादेवेत्यभि
प्रेत्याह॥ शरीरेति॥ शरीरबुद्ध्योः स्थूलसूक्ष्मदेहयोर्यद्यन्येननित्यसद्रूपेण दृश्यता पूर्वोक्तन्यायेनसिद्धा तदा निरात्मवादा

शरीरबुद्ध्योर्यदि चान्यदृश्यता निरात्मवादास्तु निराकृता मया॥ परश्च शुद्धो ह्यविशु
द्धिकर्मतः सुनिर्मलः सर्वगतोऽसितोऽद्वयः॥ ४५॥ ॥श्रीरामायनमः॥ ॥ ॥

॥ शून्यवादिनां क्षणिकात्मवादाश्च मया निराकृता एवेत्यर्थः॥ तथाच अविशुद्धिकरात्कर्मतो धर्माधर्मादिलक्षणात्कर्मणः १५
॥ परो व्यतिरिक्तस्ततः साक्षित्वाद् तस्य शुद्धोकर्तात अस्य सुनिर्मलः॥ कर्मफलभोगमललेशेनापि रहितः॥ सर्वगतो परिच्छि
न्नो तएवासितो बंधनशून्यश्चेत्यर्थः॥ ४५॥ ॥ ॥

नवेदेतदेवं यदि शरीरबुद्ध्योरात्मदृश्यता सिद्धेत्सा तु न संप्रतिपन्नेत्याशंक्य तयोरात्मादृश्यत्वाभावे बाधकमाह॥ घ
टादीति॥ यदि ते तव मते स्ववृत्तिभिर्बहुधा प्रवृत्तं घटादिरूपं विषयाकारं मनो त्मना न गृह्यते न प्रकाश्यते तो ह्यात्मनोऽन्य
त्वाविशुद्ध्यशुद्धिरूपविकारदोषदुष्टतायथा मतेर्बुद्धेस्तथा वारयितुं न शक्यते तस्य साक्षित्वानभ्युपगमे सति प्रतिदोषा
णां तस्मिन्नवकल्पनावात्तथा चानिर्मोक्षप्रसंग इत्यर्थः॥ अपवादपत्यपि शरीरद्वयग्राहकतया तदन्य आत्मा नित्यसद्रूप

घटादिरूपं यदि ते न गृह्यते मनः प्रवृत्तं बहुधा स्ववृत्तिभिः॥ अशुद्ध्यशुद्धि
रूपविकारदोषता मतेर्यथा वारयितुं न पार्यते॥ ४६॥ ॥ ॥

स्तथापि दृश्यसंसर्गकृतदोषो न परिहर्तुं शक्यते स्वचैतन्याभेदेन हि दृश्यमवभासयन्द्रष्टा भवति॥ अन्यथा दृश्यस्याप
रोक्षानुपपत्तेरतो विशुद्धत्वाद्यनुपपत्तेरित्याशंक्य ते॥ घटादिरूपमिति॥ स्ववृत्तिभिर्बहुधा प्रवृत्तं घटाद्याकारं मनो यदि चे
त्तेनात्मना गृह्यते तदा तस्य दृश्यसंबंधादशुद्ध्यादिदोषता वारयितुं न पार्यते॥ यथा मतेश्चैतन्यसंसर्गाच्छित्वाद्यता वार
यितुं न पार्यते तद्वदित्यर्थः॥ ४६॥ ॥ ॥

उप.स.
१६

स्यादेवं तदेवं यदि मतिवत्सा वत्सावयवं परिणामि चात्मस्वरूपं स्यान्नैवमात्मस्वरूपमतो नानास्याच्च बुध्यादीनां कावका
शादिति दृष्टान्तेनोपपादयन्नुत्तरमाह ॥ यथा विभ्विति ॥ विभुं दपरिणामविक्रियामलरहितं निरंतरमपरिच्छिन्नमत ए
व निरवयवं चेति द्रष्टव्यं ॥ एवंविधं यथा गगनं न सज्जते केन जतेव न लसं जयमवतिना लिप्यते न धूमा पुतक रसेने
वस्त्रादि ॥ तथात्मापि विभुर्द्धो निरंतरो निरवयवस्य स्वात्मा न लिप्यते न बुध्यादिषु सक्तेनापि तद्दोषेण लिप्यत इत्यर्थः

यथा विभुद्धं गगनं निरंतरं न सज्जते नापि च लिप्यते तथा ॥ समस्तभूतेषु
सदैव तेष्वयं समः सदात्मा ह्यजरोऽमरोऽभवः ॥ ४७ ॥

॥ अनन्यास्त्वप्रसिद्धिं हि हेतुत्वेन द्योतयन्नहेतुमाह ॥ समस्तभूतेष्विति ॥ तत्र दृश्यमानिदेवतासहितेष्वपि समस्तभूतेषु अय
मात्मा सदा समः अमो हि यस्मात्तस्मादजरोऽमरोऽभवो नित्यशुद्ध इत्यर्थः ॥ तथा च श्रुतिः ॥ यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्यो
ऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः ॥ सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति ॥ स १६
मं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं ॥ विनश्यत्स्वविनश्यंतं यः ॥ पश्यति स पश्यति ॥ न लिप्यते लोकदुःखेन बाह्य इत्यादि ॥ ४७ ॥

किंच ॥ द्रष्टुरप्यबाधितत्वादपि न तत्कृतदोषसंबंधः आत्मनः ॥ संभाव्यते न हि मिथ्यार्थेन सत्यं वस्तु संसज्यते कथं वा
धितत्वमिति चेत् ॥ प्रतिपन्नोपाधौ निषिध्यमानत्वाद्रज्जुसर्पादिवदित्यभिप्रेत्याह ॥ अमूर्तेति ॥ अमूर्तं च मूर्तानि च अमू
र्तमूर्तानि पंचमहाभूतात्मकानि स्थूलानि द्वे वाव ब्रह्मणो रूपे मूर्तं चेति श्रुतौ दृशिस्वरूपस्य ब्रह्मणः संबंधीनि श्रुतानि च
अपरं कर्म वा पनो कर्म वा अयं लिंगमिति यावत् तदपि तस्यैव तस्य पुरुषस्य रूपं यथा माहारजनं वास इत्यत्रोक्तं एतत्सर्वं

अमूर्तमूर्तानि च कर्मवासना दृशिस्वरूपस्य बहिः प्रकल्पिताः ॥ अवि
द्यया ह्यात्मनि मूढदृष्टिभिरपोह्य नेतीत्यवबोधितो दृशिः ॥ ४८ ॥ ॥

मकारणं मूढबुद्धिभिरविद्यया मोहरूपया आत्मनि दृशिस्वरूपे प्रत्यगात्मनि ब्रह्मणि प्रकल्पितं वासना प्रकल्पिता मू
र्तमूर्तानि प्रकल्पितानीति योजना ॥ हि यस्मादविद्याध्यस्तमात्मनि सप्रपंचत्वं तस्मान्नेति नेतीति निषिध्य पात तत्सर्वमात्मनो
बहिरपोह्यात्मविशेषलतारूपं बाधित्वा केवले दृशिस्विन्मात्र एवावबोधितः सत्यस्य सत्यमिति श्रुत्यास्तियोजना ॥ यदाक
स्थिता इति विसर्गान्तपाठस्तदेत्तु योजना ॥ अविद्यया मूढदृष्टिभिरात्मनि प्रत्यग्रूपे प्रकल्पिता नी आरोपिताः ॥ ॥

स्व॰प॰स॰ १७ कर्मवासना-अमूर्त्तमूर्त्तानि च भूतानि दृश्यस्वरूपस्य प्रत्यक्स्वरूपस्य ब्रह्मणो बहिर्निर्मितानीत्यपोह्य दृश्यरेखावशेषितोऽनि प्र॰वि॰ १४
षेधावधिभूतः॥ शुद्धो हि यस्मान्नास्त्यात्मनि दोषसंसर्ग इति॥ ४८॥ स्थूलसूक्ष्मप्रपंचस्य श्रुत्याबाधकमुक्त्वा दृश्यत्वाद्धि
तियुक्त्यादिबाधकमाह॥ प्रबोध इति॥ अर्थयोगाद्विषयसंबंधाज्ज्ञातं पनसः प्रबोधरूपं विषयाकारवृत्तिरूपं यत्तत्स्मृतौ स्म
त्यवस्थायां सुप्तस्य पुंसः स्वप्नावस्थायां चार्थवदर्थाकारमेव दृश्यते तद्यथा स्वप्नस्मृत्योरर्थाभावे व्यर्थाकारं दृश्यमानम्

प्रबोधरूपं मनसोऽर्थयोगजं स्मृतौ च सुप्तस्य च दृश्यतेऽर्थवत्॥ तथैव
देहप्रतिमानतः पृथक् दृशोः शरीरं च मनश्च दृश्यतः॥ ४९॥ ॥

त्मनः पृथगेवानात्मविशेषणं तद्दृश्यत्वात्तथैव दृश्यतो दृश्यत्वहेतोः शरीरं मनश्च देहप्रतिमानतो देहप्रतिमानं च त
से॥ सार्वविभक्तिकस्त्वांगीकारास्त्रैपमार्थः सद्दृह ग्रह्यते देहद्वयवासनारूपं च दृशोरात्मनः॥ पृथक् नदृशि विशेष्णम् १७
मिति योजना॥ अतश्चात्मान्येव दृश्यस्यात्मनि निषेधान्मिथ्यात्वं शुक्तिरूप्यादिवत्सिद्धमिति भावः॥ ४९॥ ॥ ॥

ननु श्रुत्यायद्यध्यस्तनिषेधेनात्मा प्रतिपाद्यते तदानिवृत्तसंसारत्वविशेषयोगादिक्रियावत्वेनास्त्वादिः॥ दोषप्रसंग इ
तिचेन्नेत्याह॥ स्वभावेति॥ यथा स्वभाव शुद्धे शुद्धस्वभावे गगने अधिष्ठाने घनादिके मले सति तस्मिन्नपयाते वा विशेषता
नविशेषः कश्चिदस्ति॥ अविक्रियमेव सदागगनमित्यर्थः॥ तद्वद्दृशावात्मन्यधिष्ठाने गगनोपमे स्वभावशुद्धे श्रुत्याबाधिते

स्वभावशुद्धे गगने घनादिके मले पयाते सति चाविशे
षता॥ यथा च तद्वत्स्तु निवारितद्वये सदाविशेषो गगनो
पमे दृशौ॥ ५०॥ ॥ इति स्वप्रस्मृतिप्रकरणं नाम च
तुर्दशं विवृतम्॥ १४॥ ॥ शुभं भवतु॥ ॥ कल्याणमस्तुः

बाधिते द्वयं यस्मिंस्तस्मिन्सदैवाविशेषः॥ कूटस्थ इति योजना तथा च संसारनिवृत्ते मिथ्यार्थप्रतिबोधकाया अधिष्ठा
नदृगात्मव्यतिरेकेणानिरूपणान्न कोपि विशेष इति भावः॥ ५०॥ ॥ इति श्रीस्वप्रस्मृतिप्रकरणं नाम चतुर्दशं विवृतम्
मातः॥ १४॥ ॥ कल्याणमस्तु॥ ॥ शुभं भवतु॥ श्रीजायोस्तु॥ ॥ श्रीरस्तु॥ ॥ श्रीरामायनमः॥ ॥ श्रीकृष्णायनमः॥ ॥

॥ ॥इतिश्रीचतुर्दशंप्रकरणंसमाप्तः॥१४॥ ॥

उ०स० १ ॥ॐनमः॥ ननु स्वभावशुद्ध आत्मा तथा सति साधनवैयर्थ्यं॥ किंतु॥ संसारिस्वभाव एव सन् ज्ञानध्यानादि अ०वि०१५
साधनानुष्ठानेन स्वभावशुद्धब्रह्मस्वरूपो भविष्यतीति केचिदेकदेशीयाः प्रतिदिरेतन्मदेय मुमुक्षुभिस्त
स्य श्रुतियुक्तिबाधितत्वादित्याह॥ नान्यदिति॥ जीवब्रह्मणोरत्यंतभेदरूपतेकिं वा भेदाभेदौ नात्यो विरुद्धस्व
भावतया श्रुत्याह मित्येकरूपध्यानज्ञानयोरसंभवात् दसंभवेचासंसारिब्रह्मभावफलासिध्येरिति मनसि
निधायाद्यदोषमाह॥ नान्यदन्यद्भवेद्यस्मादिति॥ यस्मादन्यज्जीवरूपं वस्तु तंसदन्यद्ब्रह्म न भवेन्नरूपस्थि

॥ॐनमः॥ नान्यदन्यद्भवेद्यस्मान्नान्यत्किंचिद्विचिंतयेत्॥ अन्यस्यान्यत्वभावे हि नाशस्त
स्य ध्रुवो भवेत्॥१॥

तिविरोधात्तथा तद्देव ब्रह्मणोन्यज्जीवरूपं वस्तु तद्वंसदन्यद्ब्रह्म न भवेन्न श्रुत्वादेव तस्य ब्रह्मभावं प्राप्नुरमा
वादितियोजना ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिविरोधः स्फुट एवेति नाद्यो दाहृतः यस्मादेवं श्रुतियुक्तिविरुद्धमि १
दंमतं तस्मात्॥ किंचिदीषन्मात्रमप्यन्यत् द्वयोर्त्ति न विचिंतयेत् मुमुक्षुरिति शेषः॥ किंत्वहमेव ब्रह्म ब्रह्मैवाहमि
मेति होपमद्वैनेकरूपमेवात्मवस्तु चिंतयेदित्यर्थः॥ नन्वत्यस्योपन्यासात्मज्ञानादृष्टसाधनविज्ञोपसाध्ययथैव

धविज्ञेययोगात्ताम्रादेरपि सुवर्णात्मता तद्वदिहापि स्यादित्याशंक्याह॥ अन्यस्येति॥ जीवस्य स्वविरुद्धस्वभाव
स्यान्य ब्रह्मत्वेकाभावे तन्नाशो योगो गोलकविद्रववत्तस्य नाशो ध्रुवो भवेत्॥ तथा च न ब्रह्मभावः पुरुषार्थः॥ किंत्वनर्थ एव
दृष्टांतोपि प्रतिपन्नौ वा स्वरूपाभिभावकमौल्यादिवत्तरसविशेषस्य ताम्ररूपाभिभावकमात्रत्वात् कालांतरे सुव
र्णाकारतापगमदर्शनाच्चताम्रादेस्तत्स्वभावमोत्रं तदित्यपि प्रायः॥१॥ ननु यद्येवमन्यत्वान्नाध्येयमात्मनि बुध्या
नेन संभवति एकस्मिन् ध्यातृध्येयभावायोगात् कथं तर्हि निदिध्यासनविधिरिति चेदन्यथैवोपपत्तेर्न तदर्थमेद

स्मरतो दृश्यते दृष्टं पटे चित्रमिवार्पितं॥ यत्र येन च तौ ज्ञेयौ सत्वक्षेत्रज्ञसंज्ञकौ॥२॥

॥अप्राप्येय इत्याह स्याह॥ स्मरत इति॥ दृष्टं नीलपीतादि स्मरतः पुंसो यच्चांतःकरणे तद्वासनारूपं पटेर्पितं चित्रमि
वदृश्यते येन चैतन्यात्मना दृश्यते उपलभ्यते॥ तौ सत्वक्षेत्रज्ञसंज्ञकौ यत्र दृश्यते तत्सत्वं येन दृश्यते स क्षेत्रज्ञ
इत्यर्थः॥ तथा चात्मा निदिध्यासितव्य इति॥ विधिनानेनैतयोरन्यत्वं पदार्थविवेकसंपादनमेव कर्तव्यमतयोवस्यते वि
विक्तत्वमर्थस्यैव ब्रह्मत्वादहं ब्रह्मास्मीत्यपरोक्षानुभवसंभवात् संसारनिवृत्तिफलसिद्धिः॥ ॥श्रीनाथजी॥ ॥

उप॰स॰ २ अन्यभावनायां तु आगन्तुकन्यायेनान्यस्यात्मतायोगात्संसारानिवृत्तेरिति ॥ फलोक्तिर्विधिः ॥ स्यादिति भावः ॥ २ ॥ प्र॰वि॰१५
अतः करणस्यात्मत्वस्य तस्यात्मकर्तृत्वं यस्यात्मतत्त्वमित्यपीता हृपजनद्रस्तु तत्राह ॥ फलांतमिति ॥ फलांतमु
स्वादिफलावसानं कर्त्राद्यधिकारकौर्युतं युक्तं यद्वेतत्पूर्वमनुभूतं तद्विहितं नीस्मर्यमाणं कर्मस्यं द्रष्टृरूपनिरूद्रष्टृत्वेनद्रष्टृ
निवृत्तिहि यस्मात्पूर्वमपि तत्स्मर्यमाणस्याधिकरणमतः ॥ करणोचितत्वमात्मनः ॥ कर्मविद्रष्टृरूपमेवेत्यर्थः ॥ अयमाव
निवृत्तिहि यस्मात्तत्पूर्वमपि तत्स्मर्यमाणस्याधिकरणमतः ॥ करणोचितं तत्राह ॥ तस्योहि विषयो भावसमानसा
॥ पूर्वानुभूतविषयाकाराहि वृत्तिरतः ॥ करणपरिणामात्मिका स्मृतिरित्युच्यते ॥ तस्योहि विषयो भावसमानसा

फलोक्तं चानुभूतं यद्युक्तं कर्त्रादिकैः ॥ स्मर्यमाणं हि कर्मस्थं पूर्वं कर्मैव तस्थितः ॥ ३ ॥

अयो भासते न हि तदा साक्षिणानुभूयमानस्य विषयस्य बहिराश्रयेवस्थानमस्ति ॥ तथाचेदं स्मरामीति परामर्शयो
ग्यतया द्रष्टृरूपस्यैतयानुभवस्यावश्यभावात्तदा चित्तमेव स्मर्यमाणाधिकरणतया द्रष्टृयते इति सिद्धमतः ॥ कर
णस्य साक्षित्वं त्यक्तत्वमिति ॥ ३ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥ श्रीरामाय नमः ॥ ॥ श्रीकृष्णाय नमः ॥ ॥ २

आत्मैव द्रष्टा दृश्यं चेति भ्रान्त्या मे मिरेतस्य गतमेव वासनाहृयमात्माप द्रष्टृयतीति दृश्यं स्मरामि द्रष्टृत्वानुभवस्यान्यथासि
द्धत्वान्नातः ॥ करणस्य साक्षित्वं त्यक्तत्वात्सांक्याह ॥ द्रष्टृस्यैति ॥ विमतं दृश्यं द्रष्टृरत्वं तं भिन्नं दृश्यत्वात् घटवदिस्तु
के द्रष्टृदृश्ययोर्भेदे पि परिणामत्वेनसाजात्यसम्भवाद्रष्टुः सजातीयमेतद्दृश्यमपि स्यान्नां क्याह ॥ दृश्यादिति ॥ द्रष्टासं
देव दृश्याय सजातीयो दृश्यानां स्वचेतनत्वानुपपत्तेरित्यर्थः ॥ विपक्षे दोषमाह ॥ नाधीवदिति ॥ अन्यथा द्रष्टृदृश्य

द्रष्टुस्यान्यदेवेदं दृश्यं दृश्यत्वात् घटवत्सदा ॥ दृश्यात् द्रष्टा सजातीयो न धीवत्साक्षिता
न्यथा ॥ ४ ॥

योरसजातीयत्वानंगीकारे द्रष्टुः ॥ परिणामित्वाद्धीवत्साक्षिता न स्यात्तामान्यादित्यर्थः ॥ ४ ॥ ननु नभवत्येवात्मा
साक्षी तस्य ग्राह्यग्राहिजातिमन्त्रेयासविज्ञोपत्तात्कर्माधिकारित्वेन परिणामित्वोपपत्तेरित्यानां क्याह ॥ स्वात्मेति
॥ असोजात्यादि अहं ग्रहणत्वादि आदिना बन्धादयो वस्याह्रिग्गृह्यते स्वात्मबुद्धिस्वस्मिन्नात्मीलीयाभिमाने जलं
मिथ्यादृष्टिमपेक्ष्यावि धीनां प्रयोजकैः ॥ एवं सति कः स्वान्तरान्यथा पयानं वबद्धृत्वात्तमाणे देहा ममभाता मेवदि

उप.स. ३ तावेत्यध्यासानुसारेण संस्कारप्रयोजको दृश्यते॥ तदभावे न दृश्यत इति योजना॥ तेन हेतुना न दृष्टं व वदेव आत्मा उ.वि.१५
दिरात्मधर्मो न भवतीत्यर्थः॥ अन्यथा जात्यादिमत्त्वे त्वात्मनो घटादिवदनात्मता प्रसज्येतेति योजनीयं तस्मात्स्वाद्देहे
वात्मा न कर्माधिकारितया परिणमीति भावः॥५॥ ननु नाध्याससंनिबंधनं कर्तृत्वं विदुषो विमोक्षाय क्रियानुष्ठाना
दिति चेन्नेत्याह॥ नविद्येति॥ अदेहत्वमशरीरत्वं हि मोक्षस्तन्न क्रियाफलं क्रियानुसुखदुःखे प्रसिद्धे तेनुनात्रा

स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः॥ जात्यादिः शववत्त्वेन तद्धानात्मतात्म
था॥५॥ न विद्याविषयस्तूक्तेर्नादेहत्वं क्रियाफलं॥ देहयोगः क्रियाहेतुस्तस्माद्विद्वान्क्रि
यास्त्यजेत्॥६

रीरस्य दृष्टेः श्रुतेर्वा॥ अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इत्युक्तेः॥ श्रुत्यैव मुक्तत्वादि
त्यर्थः॥ क्रियाहेतुर्यस्य स क्रियाहेतुर्देहयोगः॥ क्रियया देहसंबंध एव साध्यो न मोक्ष इत्यर्थः॥ यस्मादेवं तस्माद्विद्वा ३
न्न कर्मसाध्या मुक्तिः किंतु ज्ञानैकसाध्येति ज्ञानं न क्रिया॥ सर्वाणि साहंकाराणि कर्माणि त्यजेत् संन्यस्य श्रवणा
दिनिष्ठो भवेदित्यर्थः॥६॥

ननु सर्वेषां कर्मणामात्मकर्तृत्वप्रतीतेर्न विद्वान्क्रियास्त्यक्तुं शक्नुयादिति चेन्नेत्याह॥ कर्मस्विति॥ आत्मा
चेत्कर्मसु स्वतन्त्रः॥ कर्त्तेति हि निवृत्तौ च कर्मत्यागरूपे च प्रेप्यतां॥ यथा रागादिमान्प्रवृत्तिलक्षणे कर्मणि स्वतन्त्र
स्तथा विमुक्तत्वो वीतरागस्त्यागेपि स्वतन्त्र इष्यतां कर्मसाध्यफलाभिलाषाभावे कर्मत्यागस्यार्थप्राप्तत्वादित्य
र्थः॥ एतदेव स्पष्टयत्यदेहत्व इति॥ देहसंबंधशून्ये फले मोक्षलक्षणे अकार्ये केनापि कर्मणा साध्ये
ज्ञात्वा हि नो ज्ञाते सति क्रियाः॥ कथं कुर्यान्न कुर्यादेवेत्यभिः॥ प्रयोजनाभावादित्यर्थः॥७॥ किं क्रियापरित्यागमात्रे

कर्मस्वात्मा स्वतन्त्रश्चेन्निवृत्तौ च तथेष्यतां॥ अदेहत्वे फले कार्ये ज्ञाते कुर्यात्कथं क्रियाः॥७॥

णा कार्यविदेहकैवल्यं प्राप्यते नेत्याह॥ जात्यादीनिति॥ बुधः पंडितो बुद्धिमान्कर्मणां निमित्तभूतान्जात्यादीन्संप
रित्यज्य जात्याद्यभिमानं परित्यज्य तत्स्वरूपं कर्महेतुविरुद्धं कर्महेतुविरुद्धं कर्मनिमित्तोपमर्दकं शुद्धात्मस्वरूपं ता
ज्ञात्वा तोयथाशास्त्रोक्तं तथा स्मरेदनुचिंतयेदित्यर्थः॥८॥ शास्त्रमिति बोधो हरन्नुस्मर्तव्यमात्मरूपं विनाशरूपत्वात्मकद
त्या[illegible]स्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति॥ ॥

उप.स. ४ सर्वभूतेषु चात्मानं ततो न विजुगुप्सत इति मंत्रार्थः॥ पूर्वार्धेनोच्यते॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपा उ.वि.१५
पविद्धमिति मंत्रार्थं सार्धश्लोकेनाह॥ पर्यगादिति॥ एवं हृदयोजनात्सर्वभूतेषु हंसेक एवात्मा॥ न चेतनभेदोस्ति तर्हि
किंभूतान्यधिकरणमात्मनो नेत्याह॥ तानीति॥ तानि च भूतानि तस्मिन्नात्मन्येवाध्यस्तानि न तु ततः पृथक् वर्त्तंते तत्पा
च स्वाध्यस्तसकलविकारानुस्यूतसत्तास्फूर्तिरूपो विकारोपमर्देनानुसंधेय इत्यर्थः॥ स्वयमेति॥ अंतः सुषिररूपे

जात्यादीन्संपरित्यज्य निमित्तं कर्मणां बुधः॥ कर्महेतुविरुद्धं यत्स्वरूपं शास्त्रतः स्मरेत्॥८॥
आत्मैकः सर्वभूतेषु तानि तस्मिंश्च खे यथा॥ पर्यगाद्व्योमवत्सर्वं शुक्रं दीप्तिमदिष्यते॥९॥

ण बहिरवकाशरूपेण बहिरवकाशरूपेण वर्त्तमाने आकाशे यथा भूतसंबंधस्तथेत्यर्थः॥ पर्यगादात्मा व्योमवत्स
र्वत्र सत्तामात्रेण परिपूर्णमतादृगात्मा गतवान्सर्वमतोपमात्मानान्न किंचिदव्याप्तमस्तीत्यर्थः॥ तथा च व्योम्नेवानेनेन च ४
किंचनानावृतं तेनेन किंचनासंवृतमिति॥ शुक्रमिति मंत्रपदं तस्य व्याख्यानं दीप्तिमदिति॥ अकायमव्रणं शुद्धं तदा
त्मस्वरूपमिष्यत इत्यर्थः॥९॥

अव्रणमस्नाविरमिति पदयोरर्थमाह॥ व्रणेति॥ व्रणशिराजालनिरासेन स्थूलदेहात्मत्वमात्मनोपोह्यमित्यर्थ
ः॥ शुद्धमपापविद्धमित्यनयोरर्थमाह॥ शुद्धेति॥ शुद्धं रागादिदोषहीनमत एवापापं पुण्यपापहीनं तस्मात्कार
णाभावादेव [illegible]रः खादितदनुभवसंस्कारलेपहीनमित्यर्थः॥ अकायमिति मंत्रपदं तत्सूक्ष्मदेहात्मतानिरसनी
यमित्याह॥ लिंग[illegible]निवारयेदिति सर्वत्रानुषंगः॥ स्थूलसूक्ष्मदेहतत्कार्यतद्वासनाभ्यो वृत्तः सम एकोपरिच्छिन्न
आत्मेति सदा चिंतयेदिहेत्यर्थः॥१०॥ य एवं यथोक्तमात्मानं वेत्ति स ब्रह्मविदामुत्तम इत्याह॥ वासुदेव इति॥ वा

व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत्॥ शुद्धापापतया लेपं लिंगं चाकायमित्यतः॥१०
॥ वासुदेवो यथाश्वत्थे स्वदेहे चाब्रवीत्समं॥ तद्वद्विज्ञाय आत्मानं समं स ब्रह्मवित्तमः॥११॥ य
था ह्यन्यशरीरेषु सममाहं तान च क्ष्यते॥

सुदेवे भगवान्कृष्णो यथाश्वत्थे निकृष्टोपाधौ स्वदेहे चाविर्भूतविज्ञा
नैश्वर्यशक्तिमहात्माधिष्ठिते उत्कृष्टोपाधौ च यथा सममविशिष्टमात्मानमब्रवीदश्वत्थः सर्ववृक्षाणामिति॥ वृष्णी
नां वासुदेवोस्मीति च तद्वद्य आत्मानं सममनुपाधिकं तथैव व्यापो हि नैकरूपं वेत्ति सोतिशयेन ब्रह्मविदित्यर्थः॥११॥ वा
सुदेवस्य युक्तं सर्वत्र समात्मदर्शनं तस्योपाधिषु सममाहंकाररहितत्वान्न तु मुमुक्षोस्तस्य तद्विपरीत्यादित्यत आह॥
यथाहीति॥ अन्यशरीरेषु बहिर्दृश्यमानेषु देहेषु यथा सममाहं तामसमाह॥

सोऽभिमानोनाच्चेष्यते तस्य दृश्यत्वेनानात्मत्वनिश्चयात्तथाप्यस्मिं स्थापितत्वाभिमते देहे हे ममाहंतानेष्यते कृत॥ धीसाक्षि॰
त्वाविशेषतः॥ उभयदेहाकारपरिणतबुद्धिसाक्षित्वाविशेषादित्यर्थः॥ तथा चात्मतत्त्वालोचनया देहंकारादेरनवस
रत्वाद्धामुदेववत्समात्मदर्शने युक्तमेवेति भावः॥ १२॥ एतद्दृष्टान्तयोपदंशमान्नास्ति मुमुक्षोरभिमानाभाव इति चेन्नेत्या
ह॥ रूपेति॥ नीलादिरूपसंस्कारेण तुल्यः समानः आधीः आश्रयोऽस्तीरागद्वेषो रूपसंस्कारतुल्या धीपक्षेऽन्वयं तदपि त
त्समानाश्रयमिति संस्कारेणापस्याश्रयस्य प्रागुद्भूतावस्थासमानावस्थांतरापादकोऽतींद्रियो धर्मः॥ ततश्चायमर्थः रू

अस्मिं स्थापितथा देहे धीसाक्षित्वाविशेषतः॥ १२॥ रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत॥ ग
ह्यते धीश्रयं तस्मात्तज्ज्ञाताशुद्धो न यः सदा॥ १३॥ ॥

पाद्याकारपरिणतांतःकरणे हि रूपादिसंस्कारः पुन
रपि रूपाद्याकारपरिणामहेतुर्विद्यते॥ तत्रैव च रागद्वेषौ रूपादिदर्शननिमित्तौ तन्निमित्तकं च भयं तत्रैव कामः संकल्पो वि
चिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुतेः॥ यस्माद्धीश्रयं बुद्धिसंश्रयमेव रागद्वेषौ भयं चेति त
यमात्मना गृह्यते नात्मसंश्रयं तस्मात्तज्ज्ञाता शुद्धो रागादिरहितो न यश्च सदेति॥ १३॥ ॥श्रीरामाय नमः॥ ॥श्री॥ ॥ ५

ननु न सदा शुद्ध आत्मा॥ किंतु॥ यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः॥ प्रेत्य भवतीति श्रुतेः यं यं वापि स्मर
न् भावं त्यजत्यंते कलेवरं॥ तं तमेवैति कौंतेय सदा तद्भावभावितः॥ इति स्मृतेश्च पूर्वमशुद्धोऽपि पुरुषो ब्रह्मभावनया
शुद्धः॥ पश्चाच्छुद्धो भविष्यतीत्याशंक्याह॥ यन्मना इति॥ यस्मिन् ध्येये देवादौ मनो यस्य स यन्मना ध्याता पुरुषः स
तन्मयो ध्येयदेवादिमयो भवति॥ ध्यातृध्येययोरन्यत्वे सति ध्यानक्रियायास्तत्रार्थवत्त्वसंभवादित्यर्थः॥ न पुन

यन्मनास्तन्मयोऽन्यत्वेनात्मत्वात्तौ क्रियात्मनि॥ आत्मत्वे चानपेक्ष
त्वात्सापेक्षं हि निततत्स्वयं॥ १४॥ रक्तमिवैकरसात्मतिरविभक्ताजराम
रा॥ चतुराद्युपधानात्ताविपरीता विभाव्यते॥ १५॥ ॥ ॥

रात्मत्वाद्वै आत्मस्वरूपावस्वरूपावस्थानमात्रस्यार्थमात्मनि क्रियाध्यानादिरूपापेक्षत इत्यर्थः॥ तत्र हेतुः॥ आ
त्मत्व इति॥ मोहस्वरूपस्य ब्रह्मण आत्मत्वे सति तस्य चतुर्विधक्रियाफ॥ न विजहातण त्वात्क्रियाया अनपेक्षत्वा
दित्यर्थः॥ मोहमात्रव्यवधानाच्चोत्तेन क्रियापेक्षेति॥ चकारार्थः॥ विपक्षे दोषमाह॥ सापेक्षं हीति॥ ॥श्रीः॥ ॥

उप॰स॰ ६ यदि क्रियासापेक्षत्वं कैवल्यं न वेत्तर्हि तत्स्वयमात्मरूपं न स्यात्॥ क्रियासाध्यस्यानात्मत्वादनित्यत्वाच्चेत्यर्थः॥ त प्र॰वि॰ १५
स्मात्तत्सदा शुद्धत्वात्तस्मिन्नभ्यासो मिथ्याध्यास इति भावः॥१४॥ विनाशादिमज्ज्ञानाभावाच्चिदेकरसत्वाच्च
चात्मा सदा शुद्धत्वादभ्युपेय इत्याह॥ स्वमिवेति॥ यद्येवं स्वभावैषा ज्ञप्तिस्तर्हि तस्या जन्मविनाशौ न दृष्टौ प्रतिभा
सः॥ कथमित्याशङ्क्याह चक्षुराद्युपाधिसंसर्गदोषादित्याह॥ चक्षुरादीति॥१५॥ आत्मनः प्रतिपादितममत्वे

दृश्यत्वादहमित्येषो नात्मधर्मो घटादिवत्॥ तथान्ये
प्रत्यया ज्ञेया दोषाश्चात्मामलो ह्यतः॥१६॥ ॥श्री॥ ॥

विशदयति॥ दृश्यत्वादिति॥ अहमित्येषोऽहमिति प्रत्ययो नात्मधर्मो नात्मनिष्ठो दृश्यत्वात् घटवत्॥ तथान्ये
प्रत्ययाः परिणामा दोषाः॥ दोषरूपा रागादयो नात्मधर्मा ज्ञेया हि यस्मादतः आत्मामलो हि निर्मल एवेत्यर्थ ६
ः॥१६॥

अहंकारादीनामात्मधर्मत्वाभावेऽपि नात्मनो विशुद्धिः॥ सिद्ध्यति विकारित्वात् परिच्छिन्नत्वाच्चेत्याशंक्याह
॥ सर्वप्रत्ययेति॥ विपक्षे दोषमाह॥ विक्रियेतेति विक्रियेत परिच्छिन्नो वा यद्यात्मा तर्हि अल्पविद्भवे
मात्रावभासको न वेद्बुद्ध्यादीव बुद्धिवृत्तिमनोवदित्यक्षरार्थः॥ बुद्ध्यादिप्रत्ययेन तत्प्रतिभासो नेष्यते अन्यथा स्वरूप
तोऽचेतनत्वादि दृग्नायोगवत्त्वेनाल्पवित्त्वं तच्च नमनुपपन्नं स्यात्तत्र बुद्धेः॥ साभासो या विषयावभासनमात्रे उपहीन
परिणामायाथ पूर्वापरानुभूतितद्रवस्यात् तद्विचारानुसंधानाभावो विक्रियावत्त्वात् तथा च द्रष्टुरपि विक्रियावत्त्वे

सर्वप्रत्ययसाक्षित्वादविकारी च सर्वगः॥ विक्रियेत यदि द्रष्टा बुद्ध्यादीवाल्पविद्भवेत्॥१७॥

नुसंधानाभावप्रसंगात्सर्वव्यवहारविलोपप्रसंग इति भावः॥१७॥ द्रष्टुरात्मनो विबुद्धिवदल्पवित्त्वमेव तान्तस्यास
धनाधीनत्वात्स्यात् तन्निविनाशवत्त्वादिति चेन्नेत्याह॥ न दृष्टिरिति॥ यथैव चक्षुरादिद्वारक दृष्टिर्लुप्यते परिणामित्वात्
तथा द्रष्टुरात्मनो दृष्टिर्लुप्यते अपरिणाम्यात्मस्वरूपत्वात्स्यादित्यर्थः॥ तदेवेनित्यत्वेन हि द्रष्टुर्दृष्टेर्विपरिलोपो
विद्यते विनाशत्वादिति हि श्रुतेर्लोक इत्यर्थः॥ यस्मात् प्रमाणसिद्धमिदं तस्मादित्यर्थः॥ ॥श्रीकृष्णायनमः॥ ॥

सदैव दृक् एकरूपदृशिस्वभाव इत्यर्थः ॥ सदैक इति पाठे भुंक्ते पश्यतीति भुक् साक्षीत्यर्थः ॥ १८ ॥ यस्मादेवमा
त्मा शुद्धस्वभावो विमलत्वापाधिसंबंधादन्यथा प्रतीयते तस्माद्दीत्मानं ब्रह्मत्वेन प्रतिपत्तुं पदार्थविवेकं कुर्यान्मुमु
क्षुरित्याह ॥ संघातो वेति ॥ अथ परः ॥ अहमिति तावदात्मावभासते स भासमानोहं मनुष्य ॥ कृशः स्थूल इत्यादि
भूतसंघातात्मकदेहरूपः ॥ स्फुरतीति तद्विद्युच्यते ॥ संघातो वास्मि भूतानामिति ॥ तथाहं द्रष्टा श्रोता रसयिता को

न दृशिर्लुप्यते द्रष्टुः कर्ता दृश्यस्य पैव तत् ॥ नहि द्रष्टुरितिह्युक्तं तस्माद्द्रष्टा सदैव दृक् ॥ १८ ॥ संघा
तो वास्मि भूतानां करणानां तथैव च ॥ व्यस्तं वान्यतमो वास्मि को वास्मीति विचारयेत् ॥ १९ ॥ ॥

णो वधिर इति करणो व्यपदेशमुखेन दृश्यते अतः ॥ करणसंघातो वाहमिति ॥ तत्रापि पृथक् प्रयोगो वाहंकारद
र्शनाद्यस्तमेवैकं केवेंद्रियमहमस्मि ॥ अथ वेकस्मिन्देहेनेकात्मत्वे कर्तृत्वे मत्यसमवायो भोगव्यवस्थानुपप
त्तेरन्यतमो वास्मीद्रियसंघातादन्यो वा तद्धिष्ठातास्मि ॥ येद्यन्यतमस्तर्हि सकोवातः ॥ करणप्राणाद्यन्यतमः ॥
किंवा तत्साक्षी तद्विलक्षणस्वभाव इति विचारयेत् ॥ १९ ॥ ॥

व्यस्तंनाहमिति ॥ भूतं चेंद्रियं वा समस्तं व्यस्तं वा नाहमस्मि ज्ञेयत्वाद् चेतनत्वात् घटादिवत्करणत्वात् कुठा
रादिवद्विति यथायोग्यं योज्यं ॥ तस्मात् ज्ञाता चेतनोन्योंतःकरणप्राणादिभ्योप्यचेतनेभ्य इत्यनेनान्वयव्यति
रेकालोचनेन विवेकः ॥ कार्य इत्यर्थः ॥ २० ॥ इदानीं साक्षिसाक्ष्योरन्वयव्यतिरेकालोचनेनावस्थात्रयविवेकद्वार

व्यस्तं नाहं समस्तं वा भूतमिंद्रियमेव वा ॥ ज्ञेयत्वात्करणत्वाच्च ज्ञाता
न्योस्माद्घटादिवत् ॥ २० ॥ आत्माग्नेरिंधना बुद्धिरविद्याकामकर्मभि
॥ दीपिता प्रज्वलत्येषा द्वारैः श्रोत्रादिभिः ॥ सदा ॥ २१ ॥ ॥ श्री ॥ ॥

ण साक्षिणस्तुरीयस्याधिगमप्रकारमुपदर्शयते माह ॥ आत्माग्नेरित्यादिना ॥ तत्रैवं सतीत्यतः ॥ प्राक्तनेक्तो ॥ आत्मै
वाग्निस्तस्येंधना इव्यते प्रकाश्यते व्यवहारयोग्यः ॥ क्रियते अनयेतींधना बुद्धिरात्मचैतन्यस्य विशेषाकारतया
भिव्यक्तिकारणभूतेत्यर्थः ॥ साविद्याकामकर्मभिर्दीपिता उत्तेजिता वायुनेवाग्निस्थमिंधनमाध्माता सती प्रज्वलति

उ.वि.१५

उप.स. ८ चैतन्यग्रस्ततया प्रकाशमाना जायते अभिव्यक्ताग्निना दह्यमानमिंधनमित्यर्थः॥ गवाक्षेभ्यो निः॥ स तद्दीपप्र
भान्यायेन श्रोत्रादिभिश्छिद्रैर्निर्गता सती सदा प्रज्वलत्येवेति योजना॥ श्रोत्राद्यौ धनाछिद्रपकानिर्दृष्टा प्रयोजनं
व्यवहारकाले विषयग्रहणस्य होमत्वभावनात् तत्फलं च विषये प्रासक्तिनिवृत्तिरिति द्रष्टव्यं॥२१॥ एवं विधबु
ध्यवस्था जागरणतस्यामोत्मा स्थूलपदार्थमनुभवतीत्याह॥ दृष्टिलक्षणेति॥ दृष्टिलक्षणस्यागस्य पुरुषे प्रवृत्त्वप्रा

दृष्टिलक्षणदृप्रधाने पुरुषे बुद्धिर्विचेष्टिते॥ विषयैर्ह
विषादीप्त आत्माग्निः स्थूलभुक्तदा॥२२॥ ॥ ॥

देरिदं विशेषणं दृष्टिप्रधाने मुख्यं येषामिंद्रियाणां तेषु बुद्धिर्यदा विचेष्टते व्यापारवती भवति हविः॥ स्थानीयैर्वि ८
षयैर्दीप्ता विषयव्याप्ततदाकारेण दीप्यमाना सती तदात्माग्निः॥ स्थूलभुक् स्थूलविषयाणां भोक्ता जाग्रती
त्युच्यते इत्यर्थः॥२२॥

रूपं कनिरूपणफलं स्पृशति॥ गृह्यंत इति॥ रूपादिग्रहणे विषयग्रहणसमये रागद्वेषः॥ नौ मनसो म
नो आसेन रागद्वेषावकुर्वन् हविर्मान्यात्माग्नौ हूयंत इति स्मरन्॥ धर्मयन्नात्मा जाग्रद्दोषैर्विषयोपलब्धिनि
बंधनैः॥ पुण्यापुण्यपुण्यजन्यैर्दोषैर्न लिप्यते न संश्लिष्यत इत्यर्थः॥२३॥ इदानीं स्वप्नावस्थामाह॥ मानसेत्विति॥ म

हूयंते तु हवींषीति रूपादिग्रहणे स्मरन्॥ रागद्वेषैरात्माग्नौ जाग्रद्दोषैर्न लिप्यते॥२३॥ मानसे
तु गृहे व्यक्तः सोविद्याकर्मवासनां॥ पश्यंस्तैजस आत्मोक्तः स्वयंज्योतिः प्रकाशितः॥२४॥ ॥ ॥

नः परिणामोपाधिर्मनसि संग्रहं सः॥ तत्राभिव्यक्तः आत्माविद्याप्रयुक्तकर्मोद्भूतवासना विद्याकर्मवासनेत्युच्यते॥ तां
विषयाकारापन्नां पश्यंस्तैजस इत्युक्तो विद्वद्भिः॥ तेजसि वासनामये विषये योऽभिव्यक्त इति व्युत्पत्तेरित्यर्थः॥ तत्र भासमानः
कर्मसुखदुःखादीनां मनोमात्रत्वात्तस्य च स्वप्रकाशत्वेनैव तदवस्थानादात्मनः॥ उपाध्यंतराभावे सति बाह्यस्यादित्यादिः

उप॰स॰ ९ ज्योतिष्ट्वं तदानीमुपरतमात्रात्मैव स्वयंज्योतिः सन्॥ प्रकाशतात्माहीनवतीत्यर्थः॥ तथा च श्रुतिः॥ दृष्ट्वैव पुण्यं उ॰वि॰१
च पापं चेति॥ अत्रायं पुरुषः॥ स्वयंज्योतिर्भवतीति॥२४॥ सुषुप्तिमाह॥ विषया इति॥ यदा इति॥ यदा बुद्धावेतः॥ कर
णविषयाः॥ स्थूला वासना स्वप्नसूक्ष्माः॥ स्वप्नदृश्या स्वकर्मभिर्न चोद्यन्ते नोद्भूताः॥ क्रियन्ते तदात्मा प्राज्ञो ज्ञेयस्तत्र स्व

विषया वासना वापि चोद्यन्ते नैव कर्मभिः॥ यदा बुद्धौ
तदा ज्ञेयः प्राज्ञ आत्मा ह्यनन्यदृक्॥२५॥ ॥ ॥

तकस्तु सामवतीत्यर्थः॥ प्रज्ञातिज्ञायात दाप्राज्ञ इति॥ व्यतात्मिमनिक्रत्यविज्ञानछि॥ अनन्यदृगिति॥ अन्यदा ९
त्मव्यतिरिक्तं विषयं वासनां वा न पश्यतीत्यनन्यदृक् प्रविशिष्टज्ञप्तरूप इत्यर्थः॥२५॥ ॥श्रीकृष्णायनमः॥ ॥

एवमवस्थात्रयेण दृश्यं चात्मानं द्रष्टृदृश्यभावेन विविच्य द्रष्टेनाभिमानिसहितावस्थात्रयसाक्षितया विश्वा
दित्रयापेक्षया तुरीयं प्रपञ्चवर्जितं चात्मानं नित्यविज्ञप्तिस्वभावमुपलम्भयति॥ मनो बुद्धीति॥ इन्द्रियाणामवस्था जागरणं
मनोऽवस्था स्वप्नं बुद्ध्यवस्था सुषुप्तिरिति विभागः॥ स्पष्टमन्यत्॥२६॥ मनुपद्योत्मानिर्विकार एव साक्षी कथं तर्हि बु

मनोबुद्धीन्द्रियाणां या अवस्थाः कर्मचोदिताः॥ चैतन्येनैव भास्यन्ते
रविणेव घटादयः॥२६॥ तत्रैवं सति बुद्ध्यादेः आत्माभासावभासय
न्॥ कर्त्तासौ परयात्स्वाम्यात् तैरेवाभिधीयते॥२७॥ ॥श्रीनाथजीः॥

ध्यादीनां कर्त्तोच्यते वत्राह॥ तत्रैवं सतीति॥ तत्र तस्मिन्नात्मनि एवं सति अवस्थात्रये ध्यस्ते सति सावस्थाः॥ बुद्धीः॥
आत्माभासास्वचैतन्याभासेनावभासयन् सन् आत्मा तासां कर्त्तेति मूढैः॥ आत्माचार्योपदेशरहितैरभिधीयते व्यपा
दिश्यत इति योजना॥ तथा व्यवहारप्रवृत्तौ निमित्तं सत्यं च बुद्धिविज्ञानछि॥ परयाश्चात् इति परस्यात्मनः सुखदुः॥ ॥

उ.प.स. स्वप्रतिभासार्थस्याभासयन्निति कर्मोऽद्राक्षितबुध्यवस्थानुगतचिदाभासाविवेकादात्मा स्वमिति कर्त्तेत्युच्यते मूढैरि प्र.वि.१५
१० त्यर्थः ॥ २७ ॥ एवमज्ञानेन तत्कार्येण च प्रतिबिंबितस्य चिदात्मनो ज्ञातृत्वमुपाधिनिबंधनमुक्त्वा इदानीं सर्वज्ञत्वं सर्वकर्तृत्वं
च तस्यैव मायोपाधिप्रतिबिंबवशादिति व्युत्पादयति ॥ सर्वज्ञोपीति ॥ ज्ञातृत्वे युक्तमेवं विभ्रादयति ॥ स्वेनेति ॥ स्वा°

सर्वज्ञोप्यत एव स्यात्स्वेनाभासावभासयन् ॥ सर्वं
सर्वक्रियाहेतोः सर्वकृत्त्वं तथात्मनः ॥२८॥ ॥

त्माश्रयविषयकमायाविवर्त्तं सर्वं स्वचैतन्येनादित्यप्रकाशवद्विकृतेनाभासयन् सर्वज्ञ उच्यते ॥ न पुनः सर्वविषय
ज्ञानकर्तृत्वेनेत्यर्थः ॥ तथा तद्वन्मायानिबंधनमेवात्मनः सर्वकृत्त्वं तदेवाह ॥ सर्वक्रियाहेतोरिति ॥ सन्निधिसत्ता १०
मात्रेणाभ्रामकवत्सर्वकारकप्रवृत्तिहेतुत्वादित्यर्थः ॥२८॥

तदेवमवस्थात्रयसाक्षितया विविक्तशुद्धचिद्रूपस्यात्मनः कार्यकारणात्मकमायोपाधिवशात् ज्ञातृत्वकर्तृ
त्वसर्वज्ञत्वादिव्यवहारास्पदत्वेन स्वभावत इत्युक्तमर्थमनूद्य किं तत्स्वाभाविकं बिंबकल्पमात्मस्वरूपमित्यपेक्षा
यामाह ॥ सोपाधिश्चेति ॥ यस्तु निरूपाख्यो विधितयोद्देशयोग्यो न भवति सोनुपाधिकः सर्वव्यवहारातीत इत्यर्थः ॥
गुणावयवशून्यत्वात् शुद्धः कूटस्थ इत्यर्थः ॥ निरूपाख्यत्वमुक्तं व्यनक्ति ॥ तमिति ॥ २९ ॥ मनोवागगम्यत्वं साधयति
॥ चेतन इति ॥ अयमर्थः ॥ अहमिति प्रत्ययो तावत् पराग्व्यावृत्ततयात्मानं प्रत्यंचमवगाहत इत्यविवादं तो चेतद्यु

सोपाधिश्चैवमात्मोक्तो निरूपाख्योनुपाधिकः ॥ निष्कलो निर्गुणः शुद्धस्तं मनो वाक् च नाप्नुतः ॥२९
चेतनोचेतनो वापि कर्ताकर्ता गतागतः ॥ बद्धो मुक्तस्तथा चैको नैकः शुद्धोन्यथेति वा ॥३०॥ ॥ ॥

क्तमेवात्मानं गोचरयेत्तदा प्रत्यक्षोपलब्धो घटाकाशादिवद्वादिनां विप्रतिपत्त्यभाव एव स्यात् विप्रतिपद्यंते तेषु
देहेंद्रियमनोबुद्धीनामन्यतमो चेतन एवात्मेति वेदबाह्याः ॥ तदन्यश्चेतन इति वेदवादिनस्तेष्वपि केचित्कर्त्तेति केचिद
कर्त्तेति गतो व्यापको गतो व्यापको वाणुपरिमाणो देहपरिमाणो वेति केचिद्बद्धो जीवो मुक्तोन्यश्चेश्वरस्तथा सर्वशरीरग
कोनेको वा शुद्धो रागादिगुणरहितोन्यथा तद्युक्तश्चेति ॥३०॥ ॥ ॥

उप०स०
११

अतो विप्रतिपत्तेरयथाभूतात्ममात्रगोचरत्वादसमर्थौ शब्दप्रत्ययौ शुद्धात्मनीत्याह ॥ अप्राप्येति ॥ कथमात्मा प्र०वि०१५
प्राप्तिर्वाचां धियामिति चेत्परमार्थतः ॥ प्रवृत्तिबीजाभावादित्याह ॥ निर्गुणत्वादिति ॥ रूपादिगुणहीनत्वाद्बाह्येन्द्रियद्वार
कधीभिस्तावदात्मा न प्राप्यते मनसश्च बाह्येन्द्रियद्वारोपलब्धविषयातिरेकेण स्वतंत्रस्य विषयस्यानिरू
पणात्तद्गोचरमात्मानं तन्न प्राप्नोति क्रियाभावाच्चात्मनो मनोगोचरत्वाभावः ॥ न हि क्रियाहीनेन वह्निना वस्तु निक्षि

अप्राप्यैव निवर्तन्ते वाचो धीभिः सहैव तु ॥ निर्गुणत्वात्क्रियाभावाद्विशेषाणामभावतः ॥ ३ ॥ ॥

यौवदनुगतिमात्रेण दृष्टधर्मोपजनिः संभवति ॥ घटादिनानुगते गगने तद्दर्शनात्तस्यात्मनः संयोगजत्वानासं
योगजत्वानां संभवान्मनसो विप्राप्य आत्मेत्यर्थः ॥ तथा विशेषाणां गोधनरूपाणां बाह्यानां स्वगतानां वा जात्यादीनां प्र ११
वृत्तिनिमित्तानामभावाल्लक्षणयापि प्राप्नोत्यात्मानं नेत्यर्थः ॥ तथा च श्रुतिः ॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति ॥ न
चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वेति च ॥ ३ ॥ ॥

अविषयस्यात्मनः ॥ कथं वेदांतवेदनीयत्वमित्याशंक्य लक्षणयैव तन्नैत्यभिप्रेत्याह ॥ व्यापकमिति ॥ सर्वैः ॥ मू
र्तैः ॥ सर्वतो वियोजितं परिच्छेदप्रतिभासहेतूपाधिवर्जितं व्यापकं स्वरूपतोऽपरिच्छिन्नं च व्योम यथा तद्वदेव शुद्धम
वस्थात्रयोपाधिवियोजितमवस्थात्रयोपाधिवियोजितमवस्थात्रयसाक्षीतयातीतया लक्षितं शुद्धमात्मानमिह वेदांतस
मये परं पदं परमात्मानं ब्रह्म विद्यादिति योजना ॥ ३ ॥ एवमात्मतत्त्वे वधारिते पुनरवस्थात्रयाभिमानं न कुर्यादित्याह ॥ दृष्ट

व्यापकं सर्वतो व्योम मूर्तैः सर्वैर्वियोजितं ॥ यथा तद्वदिहात्मानं विद्याच्छु
द्धं परं पदं ॥ ३ ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥ ॥ श्रीकृष्णाय नमः ॥ ॥

मिति ॥ दृष्टं जागरितं तद्वित्वाद्दृष्ट्यो स्वप्ने तत्त्वेवमैकैकक्रियोपरक्तया त्वाभिमानं त्यक्तेत्यर्थः ॥ दर्शनाद्यवस्थाया
मपि निर्विशेषमेकात्मानं मन्वीतेति भावः ॥ तस्मिन्नु दृष्टेऽस्मिस्तत्त्वं न हि त्वा संस्कारद्वारेकत्वात्तत्त्वमुए वेह स्मृति
रुच्यते ॥ अहं स्वप्ने देवो भूवं व्याघ्रो वाभूवमिति तदभिमानं हित्वेत्यर्थः ॥ दृष्ट्यस्य सतस्य मनसोरिकारो सौनात्मन

उप.स. इत्यसंगतामात्मनोनुसंधीतेति भावः ॥ तथा तमः ॥ सुषुप्तिं त्यजेत्वमसौ विश्वोपलं सर्वग्र इति सर्वं ग्रसतीति सर्वग्रः ॥ ब्र.वि.१५
१२ सौत मिदं पदं सुषुप्तेरप्यवभासकतया तु सत्त्वकात्मास्वभाव एवात्मा न तु मूढो ज्ञान वान्येति मन्वीतेत्यर्थः ॥ कोसावव
स्थात्रयस्य स्थिति तत्माह ॥ सर्वदृगिति ॥ सर्वदृक् सर्वसाक्षी त्वया गातव्यो ज्योतिषा युक्तो ज्योतिषां ज्योतिरित्युक्तेन ब्रह्मे

दृश्यं हित्वा स्मृतिं तस्मिन्सर्वग्रस्तत्तमस्त्यजेत् ॥ सर्व
दृग्ज्योतिषा युक्तो दिनकृच्छार्वरं यथा ॥ ३३ ॥ ॥

णैकीभूत इत्यर्थः ॥ यथा दिनकृत्सविता शौर्वर्यं निवं शार्वरं तमः ॥ स्वतेजसा ग्रसित्वा निस्तमस्क एवावतिष्ठत ॥ तथा १२
वस्थाविकारहेतुत्वज्ञानं ब्रह्मेण ज्योतिषाभिभूयाद्वयानंदस्वभाव एवावतिष्ठत इत्यर्थः ॥ ३३ ॥ ॥ श्रीकृष्णायनमः ॥ ॥

उक्तमेव त्याग प्रकारं प्रकटयति ॥ रूपस्मृतीति ॥ रूपस्मृत्यंधकाराजाग्रत्स्वप्नसुषुप्तयो थविषयायेषां प्रत्यया
नांते तथोक्ताः ते यस्य साक्षिणो गोचराः प्रतिभासाः स एवात्मा सर्वभूतेषु द्रष्टा तथापि समो निर्विशेषो यतः सर्वगः परि
च्छेदकरहित इत्यर्थः ॥ ३४ ॥ यद्येव मुक्तस्वभाव एवात्मा कुतस्तस्मिन्विचित्रः संसार प्रत्ययोदयस्तत्राह ॥ आत्मा बुद्धीति

रूपस्मृत्यंधकारार्थाः प्रत्यया यस्य गोचराः ॥ स एवात्मा समो दृष्टा सर्वभूतेषु सर्वगः ॥ ३४ ॥ आ
त्मा बुद्धिर्मनश्चक्षुर्विषयालोकसंगमात् ॥ विचित्रो जायते बुद्धेः प्रत्ययोज्ञानलक्षणः ॥ ३५ ॥ विवि
च्यास्मात्त्वमात्मानं विद्यात्तच्छुद्धं परं पदं ॥ द्रष्टारं सर्वभूतस्थं समं सर्वभयातिगं ॥ ३६ ॥ ॥ ॥

॥ स्वतानोपाधिनिबंधन इत्यर्थः ॥ ३५ ॥ अविद्यात त्कार्योपाधीनामात्मनश्चाविवेकानुपलंभादेव संसार प्रतिभास
इति स्थिते मुमुक्षोः ॥ कर्त्तव्यमुपदिशति ॥ विविच्येति ॥ अस्माद्बुद्ध्यादिसंघातादिविच्य त्वमात्मानं विद्यादिति संबं
धः स्पष्टमन्यत् ॥ ३६ ॥ ॥

उप·स·
१३

वेद्यमेवात्मरूपं पुनर्विशिनष्टि॥ समस्तमिति॥ समस्तमात्मानां सर्वं परं पदं ब्रह्मेति पृथक्पयोन्यामनुरुक्ततायैः अन्य प्र·वि·१५
विधिमुखेन प्रतिषेधमुखेन च ये विशेषा निर्दिष्टास्तान् शेषान्विशेषान् साक्षित्वं ब्रह्मेति निश्चिनुयादिति तात्पर्यार्थ
ः॥२७॥ एवं ब्रह्मात्मरूपेणैव ज्ञातव्यमित्युक्ते पुनर्मुमुक्षुं शिक्षयति॥ सर्वेति॥ सर्वप्रत्ययसाक्षी ज्ञानैकस्वभावेनैकस्व

समस्तं सर्वगं शान्तं विमलं व्योमवत्स्थितम्॥ निःकलं निःक्रियं सर्वं नि
त्यं द्वन्द्वविवर्जितम्॥२७॥ सर्वप्रत्ययसाक्षी त्वं कथं ते योग्यते तु ता॥ वि
मृश्यैव विजानीयात् ज्ञानकर्म न वेति वा॥२८॥

भावो यद्युक्तः॥ स कथं कीदृक्स्वभावो इति विमृश्य निश्चियो जनीयं॥ कथं शास्त्ररूच्चितं विमर्शमेव विभजयते॥ ज्ञेय १३
इति॥ मयोक्तेयज्ञतनज्ञेय इति शेषः॥ यद्दिज्ञेयस्त्वदृपिज्ञानं प्रतिकर्मदानवे स्यैवं विभज्य विजानीयात्तत्त्वमात्मनः इ
त्यर्थः॥२८॥ ॥

एवं विमृश्य ज्ञेयत्वपक्षस्तावन्न संगच्छत इत्याह॥ अदृष्टमिति॥ यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्र
ह्मणो रूपमिति ज्ञेयस्यात्वत्त्वोपदेशाद्ब्रह्मत्वापत्तेरदृष्टमविज्ञातमिति च श्रुतिशासनात् ब्रह्मात्मतत्त्वे ज्ञानकर्मत्वे
न मया अन्यैर्वा कथं च न ज्ञेय इत्यर्थः॥२९॥ यद्येवं ज्ञेयत्वं न संभवति॥ कथं तर्हि आत्मन्येवात्मानं पश्येदित्याद्यु
पदेशा इत्याशंक्याविषयत्वेनाविर्भावमात्रमेवात्मतत्त्वज्ञानेन विषयत्वेन॥ यस्यामतं तस्य मतं मतं यस्य न वेद स इ

अदृष्टं दृष्टविज्ञातं दहरमित्यादिशासनात्॥ नैव ज्ञेयं मया न्यैर्वा परं
ब्रह्म कथं च न॥२९॥ स्वरूपाव्यवधानाभ्यां ज्ञानालोकस्वभावतः॥ अ
न्यज्ञानानपेक्षत्वात् ज्ञातं चैव सदा मया॥३०॥

श्रुतेरिति मन्वानो ज्ञेयत्वपक्षमपि प्रतिक्षिपति॥ स्वरूपेति॥ यत् ज्ञानस्वरूपादन्यत् जडं यच्च व्यवहितं ज्ञानदेशात् तद्
ज्ञेयं ज्ञानसापेक्षत्वात् ज्ञानप्रकाश्यं स्वरूपविषयतया ज्ञेयं भवति॥ न तथेदमात्मतत्त्वं कथं तर्हि अणुज्ञानालो

उप॰स॰ कस्वभावतो ज्ञानप्रकाशस्वरूपत्वात्स्वरूपाव्यवधानाभ्यां हेतुभ्यां अन्यज्ञानानपेक्षत्वाद्विषयत्वेन विज्ञातं न च प्र॰वि॰१५
१४ त्यात्मत्वमितियोजना॥ ज्ञातुरेव ब्रह्मत्वोपदेशात् ज्ञातुस्स्वस्वतेयत्वानुपपत्तेरविज्ञातत्वाभावाच्च सदा मय्याज्ञातं त्व
ब्रह्मात्मतत्त्वमित्यर्थः॥ ४०॥ ज्ञानस्वरूपस्य नान्यज्ञानापेक्षत्वे तद्दृष्टान्तेन साधयति॥ नान्येनेति॥ स्पष्टार्थः॥ ४१॥

नान्येन ज्योतिषा कार्यं रवेरात्मप्रकाशने॥ स्वबोधान्नान्यबोधेच्छा
बोधस्यात्मप्रकाशने ह्यते॥ ४१॥ न तस्यैवान्यतोपेक्षा स्वरूपं यस्य य
द्भवेत्॥ प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन॥ ४२॥ ॥ ॥

दृष्टान्तस्य दार्ष्टान्तिकस्य चैतैरपेक्षमुक्तं साधयति॥ न तस्येति॥ आत्मानान्यतो ज्ञानमपेक्षते तत्स्वरूपत्वाद्यस्य
दृष्टान्तस्य दार्ष्टान्तिकस्य च नैरपेक्ष्यमुक्तं साधयति॥ न तस्येति॥ आत्मा नान्यतो ज्ञानमपेक्षते तत्स्वरूपत्वाद्यस्य १४
स्वरूपं तन्नान्यतस्तदपेक्षते यथा प्रकाशरूपः॥ सविता न प्रकाशमन्यतोपेक्षते तथाचायं तस्मादेवमित्यर्थः॥
स्वरूपं तन्नान्यतस्तदपेक्षते यथा प्रकाशरूपः॥ सविता न प्रकाशमन्यतोपेक्षते तथाचायं तस्मादेवमित्यर्थः॥ ४२॥ ॥ श्रीनाथजी॥
किंच॥ नात्मा प्रकाशान्तरदृश्यः॥ प्रकाशरूपत्वादादित्यवदित्यर्थं विद्दिह॥ प्रकाशान्तरेति॥ ४२॥

ननु प्रकाशान्तरदृश्यत्वाभावेपि स्वरूपप्रकाशादृश्य एव किं न स्यात्तथा सविता घटादि प्रकाशयन्स्वात्मानम
पि प्रकाशयत्येव तथात्मापि दृश्यमवभासयन्स्वात्मानमपि भासयेदिति चेन्नेत्याह॥ व्यक्तिः स्यादिति॥ अप्रकाशा
स्य स्वरूपतः॥ प्रकाशहीनस्य प्रकाशात्मसमागमात् प्रकाशस्वभावसंसर्गमात्राद्व्यक्तिरभिव्यक्तिस्तमोनिवृत्तिलक्ष
णा स्यात्॥ न तत्र प्रकाशगुणोदय इत्यर्थः॥ अतः प्रकाशोर्ककार्य इति मिथ्या व्यपदेशः॥ प्रकाशावगुंठितेवस्तुनि प्र

व्यक्तिः स्यादप्रकाशस्य प्रकाशात्मसमागमात्॥ प्रकाशस्त्वर्ककार्यः स्यादिति मिथ्यावचो ह्यतः॥
४३॥ यतोभूत्वा भवेद्यच्च तस्य तत्कार्यमिष्यते॥ स्वस्वरूपत्वादभूत्वा न प्रकाशो जायते रवेः॥ ४४॥ ॥

काशोदयाभावेपि व्यक्तताभावस्तत्प्रकाशतादर्शनादित्यर्थः॥ तस्मादसमानस्वरूपसंसर्ग एव नास्य स्याभिव्यक्तिरि
ति॥ प्रकाशस्वभावस्य सवितुर्नान्यप्रकाश्यतावात्तप्रकाशतास्तीति न दृष्टान्तस्य सिद्धिरतो न दार्ष्टान्तिकसिद्धिस्त्वस्य
दिति भावः॥ ४३॥ घटादि प्रकाशः कस्मादर्ककार्यो न भवतीति चेत्तत्राह॥ यतोभूत्वेति॥ यत्तु प्रागभूत्वा यतो भवेत्तत्त
स्य कार्यमिष्यत इति संबंधः॥ स्पष्टमन्यत्॥ ४४॥

प्र.स. १५ कथं तर्हि प्रकाशस्वरूपस्यादित्यस्य प्रकाशयितृत्वमात्मनश्च बोधमात्रस्वभावस्य बोधत्वं व्यपदिश्यते तत्राह प्र.वि.१५५
॥सत्तामात्र इति॥ प्रकाशस्य संनिधिसत्तामात्रे सति घटादिव्यक्तेर्दृश्यतादित्यादि॥ प्रकाशकत्वमिष्यते यद्
त्तद्बोधरूपेप्यात्मनि स्वाध्यस्तवस्तुसंनिधिसत्तामात्रे सति बोधयितृत्वमिष्यतामंगीक्रियतामिति योजना॥४५
॥स्वगतविकारमंतरेणैवात्मनोर्थप्रकाशकत्वमित्येतदपरदृष्टांतेन साधयति॥विज्ञादिति॥सर्पस्य विज्ञा

सत्तामात्रे प्रकाशस्य कर्तादित्यादिरिष्यते॥ घटादिव्यक्तितो यद्वत्तद्बोधात्मनीष्यतां॥४५॥ वि
ज्ञात्सर्पस्य निर्याणे तस्य यद्वत्प्रकाशकः॥ प्रयत्नेन विना तद्वत्ज्ञातात्मा बोधरूपतः॥४६॥ ॥

बिलान्निर्गमे ज्ञायमाने यद्वत्सूर्यः॥ प्रयत्नेन विना पूर्वसिद्धेनैव स्वज्योतिषा तं भासयन् प्रकाशकोऽव्यपदिश्य
ते॥ तद्वत्सत्त्मा बोधरूपत्वात् प्रयत्नेन विना विकारमंतरेण ज्ञाता व्यपदिश्यत इत्यर्थः॥४७॥ ॥श्रीनाथजी॥ १५

इदानीमुपाधिभावे ज्ञाते ज्ञातृत्वव्यपदेशात्तदभावे तदभावाद्धौपाधिकमेव ज्ञातृत्वमिति दर्शयितुं परमुदा
हरणमाह॥ दग्धैवमिति॥ यथा दाह्यसन्निधावुष्णस्वरूपस्याग्नेः सत्तामात्रेण दाहकत्वं तथा बोधस्वरूपस्या
प्यात्मनो बोध्यसन्निधिमात्रेण बोधत्वमिष्यतां यद्यस्मादुपाधौ ज्ञाते सत्येवात्मा ज्ञातोच्यते यथा बिलादुत्थिते
सर्पेउपाधौ ज्ञाते सत्येव सविता प्रकाशकः कथ्यते॥ न तदभावे॥ तस्मादौपचारिकमेवात्मनो ज्ञातृत्वव्यपदेश

दग्धैवमुष्णसत्तायां तद्बोधात्मनीष्यतां॥ सत्येव यदु
पाधौ तु ज्ञाते सर्प इवोत्थिते॥४७॥

इत्यर्थः॥४७॥ औपाधिकं ज्ञातृत्वमात्मनोऽविदृष्टांतेन प्रतिपादितेनैव दृष्टांतेन कर्तृत्वमप्यौपाधिकं प्रतिपा
दयति॥ ज्ञातेति॥ यद्वदयं सूर्यः आत्मा यत्नरहितो विज्ञाताऽविख्यातस्तद्वत्स्वगतविकारशून्योपि सन्निधिमात्रे
णकारकाणि प्रवर्तयति क्रियाणां कर्तेति व्यपदिश्यते भ्रामकवदित्यर्थः॥

भ्रामयति प्रवर्त्तयति शाकुसुसंजनसमूहमिति॥ भ्रामकः॥ सूर्यः॥ यद्वा॥ भ्रामकोयस्कांतः॥ स यथा स्वयं चलना
दिव्यापाररहितोपि लोहकांतादीनां चालको दृश्यते यथायमपीत्यर्थः॥ तद्देदेत्युक्तिः॥ स्यादप्रकाशस्येत्यारभ्योक्तं
प्रासंगिकमात्मनो ज्ञातृत्वं कर्तृत्वं चौपाधिकं व्यवस्थाप्य प्रकृतमात्मनो ज्ञानकर्मत्वाकर्मत्वाभ्यां ज्ञेयताज्ञेयत्व
पक्षद्वयसमर्थनमुपसंहरति॥ स्वरूपेणेति॥ यतोयमात्मा निर्विशेषस्वभावोतो ज्ञातृत्वप्रकाशरूपस्य ततः स्वयं

ज्ञाताऽयत्नोपि तद्वत्त्वात्कर्ताश्चाभ्रामकवद्भवेत्॥ स्वरूपेण
स्वयं नात्मा ज्ञो ज्ञेयो वा ततः॥४८॥

स्वरूपेण साक्षात्स्वभावेन तयो ज्ञानक्रियया व्याप्यो न भवति॥ तथा ज्ञेयाव्यवहितवस्तुवज्ज्ञानप्रकाश
रहितं इत्यर्थः॥ अथवेत्यनेन ज्ञाता वा न स्यात् ज्ञातावा न भवत्यात्मा निर्विकारत्वाच्चैतन्ययोगाच्च तथा कर्त्राकार १६
कोध्यासोधिष्ठानत्वान्न कर्त्ताच निर्व्यापारत्वादित्यादि विरुद्धप्रतिभासव्यवस्थोपसंहारउक्तो वेदितव्यः॥४८॥ ॥

आत्मनः॥ उक्तज्ञेयत्वाद्यभावे प्रमाणमाह॥ विदिताविदिताभ्यां तदिति॥ अन्यदेव तद्विदितादथो अविदिताद
धीति श्रुत्या विदिताविदिताभ्यां कार्यकारणाभ्यां अन्यदात्मतत्त्वं ब्रह्मेति शासनात्कार्यकारणधर्मविलक्षणस्व
भावएवायमात्मेत्यर्थः॥ तथा च॥ यथात्मनि ज्ञातृत्वकर्तृत्वमकर्तृत्वकारणत्वमित्यादि॥ सर्वमविद्यावशादेवक

विदिताविदिताभ्यां तदन्यदेवेति शासनात्॥ बंधमोक्षादयो
भावास्तद्वदात्मनि कल्पिताः॥४९॥ नाहोरात्रे यथा सूर्ये प्रभारू
पाविशेषतः॥ बोधरूपाविशेषान्न बोधाबोधौ तथात्मनि॥५०॥

ल्पितं॥ तथा बंधमोक्षः भिन्नाभिन्नः सुखी दुःखीत्यादयो विभावा आत्मनि कल्पिता वेत्याह॥ बंधेति॥४९
॥ बंधादीनामात्मनि कल्पितत्वे सदृष्टांतहेतुमाह॥ नाहोरात्रे इति॥ अबोधनिबंधनो बंधो बोधनिबंधनो मोक्षस्त
योरभावेन तयोरप्यभाव इत्यर्थः॥५०॥ ॥

उप.स.
१७

उक्तेनोपायेनोक्तस्वरूपं ब्रह्म विजानतः फलमाह॥ यथोक्तमिति॥ हानोपादानवर्जितमिति॥ हानोपादानक प्र.वि.१५
र्तृत्वं कर्मत्वं च व्यावर्त्यते॥ अनेन सर्व एव विशेषाः प्रतिषिद्धा भवंति॥ परिग्रहपरित्यागात्मकत्वात् सर्वविशे
षाणामित्यर्थः॥ यथोक्तविधानं पदार्थपरिशोधनप्रकारः॥ स नैव जायत इति॥ सद्य इति संबंधः॥ न स भूयो

यथोक्तं ब्रह्म यो वेद हानोपादानवर्जितं॥ यथोक्तेन विधानेन स स
द्यो नैव जायते॥५१॥ जन्ममृत्युप्रवाहेषु पतितो नैव शक्नुयात्॥ इ
त उद्धर्तुमात्मानं ज्ञानादन्येन केनचित्॥५२॥ भिद्यते हृदयग्रंथि
श्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे
॥५३॥

भिजायत इति स्मृतेरित्यर्थः॥५१॥ यथोक्तब्रह्मवेदनेन विनापि यथोक्तफलसिद्धेः॥ किं कृतं ज्ञानेनेत्याशंक्य नान्यः॥ १७
पंथा विद्यतेऽयनायेति श्रुतिविरोधान्नैवमित्याह॥ जन्मेति॥ इत एभ्यो जन्ममृत्युप्रवाहेभ्यः केनचित्साधनांतरेण॥५
२॥ उक्तेऽर्थे पूर्वोपनिषद्वाक्यं प्रमाणयति॥ भिद्यत इति॥ स्पष्टं॥५३॥

प्रकरणार्थं संक्षिप्योपसंहरति॥ ममाहमिति॥ इति नान्यदन्यत्प्रकरणं॥ सर्वतः सर्वात्मना ममाहमित्येतत्स
विषयमपोह्य त्यक्त्वा नरो मनुष्योऽस्मिन् यदि निश्चितो निश्चितमतिः स्यात्तदा स विमुच्यत इति योजना॥ अस्मिन्
कस्मिन् विनिश्चित इति तदाह॥ विमुक्तदेहमिति॥ देहद्वयसंबंधशून्यं प्रत्यक्तत्त्वं पदं ब्रह्म अंबरोपमं निरतिशयं नि

ममाहमित्येतदपोह्य सर्वतो विमुक्तदेहं पदमंबरोपमं॥ सुदृष्टशास्त्रानुमितिभ्य ईरितं विमुच्यतेऽस्मिन्य
दि निश्चितो नरः॥५४॥ ॥इति श्रीनान्यदन्यत्प्रकरणं पंचदशं विवृतम्॥१५॥ शुभं भवतु॥ श्रीरस्तु॥ ॥

ष्प्रपंचमिति यावत्॥ कुत एवंविधं ब्रह्मात्मस्वरूपमित्यपेक्षायां श्रुतियुक्तिभ्यां निर्धारितत्वादत्रासंभावना नास्तीत्य
भिप्रेत्य तद्विशिनष्टि॥ सुदृष्टेत्यादीरितमित्यंतेन॥ यदेवंविधं सम्यग्विचारितशास्त्रानुमानेभ्योऽस्माभिरीरि
तं तस्मिन्निति संबंधः॥५४॥ ॥इति श्रीनान्यदन्यत्प्रकरणं पंचदशं विवृतम्॥१५॥ कल्याणमस्तु॥ शुभं भवतु॥ ॥

॥ ॥इतिश्रीपंचदशप्रकरणंसमाप्तः॥१५॥ ॥

उप॰स॰ १ ॥ ॥श्रीकृष्णायनमः॥ ॥पूर्वस्मिन्प्रकरणे एकदेशिमतप्रतिक्षेपमुखेन ब्रह्मैकत्वात्मानमेवस्वरू प्र॰वि॰ १६
पावस्थानलक्षणमोक्षसाधनंनभेदाभेदज्ञानमितिप्रतिपादितं॥ अधुनासर्वतार्किकमतप्रतिषेधेनमु
मुक्षूद्धारायेपिप्रकरणांतरमारभमाणः॥ प्रथमंस्थूलशरीरात्मवादिमतंनिराकरोति॥ पार्थिवइ
ति॥ यस्स्थूलदेहेकठिनोधातुर्मांसादिरूपः॥ सपार्थिवःपृथिव्यंशः॥ पृथिवीपरिणामात्मकःस्मृतोऽन्ना

॥ॐनमः॥ पार्थिवःकठिनोधातुर्द्रवोदेहेस्मृतोऽप्मयः॥ पंक्तिश्चेष्टावकाशाः
स्युर्वह्निवाय्वंबरोद्भवाः॥१॥ ॥

तोविद्धिरित्यर्थः॥ एवंद्रवोऽप्मयोऽपांपरिणामः॥ पंक्तिः॥ पाचकस्थेशस्पंदनमवकाशोत्रपानमन
सांसंचारमार्गाः॥ देहगतसुषयोयेस्युः॥ एतेक्रमेणवह्निवाय्वंबरोद्भवादेहानुगतवह्न्याद्यंशाःकार्यभूता १
स्मृताइत्युत्तरार्थः॥ देहोनात्माभूतपरिणामत्वाद्घटादिवदितिभावः॥१॥ ॥श्रीरामायनमः॥ ॥

इंद्रियात्मवादिनंप्रत्याह॥ घ्राणादीनीति॥ घ्राणादीनींद्रियाणितदर्थास्तेषांविषयाःगंधादयस्तत्क्रमात्पृथि
व्यादीनांगुणाःकार्याणीत्यर्थः॥ गंधरसरूपस्पर्शशब्दास्तावत्पृथिव्यप्तेजोवाय्वाकाशानांक्रमेणधर्माः॥ प्र
सिद्धास्तेषांघ्राणाद्येकैकेंद्रियग्राह्यतान्वयव्यतिरेकसिद्धा॥ तथाचयदिंद्रियंयस्यधर्मंग्राहयति॥ तदिंद्रियंत
स्यसजातीयंभवितुमर्हति॥ यथातैजसस्यरूपस्यप्रकाशोदीपादिस्तैजसोदृष्टस्तथेंद्रियाण्यपिभौतिकानीप्र

घ्राणादिनितदर्थाश्चपृथिव्यादिगुणाःक्रमात्॥ रूपालोकवदिष्टंहि
सजातीयार्थमिंद्रियं॥२॥ बुध्यर्थान्याहुरेतानिवाक्पाण्यादीनिकर्मणे
॥तद्धिकल्पार्थमंतस्थंमनएकादशंभवेत्॥३॥ ॥

कान्येवेत्यनुमाह॥ रूपालोकवदिति॥ एवमिंद्रियाणांभौतिकत्वेसिद्धेदेहवदेषामप्यनात्मत्वंसिद्धमिति
भावः॥२॥ किंचेंद्रियाणिनात्मानः॥ करणत्वात्कुठारवदित्यनुमानांतरंसूचयन्कार्यवशादिंद्रियाणामेका
दशत्वनियममाह॥ बुध्यर्थानीति॥ एतानिघ्राणादीनिबुध्यर्थानिज्ञानकरणान्याहुः॥ ॥श्रीरामः॥ ॥

वाक्पाणिपादपायूपस्थाख्यानि इंद्रियाणि कर्माणि कर्मार्थं वचनादानगमनविसर्गानंदार्थं तत्करणान्याह
रित्यर्थः॥ तेषामन्तानामिंद्रियाणां विकल्पार्थं युगपद्विषयसंनिधाने क्रमेण तत्तद्विषयज्ञानादिति यमार्थं यदिं
द्रियं तन्मनः उक्तं दर्शापेक्षयाएकादशं भवेत्॥ मनस्त्वेकं साधारणं करणमवश्यमंगीकार्यमन्यथात्मनो यु
गपदनेकेंद्रियविषयसंप्रयोगे सति युगपदेवानेकज्ञानानि जायेरन् न त्वेवमस्ति॥ तथा च तस्यापि मनसः॥
करणत्वादनात्मत्वमिंद्रियवदिति सिद्धं॥३॥ बुद्धिरिति ज्ञानाकरणविज्ञेयत्वात्मनो वदिति॥ बौधमतं निरा

निश्चायार्थान् भवेद्बुद्धिस्तां सर्वार्थाननुभाविनीं॥ ज्ञाता तज्ज्ञः स्वरूपेण ज्योतिषा व्यंजयन् सदा॥४॥ ॥

वंस्तत्राः॥ स्वभावं दर्शयति निश्चायार्थेति॥ निश्चयोर्थपरिच्छेदः॥ सोर्थः प्रयोजनं यस्याः॥ अंतः॥ करणवृत्ते
॥ सा निश्चयार्था बुद्धिर्भवेत्॥ निश्चयकरणं बुद्धिरित्यर्थः॥ अन्यदृश्यत्वाद्पि तस्याः॥ अनात्मत्वमित्याह॥ ता
मिति॥ बुद्धिज्ञातुरपि बुद्धिवदृश्यतो यत्वज्ञो कोवारयति॥ स्वरूपेण ज्योतिषेति॥ तथा च भास्यभासकयोरुपाजो २
कयोरिव भेदात् भास्याया बुद्धेरन्यो भासक आत्मेत्यर्थः॥४॥ ॥

यदि बुद्धेरात्मा भासकस्तर्हि तयासंसर्गाद्बुद्धिवद्योतेत्याशंक्य दृष्टांतेन प्रत्याह॥ व्यंजकस्त्विति॥ यथालोको
व्यंजकोदीपालोकादिर्व्यंग्यस्य घटादेराकारतां गतः॥ सन्व्यतिकीर्णोपि व्याभिश्रतया॥ भासमानोपि वस्तुतो
संकीर्णो विविक्तस्वभाव एव भवति॥ तद्वदेवाः॥ स आत्मा सदा प्रत्ययैर्बुद्धिवृत्तिभिरित्यर्थः॥ अतो नित्यशुद्ध
एवात्मेति भावः॥५॥ यदि बुध्यादेरत्यंतविजातीयो निर्व्यापार आत्मा कथं तर्हि तस्य तदवभासकत्वमित्याशं

व्यंजकस्तु यथालोको व्यंग्यस्याकारतां गतः॥ व्यतिकीर्णोप्यसंकीर्णस्तद्वत् ज्ञः प्रत्ययैः सदा॥५॥
स्थितो दीपो यथा यत्नः प्राप्तं सर्वं प्रकाशयेत्॥ शब्दाद्याकारबुद्धीर्ज्ञः प्राप्तास्तद्वत्प्रपश्यति॥ शरी
रेंद्रियसंघात आत्मत्वेन गतां धियं॥ नित्यात्मज्योतिषा दीप्तां विशिषंति सुखादयः॥७॥ ॥

क्यतदपि दृष्टांतेनाह॥ स्थितवदिति॥ स्पष्टार्थः॥६॥ तथापि कथं शुद्धिः॥ सुखित्वादिस्फुरणादित्याशंक्याह॥ श
रीरेति॥ सुखादयः शरीरादिसंघाते आत्मत्वेन प्रवृत्तां धियं बुधिं विशिषंति॥ न त्वात्मानं॥ किं लक्षणां नित्यात्म
ज्योतिषा दीप्तां प्रकाशितां॥ तथा च भास्यभासकबुध्यात्मनोरविवेकात्सुखादिमानिति भ्रांतिरित्यर्थः॥७॥

उप.स. ३ कुतएवं निश्चय इत्यत आह॥ शिर इति॥ शिरआदिदेहावयवगतेन दुःखेन हि यस्मात् दुःख्यहमस्मीत्यात्मानं प्र.वि. १६
लोकः पश्यति॥ तस्माद्देहमात्मत्वेनगता बुद्धिरिति योजना॥ अयमाशयः॥ आत्मनो विनाशविज्ञानं बुध्यध्यासनिबं
धनमिति हि स्थितिः॥ तथा च शिरोदुःखेनोदरदुःखेन वा दुःख्यहमस्मीति अभिमानात्मकबुध्यवस्थापन्नवि

शिरोदुःखादिनात्मानं दुःख्यस्मीति हि पश्यति॥ द्रष्टान्यो दुः
खिनो दृश्याद् द्रष्टृत्वाच्च न दुःख्यसौ॥८॥ ॥

शेषस्यैव दुःखित्वात् सुखदुःखादयो बुद्धिं विशिंषन्तीति युक्तमिति॥ द्रष्टा तु दुःखिनो दृश्याद्दन्यः॥ आत्म ३
त्वेनाभिमन्यमानदेहावयवोपघातादिजनितदुःखाकारसाभासबुद्धेर्दृश्यायाः॥ साक्षी तद्दन्यएवासौ द्र
ष्टृत्वादेव न दुःखीत्यर्थः॥८॥ ॥

द्रष्टृत्वादसौ न दुःखीत्युक्तमेव स्पष्टयति॥ दुःखी स्यादिति॥ अयमात्मा दुःख्यहंमानात् दुःखाकारपरिणाम
वदंतःकरणे अहमित्यभिमानात् दुःखी स्यात् तद्दुःखिनो दुःखाकारपरिणामवतो दर्शनात् अध्यासात्तु दुःखी
नानामपि दुःखिनं पश्यतो दुःखित्वप्रसंग इत्यर्थः॥ प्रकृते किमायातं तदाह॥ संहत इति॥ अंगादिभिर्हस्ता

दुःखी स्यात् दुःख्यहंमानात् दुःखिनो दर्शनात्र च॥
संहतेंगादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः॥९॥ ॥

द्यंगैश्च चक्षुरादींद्रियैश्च संहते देहे पतत् दुःखं तस्य दुःखस्य द्रष्टा य आत्मा साक्षी स नैव दुःखीति सिद्धमि
तिभावः॥९॥ दुःखिनो द्रष्टृत्वेऽपि दुःखित्वं आत्मनो युज्यत इति दृष्टांतेन शंकते॥ चक्षुर्वदिति॥ यथा च चक्षु
षो दर्पणादिनिष्ठया दृश्यत्वं तस्यैव मुखदेशाद्ध्यस्तया द्रष्टृत्वं च तथात्मनो दुः॥ ॥श्रीरामायनमः॥ ॥ ॥

उप॰स॰ स्वसंभिन्नतया दृश्यत्वं स्वरूपं चैतन्यावस्थतयाऽदृश्यत्वं चेति॥ कर्मकर्तृत्वं घटत इत्यर्थः॥ सिद्धांती परिहर प्र॰वि॰
४ ति॥ नेति॥ कुत इत्यत आह॥ अनेकमेव तत् इति तत्चक्षुरनेकमनेकाकारमेव संहतं च भवतीत्यतो घटते तस्य १६
कर्मत्वं कर्तृत्वं चांशभेदोपपत्तेरित्युत्तरार्थः॥ गोलकांशस्य दर्पणस्य प्रसादरूपत्वं तस्यैव शक्तिसमत्वांशस्यमुख

चक्षुषः कर्मकर्तृत्वं स्याद्भेदान्नानेकमेव तत्॥ संहतं॥
च ततो नात्माऽदृश्यत्वात्कर्मतां व्रजेत्॥१०॥ ॥ ॥

निविष्टस्यऽदृश्यत्वमिति॥ युक्तमुभयरूपत्वमिति विवक्षितोर्थः॥ आत्मनस्तु नैवमंशभेदोस्त्येकरूपत्वा ४
दसंहतत्वाच्चेत्येतमभिप्रेत्याह॥ नत इति॥ चित्प्रकाशैकस्वभावो ह्यात्माऽदृश्यैव दृश्यांशसंभिन्नो दृश्यांशस्यानात्म
त्वादतोऽदृश्यत्वात्कर्मतां न प्राप्नोतीत्यर्थः॥१०॥ ॥

तत्वात्मनोपि ज्ञानादिभिरनेकात्मत्वसंभवाच्चक्षुर्वत्तस्यापि कर्मतास्यादित्याशंक्य प्रत्याह॥ ज्ञानयत्नादी
ति॥ ज्ञानप्रयत्नेच्छाद्वेषादिगुणभेदैरनेकात्मत्वादात्मनोपि केनचिदंशेन विशिष्टस्य ग्राह्यत्वमंशांतरेण ग्रा
हकत्वं च यदि मतमिति शंकाग्रंथार्थः॥ तुशब्दः शंकानिषेधार्थः॥ नैवं ज्ञानगुणत्वात्कर्तृत्वे॥ प्रज्ञानघन

ज्ञानयत्नाद्यनेकत्वमात्मनोपि मतं यदि॥ नैकज्ञानगु
णत्वान्नु ज्योतिवत्तस्य कर्मता॥११॥ ज्योतिषो द्योतकत्वे
पि यद्वात्मप्रकाशनं॥१२॥ ॥

ण एवेति॥ श्रुत्या ज्ञानैकस्वभावत्वावधारणादनेकात्मत्वाभावाज्ज्योतिर्वत्तस्य न कर्मता ग्राह्यता तस्य न संभ
वतीति॥ परिहारग्रंथार्थः॥११॥ दृष्टांतं व्याचष्टे॥ ज्योतिष इति॥ अयमर्थः॥ यद्यात्मनो ग्राह्यग्राहकांशभेदोऽभ्यु
पगम्यते॥ तदेवं वक्तव्यं॥ ग्राह्यो ग्राहको वा चेतनः॥ किं वा जड इति॥ तत्राद्यं निराकरोति दृष्टांतेन॥ ज्योतिष इति॥

उ.प.स. ५ ऽआदित्यादिज्योतिषो द्योतकर्मत्वेपि प्रकाशात्मस्वभावत्वेपि नात्मप्रकाशनं ज्योतिः स्वरूपप्रकाशत्वं तद्व उ.वि. १६
द्देवं यथा दृष्टांतस्तथा भेदेप्येवं भेदकत्वेन वितत आत्मा समत्वाद्वै तत्स्वभावाविशेषादात्मानं नैव पश्यति न स्वा
त्मानं विषयीकरोतीत्यर्थः॥ न द्वितीयो ज्ञातृज्ञेययोरंशाभित्त्वेनाभेदानुपपत्तेर्न ग्राह्यग्राहकत्वमिति॥ नात्मनः स्ववे
द्यत्वसिद्धिरिति स्वरूपस्फुरणमेवेत्युपेक्षितमिति द्रष्टव्यं॥१२॥ स्वरूपत्वात्तद्वारेणात्मापद्यप्यात्मात्मानं नैव पश्यतीति

भेदेप्येवं समत्वाद्धि आत्मात्मानं नैव पश्यति॥१२॥ यद्धर्मा यः
पदार्थो न तस्यैवेयात्मकर्मतां॥ न ह्यात्मानं दहत्यग्निस्त
थानैव प्रकाशयेत॥१३॥ ॥

याचित्स्वगुणज्ञानस्य कर्मतां गमिष्यतीत्याशंक्याह॥ यद्धर्मेति॥ यः पदार्थो यद्धर्मा येनासाधारणधर्मेण धर्मवा ५
न् स तस्यैव धर्मस्य कर्मतां नेयात॥ तथा च ज्ञानस्वभाव आत्मा न ज्ञानकर्मतां गंतुमर्हतीत्यर्थः॥ दृष्टांतमाह॥ स्प
ष्टार्थः॥ आत्मा न स्वीयधर्मव्याप्यः पदार्थत्वादग्निवदित्यर्थः॥१३॥ ॥

उक्तन्यायेन विज्ञानवादिबौद्धोपि निराकृत इत्याह॥ एतेनैवेति॥ आत्मन इत्यस्मिन्नात्मान इति छांद
सः प्रयोगः॥ बुद्धेरात्मनः स्वरूपस्यात्मना स्वेनैव ग्रह इति बौद्धपक्षोप्येतेनैवोक्तदृष्टांतप्रबंधेन निराकृत इत्यर्थ
ः॥ स्वरूपेणैव ग्राह्यत्वाभावेपि एकेनांशेन ग्राह्यत्वमंशांतरेण ग्राहकत्वमिति कल्पनाप्यत्र न घटत इत्याह
॥ अंशोप्येवमिति॥ एवं प्रागुक्तवर्त्मना तदेवाह॥ समत्वान्निर्भेदत्वादिति॥१४॥ एवं बुद्धेः स्वग्राह्यत्वनिराक

एतेनैवात्मनो ग्रहो बुद्धेर्निराकृतः॥ अंशोप्येवं समत्वाद्धि निर्भे
दत्वान्न युज्यते॥१४॥ शून्यतापि न युक्त्वैवं बुद्धेरन्येन दृश्यता॥ यु
क्ता तो घटवत्तस्याः प्राक्सिद्धेश्च विकल्प्यते॥१५॥ ॥ ॥

रणेनार्थादन्यग्राह्यत्वमुपपादितं मन्यमानस्तस्याः॥ क्षणिकत्वाद्यसिद्धेः॥ तत्र मा भूत्तर्हि बुद्धिस्तद्ग्राहकस्य प
रः॥ शून्यमेवात्मतत्त्वमस्तीति वादिनं निराकरोति॥ शून्यतापीति॥ एवं सति शून्यतापि न युक्ता॥ यथा बुद्धे
॥ यथा बुद्धेः॥ स्वग्राह्यता न युक्ता युक्तिविरोधादेवं शून्यतापि बुद्धेस्तद्वभासस्य च न युक्ता अपरोक्षतयाव
स्याः॥ ॥

प्रतीयमानत्वादित्यर्थः॥ अतो हेतोर्घटवदन्येन साक्षिणा बुद्धेर्ग्राह्यतायुक्ता साक्षिणि पर्यवसानात्तस्या
विनश्वरतान्नांकेत्यर्थः॥ किंच॥ तस्या बुद्धेर्विकल्पतो विकल्पनात् प्रागेव तत्साक्षिणः॥ सिद्धेर्नश्वरत्व
कदापीत्यर्थः॥ बुद्धिविकल्पतात्पूर्वमेव सुषुप्तावप्यात्मप्रकाशसद्भावोंगीकर्त्तव्योन्यथा सुषुप्तेरसाक्षिक
त्वादवस्थांतरे परामर्शानुदयप्रसंगादिति भावः॥१५॥ किंच॥ यत्कार्यं यदन्वितं तद्रूपतेतत्तस्य कारणं का

अविकल्पं तदस्त्येव यत्पूर्वं स्याद्विकल्पतः॥ वि
कल्पोत्पत्तिहेतुत्वाद्यद्यस्यैव तु कारणं॥१६॥ ॥

र्यविकल्पात्प्राक् सिद्धं च यथा घटान्वितामृत्तथा बुध्यादेर्विकल्पस्य सदर्थान्विततयोपलभ्यमानत्वात्प्राक्
सिद्धसत्कारणत्वमेव युक्तमित्याह॥ अविकल्पमिति॥ सर्वविकल्परहितं कूटस्थमित्यर्थः॥ अकारणका
र्योत्पत्तेरनुपपत्तेः॥ कारणसत्वमेष्टव्यमन्यथा कार्यविशेषार्थिनां कारणविशेषोपादानप्रवृत्तिनियमानुप
त्तिः॥ सत्यस्य सर्वत्र सुलभत्वादिति भावः॥१६॥ ॥

कूटस्थस्य ब्रह्मात्मनः॥ कथं कारणत्वं व्यापारवद्धिकारणानामेत्याशंक्य रज्जुवत्सर्पस्य विवर्त्ताधिष्ठान
तयातस्य कारणत्वं घटतइत्यभिप्रेत्याह॥ अज्ञानमिति॥ अज्ञानमनाद्यविद्या कूटस्थे प्रत्यगात्मनि ब्रह्म
णि सर्वकल्पनाया मूलमतद्रूपप्रतिभासहेतुरित्यर्थः॥ तथा च विद्वद्विद्याविवर्त्तेषु कार्येषु प्रसक्तात्मना भासमा
नतया कारणत्वं कूटस्थस्याविघटत इति भावः॥ संसारस्थितियामकमिति विशेषणेन सर्वविकल्पनाया अ

अज्ञानं कल्पनामूलं संसारस्थितियामकं॥ हित्वा
त्मानं परं ब्रह्म विद्यान्मुक्तं सदाभयं॥१७॥ ॥ ॥

ज्ञानमूलत्वेन्वयव्यतिरेकाख्यं प्रमाणमनुमानं सूचयति तर्ह्यज्ञानविशिष्टमेव किं ब्रह्म प्रसक्तेन अनुसं
धेयं तेत्याह॥ हित्वेति॥ सकार्यमज्ञानं हित्वा साक्षित्वेन तस्य साक्षिधर्मतां बाधित्वात्मानं प्रत्यंचं साक्षित्वे
नोदीरितं साक्ष्यबाधया परं ब्रह्म परिपूर्णं मुक्तं कार्यकारणप्रपंचसंसर्गरहितमनयमद्वयमहं ब्रह्मास्मीति

उप॰स॰ वाक्यार्थभूतं सदा विंद्यादनुसंदध्यादित्यर्थः॥१७॥ संसारेति यामहानं हित्वात्मानं हित्वात्मानं ब्रह्म विंद्यादित्यु ग्र॰वि॰
७ क्तं तत्र कः संसारः॥ कथं वा तस्य हानं कारणं तत्तो वा कथमात्मनो विवेकः स्यादित्यपेक्षायामाह॥ जाग्रदिति॥ जा १६
ग्रत्स्वप्नौ स्थूलसूक्ष्मविषयभोगजन्मानौ संसार इति शेषः॥ तयोर्बीजं कारणं तमोमयमज्ञानप्रायं सुषुप्ताख्यं सु

जाग्रत्स्वप्नौ तयोर्बीजं सुषुप्ताख्यं तमोमयं॥ अन्यो
न्यस्मिन्नसत्त्वाच्च नास्तीत्येतत्त्रयं त्यजेत्॥१८॥ ॥

षुप्तिसंज्ञितं तमो बीजमिति वक्तव्ये मयट्प्रयोगाज्ज्ञानस्य स्वातंत्र्यं वारयति साभासं तमो बीजमित्यर्थः॥ एवं का
र्यकारणात्स्वरूपमुक्त्वा तत्त्यागप्रकारमाह॥ अन्योन्यस्मिन्निति॥ स्थूलसूक्ष्मकारणावस्थानामन्योन्यस्मि ७
न्नसत्त्वात्सत्त्वव्यभिचारात्तदन्यत्वाच्चैतत्त्रयं रज्ज्वां दृष्टसर्पधारादिवदात्मनि ततोऽन्यत्र नास्तीति ज्ञात्वा त्यजेद्वि
लापयेदात्मानं बोधयेदित्यर्थः॥१८॥

त्यजेदित्युक्ते कर्तृत्वप्रतीतेः॥ कथमस्यात्मनो ब्रह्मत्वमित्यत आह॥ आत्मबुद्धीति॥ आत्मा देहः॥ अर्था
दीत्यादिपदादेशकालादिग्रहः॥ आत्मादीनां संकरान्निष्पेयोगुणप्रधानभावेनाध्यासाद्धेतोः॥ क्रियाणां सन्नि
पाततः॥ समुदायावादात्मकर्म आत्मनः॥ कर्मक्रियाः स्यात्मातदधिष्ठानभूतः॥ कूटस्थोऽपि करोतीति भ्रांतिः

आत्मबुद्धिमनश्चक्षुरालोकार्थादिसंकरात्॥ भ्रांतिः स्यादा
त्मकर्मेति क्रियाणां सन्निपाततः॥१९॥ निमीलोन्मीलने स्याते
वायव्ये ते न चक्षुषः॥ प्रकाशात्वान्मनस्येवं बुध्येनस्तः प्रकाशतः
२०

स्यात्॥ तस्मादात्मनः॥ स्वतो निः॥ क्रियत्वान्निः॥ क्रियं ब्रह्मत्वमविरुद्धमित्यर्थः॥१९॥ अन्यधर्मस्याप्यन
देरात्मारोपे दृष्टांतमाह॥ निमीलेति॥ येनेत्र गोलकस्थाने निमीलोन्मीलने दृष्टे ते वायव्ये वायुकार्ये क्रियात्म
कस्य वायोस्तदाश्रयत्वान्न चक्षुरिंद्रियस्य तस्य प्रकाशरूपत्वात्क्रियाश्रयत्वानुपपत्तेः॥ ॥श्रीरामः॥

उप.स. तथापि चक्षुषो वर्तते व्यपदिश्यते ध्यासाद्यथा॥ एवं मनसि बुद्धौ च चलनाचलनेन स्वतः॥ प्रकाशत्वादेव स्वतो प्र.वि.
८ न विद्यते॥ तथापि प्राणव्यापाररूपे तत्तमो योगारोप्यते चंचलं मनः॥ स्थिरा बुद्धिरिति व्यपदेशाद्दृष्टान्तादि १६
त्यर्थः॥२०॥ मनोबुद्ध्योरसाधारणैकधर्मकथनपूर्वकं प्रासंगिकमुपपादितमुपसंहरति॥ संकल्पेति॥ सं

संकल्पाध्यवसायौ तु मनबुद्ध्योर्यथाक्रमात्॥ नेतरेतरध
र्मत्वं सर्वं सर्वं चात्मनि कल्पितं॥२१॥ ॥

कं मनस्य धर्मकं मनोध्यवसायधर्मिका बुद्धिरिति॥ व्यवस्थैव न सांकार्यमित्यर्थः॥ तस्मात्कूटस्थस्यात्म
नः॥ स्वतः॥ कर्तृत्वासंभवाद्विद्यादेश्च जडस्य स्वातंत्र्येण प्रवृत्त्यसंभवाज्जडाजडयोश्च परमार्थतः॥ संबं ८
धानिरूपणात्सर्वं सहेतुकं संसारबंधनमात्मनि कल्पितमध्यस्तं न परमार्थत इति॥ सदेवात्माद्वयं ब्रह्मे
तिसिद्धमित्यर्थः॥२१॥ ॥

पूर्वं देहेंद्रियमनोबुद्धिभ्य आत्मवादनिराकरणेन तद्भिन्नत्वेनात्मा विविचितः॥ इदानीं देहादिविलक्षणो
प्यात्मा देहसमपरिमाण इति जैनमते नात्मनः॥ परिच्छिन्नत्वशंकायां न तस्य ब्रह्मत्वमुपपद्यते तेन चानंतत्वं सर्वे
कल्पितमिति युज्यते कल्पकाभावादित्याशंक्याह॥ स्थानेति॥ इंद्रियाणां देहाद्बहिर्वृत्त्यभावाद्देहावयवगोलक
स्थानावच्छेदेन दृष्टिरुपलंभः॥ स्यादिवतीत्यर्थे स्यात्तद्वत्॥ तथा च त्वगादीनामिंद्रियाणां यथायोगं देहपरिमा

स्थानावच्छेददृष्टिः स्यादिंद्रियाणां तदात्मतां॥ गत्वा धी
स्तां हि पश्यन्तो देहमात्र इवेक्षते॥२२॥

णत्वात्तदात्मतां गता धीः॥ सेंद्रियदेहतादात्म्यं प्राप्ता बुद्धिः॥ स्यादिति योजना तां बुद्धिं पश्यन्नवभासयन्ना
त्मा स्वतोऽपरिच्छिन्नोऽपि देहमात्र इव देहपरिमाणावच्छिन्न इवेक्ष्यते ज्ञायते भ्रांत्या प्रतिभासते॥ अन्यथा मध्य
मपरिमाणस्य घटादिवत्सावयवत्वेनानित्यत्वोपपत्तेः पारलौकिकसाधनप्रवृत्त्यसंभवप्रसंग इति दिक्॥
उत्कृष्टोपाधिमंतरेणात्मनः॥ स्वतः परिच्छेदानुपलंभाद्युक्तं तस्य ब्रह्मत्वं तिरवयवस्य च परमार्थत उपाधिसम

उप॰स॰ र्गायोगात्तदुक्तं तस्मिन्सर्वं कल्पितत्वं चेति भावः ॥२२॥ दिगंबरमतनिराकरणेन यदन्तं तत्त्वमात्मनत्रुक्तं त प्र॰वि॰
८ द्रूपमुच्यमानोः ॥सूत्रकृत्या॥ प्रत्यवतिष्ठते ॥ क्षणिकं हीति ॥ ततज्ञानं यदि तच्चेत्तूभयं क्षणिकं हि तिस्थितं कतिपया १६
नेकक्षणवर्त्तित्वं नां कोवारयति ॥ अस्त्यर्थमिति ॥ स्वरसभंगुरमित्यर्थः ॥ धर्ममात्रं वस्तुमात्रं तस्यापि किं
चित्तस्याधिष्ठानमस्तीति मात्रस्यार्थः ॥ तर्हि कथं विच्छेदो नोपलभ्यते तत्राह ॥ निरंतरमिति ॥ नैरंतर्येणोत्पद्य

क्षणिकं हि तदस्त्यर्थं धर्ममात्रं निरंतरं ॥ सादृश्याद्दी
पवत्तद्धीस्ततश्चोक्तिः पुरुषार्थता ॥२३॥ ॥

मानमित्यर्थः ॥ यदि सर्वं क्षणिकमेव कथं तर्हि तदेवेदमिति ॥ सोऽहमिति च दृश्यद्भूतविषयं प्रत्यभिज्ञानं घ
टतइत्याशंक्य अतिसादृश्यादित्याह ॥ सादृश्यादिति ॥ तद्धीस्तदेवेदमिति मतिस्ततश्चोक्तिस्तस्यस्यापि च प्रति ८
नासस्य ज्ञानतेयगतस्य तन्मूलस्याविवेकस्य च नूांतिरस्तमयः ॥ इति ज्ञानसनिवृत्तिरेव पुरुषार्थता मोक्ष इ
त्यर्थः २३

सिद्धांती दूषणविभागज्ञानाय बौधमतभेदं विविच्य दर्शयति ॥ स्वाकारेति ॥ स्वाकारस्यान्येन ज्ञानेनावभासो
स्यास्तीति स्वाकारान्यावभासं रूपादि बाह्यं वस्तु येषां बौधानां मते विद्यते ॥ येषां च ज्ञानमात्रास्तित्ववादिनां म
ते तत्तोवभासा तज्ञानादन्यद्बाह्यं रूपादिनास्ति ॥ पूर्वार्द्धगतचकारादेषां मते विज्ञानमपि नास्ति शून्यमेवस

स्वाकारान्यावभासं च येषां रूपादि विद्यते ॥ येषां
नास्ति ततस्त्वान्यत्पूर्वासंगतिरुच्यते ॥२४॥ ॥

र्वमिति ॥ तत्र पूर्वासंगतिर्बाह्यार्थसत्त्ववादस्यासंगतिरघटमानता तावदुच्यते इति प्रतिजानीत इति योज
ना ॥२४॥ तस्मात्तस्यासंगतिं प्रतिपादयति ॥ बाह्येति ॥ ज्ञेतेर्ज्ञानस्यैव बाह्याकारत्वतो बाह्यवस्त्वाकारत्व प्रसं
गादित्यक्षरार्थः ॥ तेयस्योत्पत्तेः ॥ प्राकृतावत्ज्ञानसंबंधोनास्ति ॥ ॥ ॥

उप.स. तुत्पन्नस्य च स्वरसभंगुरत्वात् कर्मकारकतया ज्ञानात् प्रागवस्थानाभावात् ज्ञानेन संबंधानिरूपणाच्च प्र उ.वि.
१० त्यक्षानुभवविरुद्धत्वाज्ज्ञानस्यानुमेयत्वकल्पनानुपपत्तेश्च परिशेषात् ज्ञानस्यैवाकारो विषय इति ॥ विज्ञानमात्रा १६
स्तित्ववादिमतप्रवेश इति भावः ॥ किंचानुभवितुरपि तन्मते क्षणिकत्वादन्यानुभूतेन्यस्य स्मृत्यदर्शनादनुभ

बाह्याकारत्वतो नष्टेः स्मृत्यभावः सदा सता ॥
क्षणिकत्वाच्च संस्कारं नैवाधत्ते क्वचिद् धीः ॥२५॥

तविषयस्मृत्यभावश्च प्रसज्येतेत्याह ॥ स्मृत्यभाव इति ॥ सता सतः क्षणिकत्वात्सदा स्मृत्यभावः प्रसज्येतेत्य
र्थः ॥ स्मृतिहेतुसंस्कारोपि ते दुर्लभ इत्याह ॥ क्षणिकत्वादिति ॥ धीः क्वचिद् ॥ पि संस्कारं नैवाधत्ते ॥ न निहित १०
ति ॥ सर्वस्य क्षणिकत्वादित्यर्थः ॥ चतुर्भ्योन्यस्यानन्यपि च स्वस्या अपि क्षणिकत्वादित्यर्थः ॥२५॥ ॥

क्वचिदित्युक्तं स्फुटयति ॥ आधारस्येति ॥ यत्र संस्कार आधीयते आत्मन्यन्तःकरणे वा तस्याप्याधारस
संस्काराधानकालेसत्त्वाच्च स्मृत्यभाव इत्यन्वयः ॥ यदुक्तं सादृश्यनिबंधनो भ्रम एव प्रत्यभिज्ञानमिति तत्
एव दूषयति ॥ तुल्यतेति ॥ इति आरभ्य क्रियमाणं दूषणं क्षणिकविज्ञानमात्रवादेपि समानं तेषां ॥ तुल्यतानिर्निमि
त्तत इत्येकं पदं तुल्यतायाः ॥ पूर्वापरक्षणयोः सादृश्यस्य निमित्ताभावादित्यर्थः ॥ गुणैरवयवैर्वा सामान्यं सादृ

आधारस्याप्यसत्त्वाच्च तुल्यतानिर्निमित्ततः ॥ स्थाने वा क्षणिकत्वस्य हानं स्यान्न तु दृश्यते ॥२६॥

श्यव्यवहारनिमित्तं तद्विज्ञानानां नास्ति निर्गुणत्वान्निरवयवत्वाच्च ॥ तथा पूर्वोत्तरक्षणयोर्दूरे कस्यासत्वाच्च न
सादृश्यसिद्धिरतस्तुल्यतायाः प्रसिद्धेर्न तन्निबंधनं प्रत्यभिज्ञानमित्यर्थः ॥ अथ पूर्वापरक्षणयोः क्षणद्वयस्थायी
कश्चिदभ्युपेयते तत्राह ॥ स्थाने वेति ॥ तत् क्षणिकत्वहानं तेष्यते त्वयेति शेषः ॥२६॥ यत्तु क्षणिकत्वादिभावनया
स्थायित्वादिभ्रांतिनिवृत्तिर्मुक्तिरित्युच्यते बौद्धैस्तदपि नोपपद्यत इत्याह ॥ भ्रांतेरिति ॥ भ्रांतेश्चायथार्थत्वमेव

साधयतीति॥ एकैकस्मिन्निति॥ भावनानामेकैकस्मिन् क्षणे समाप्तत्वात् तत्संतानस्य चावस्तुत्वात् तदेकैकस्मिंश्च
क्षणे स्वभावान्तरे स्वनिरपेक्षतासिद्धात् तत्साधनविधानोक्तिर्निरर्थकेत्यर्थः॥२७॥ किं चास्मिन्मते लोके वि
साध्यसाधनभावो न घटत इत्याह॥ अपेक्षायदीति॥ कार्यकारणलक्षणानामत्यंतविलक्षणत्वात् भिन्नेष्वत्यंत
व्यावृत्तेविधिरिष्यपदिदृश्येपेक्षा तत्रापरसंतानविकल्पादावपि दृश्यपेक्षेष्यतां अत्यंतभेदाविशेषात् कथं नेष्यत इ

मृतांतेस्याप्त्वसिद्धत्वात्साधनोक्तिरनर्थिका॥ एकैकस्मिन्समाप्तत्वात्स्वांतेरन्यानपेक्षता॥२७
॥ अपेक्षा यदि भिन्नेपि परसंतानदृश्यतां॥ सर्वार्थे क्षणिके कस्मिंस्तथाप्यन्यानपेक्षता॥२८॥

त्यर्थः॥ तथा च विकल्पान्योपि दृष्टिजापेक्षेत्यतिप्रसंग॥ इति भावः॥ प्रसिद्ध्यवष्टंभेनातिप्रसंगपरिहारशंकां
तदीयामनूद्य निराकरोति॥ सर्वार्थ इति॥ सर्वस्य जनस्यार्थे ध्यामाते कार्यकारणभावेन स्थिते दधिक्षीरादौ वस्तु
नि क्षणिकेपि कस्मिंश्चित्क्षीर एव कस्यचिद्दृश्यपेक्षा न सर्वत्रेति लोकप्रसिद्धेर्नातिप्रसंग इति चेदिति शंका ११
नुवादार्थः॥ तथापि प्रसिद्ध्याश्रयणेपि क्षणिके पक्षेन्यानपेक्षतैवेति परिहारभागार्थः॥२८॥ ॥श्रीरामं॥ ॥

तत्र हेतुमाह॥ तुल्यकालेति॥ यौ भावौ तुल्यकालसमुद्भूतावेककालेन लब्धात्मकौ इतरयोगिनौ परस्परं संबं
धे चायथा पर्जन्यांकुरौ न यो मध्ये यस्तु भावांकुरजक्षणः॥ पर्जन्ययोगात् संस्कृतलब्धातिशयस्वभावेत सहि
खत्वच्चनमुपकारित्वं भिक्षितुमपेक्षितुमर्हति॥ नन्वत्राणिकस्तथा प्रसिद्ध्यभावादतः॥ क्षणिकानां भिन्नकालत्व
सापरस्पंबंधाभावादतु॥ क्षणिकानां भिन्नकालतया परस्परसंबंधाभावेनोपकार्योपकारकत्वायोगान्नापे

तुल्यकालसमुद्भूतावितरेतरयोगिनौ॥ योगाच्च संस्कृतो यस्तु सोन्यं हीक्षितुमर्हति॥२९॥
मृषाध्यासस्तु यत्र स्यात्तन्नाशस्तत्र नोभयौ योगाच्चतः॥ सर्वनाशो भवेद्यस्य मोक्षः कस्य फलं वद॥३०

क्षा घटयितुं शक्यत इति भावः॥२९॥ तदेवं क्षणिकमतं निराकृत्य शून्यमतं निराकरिष्यन्नादौ स्वमतसाम्यं
जल्पमुपन्यस्यति॥ मृषेति॥ यद्वा॥ वेदांतिमतेपि ब्रह्मात्मनो नाशेपातिशायत्वात् क्षणिकमत इव तुल्यामोक्षानु
पपत्तिरित्याशंक्य परमार्थतो नित्यायायोगेपि स्थायित्वात् स्वलत्वोपपत्तेर्मैवमित्याह॥ मृषेति॥ यत्र धिष्ठाने ब्र
ह्मात्मनि कर्तृत्वादिसंसाराध्यासो मृषा मिथ्या अथवा मृषाध्यासो विद्यानिबंधनो भ्रमः कर्तृत्वादिसंसार प्रति

उप.स. भासोयत्रस्यादितियोजना॥ तत्राहं ब्रह्मास्मीतिविद्यया तत्रैव तन्नाशोऽध्यस्तनाशइतिनोमतोऽस्माकंमतमित्य उ.वि.
१२ र्थः॥ तथा च योऽज्ञानाद्बन्धोऽनुभववांस्तस्य ज्ञानाद्बन्धनिवृत्त्या शुद्धस्वभावानुभवः॥ पुरुषार्थ इति वेदान्तिमतं सम १६
ञ्जसइतिभावः॥ इदानीं शून्यमते दोषमाह॥ सर्वनाश इति॥ अनुभवितुरभावात्कस्य पुरुषार्थः॥ सर्वनाश इ
ति वदेत्यर्थः॥ अविद्यानाशोऽप्ययोरपि तन्नाशे फलाभावात्फलासिद्धेर्मोक्षासिद्धिरिति भावः॥३०॥ सर्वनाश एव मो

अस्ति तावत्स्वयं नाम ज्ञानं वात्मान्यदेव वा॥ भावाभावज्ञतस्तस्य नाभावस्त्वधिगम्यते॥३१॥

शून्यवादापततिपरमार्थभावस्यास्तित्वे प्रमाणाभावादित्याशंक्याह॥ अस्तीति स्वयं नामास्तीत्यभिवादं सर्व
वादिनां सर्वज्ञानं वा आत्मा वान्यद्वस्त्वं वेति परविकल्पस्तस्याभावस्तु नाधिगम्यते शून्यता तु न प्रामाणिकीत्यर्थ १२
ः॥ कुत इति तत्राह॥ भावाभावज्ञत इति॥ लोकव्यवहारसिद्धार्थानां भावाभावाभिज्ञत्वाद्यस्याभिरस्य कस्यचि
त्सोऽस्ति तेऽभावे सर्वव्यवहारलोपप्रसंग इत्यर्थः॥३१॥

तस्याप्यभावः॥ कस्यचिज्ज्ञातीत्याशंक्याय भातितस्यैव सत्त्वाप्रसक्तेर्न शून्यत्ववादांकावकाश इति परिहरति॥ येनेति
॥ अथवोक्तमेवार्थं प्रपंचयति॥ येनेति॥ येनाभावोऽधिगम्यते सर्वस्य तत्सदेव स्यात्॥ विपक्षे दोषमाह॥ तन्न
चेदित्यादिना॥ अस्तु लोकस्य भावाभावानभिज्ञत्वमिति चेन्नेत्याह॥ न चेष्यत इति॥ केनापि सोऽभिज्ञो निराकर्तुं न श

येनाधिगम्यते भावस्तत्सत्यात्तन्न चेद्भवेत्॥ भावा
भावानभिज्ञत्वं लोकस्यास्याच्च चेष्यते॥३२॥ ॥ ॥

क्यते निराकर्तुरेव तत्स्वरूपत्वात्तस्य च सत्त्वात्तस्यापह्नवश्चैवेनं स्यादनुभवविरुद्धमेवेत्यर्थः॥३२॥ यद्यपि भा
वाभावविभागज्ञं किंचिद्वस्त्वीत्यवगतं तथापि तत्कीदृशमिति॥ विशेषतो निर्धारणे कारणं नास्तीत्याशंक्य तत्
स्वरूपमुपपादयति॥ सदसदिति॥ साक्षिस्वरूपं जगद्भ्रमतः असत सदसद्रूपमिति॥ च यो विकल्पो विवादस्तस्मा

ऽग्रागेव सिद्धं निरालंबनविकल्पानुपपत्तेर्यत्स्वरूपमिष्यते तत्स्वद्वैतं तत्र हेतुः॥ समत्वादिति॥ विकल्पात्प्राक्
वैषम्यहेत्वभावादित्यर्थः॥ द्वैतजडविलक्षणत्वेन तत्त्वेन तत्स्वरूपमभिधाय विनाशित्वे विशेषांतरमाह॥ नित्यं चे
ति॥ अनंतविलक्षणत्वेन सत्यत्वे च विशेषांतरमाह॥ अन्यद्विकल्पितादिति॥ विकल्पात्प्राग्यदिष्यत इत्यत्र स्वतः

सदसत्सदसच्चेति विकल्पात्प्राग्यदिष्यते॥ तदद्वै
तं समत्वाद्धेतुनित्यं चान्यद्विकल्पितात्॥३३॥ ॥

॥ सिद्धत्वोक्त्या ज्ञानरूपत्वमुक्तं अद्वैतमित्यानंत्यमुक्तं॥ नित्यमिति कूटस्थत्वोक्त्या दुःखाभावस्य सूचितत्वा
त्तद्विनाभूतानंदरूपता ध्वनिता॥ तथा च सत्यज्ञानानंतानंदरूपमात्मतत्त्वमित्यनुभवादेव सिद्धमिति॥ नत १३
त्रकारणांतरं मृग्यमिति भावः॥३३॥ ॥

नानाविधे द्वैते प्रतीयमाने कथमद्वैतमात्मतत्त्वमनुभूयत इत्यत आह॥ यद्वा॥ द्वैतस्य सत्यत्वमुपपाद्य तद्रूपस्या
विकल्पात्मकतया न तत्त्वं प्रतिपादयति॥ विकल्पोऽद्भवत इति॥ द्वैतस्यासत्त्वं परमार्थत्वाभाव इष्यतां कुतो विकल्पो
द्भवतो विकल्परूपेणोद्भूतत्वात् स्वप्नदृश्यवदिति योजना॥ द्वैतं न परमार्थसत्॥ दृश्यत्वात् स्वप्नदृश्यवदित्यर्थः॥
हेत्वंतरमाह॥ प्रागिति॥ सदसत्त्वादिविकल्पनात्प्रागसत्त्वाच्च स्वप्नदृश्यवदिति संबंधः॥ नहि द्वैतं स्याज्ञातसत्त्वे

विकल्पोऽद्भवतोऽसत्त्वं स्वप्नदृश्यवदिष्यतां॥ द्वैतस्य प्रागसत्त्वाच्च
सदसत्त्वादिकल्पनात्॥३४॥ वाचारंभणमात्रत्वाच्च विकाराणां ह्य
भावता॥ मृत्योः स मृत्युमित्यादेर्भ्रममायेति च स्मृतेः॥३५॥ ॥

प्रमाणमस्तीति भावः॥३४॥ न्यायतो द्वैतमिथ्यात्वमुपपाद्य श्रुत्यादपि तन्मिथ्यात्वमुपपन्नमित्याह॥ वाचारं
भणेति॥ वाचारंभणं विकारो नामधेयमिति॥ श्रुतिर्नाशादिकारणमभावतासिद्धेति शेषः॥ वाचारंभणशब्दोऽ
नृतत्ववचनो वाग्यते मृत्तिकेत्येव सत्यमिति॥ कारणे सत्त्वस्यावधारणादित्यर्थः॥ ॥श्रीकृष्णायनमः॥ ॥

उपा॰स॰ मृत्योः सममृत्युमिति चात्मनोऽद्वैतं तदभूतिस्यानिंदितत्वात्मृत्युत्वे द्वैतस्य तदयोगादर्थादनन्तत्वं तस्योक्तमित्यर्थः॥ प्र॰वि॰
१४ आद्विशुद्धात्मैकहृनानास्तिकिंचनेत्यादिसाक्षात्द्वैतापवादकं शास्त्रं गृह्यते॥ ममममायेत्यत्र मामेव ये प्रपद्यंते मायामेतां तरंतिते इति गुणमय्यास कार्याया मायायाः॥ परमात्मज्ञानं निवृत्यत्वस्य भगवतानुशासनात्त्यते १६
तदनुपपत्तेर्मायिकत्वं द्वैतस्य सिद्धमित्यर्थः॥३५॥ तदेवं श्रुतियुक्तिभ्यां द्वैतमिथ्यात्वप्रतिपादनेनात्मनोऽद्वितीयत्वे दृढीकृते सत्यशुद्धिकारणाभावात्तस्य विशुद्धिरपि सिध्यतीत्याह॥ विशुद्धिरिति॥ अस्यात्मनो विशुद्धिः धर्मा

विशुद्धिश्चात एवास्य विकल्प्याच्च विलक्षणः॥ उपादेयो न हेयो तस्मा
त्मानान्यैरकल्पितः॥३६॥ ॥ ॥

मतित्फलसंस्पर्शाभावोऽत एव द्वैतस्यानृतत्वादेव सचयतो विकल्प्याद्विजगतस्तद्विपरीतस्वभावोऽत एवात्मा॥
नोपादेयो हेयो वा भवति॥ हानोपादाने हि मूर्तविषयेनामुर्तेऽप्रत्यगात्मनि तेसंभवत इत्यर्थः॥ किं चान्यैरकल्पितो १५
न्यैः॥ कल्पयितुं अशक्यत्वादपि विशुद्ध एवात्मेत्यर्थः॥ नहि सर्वकल्पनाधिष्ठानं केनचित्कल्पयितुं शक्यते अ
तो नित्यशुद्ध इति भावः॥३६॥ ॥ ॥

कस्मादात्माकल्पितो न भवतीत्याशंक्य कल्पनाहेतोरज्ञानस्य वस्तुतः आत्मन्यभावादित्याह॥ अ
प्रकाश इति॥ अनात्मनोऽज्ञान कल्पितत्वादेवतत्र तदभावइति द्रष्टव्यं॥३७॥ यथा नित्यबोधस्वरूपत्वादज्ञान
मात्मनि वस्तुतो नास्ति तथा सर्वविक्रियारहितस्वभावत्वादवस्थांतरं कूटस्थतापच्युतिरूपं तस्य नास्तीत्याह॥ त

अप्रकाशो यथादित्ये नास्ति ज्योतिःस्वभावतः॥ नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदा
त्मनि॥३७॥ तथाविक्रियरूपत्वान्नावस्थांतरमात्मनः॥ अवस्थांतरवत्त्वे हि नाशोऽस्यस्यान्न
संशयः॥३८॥ ॥

थाविक्रियेति॥ विपक्षे दोषमाह॥ अवस्थांतरवत्त्वे हीति॥३८॥ मोक्षस्यावस्थांतरत्वात्क
थमवस्थांतराभाव इति तत्राह॥ मोक्ष इति॥ यस्य वादिनो मते मोक्षोऽवस्थांतरमात्मनस्यात्तस्य मते कृतको मोक्ष
॥ स्यात् आगवस्थायोनष्टायोनष्टायोऽनातदन्यावस्थायोगित्वानुपपत्तेरतः॥ स मोक्षः अजो नित्य एवस्यादित्य

उप॰स॰ पुरुषार्थतापत्तिरित्यर्थः॥ माभूदवस्थांतरं मोक्षस्तथापि ब्रह्मणा संयोगो वा प्रकृतेर्वियोगो वा मोक्षो न विघ्यतीति उ॰वि॰
१५ ॥मतांतरमाशंक्याप्रमाह न संयोग इति॥३९॥ अयुक्तत्वे हेतुमाह॥ संयोगस्येति॥ कृतकस्यानित्यत्वनियमादित्यर्थ १६
ः॥ननु जीवस्य संसारदेशात्परमात्मदेशागमनेवा परमात्मनोस्वोपासकानुग्रहाय तं प्रत्यागमनं मोक्षइत्यत आ

मोक्षोवस्थांतरं यस्य कृतकः स च लो ह्यतः॥ न संयोगो वियोगो वा मोक्षो युक्तः कथंचन॥३९
॥संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च॥ गमनागमने चैवं स्वरूपं तु न हीयते॥४०॥ ॥

क्याह॥ गमनागमने चेति॥ न मोक्षो युक्त इति॥ पूर्वेणानुषंगः॥ जीवपरयोर्द्वयोरप्यविक्रियत्वात् गमनागमनायो
गादित्यर्थः॥ परमते दोषमुक्त्वा स्वमते निर्दोषतामाह॥ स्वरूपं त्विति॥ न हीयते न विनश्यति॥ अत आत्मस्वरू १५
पमेव मोक्षो युक्त इत्यर्थः॥४०॥ ॥

आत्मस्वरूपमोक्षस्यानित्यत्वे कार्यत्वे हेतुमाह॥ स्वरूपस्येति॥ नास्ति निमित्तं कारणं यस्य तदनिमित्तं तस्य
भावो निमित्तत्वं तस्मादकार्यत्वादित्यर्थः॥ अपरे त्ववस्थांतरादयः॥ सनिमित्ता हीत्यतो नित्याः स्युरित्यर्थः॥
स्वरूपस्यानिमित्तत्वं तद्दर्शयति॥ स्वरूपं हि नाम तद्यत्स्वेनान्येन वानोपात्तमुपा

स्वरूपस्यानिमित्तत्वात्सनिमित्ता हि चापरे॥ अनुपात्त
स्वरूपं हि स्वेनात्यक्तं तथैव च॥४१॥ स्वरूपत्वात्सर्वस्य स
क्तुं नाक्यो ह्यनन्यतः॥ गृहीतुं वा ततो नित्यो विषयत्वात्पृथक्कृतः४२

र्जितं न भवति तथा स्वेनान्येन वा सक्तमपि न भवति॥ न ह्युपादेयस्येहेयस्य वा वस्त्रादेः॥ स्वरूपत्वं दृष्टमतो ना
गं तु कं वस्तु स्वरूपं किं तु नित्यमेवेत्यर्थः॥४१॥ उक्तं स्वरूपलक्षणमात्मनि लक्ष्येयोजयति॥ स्वरूपत्वादिति
॥ सर्वस्याकाशादेः स्वरूपत्वादारोपितसर्पादेरज्ज्वादिवत्सर्वस्यात्मभूतत्वात्तत्यक्तुं गृहीतुं वानन्यात्क्व आत्मा

उप॰स॰ १६ कृतो हि यस्मादनन्यतो भेदाभावादित्यर्थः॥ हेयोपादेयत्वाभावे विद्वेजितमाह॥ नातो नित्य इति॥ आत्मन उप अ॰वि॰ १६
हीनहानयोरयोगे पुनरपि क्रमेण हेतुद्वयमाह॥ अविषयत्वात्पृथक्कृतः॥ न ह्यविषयमुपादीयते स्वरूपं वा
त्यज्यत इति युज्यत इत्यर्थः॥४२॥ आत्मनो नित्यत्वे हेत्वन्तरमाह आत्मार्थत्वाच्चेति॥ सर्वस्यागमापायिन आ

आत्मार्थत्वाच्च सर्वस्य नित्य आत्मैव केवलः॥ त्यजेत्तस्मात्क्रि
याः सर्वाः साधनैः सह मोक्षवित्॥४३॥ ॥

त्मार्थत्वाद्धात्मभोग्यत्वाच्चेद्घनागमापायिभोक्तात्मा नित्य एवेति योजना॥ केवलो निरुपाधिरित्यर्थः॥ उपा १६
धितोप्यस्य विशेषो नास्तीत्यर्थः॥ यस्मादात्मा नित्यो न्यत्सर्वमनित्यमात्मार्थं च तस्मात्तन्यवस्थाने मोक्ष इति सि
द्धं॥ तस्मान्मुमुक्षुणा ससाधनं सर्वं कर्म त्याज्यमित्याह॥ त्यजेदिति॥४३॥ ॥

इतोपि मुमुक्षुणा क्रिया त्याज्येत्याह॥ आत्मलाभ इति॥ आत्मलाभान्न परं विद्यत इति श्रुतेः सर्वस्व त्या॥ येनाप्या
त्मसंरक्षणप्रवृत्तिदर्शनमुपपत्तिः॥ बहुवचनप्रयोगादनेकत्वं श्रुत्युपपत्तीनां सूचयति॥ आत्मलाभस्य नित्य
सिद्धत्वात्किमिदमपूर्वमिवोच्यत इत्यत आह॥ अलाभ इति॥ अलाभे इति नित्यसिद्धस्याज्ञानपरिच्छिन्नत्वेऽहंकारादि
वभेदेनात्मस्फुरणमनात्मलाभ उच्यते॥ मुतुलाभेन भवति संसारदुःखहेतुत्वात्स्वतः॥ सिद्धपरमानंदाविर्भा
वप्रतिबंधकत्वात्त्वतुतस्तिरेवेत्यर्थः॥ तस्मादनात्मतामहंकाराद्यात्माभिमानितामविद्याध्यारोपितांत्रमा

आत्मलाभः परो लाभ इति श्रुत्योपपत्तयः॥ अलाभोनात्मलाभस्तु त्यजेत्तस्मादनात्मतां॥४४॥

णजनित॥ ब्रह्मात्मज्ञानेनाज्ञानबाधनद्वारा त्यजेदित्यर्थः॥४४॥ आत्मतत्त्वब्रह्मस्वरूपावगमे आत्मलाभ ए
व परमो लाभः॥ परमपुरुषार्थ इत्यात्मैक्यज्ञानं मोक्षसाधनमात्मवाद्यानंदरूपस्तस्मिन्ज्ञानमूलः॥ संसारो
न परमर्थितः॥ इति स्वमतमभिधाय तत्रैव मुमुक्षूणां मतिस्थैर्याय मतांतरनिराकरणं कर्त्तुमारभमाणो भगवा
न्भाष्यकारः सांख्यकल्पितां तावन्निराकारोति॥ गुणानामिति॥ ॥

उप॰स॰ तत्रयत्प्रधानंत्रिगुणात्मकंस्वतंत्रमचेतनंपुरुषस्यभोगापवर्गार्थंमहदादिरूपेणपरिणमतइतिकल्प्यंते प्र॰वि॰
१७ ॥तन्नावकल्पते॥यतोगुणानांसत्वरजस्तमसांसमभावस्यसृष्टिप्राक्कालीनस्येजनस्यस्वतंत्रंगः॥प्रच्युतिः॥पू १६
र्वविस्थात्यागेनावस्थांतरापत्तिरूपःपरिणामोदुर्घटत्वान्नोपपद्यते॥कुतइतिचेत्तत्रवक्तव्यंकिंनिर्हेतुकाएव
गुणपरिणामइष्यतेसहेतुकोवानाद्यः॥सदापरिणामप्रसंगात्॥द्वितीयेप्यविद्यात्राणपदृष्टपुरुषाणांवहेतुस्त

गुणानांसमभावस्यभंगोनह्युपपद्यते॥अविद्यादेः॥प्रसुप्तत्वान्नचान्योहेतुरिष्यते॥४५॥

इत्योवापरमेश्वरोनाद्यइत्याह॥अविद्यादेरिति॥तस्मामवस्थायामविद्यादेः॥प्रसुप्तत्वाद्धीनत्वान्पुरुषीणा
मुदासीनत्वान्नातन्निमित्तसाम्यावस्थाभंगइत्यर्थः॥नद्वितीयइत्याह॥नचान्यइति॥अविद्यादिभ्योन्यःप
रमेश्वरांगीकारेपसिद्धांतप्रसंगइत्यर्थः॥४५॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनम॥ ॥श्रीनाथजीः॥ ॥ १७

गुणानामन्योन्यंप्रवृत्तिहेतुत्वंस्यादितिचेत्तत्राह॥इतरेतरेति॥अस्मिन्पक्षेप्रयोजकांतरप्रतीक्षानपेक्ष
णात्सदाप्रवृत्तिः॥परिणामः॥स्यान्नवास्यात्क्विप्रोपाभावादित्यर्थः॥अयक्रमेणोत्पत्तिस्थितिसंहाराणांप्रसिद्ध
त्वान्नासदातत्प्रसंगइतितत्राह॥नियमइति॥नियम्यतेनेनेतिनियमोनियामकोहेतुः॥प्रवृत्तीनांगुणकार्यो

इतरेतरहेतुत्वेप्रवृत्तिःस्यात्सदानवा॥नियमोन
प्रवृत्तीनांगुणेष्वात्मनिवानवेत्॥४६॥ ॥

त्पत्त्यादीनांगुणेषुसत्वादिष्वात्मनिपुरुषेवायतोनसंभवेन्नसंभवेदतः॥सदाप्रवृत्तिरप्रवृत्तिर्वास्यादिति॥यो
जना॥नहिगुणपुरुषातिरिक्तंकिंचित्तत्वमभ्युपगतमस्तीसीस्थैर्येगुणेषुवापुरुषेषुवास्थित्वाप्रवृत्त्यादिनि
यमकंस्यादित्यर्थः॥४६॥ ॥

उप·स·
१८
यथा कथंचिदस्तु वा प्रधानप्रधानप्रवृत्तिस्तथापि दोषप्रसक्तिं परिहर्तुं न पार्यत इत्याह ॥ विशेष इति तादर्थ्ये अ·वि·
प्रधानस्य पुरुषार्थत्वे सति बद्धमुक्तानां बद्धानां मुक्तानां विशेषो न युज्यते ॥ न हि सर्वपुरुषान् प्रति साधारणे प्रधा १६
नस्यैकस्य व्यापारे केचिद्बद्धाः ॥ केचिन्मुक्ता इति व्यवस्थोपपद्यते ॥ तथा च सर्वे वा सदा बद्धा मुक्ता वा स्युरित्यर्थः ॥
किंचास्मिन्मते र्थार्थिनोः त्रोपन्नो विणोः संबंधश्च न युज्यत इत्याशयः ॥ अर्थ्यत प्रार्थ्यत इत्यर्थः ॥ सुखवत्ताधनरू

विशेषो मुक्तबद्धानां तादर्थ्ये न च युज्यते ॥ अर्थार्थिनोश्च
संबंधो नार्थितो नेतरो ऽपि वा ॥ ४७ ॥ ॥

पः ॥ पदार्थः सोऽभिलषितो विद्यते यस्य सोऽर्थी ॥ तयोः संबंध उपकार्योपकारकभावलक्षणः स प्रधानवादे न युज्य
ते न घटत इत्यर्थः ॥ कुत इति आह ॥ नेति ॥ नार्थितो नैकस्वभावः पुरुषो नार्थी युक्तस्तस्यासंगत्वनिर्विशेषित्वाभ्युपग १८
मान्नेतरो ऽपि वा प्रधानाख्यो ऽपि नार्थी जडत्वादेवेत्यर्थः ॥ तस्मात्प्रधानस्य परार्थत्वकल्पनमयुक्तमिति भावः ॥ ४७

एवं प्रधानस्य पुरुषान् प्रति प्रवृत्तिमंगीकृत्याव्यवस्थोक्ता साधीदानीं न घटत इति साधयन्नेवेति प्र
धानस्येति ॥ पुरुषस्याविकारतः ॥ प्रधानकृतातिशययोगित्वलक्षणविकाररहितत्वात् प्रधानस्य परा
र्थ्यं न च युक्तमिति योजना ॥ न ह्यनुविधेयकृतातिशयायोगीनि स्वामित्वमुपपद्यत इत्यर्थः ॥ यदि पुरु

प्रधानस्य च पारार्थ्यं पुरुषस्याविकारतः ॥ न युक्तं ॥
सांख्यशास्त्रे ऽपि विकारो ऽपि न युज्यते ॥ ४८ ॥ ॥

षस्य प्रधानं प्रति स्वाम्योपपत्तये विकारो ऽप्यंगीक्रियेत तदंगीकृते ऽपि विकारे प्रधानस्य पारार्थ्यं न युज्यते
॥ विकारवतो ऽनित्यत्वनियमान्नित्यप्रधानस्वाम्यायोगादित्यर्थः ॥ सांख्यशास्त्रे ऽपीत्यपिशब्दान्नवेदबाह्य
शास्त्रेष्वेवाप्यवस्था ॥ किं तु सांख्यशास्त्रे ऽपीति ॥ तस्यापि पुंबद्धिमूलत्वं न समग्रवेदमूलत्वमस्तीति शेषः ॥ अने
४८

उप.स. प्रधानपुरुषयोः॥ संबंधाभावमुक्तं प्रपंचयति॥ संबंधानुपपत्तेश्चेति॥ पुरुषस्यासंगोदासीनस्वभाव अ.वि.
१९ त्वात्प्रकृतेः॥ जडत्वेनस्वतः॥ प्रवृत्त्यनुपपत्तेस्तयोर्मिथः॥ संबंधानुपपत्तेः प्रधानस्य तादर्थ्यं पुरुषार्थ १६

संबंधानुपपत्तेश्च प्रकृतेः पुरुषस्य च॥ मिथोयु
क्तं तदर्थत्वं प्रधानस्याचितित्वतः॥१९॥ ॥

त्वमयुक्तं युक्तिशून्यं अचितित्वतो जडत्वात्॥ प्रधानस्यान्यस्य वदुपकारकत्वासंभवादित्यर्थः॥ अतः १९
प्रधानेपुरुषयोरर्थार्थित्वकल्पनानयुक्तिमतीतिभावः॥१९॥

पुरुषस्याविकारतद्रत्युक्तमविकारित्वं स्पष्टयति॥ क्रियोत्पत्ताविति॥ पुरुषेयत्किंचित्क्रियोत्पत्तावभ्यु
पगम्यमानायां विनाशित्वं तस्य प्रसज्येत् यत्क्रियावत्तदनित्यं यथा घटादीति व्याप्तिदर्शनात् नित्यस्य पुरु
षोभ्युपगम्यते सांख्यैरित्यर्थः॥ ननुन परिस्पंदः॥ परिणामोवापुरुषस्यक्रियाभ्युपगम्यते येनानित्यत्वप्र

क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रेच पूर्ववत्॥

संगः॥ किंतु॥ ज्ञानमेव क्रियाभ्युपगम्यते॥ इतिचेत्तर्हि जन्यमजन्यं वाज्ञानमभ्युपेयते नोभयथापि घट
तइत्याह॥ ज्ञानमात्रेच पूर्ववदिति॥ जन्यज्ञानयोगे विकारित्वादनित्यत्वापत्तिरजन्यज्ञानयोगित्वेन प्रधा
नं प्रतिस्वामित्वसंभवइत्युक्तदोषापत्तिरित्यर्थः॥ तस्मात्पुरुषस्यासंगोदासीनत्वाद्बाधेयाति॥ ॥श्रीः॥

उप॰स॰ ज्ञयत्वात् प्रवर्तकत्वानुपपत्तेरन्यस्य च हेत्वन्तरस्य प्रधानविकारातिरिक्तस्यानभ्युपगमात्॥ प्रलये च प्रधा प्र॰दि॰
२० नविकाराणामलब्धात्मलाभतया प्रवर्तकत्वायोगात् निर्निमित्तैव प्रधानप्रवृत्तिरङ्गीकार्या॥ तथा चाव्य १६
वस्था मुक्तस्यैवेति॥ प्रतिपादयन्नुपसंहरति॥ निर्निमित्त इति॥ प्रधानस्य व्यापारे निर्निमित्तेऽभ्युपगम्यमाने

निर्निमित्ते त्वनिर्मोक्षः प्राधानस्य प्रसज्यते॥५०॥

तस्य सर्वदा सर्वान् प्रति प्रवृत्तिसंभवात्॥ दृक्शक्तिमतां पुरुषाणां तद्दर्शनस्यावर्जनीयत्वादनिर्मोक्षः॥ २०
प्रसज्येत अतः इत्थमव्यवस्थितं सांख्यशास्त्रं न मुमुक्षुभिः॥ श्रद्धेयमिति भावः॥५०॥ ॥श्रीकृष्णायनमः॥

निर्गुणपुरुषमतप्रक्रियां निराकृत्य सगुणः॥ पुरुषः॥ इति वैशेषिकमतप्रक्रियां दूषयति॥ न प्रकाश्य
मित्यादिना॥ आत्मगतेन ज्ञानेनात्मगताः॥ सुखादयो गुणाः प्रकाश्यन्त इति हि तेषां मतं तन्नोपपद्यते तथा हि
॥यथोष्णत्वमग्निनिष्ठमग्निनिष्ठेन प्रकाशेन न प्रकाश्यं प्रकाशग्राह्यं न भवति॥ एकाश्रयत्वादेवं सुखादयो गुणा
आत्मनिष्ठा आत्मनिष्ठेन ज्ञानेनाग्राह्याः स्युः कुतः॥ एकनीडत्वतः॥ एकाश्रयत्वात् कणादादिवर्तिनां मतः इत्यर्थ

न प्रकाश्यं यथोष्णत्वं ज्ञानेनैवं सुखादयः॥ एकनीडत्वतोऽग्राह्याः स्युः कणाददिवर्तिनां॥५१॥

॥ विषयविषयिणोः॥ समानदेशत्वे ग्राह्यमिदं ग्राहकमिदमिति च भेदनियमासिद्धेरिति भावः॥५१॥ वलमेका
श्रयत्वादेव ज्ञानसुखादीनां भास्यभासकत्वानुपपत्तिरपि तु यौगपद्यासंभवादपीत्याह युगपदिति॥ नेति पूर्वश्लो
कादनुवर्तनीयं॥ तथा चायमर्थः॥ सुखविज्ञानयोर्न युगपदात्मसमवेतत्वं संभवति कुतः॥ मनोयोगैकहेतुत्वाभा
नः

उप॰स॰ २१ संयोगस्यासमवायिकारणस्यैकमेवात्मगुणं प्रतिहेतुत्वाभ्युपगमात्तथा च सुखासमवायिकारणमनः॥ संयोग न्र॰वि॰ १६
नाम्नो सुखस्य नाशात् संयोगांतरासमवायिकारणक ज्ञानेन सुखस्य न ग्राह्यत्वं प्रत्यक्षत्वमुपपद्यते इति अपि नाशात्
त्मसमवायोपि न प्रमाणयुक्तिः क्षिप्रमवतरति इति द्योत्यते॥ चक्षुरादात्ममनसोर्निरवयोः॥ प्रदेशाभावादात्म
नोरिव संयोगानुपपत्तिः॥ संयोगे वा विभोरात्मनो विभागानुपपत्तिस्तदभावे संयोगांतरानुपपत्तेर्ज्ञानादिकार्य

युगपत् समवेतत्वं सुखविज्ञानयोरपि॥ मनोयोगैकहेतुत्वाद् ग्राह्यत्वं सुखस्य च॥५२॥

क्रमानुपपत्तिः॥ कार्याणामसंवायिकारणदेशानतिवर्त्तित्वनियमदर्शनादन्यत्रेहापि तत्प्रसंगेऽणुपरिमाण
मनः॥ संयोगस्याणुदेशमात्रवर्त्तितया तत्कार्यस्यापि तन्मात्रवर्त्तित्वे सकलशरीरगतात्मवेदनायाः प्रत्य २१
क्षत्वं प्रसंगइत्यादि दूषणगणः समुच्चीयते॥५२॥

सुखवदेव दुः॥ खेच्छाद्वेषप्रयत्नानामप्यग्राह्यत्वं न्यायसाम्यादित्याह॥ तथेति॥ अन्येषां गुणानां भिन्नत्वात् स
रविलक्षणत्वात्॥ ज्ञानसुखयोरिव युगपज्जन्म नेष्यते एकस्यात्मनः॥ संयोगस्यानेककार्यहेतुत्वासंभवस्योक्त
त्वादित्यर्थः॥ चकारादेकाश्रययोर्विषयोर्वेषयित्वायोगः॥ पूर्वोक्तः॥ संग्रह्यते॥ मा भूत् ज्ञानेनास्य त्वं सुखादीना

तथान्येषां च भिन्नत्वाद्युगपज्जन्म नेष्यते॥ गुणा
नां समवेतत्वं ज्ञाने चेन्न विशेषणात्॥५३॥ ॥ ॥

मेकस्मिन्नात्मनि समवेतत्वमेव तेषां ज्ञानं नाम स्यान्नां कथं ज्ञानेन तेषां विशेषितत्वान्नैवमित्याह॥ गुणानामि
ति॥ ज्ञातं सुखं ज्ञानं दुःखमिति॥ विशिष्टव्यवहारदर्शनादित्यर्थः॥५३॥ एतदेव विशदयति॥ ज्ञाने नैवेति॥ ज्ञाने
न विशेष्यत्वादेव ज्ञानाप्यत्वं सुखादीनामेष्टव्यमित्यर्थः॥ ॥

उप.स. २२ ज्ञाना हि तत्संस्कारजन्यस्मृतिविषयत्वादपि ज्ञानाध्यत्वं सुखादेरेष्टव्यमित्याह ॥ स्मृतेस्तथेति ॥ सुखं मया ज्ञातमि प्र.वि. १६
त्येवं स्मृतेरिति संबंधः ॥ किंच ॥ ज्ञानविशिष्टात्मसमवेतत्वं सुखादेर्ज्ञानमिष्यते ॥ केवलात्मसमवेतत्वं वाशाद्यो पुन
पतत्त्वात्तिकल्मि विशेषगुणानां समवायासंभवस्योक्तत्वादात्मगतसंख्यापरिमाणादेरपि ग्रहणप्रसंगाच्चेत्यपि

ज्ञातेनैव विशेष्यत्वात् ज्ञानाध्यत्वं स्मृतेस्तथा ॥ सु
खं ज्ञातं मयेत्येवं तथा ज्ञानात्मकत्वतः ॥५४॥ ॥

चेत्यद्वितीयं दूषयति ॥ तवेति ॥ तवमतेऽऽत्मनो ज्ञानभिन्नत्वाद्घटवद्द्रव्यमात्रत्वात्तत्समवेतत्वमात्रेण न सु २२
खादिसिद्धिः ॥ सर्वस्य जडत्वादित्यर्थः ॥५४॥ ॥

ज्ञानसुखादीनामात्मगुणत्वाभ्युपगमेन भाष्यभासकत्वासंभवमुक्तः ॥ इदानीं तेषामात्मगुणत्वमपि दुर्भ
णमित्याह ॥ सुखादेरिति ॥ सुखादेरात्मधर्मत्वं न संभवतीति तवमतेऽऽत्मनोऽविकारतो विकारत्वाभावाद्भिन्नत्वा
गीकारेणानित्यत्वाभ्युपगमान्नहि नित्यगुणकमिति मांप्रतिदृष्टांतः ॥ कोपि विद्यते तेनात्मनो गुणवदत्वसिद्धिः ॥

सुखादेर्नात्मधर्मत्वमात्मनस्तेऽविकारतः ॥ ॥

द्वैरेयाह्यग्राहककल्पनेति भावः ॥ किंच ॥ गुणगुणिनोरन्यंतभेदवादिनस्तव मते स्वयं वात्मनो यं सुखादिरिति ॥ नि
यमोपि दुर्घटइत्याह ॥ भेदादिति ॥ अन्यस्यात्मांतरस्य मनसो वाकस्मात्सुखादयो गुणा न स्युर्विशेषतो भेदावि
शेषादित्यक्षरार्थः ॥ अयमाशयः ॥ सर्वात्मनां विभुत्वांगीकारादन्यच्छरीरावच्छेदेनात्मनि सुखादयो जायंते ॥ ॥

उपा.स. २३ तत्र तदात्मसर्वात्मनां सत्त्वात् तत्तद्देहस्य च तत्त्वान्नवगमाद् दृश्ये वात्मनो योगसुखादिधर्मी नान्यस्येति ॥ नियंतुं न शक्य प्र.वि. १६
ते ॥ न मनःसंयोगभेदे नियामको मनस्यापि सर्वात्मसंबंधस्याविशेषात् ॥ नाप्यदृष्टभेदे नियामकस्तस्याप्या
त्मधर्मत्वाविशेषाद् देरदृष्टहेतुप्रयत्नादेरपि मनः ॥ संयोगनिमित्तकत्वात्तस्य च सर्वात्मसु विशेषाभावाददृष्टस्यापि।

मेदादन्यस्य कस्मान्न मनसो बाह्यनिरोधतः ॥५५॥ ॥

नाश्रयविशेषसिद्धिरिति ॥ यत्र कुत्रापि जायमानं सुखादि यस्य कस्यापि कस्मान्न स्यात्तथा मनसः ॥ क्रियावत्त्वा २३
न्मूर्त्तत्वात् सुखादिदेशाव्यभिचाराच्च तस्यैव कस्मात् धर्माः सुखादयो न स्युर्विनिगमनाभावादिति ॥५५॥ ॥

यद्यपि वैशेषिकैर्ज्ञानस्य ज्ञानांतरवेद्यत्वमिष्यते ॥ तदप्ययुक्तमनवस्थाप्रसंगादित्याह ॥ स्यान्मालेति ॥ अय
मर्थः ॥ येनात्ममनःसंयोगेन प्रथमं ज्ञानं जायते तदन्येन संयोगांतरेण तद्विषयं ज्ञानांतरं जायते किं वा तेनैव संयोगे
न ॥ आद्ये दोषमाह ॥ स्यादिति ॥ ज्ञानं चेत् ज्ञेयतां व्रजेत् तदापरिहार्या ज्ञानमालापरंपरा स्यात् ज्ञानानवस्था स्या

स्यान्मालापरिहार्या तु ज्ञानं चेत् ज्ञेयतां व्रजेत् ॥ ॥

दित्यर्थः ॥ विषयावभाससमये यदि ज्ञानं नावभासेत तर्हि विषयः ॥ स्वयमेवभासते ज्ञानाधीनतया वेति विवे
कमनाकृत्वा तदैव ज्ञानमानं ज्ञानांतरमपेक्ष्यं तस्याप्यभावेन पूर्वज्ञानस्य ज्ञानांतरभास्यत्वासिद्धेस्तज्ज्ञानाय ज्ञा
नांतरमिति दुर्निवारानवस्था स्यादिति भावः ॥ तुर्वाद्यार्थः ॥ तेन च प्रथमज्ञानोत्पत्त्यनंतरं मनसि क्रिया ततो

उप.स. विभागस्ततः पूर्वसंयोगनाशस्ततः संयोगांतरं ततो ज्ञानांतरमिति॥ बहुक्षणविलंबेनोत्पद्यमानमुत्तरज्ञानं पू ब्र.वि.
२४ र्वज्ञानावभासनेकपंक्तुर्यांत्रस्य तद्ज्ञानीमभावादित्यादि युक्त्यांतरं समुन्नीयते॥ अप्यद्वितीयं कूटस्थमन्यद्यातिप्र १६
संगेन दूषयति॥ युगपदिति॥ अविच्छानवस्थादोषपरिजिहीर्षया पूर्वोत्तरज्ञानयोरेकस्मादेव संयोगाद्युगपद्वो

युगपद्वा विचित्रोत्पत्तिरभ्युपेता तद्व्यते॥५६॥ ॥

त्पत्तिरभ्युपेता चेदित्यनुषज्यते॥ तदा तौ स्मादेव संयोगाद्युगपत्संनिकृष्टरूपरसगंधज्ञानाद्युत्पत्तौ ज्ञानानाम २४
पि तद्वैचित्र्योत्पत्तिरिष्यते॥ इष्यतां तदा संस्कारोद्बोधसन्निपातितहकारिज्ञानात्तत्तद्दर्शनस्मृतीनामप्युत्पत्तिरि
ष्यतामतो न ज्ञानस्य ज्ञानांतरवेद्यत्वकल्पनायुक्तिमतीति स्थितमित्यर्थः॥५६॥ ॥

किंचात्मनैक्ये तत्संस्वरूपलक्षणमुच्यते तटस्थलक्षणं वा आद्ये पृथिव्यादौ गंधादिवत्तातत्त्वात्तस्य
च स्वरूपानतिरेकादतिव्याप्तिः आत्मत्युक्तौ पौनरुक्त्यं तस्यात द्वितीये तु स्वरूपलक्षणमन्यदनात्मसाधारणं व
क्तव्यं॥ तच्च चेतनातिरिक्तं न किमपि संभावितमस्मात्तो देहादिजडविलक्षणमात्मानमभ्युपगच्छतां सदातिवि
शेषचिद्रूपः॥ कूटस्थ्याणा वात्माभ्युपेतव्यो न्यथा विकारिणो नित्यत्वनियमाद्बंधमोक्षान्वयैकआत्माभवती

अनवस्थांतरत्वाच्च वैयोनात्मनि विद्यते॥ नाशुद्धिश्चाप्यसंगत्वादसंगो हीति च श्रुतेः॥५७॥

ति दुःसंपादमित्येतत्सर्वमभिप्रेत्याह॥ अनवस्थांतरत्वाच्चेति॥ नास्त्यवस्थांतरं यस्य सोनवस्थांतरस्तस्य
भावोनवस्थांतरत्वं तस्मादिति विग्रहः॥ आत्मनः॥ इति शेषः॥ तथा चात्मनः कूटस्थत्वात्तस्मिन्नात्मनि वै
धर्म्यविशेषगुणवत्त्वलक्षणः परमार्थतो न विद्यते॥ चकारात्तन्निवृत्तिरूपो मोक्षोपि न विद्यत इति योज्यं तस्मा
न्नित्यशुद्धत्वात्पेत्यत्र प्रमाणवदनूपरकल्पनानिराकरणफलमाह॥ नाशुद्धिश्चापीति॥ स्वगतधर्मकृतबंध
नाववदन्यसंसर्गकृताशुद्धिरपि न चास्य संगत्वादित्यर्थः॥५७॥

इतश्चात्मनः पारमार्थिको बंध इत्याह॥ सूक्ष्मेति॥ सूक्ष्मत्वं मनोवागगम्यत्वमेकत्वमद्वितीयत्वमगोचरत्वं श्रोत्रादिविज्ञेयत्वमेतेभ्यश्च हेतुभ्यो नित्यश्रुतिरात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेरित्यर्थः॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ इति भगवद्वचनं चात्रोदाहर्तव्यं॥ अर्द्धश्लोकः॥ एवमात्मनो नित्यशुद्धबुद्धमुक्तस्वभावत्वं साधयतो वेदांतिनः शास्त्रोपदेशशास्त्रानर्थक्यमित्याक्षिपति पूर्ववादिनः॥ एवं तर्हीति यदीत्यध्याहार्यं॥ यद्येवं नित्यशुद्ध आत्मा तर्हि कथंचन केनापि रूपेण

सूक्ष्मैकागोचरेभ्यश्च न लिप्यत इति श्रुतेः॥ एवं तर्हि न मोक्षोऽस्ति बंधाभावात्कथंचन॥५८॥

बंधाभाववन्मोक्षोपि नास्ति बंधपूर्वकत्वान्मोक्षस्य तदभावे नावाप्यथा च मोक्षोपायोपदेशशास्त्रानर्थक्यमेव स्यादिति॥ उत्तरमाह॥ न बुद्धेरित्यादिना॥ बुद्धेर्भ्रांतिः॥ बंध इष्यत इत्यन्वयः॥ तस्या भ्रांतिनाशो मोक्ष इति चेष्यते॥ न परमार्थः सर्वेऽपि यथापूर्वमुक्तोऽहं नकल्पनामूलसंसारस्थितियामकं इति तथैवाचनान्यथा तथा चाज्ञानकल्पितबंधभ्रमनिवृत्त्यर्थत्वादुपदेशशास्त्रस्यानवैयर्थ्यप्रसंग इत्यर्थः॥५८॥

॥५९॥ अज्ञानमूलबुद्धिधर्माध्यासलक्षणो बंधश्चिदात्मनीत्युक्तमुपपादयति॥ बोधात्मेति॥ बोधरूपस्यात्मनो यज्ज्योतिः प्रकाशश्चिदाभासस्तेनादीप्ता व्याप्ता प्रकाशिता बुद्धिरात्मनि स्वस्यां बोद्धृचैतन्यमन्यते अन्यो बोद्धा साक्षी नास्ति अहमेव बोद्धेति सा भ्रांता बुद्धिप्रकाश्यते॥ तदविवेकादहमेव बोद्धा कर्तेत्यादिरात्मनि संसारो धीगता भ्रांतिरेवेत्यर्थः॥६०॥ बुद्धेरेव बोद्धृत्वं यथा प्रतीति परमार्थं किं न स्यादिति तत्राह॥ बोद्धस्येति॥ बुद्धेरा

शास्त्रानर्थक्यमेव स्यान्न बुद्धेर्भ्रांतिरिष्यते॥ बंधो मोक्षस्तु तन्नाशः स यथो
क्तो न चान्यथा॥५९॥ बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते॥ बुद्धिर्नान्यो
ऽस्ति बोद्धेति सेयं भ्रांतिर्हि धीगता॥६०॥

गंतुकत्वेन बोधव्यभिचारात् बोद्धस्य च विनापि बुद्धिं सुषुप्तेऽसद्भावात् तत्स्वरूपत्वात् न बुद्धेः पञ्चपंचयते ध्यस्यव्यवह्रियते विवेकादित्यर्थः॥ तर्हि सो विवेकः सादिरनादिर्वेति वीक्षायामाह॥ अविवेकोऽपीति॥ यद्यविवेक एवानाद्यज्ञानकृतत्वादनादिस्तर्हि तस्यैव ब्रह्मात्मज्ञानान्निवृत्तिः स्यान्न संसारस्येति॥ भ्रमं वारयति॥ संसारो नान्य इष्यते॥ कर्त्रादिधर्मकबुद्ध्यविवेक एव संसार इत्यर्थ
॥६१

उप.स. बंधस्यात्मानात्मकत्वे फलितमाह॥ मोक्ष इति॥ ज्ञानाद् ज्ञाननिवृत्त्यातत्॥ कार्यं बंधनिवृत्तिरेव मुक्तिर्नान्यथा अ.वि.
२६ हेयस्योपादेयस्य वा मोक्षस्यानुपपत्तितोनुपपत्तेरित्यर्थः॥ अनुपपत्तिमेव हृदयतत्पक्षांतरं निराकरोति॥ ये १६
षामिति॥ येषां वादिनां स्वरूपादन्यवस्त्वंतरापत्तिरात्मनो मोक्ष इति॥ मतं तैरात्मनाश एव मोक्ष इतीष्टः स्यात्॥

बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते॥ अविवेकोप्य
नाद्योयं संसारो नान्य इष्यते॥६१॥ मोक्षस्तन्नाश एव स्यान्ना
श एव स्यान्नान्यथानुपपत्तितः॥ येषां वस्त्वंतरापत्तिर्मोक्षो
ता नाशस्तु तैर्मतः॥६२॥

स्थितस्य नष्टस्य वान्यस्यान्यत्वासंभवात् वस्त्वंतरापत्तिर्नाश एव यदि ज्ञप्तिर्विवक्ष्यते॥ तथापि संयोगा विप्रयो २६
गाविप्रयोगांता इति न्यायेन कृतकस्यानित्यत्वव्याप्तेश्चानित्यो मोक्षः स्यादित्यर्थः॥६२॥

यथा वस्त्वंतरापत्तिर्मोक्ष इति॥ पक्षेनुपपत्तिपरनित्यत्वापत्तिश्च तथात्मनोवस्थांतरापत्तिर्मोक्ष इत्येतेपि सदो
षमेवेत्याह॥ अवस्थांतरमप्येवमिति॥ अविकारित्वादात्मनोवस्थांतरमपि न युज्यते॥ यदि पुनर्विकारो
प्यभ्युपगम्येत तत्रथा सति सावयवत्वमात्मनः॥ स्यात्ततः॥ सावयवत्वान्नाश एव घटादिवदपरिहार्यः॥ स्याद
तो भ्रांतिनिवृत्तिमात्र एव मोक्षो नान्यथा संभवतीत्यर्थः॥६३॥ वेदांतसिद्धांतादन्याः॥ बंधमोक्षादिकल्पना वा

अवस्थांतरमप्येवमविकारान्न युज्यते॥ विकारेवयवित्वं स्यात्ततो नाशो घटादिवत्
६३॥ तस्माद्भ्रांतिरतोन्या हि बंधमोक्षादिकल्पना॥ सांख्यकाणादबौद्धानां मीमांसाहत
कल्पना॥६४

दिभिरुत्प्रेक्षिताः॥ श्रुतिस्मृतिन्यायबाधितत्वान्नादरणीया मुमुक्षुभिरित्युपसंहरति
॥ तस्मादिति॥ द्वाभ्यां॥ भ्रांतिरेव परिशेषादात्मनि बंधमोक्षप्रतिभास इति॥ कल्पना श्रुत्याद्यविरुद्धा अतोन्या बं
धमोक्षादिकल्पना आदिशब्दात्तद्धेतुकल्पना च तार्किकव्याकरणादाचनेति संबंधः॥ अतोस्मात् सिद्धांतादन्या

उप॰स॰ २७ बंधमोक्षादिकल्पना हि यस्माद्भ्रांतिः॥ भ्रमाणामूलत्वात् तस्मात्तादृशं व्यतिरेकान्वयः॥ केषांवा कल्पनानादर्तव्या अ॰वि॰ १६
इत्यत आह॥ सांख्येति॥ मीमांसाहता विचारविरुद्धा विचारासहा वा कल्पना मीमांसाहतकल्पने त्यर्थः॥६४॥ अ
नादरे हेतुमाह॥ शास्त्रेति॥ शास्त्रयुक्तिविरुद्धाश्रताः कल्पना इत्याह॥ शाक्यं तद् इति॥६५॥ इतरस्य सांख्यादिकल्प
नानादर्तव्या इत्याह॥ अपिनिरोपपत्तेरिति॥ यान्यतोन्यानि शास्त्राणि रचयिष्यन्ति वै॥ शाकनीयानि

शास्त्रयुक्तिविहीनत्वात्तादृशं व्याशैकदाचन॥ शाक्यं तेषां तन्नैव कर्तुं दोषाख्यास्तासां सह
स्त्रशः॥६५॥ अपिनिरोपपत्तेश्च यान्यतोन्यानि चेत्यतः॥ संस्कारैर्हा अन्यशास्त्रीकां मति
कुर्याद्दृढां बुधः॥६६॥ ॥

विद्वद्भिर्धर्मशुद्धिमद्भिर्मुनिभिः॥ यावेदबाह्याः॥ स्मृतयो याश्च काश्च कुदृष्
यः॥ सर्वास्ता निःफलाः॥ प्रेत्य तमोनिष्ठा हि ताः॥ स्मृता इत्यादिं दावचनात्तादृशं व्या इत्यर्थः॥ अतोन्यशास्त्री ४५
कीसंस्काराद्दृढां मतिं बुधः॥ कुर्यादित्यन्वयः॥६६॥ ॥

कथमहं मतिं कुर्यात् कुत्र वेत्याकांक्षायामाह॥ श्रद्धेति॥ श्रद्धा गुरुत्युक्तेर्थे विश्वासो भक्तिस्तत्परता ते पुरस्कृ
त्यादरेणावलंब्येत्यर्थः॥ सुगममन्यत्॥६७॥ एवमुक्तं परपक्षनिराकरणं संक्षिप्य तत्प्रयोजनं कथयति॥

श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनार्जवं॥ वेदांतस्यै
व तत्वार्थं व्याससूत्यामिमतोतथा॥६७॥ इति प्रत्युक्ताद्व
यवादकल्पना निरात्मवादाश्च तथा हि युक्तितः॥६८

इतीति॥ इति इत्थं युक्तितः॥ प्रत्युक्ता निराकृताद्वयवादकल्पना भेदवादकल्पनाः॥ सांख्यादिकल्पना इतिया
वत्॥ तथा निरात्मवादाः बौद्धवादाश्च युक्तितः॥ प्रत्युक्ता इत्यर्थः॥ किमर्थं तदाह॥ व्यपेति॥ मुमुक्षवः॥ परवादतः

उप॰स॰ २८ परमात्मस्वरूपैर्व्यपेतशंकास्ततप्रामाणिकत्वशंकारहिताः॥ संतो ज्ञानपथे वेदांतोक्तज्ञानमार्गे स्थिराः श्र॰वि॰ १६
स्युर्भवेयुरित्युत्तरत्रापीति योजना॥६८॥ वेदांतविहितब्रह्मात्मज्ञानस्यैव परमपुरुषार्थसाधनत्वमिति॥ तत्तत्त्व
रूपकथनपूर्वकं मुमुक्षूणां तन्निश्चयत्वमावश्यकमिति॥ दर्शयति॥ स्वसाक्षिकमिति॥ अद्वयमखंडवस्तु

व्यपेतशंका परवादतः स्थिरा मुमुक्षवो ज्ञानपथे स्यु
रित्युत॥६८॥ स्वसाक्षिकं ज्ञानमतीव निर्मलं विकल्प
नाभ्यां विपरीतमद्वयं॥ अवाप्य सम्यक् यदि निश्चितो
भवेन्निरन्वयो निर्वृत्तिमेति शाश्वतीम्॥६९॥ ॥ ॥

२८

मावांत्राकारमित्यर्थः॥ निरन्वयो निस्त्ताज्ञानतत्कार्यसंबंधः सन्नित्यर्थः॥ शाश्वतीति॥ निरखंडानंदा
नुभवस्वरूपाविर्भावः॥६९॥ ॥

यथोक्तज्ञानाधिकारिणां संक्षिप्तविशेषणोपसंहारं कथयंस्तत्त्वनिष्ठालक्षणमाह॥ इदं रहस्यमिति॥ पदवाप्यनाम्य
तीनिवृत्तिमेति॥ तदिदं रहस्यमुपदेशैकगम्यं परमं परमात्मतत्त्वप्रकाशत्वात् सर्वोत्तमं परायणं निरवधिकस
र्वाश्रयं परममतिरूपमिति यावत्॥ एवंविधमात्मज्ञानं समीक्ष्य सम्यगालोच्य हृदीकृत्वेति यावत्॥ व्यपेतदोषैर
पगतेंद्रियबहिर्मुखैरभिमानवर्जितैः॥ पांडित्यादिनिमित्तदोषैरहितैः॥ ज्ञातेदंवैश्वेति यावत्॥ एवंविधैरपि

इदं रहस्यं परमं परायणं व्यपेतदोषैरभिमानवर्जितैः॥ समीक्ष्य
कार्या मतिरार्जवे सदा न तत्त्वदृक्स्वान्यमतिर्हि कस्यचनः॥७०॥ ॥

कारिभिरार्जवे ऋजुभावे समे ब्रह्मात्मत्वे मतिर्निश्चयः सदा कार्या ब्रह्मात्मत्वमेव ऋजु सर्वदा सर्वत्रैकरूपत्वात्त
॥तत्स्वरूपमेवार्जवं नाम तस्य निर्विघ्नोदयत्वादिति द्रष्टव्यं॥ तथा च ब्रह्मात्मैकत्वज्ञाननिष्ठातत्त्वनिश्चेतुः कृतंभ
वति॥ ॥ ॥

उप॰स॰ णातद्देवव्यतिरेककथनेन विशदयति॥ नतत्त्वदृगिति॥ यः कश्चन स्वात्मेति॥ प्रत्यगात्मनोन्यस्मिन्नब्र प्र॰वि॰
२९ ह्मणि मतिर्यस्य स स्वात्मघाती॥ स न तत्त्वदृक् तत्त्वदृष्टिर्न भवतीत्यर्थः॥ तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपास १६

अनेकजन्मांतरसंचितैर्नरो विमुच्यते ज्ञाननिमित्तपातकैः॥
इदं विदित्वा परमं हि पावनं न लिप्यते व्योमवदेह कर्मभिः॥७१॥

ते॥ अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति॥ न स वेदेति श्रुतेः॥७०॥ एवमतियत्नजन्यैतज्ज्ञानेन २९
किं फलं संपाद्यते तदाह॥ अनेकेति॥ स्पष्टार्थः॥७१॥ ॥

इदं ज्ञानमाचार्येण कस्मै दातव्यमित्यपेक्षायां विस्तृतविशेषणमधिकारिणमाह॥ प्रशांतेति प्रशांतचित्ता
य शांतिगुणयुक्ताय जितेंद्रियाय दांताय प्रहीणदोषाय अनेकजन्मानुष्ठितादिपरितोषितेश्वरप्रसादहत
समस्तकल्मषाय यथोक्तकारिणे ज्ञात्वोक्तस्वधर्मस्य यथाशास्त्रमनुष्ठात्रे गुणान्विताय विद्याविनयार्जवादिगु

प्रशांतचित्ताय जितेंद्रियाय च प्रहीणदोषाय यथोक्तकारिणे॥ गुणान्वि
ताय अनुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥७२॥ ॥

णयुक्ताय सर्वदा दीर्घकालं सततं च नैरंतर्येणानुगताय गुरुमनुसृताय एवंविधाय मुमुक्षवे मोक्षमात्रेच्छा
वते एतद्ब्रह्मज्ञानं गुरुणा देयं प्रतिपादयितव्यमित्यर्थः॥७२॥ ॥

उ.प.स. ३० एवंविधः शिष्यो महावाक्येनावगमितमात्मतत्त्वं कथमवगच्छति॥ किंवा फलं चाप्नोतीत्यपेक्षायामाह॥ त्र.वि. २६
परस्येति॥ यथा परस्यान्यस्य देहे परस्यापरस्य नाभिमानिता अहं ममेत्यभिमानित्वं न भवति॥ तद्वत् स्वदे
हेऽपि परमार्थमीक्ष्य देहातिरिक्तमात्मतत्त्वमीक्षणाज्जोऽप्यभिमानरहितः सन्निति यावत्॥ चकारात्तत्प्रतिपादक

परस्य देहे न यथाभिमानिता परस्य तद्वत् परमार्थमीक्ष्य च॥ इदं हि विज्ञा
नमतीव निर्मलं संप्राप्य मुक्तोऽथ भवेच्च सर्वतः॥७३॥ ॥

वेदांतवचांस्यालोच्येति गृह्यते॥ एवंविधं इदं विज्ञानं पूर्वोक्तसाक्षात्कारं संप्राप्याथ तदैव सर्वतो मुक्तो भवेन्नि ३०
रस्ताज्ञानतत्कार्यसंस्कारः परमानंदानुभवब्रह्मात्मरूपो भवेदित्यर्थः॥७३॥ ॥

किमिति॥ गुणविशेषवत्तच्छिष्यपरीक्षणं गुरोर्यस्मै कस्मैचित्तच्छिष्याय कस्माद्विद्या न दीयते तत्राह नहीति
॥स्वरूपमात्मतत्त्वं लभ्यतेऽनेनेति स्वरूपलाभस्तत्त्वज्ञानं तस्मादभ्यधिको लाभः कश्चन कोपीह देवमनुष्यादि
भवपरं परायणं नास्ति॥ आत्मलाभान्न परं विद्यत इति स्मृतेः॥ स लाभः॥ इत एव वेदांतवाक्याज्ञान्यातोऽन्यस्मा
त्तच्छास्त्रोत्तरान्न भवति हि यस्मात्तस्माच्छलतः॥ शिष्यमपरीक्ष्य स्वरूपलाभं तु ज्ञानेन न देयं॥ ऐं भादपि राज्यतो

नहीह लाभोऽभ्यधिकोऽस्ति कश्चन स्वरूपलाभात्स इतो हि नान्यतः॥
न देयमेताप भवेदपि राज्यतोऽधिकं स्वरूपलाभं त्वपरीक्ष्य यत्नतः॥
॥७४॥ ॥इति श्रीपार्थिवप्रकरणं षोडशं विवृतं नाम समाप्तः॥१६॥

राज्यादधिकमिति॥ विशेषणेन प्रणाम्याय चांतेवासिने नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृ
हीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इति श्रुतिं प्रमाणयति॥७४॥ ॥इति श्रीपार्थिवप्रकरणं षोडशं
विवृतं समाप्तं॥१६॥ ॥शुभं भवतु॥ ॥कल्याणमस्तु॥ ॥श्रीरस्तु॥ ॥श्रीजयोऽस्तु॥ ॥श्रीप्रबाजीसत्यछे॥

॥ ॥इतिश्रीषोडशप्रकरणंसमाप्तं॥१६॥ ॥

॥ॐ नमः॥ परपक्षनिराकरणमुखेनोक्तं मोक्षसाधनं ज्ञानं स्वप्रक्रियया विवक्षीकर्तुं प्रकरणमारभमाणो
देवतानमस्कारं विद्याप्राप्त्यंतरंगत्वं द्योतयन् प्रकरणप्रतिपाद्यार्थं नमस्कारव्याजेन संक्षिप्याह॥ आत्म
ज्ञेय इति॥ आत्मस्वरूपं ज्ञेयः॥ स्वरूपतोवधार्यः॥ किं घटादिवद्विषयत्वेनेत्याह॥ परो ह्यात्मेति हि य
स्मादात्मा सर्वज्ञो ज्ञेयात्परोसत्त्वधर्मरहितः॥ तत्कुतः॥ तत्राह॥ यस्मादन्यन्न विद्यत इति॥ यस्मादात्मनः

ॐ नमः॥ आत्मज्ञेयः परो ह्यात्मा यस्मादन्यन्न विद्यते॥ सर्वज्ञः सर्वदृक् शुद्धस्तस्मै ज्ञेयात्मने नमः॥१

स्वरूपादन्यत्परमार्थतः॥ पृथग्भूतं तद्वस्तु नैव न विद्यते॥ तथा च रूपादिहीनतया चक्षुराद्यगोचरत्वात्
॥स्वसमानजातीयाप्रत्यक्षव्यक्त्यंतराभावात् व्याप्तिग्रहाभावे सत्यनुमानार्थापत्तिग्राह्यत्वाभावात्॥ शब्द
प्रवृत्तेतराभावेनोपमानाग्राह्यत्वात्॥ षष्ठीजातिगुणक्रियादिधर्मराहित्येन शब्दागोचरत्वात्॥ ज्ञातुः स्व १
रूपत्वादेव नास्तीत्यभ्युपगंतुमशक्यत्वात्॥ परिशेषाद्विषयभूतदेहेंद्रियांतः॥ करणप्रत्याख्यानेनान्वि

ष्यतत्साक्षितयाविषयत्वेन स्वयंप्रकाश आत्मा ज्ञेय इत्यर्थः॥ एवं त्वंपदार्थं परिशोध्य तस्य तत्पदार्था
त्मकत्वं वाक्यार्थं कथयितुं तत्पदार्थमाह॥ सर्वज्ञ इति॥ सामान्यतः॥ सर्वं जानातीति सर्वज्ञो विशेषत
ः सर्वं पश्यतीति॥ सर्वदृक् सर्वज्ञत्वमुपलक्षणमुक्त्वा तस्य स्वरूपलक्षणमाह॥ शुद्ध इति॥ अज्ञानतज्जउप
रिच्छिन्नदुः॥ खादिप्रपंचसंसर्गरहितः सत्यज्ञानानंतानंदरूपमित्यर्थः॥ वाक्यार्थतत्त्वे पदार्थैक्यमाह॥

पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितं॥ ब्रह्म वेदरहस्यं यैस्तान्नित्यं प्रणतोस्म्यहं॥२॥ ॥

तस्मादिति॥ पूर्वोक्तप्रकारेण ज्ञेयस्यात्मनश्च ज्ञेयात्मा तस्मै ज्ञेयात्मने तस्मै सर्वज्ञत्वाद्युपलक्षिताय स
त्यादिस्वरूपाय नमः॥ प्रह्वीभावोस्तु तदुद्देदृष्टिविलय एवेह नमः॥ नम्रार्थः॥१॥ देवताभक्तिवद्गुरुभक्तेरपि
विद्याप्राप्त्यंतरंगत्वं॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः॥ प्रकाशंते महात्मन इ
ति श्रुतिसिद्धं द्योतयन् गुरुपरंपरां प्रणमति॥ पदवाक्येति॥ यैर्गुरुभिः॥ वेदरहस्यं ब्रह्म प्रकाशितं तान्नित्यं

उप·स· प्रणतोस्म्यहमिति संबंधः॥ पदानां वाक्यानां च शक्तितात्पर्यमर्यादया परिमाणैः पदवाक्यप्रमाणैः॥ प प्र·वि·१३
२ दा पदवाक्ये प्रसिद्धे प्रमाणमानुमानादि तद्वेत्तारित्यर्थः॥ दीपभूतैरयत्नेन सर्वार्थप्रकाशकैर्यैरिति संबंधः॥
२॥ सामान्येनाचार्यपरंपरां नमस्कृत्य विशेषेण स्वगुरुं प्रणामपूर्वकं मुदेन्यं प्रति जानीते॥ यद्वागीतिः॥
ब्रह्मविद्याया विनिश्चयो यस्मात्तन्यायविशेषात् भवति तं न्यायविशेषं वक्ष्ये इत्यर्थः॥ सुगममन्यत्॥३॥

यद्वाक्सूर्यांशुसंपातप्रनष्टध्वांतकल्मषः॥ प्रणम्य तान्गुरून्वक्ष्ये ब्रह्मविद्यावि
निश्चयं॥३॥ आत्मलाभात्परो नान्यो लाभः कश्चन विद्यते॥ यदर्था वेदवादाश्च स्मार्ताश्चा
पि तु याः क्रियाः॥४॥

किमर्थं ब्रह्मविद्याविनिश्चयो वक्ष्यते तत्राह॥ आत्मलाभादिति॥ आत्मलाभ
स्य परमत्वे प्रमाणं सूचयति॥ यदर्था इति॥ वेदवादाः॥ वेदवचनानि स्मार्ताश्च वादाः स्मृतिवचनानि सा
क्षात्तानार्थाः॥ वेदवादाः स्मृतिवादाश्च यदर्थाः॥ अपि तु याः क्रियाः कर्मपर वेदस्मृतिविहिताः॥ ताश्च २
चित्तशुद्धिपरंपरया यदर्थास्तस्मादात्मलाभादिति संबंधः॥४॥ ॥श्रीकृष्णायनमः॥ ॥श्री॥ ॥

पुत्रादिलाभापेक्षया आत्मलाभस्य परमत्वं प्रामाणिकमित्युक्तमुपपादयति॥ आत्मार्थोपीति॥ योपि
लाभः पुत्रधनादिविषयो लोके सुखायेष्टः सोप्यात्मार्थः आत्मसुखार्थ इति प्रसिद्धमिति॥ योजना॥ तर्हि पुत्रादि
लाभेनैवात्मसुखसिद्धेः॥ किमित्यात्मज्ञानमात्मलाभायेष्यं विशेषाभावादित्यत आह॥ विपर्यय इति॥ सुख

आत्मार्थोपि हि यो लाभः सुखायेष्टो विपर्ययः॥ आत्मलाभः परः प्रोक्तो
नित्यत्वात्ब्रह्मवेदिभिः॥५॥

विपर्ययः दुःखायापि स लाभः स्यात्कदाचित्कस्यचित्पुत्रादेरेव दुःखहेतुत्वदर्शनादित्यर्थः॥ तस्मा
त्लाभांतरानपेक्षया आत्मलाभः परमो लाभ इति॥ तदर्थं सर्वपरित्यागेनात्मज्ञानं संपादनीयमित्यभिप्रे
त्याह॥ आत्मेति॥ विपर्ययप्रसंगस्तत्र नास्तीत्याह॥ नित्यत्वादिति॥ तथा च श्रुतिः॥ ॥श्रीरामायनमः॥ ॥

उप.स. तदेतत्प्रियं पुत्रात् प्रियो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मात् अंतरांतरं यदयमात्मा स योऽन्यमात्मनः प्रि प्र.वि.१३
३ यं ब्रुवाणं ब्रूयात् प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत तेनेहास्य प्रियं प्रमायुकं भवतीति
॥५॥ आत्मसुखलाभस्य नित्यत्वमुक्तं साधयति॥ स्वयमिति॥ तस्यात्मनो लाभेन चान्यतोऽन्यनिमित्तको न भव

स्वयंलब्धस्वभावत्वाल्लाभस्तस्य न चान्यतः॥ अन्यापेक्षस्तु यो लाभः सो
न्यदृष्टिसमुद्भवः॥६॥

ति॥ कुतः स्वयंलब्धस्वभावत्वात्॥ साधनसाध्यत्वाभावात् नित्यत्वमित्यर्थः॥ पुत्रादिलाभस्य साधना- ३
धीनत्वेनानित्यत्वं साधयति॥ अन्यापेक्ष इति॥ अन्यदृष्टेः सकाशात्समुद्भवो यस्य सः॥ तथा॥ अन्याधी
नस्य तदपगमे अपगमादनित्यत्वमित्यर्थः॥६॥

केयमन्यदृष्टिः का वा ततदुद्भवस्यान्यपुत्रादिलाभस्य अनित्यत्वे हानिरित्यत आह॥ अन्यदृष्टिस्त्विति॥
अन्यस्मिन् अनात्मनि दृष्टिः प्रतीतिः॥ यस्याः सा अन्यदृष्टिः॥ सा अविद्या भवतीत्यर्थः॥ ततस्तस्यात्मा अवि
द्योद्भूतत्वात् भ्रांतिनिबंधनत्वात् पुत्रादिलाभप्रीतेस्तस्याश्च स्वप्नतुल्यत्वात् नित्यात्मप्रियहानिः॥ स्यादिति भावः॥ त
थाचाविद्यानिवृत्तिमंतरेण आत्मस्वरूपनित्यसुखलाभाभावात् सा संपाद्येत्याह॥ तन्नाश इति॥ मोक्षो नित्यनिर

अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते॥ ज्ञानेनैव तु
सोऽपि स्याद्विरोधित्वान्न कर्मणा॥७॥

तिशयपरमानंदाविर्भावोऽज्ञानहानिलक्षणस्तस्याप्युपायमाह॥ ज्ञानेनैवेति॥ सोऽप्यज्ञाननाशलक्षणो मो
क्षो ज्ञानेनैव स्यात्॥ तस्यैवाज्ञानविरोधित्वात्॥ न कर्मणा तस्याज्ञानविरोधित्वाभावात् तस्मात्॥ सर्वकर्मप
रित्यागेनात्मज्ञानं सर्वथा संपादनीयमेव मुमुक्षुणेत्यर्थः॥७॥

उ॰प॰स॰ ४ ननु विरोधाभावात् सकार्याविद्यानिवृत्तिरूपो मोक्षः कर्मणामाभूत तत्साधिते न नित्यपुरुषार्थोऽभि प्र॰वि॰
विव्यक्ततः ॥ किं ज्ञानेनेति नेत्याह ॥ कर्मकार्यस्त्विति ॥ तत्र हेतुगर्भं विशेषणं ॥ अविद्येति ॥ मिथ्याज्ञानप्रमूल
रागप्रयुक्तकर्मसाध्यत्वादित्यर्थः ॥ कर्मसाध्यं फलमनित्यं ज्ञानसाध्यं तु नित्यमित्यत्र किं प्रमाणमिति चेत् तत्रे

कर्मकार्यस्त्वनित्यः स्यादविद्याकामकारणः ॥ प्रमाणं वेदन
चात्र ज्ञानस्याधिगमे स्मृतः ॥ ८ ॥

दृण वेत्याह ॥ प्रमाणमिति ॥ तद्यथेह कर्मजितो लोकः ॥ क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते ॥ ब्रह्म
विदाप्नोति परं ॥ तरति शोकमात्मविदित्यादिवेद एव कर्मसाध्यमनित्यं ज्ञानसाध्यं नित्यं मोक्षरूपमित्य ४
त्र ज्ञानस्याधिगमे प्रमाणं विद्वद्भिः स्मृतमित्यर्थः ॥ ८ ॥

किंच ॥ वेदस्याध्ययनविध्युपादापितत्वात् पुरुषार्थपर्यवसानायोगात् परमपुरुषार्थपर्यवसानाया
त्मैक्यज्ञानपरत्वमेष्टव्यं तेन कर्मसु तस्य महातात्पर्यं नभ्यत इत्यभिप्रेत्याह ॥ ज्ञानैकार्थेति ॥ ज्ञानमेवैको
र्थः ॥ प्रयोजनं परं प्रतिपाद्यं यस्य वेदस्य स तथा तस्य भावः ॥ तत्त्वं तस्मात् तं वेदमेकवाक्यं विदुः वाक्यप्र
माणविद इति शेषः ॥ किं तस्य तेयस्थिमित्यपेक्षायामाह ॥ एकत्वं हीति ॥ ततो ज्ञानाद्यात्मन एकत्वमेव ज्ञेय

ज्ञानैकार्थपरत्वात्तु वाक्यमेकं ततो विदुः ॥ एकत्वं
ह्यात्मनो ज्ञेयं वाक्यार्थप्रतिपत्तितः ॥ ९ ॥ ॥ ॥

मित्यन्वयः ॥ हिशब्दोऽवधारणार्थः ॥ ज्ञानप्रकारमाह ॥ वाक्यार्थप्रतिपत्तित इति ॥ सत्यं ज्ञानमनंतमि
त्याद्यवांतरवाक्यार्थप्रतिपत्तिद्वारेण तत्त्वमस्यादिमहावाक्यैरात्मनो ब्रह्मैकत्वं ज्ञेयमित्यर्थः ॥ आत्मतत्त्वज्ञा
नस्यैव परमपुरुषार्थहेतुतायाः श्रुतत्वात् ॥ कर्मकांडमपि तत्त्वज्ञानापेक्षितचित्तशुद्धिहेतुकर्मविधानद्वा

रापारंपर्येण परमपुरुषार्थसाधनभावं भजत इति युक्तमेकार्थपर्यवसानेनैकवाक्यत्वं वेदवाक्यस्येति भा
वः ॥ ९ ॥ नन्वात्मनो ब्रह्मणश्चैकत्वज्ञानमनुपपन्नं तयोः पर्यायशब्दवाच्यत्वेन भेदादित्याशंक्यमेवमन्यो
न्याश्रयापत्तिरित्याह ॥ वाच्यभेदादिति ॥ तेद्वे दोषपर्यायशब्दभेदो वाच्यभेदात् कल्प्यस्त्वया वाच्योपि तच्छ्रुते
रपर्यायशब्दभेदश्रवणात् भिन्नः कल्प्यः ॥ तथा च ॥ सिद्धे वाच्यजीवब्रह्मभेदे तद्वाचकशब्दयोरपर्यायत्वे

वाच्यभेदात्तु तद्भेदः ॥ कल्प्यो वाचोहि तच्छ्रुतेः ॥ त्रयं
त्वेततः ॥ प्रोक्तं रूपं नाम च कर्म च ॥ १० ॥ ॥ ॥

सिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः ॥ स्वरूपतो भेदकल्पनायां प्रमाणाभावादिति भावः ॥ भेदस्य प्रामाणि
कत्वादेकत्वज्ञानमनुपपन्नमित्युक्ते भेदस्यापि प्रमाणसिद्धित्वं पूर्ववादी शंकते ॥ त्रयं त्वेतदिति ॥ त्रयं वा इदं ५
नामरूपं कर्मेति श्रुत्या ततश्चात्मनोऽतिरिक्तं रूपं नाम च कर्म च प्रोक्तमतो नैकत्वमेव वेदार्थ इत्यर्थः ॥ १० ॥

सिद्धांती दूषयति ॥ असदेतदिति ॥ हि यस्मादेतत् त्रयमन्योन्येन कल्पितं अन्योन्यसापेक्षसिद्धिकं तस्मादसदि
त्यन्वयः ॥ अन्योन्याश्रयग्रस्तत्वात् भेदस्य प्रमातुमशक्यतया प्रामाणिकत्वाभावात् यथा कथंचित् लोकसिद्धो
मिथ्याभेदः श्रुत्यानूद्यते केवलं वैराग्याय नातो नाद्वैतज्ञाननाशो विरोधितेति भावः ॥ अथवा कर्मसर्वस्य वेदस्यैका
र्थतानपरत्वेनैकवाक्यत्वं नियंतुं शक्यते ॥ अपुनरुक्तशब्दभेदवशात् तत्र तत्रार्थभेदस्य प्रतीयमानत्वादिति

असदेतत्त्रयं तस्मा ॥

चेतत्सत्यं तथापि न तत्र तात्पर्ययुक्तं ॥ प्रमाणयुक्तिबाधितत्वात् द्वैतस्येत्यभिप्रेत्याह ॥ वाच्यभेदादिति ॥ वा
च्यभेदे प्रामाणिके सति तद्विषयतोऽस्य पर्यवतच्छब्दभेदादनेकवाक्यता सिध्यति ॥ तथा तत्भेदो वाच्यभेदोपि त
च्छ्रुतेः ॥ वाचकशब्दभेदश्रुतेः ॥ श्रवणात् कल्प्यः ॥ प्रकारांतरेण वाच्यभेदासिद्धेः ॥ ॥ श्रीनाथजी ॥ ॥

ज्ञ.स. नहीशब्दाधीनोऽर्थतत्त्वनिश्चयः॥ आरोपितविषयेपि शब्दभेददर्शनात्॥ नान्यार्थाधीनः शब्दनिश्चयः॥ एक ब्र.वि.६
स्मिन्नपि पुरुषे पिता भ्राता मातुलो जामाता पितेत्यपि तु उपाधिभेदात्पुनरेकशब्दभेददर्शनात् नहि तत्र प्रतियो
६ ग्युपाधिभेदव्यतिरेकेण वस्तुभेदो विद्यते॥ तथा चानाद्यविद्याकल्पितानेकोपाधिभेदावच्छिन्नानेककर्त्रादि

दन्योन्येनहि कल्प्यते॥

कारकभेदानुवादेन ज्ञातापेक्षितांतःकरणशुद्धिसाधनकर्मविधिपरत्वात्॥ कर्मकांडस्यात्मतत्त्वज्ञानवाक्यै
कवाक्यत्वोपपत्तेः॥ निरतिशयानंदात्यंतिकदुःखनिवृत्तिफलस्य सर्वोपास्तरसतो निजावगोचरस्यात्मतत्त्व
ज्ञानादन्यातोसंभवाद्विद्याविद्यावदेवस्या॥ उपाधिभेदेनाधिकारिभेदप्रयोगभेदयोरप्युपपत्तेः॥ ॥ ॥ ६

एकपुरुषापेक्षितैकपरमपुरुषार्थैकसाधनत्वकारणत्वेनैकवाक्यतावदेवस्य युक्तेतिभावः॥ एवं द्वैतस्या
विद्याकल्पितत्वे युक्तिमभिधाय प्रमाणमभिधत्ते॥ त्रयं त्विति॥ यतोऽयमनिरूपिताकारभेदः॥ प्रपंच
स्ततो हेतोरेतत्सर्वं दृश्यं रूपं नामचकर्मचेति॥ त्रयं राशीकृत्य श्रुत्या प्रोक्तमिति योजना॥ त्रयं वा इदं ना

कृतोवर्णोयथा शब्दात्॥

मरूपं कर्मेत्यस्मिन्ब्राह्मणे हेतुक्तिपूर्वकं शब्दविशेषाणां वाङ्मात्रत्वं॥ रूपविशेषाणां चक्षुर्मात्रत्वं॥ कर्म
विशेषाणां शरीरमात्रत्वमिति॥ विशेषप्रविलापनेन तत्त्रयात्मा सामान्यत्रित्वमभिधाय तदेतत्त्रयं सदेकमयमा
त्मा आत्मैकः सन्॥ एतत्त्रयमित्यैकात्म्यं सर्वस्य जगतद्रूपसंहृतमतो न तत्त्वभेदोऽस्तीत्यर्थः॥ ॥ ॥

उप.स. उपसंहरति॥ असदेतदिति॥ उक्तार्थमेतत्॥ अन्योन्यापेक्षयावगम्यमानत्वमित्याख्यायात्वे दृष्टान्तमाह अ.वि.२७
७ ॥कृतइति॥ शब्दात्सूतो वर्णइन्द्रादिरूपविशेषः॥ सहस्राक्षो वज्रबाहुरित्यादिः॥ धियाअन्यत्रह्यान्यत्रबहिः॥कुं

सूतोन्यत्रधियाबहिः॥११॥ ॥

ड्यादौ चित्ररूपेणाकृतौ यथा कल्पितो मिथ्येति योजना॥ नहि चित्रे दृश्यमेवं रूपं इन्द्रस्य वज्रस्य वाभवति ७
॥तथाच मिथ्यार्थः॥गोचरः शब्द इत्यर्थः॥११॥ ॥

शब्दात् मिथ्यार्थकल्पनामुदाहृत्यामिथ्यार्थात्शब्दकल्पनामुदाहरति॥ दृष्टं चापीति॥ भित्तिपटादौ दृष्टं दे
वतारूपं तथा तद्देवबुद्धेस्तद्दर्शनसंस्कृतायाः आगतस्य शब्दापरोक्षव्यपदेशाय कल्पितमिति योजना॥
दार्ष्टान्तिकमाह॥ एवमिति॥ एतत्सर्वंजगदेवं यथा दृष्टान्तमेवं भ्रान्तबुद्ध्या शुक्तौ रजतमिवात्मनि विविधंक

दृष्टं चापि यथारूपं बुद्धेः शब्दाय कल्प्यते॥ एवमेतज्ज
गत्सर्वं भ्रान्तिबुद्धिविकल्पितं॥१२॥

ल्पितं न वस्तुसदित्यर्थः॥१२॥ जगतो मिथ्यात्वे फलितमाह॥ असदेतत्तु तदिति॥ सर्वंकल्पितं चेतच्छून्
वादापत्तिरित्याशंक्याह॥ सच्छिदिति॥ निरधिष्ठानकल्पनानुपपत्तेः॥ सर्वकल्पनास्पदं सच्छिन्मात्रं
वस्तुकृत्वेन कल्पितं सर्वसाक्षित्वात्॥ तस्य सर्वकल्पनायाः॥ प्रागेव सिद्धत्वादित्यर्थः॥ ॥श्रीनाथजी॥ ॥

उ.प.स. वेदाचार्यादिरात्मतत्त्वप्रतिपत्तिहेतुत्वात्कल्पितत्वमस्तीति॥ कथं सच्चिन्मात्रमकल्पितमित्युच्यते तत्राह उ.वि.१३
८ ॥वेदत्वस्यापीति॥ स एवाद्यः पूर्वसिद्ध आत्मा वेदोपि वेदनहेतुः॥ श्रुत्याचार्यरूपेण मायया प्रपतेऽर्थप्रकाशनेन
आत्मकैरन्यत्र जडेऽसंभवात्॥ न ह्यग्निगतप्रकाशनशक्तिव्यतिरेकेण दीपादेः परप्रकाशनशक्तिरस्ति वेद्यं च तत

असदेतत्ततो युक्तं सच्चिन्मात्रं न कल्पितं॥ वेदस्याविद ए
वाद्यो वेद्यं चान्यत्तु कल्पितं॥१३॥

त्वस एवाद्य इति संबंधः॥ अन्यत्तु विशेषमात्रं कल्पितं तथा च कल्पितविशेषानुगतत्वेनात्मन एव बोधकत्वे ८
सर्वकल्पनापवादावधितयात्तस्यैव बोध्यत्वं चोपपद्यत इत्यर्थः॥१३॥

कथं स एवाद्यो वेदो वेद्यं चेत्याशंक्य स्वप्नदृष्टांतेन व्युत्पादयति॥ येनेति॥ स्वप्ने प्रसिद्ध आत्मा येन स्वात्मनि विषयजातं
वेत्ति स एव वेदः स्यात्॥ न हि स्वप्ने चिदात्मव्यतिरिक्तं भासकमस्ति॥ आदित्यादिज्योतिषां तदोपरमात्स्वयंज्योतिष्ट्व
श्रुतेश्च॥ यत्तु तत्र सर्वं वेद्यं तदपि मायया स एव॥ न हि स्वप्ने बाह्यविषयजातमस्ति तत्रावकाशाभावात्तत्र रथादित्या
दिश्रुतेश्च॥ तथा च स एवात्मा स्वमायाकृतोपाधिभेदावच्छिन्नः सदात्मना वेद्यस्तदनुस्यूतचिदात्मना वेदन

येन वेदैत्रि स वेदः स्यात्स्वप्ने सर्वं तु मायया॥ येन पश्य
ति तच्चक्षुः शृणोति श्रोत्रमुच्यते॥१४॥

रूपश्चेति वेद्यवेदितृभावो मायिक इत्यर्थः॥ चक्षुरादीन्द्रियाण्यपि परमात्मस्वरूपगत आत्मा येन पश्यति रूप
मुपलभते तदेव चक्षुरिति योजना॥ स्वप्ने रूपाकारसंस्कृतमनोवस्थाचिन्निष्ठाविद्यात्मकं रूपं प्रकाशयन्॥ पश्य
तीत्युच्यते॥ एवं श्रोत्रादिष्वप्यूह्यं॥१४॥

उप॰स॰ येन स्वप्नगत इति॥ येन स्वप्नगतो जिघ्रति तत् घ्राणमित्याहि॥ यथायोग्यं योज्यमिति॥ रसनमिति॥ स्पर्शनेऽपीति॥ प्र॰वि॰१७
८ मन इति॥ तथेन्द्रियमिति॥ १५॥ कथमेकरूपं चैतन्यं वेद्यवेदवेदकचक्षुरादिरूपेण भिद्यते तत्राह॥ कल्प्योपा

येन स्वप्नगतो वक्ति साक्षात् घ्राणं तथैव च॥ रसनस्पर्शने चै
वं मनस्त्वाख्यं तथेन्द्रियम्॥१५॥ कल्प्योपाधिभिरेवैतद्भि
न्नं ज्ञानमनेकधा॥ उपाधिभेदाद्यथा भेदो मणौ रक्तस्य जायते॥
॥१६॥

धिरिति॥ स्वप्नकल्प्योपाधिभेदादेकमेवेदं ज्ञानमनेकधा भिन्नमित्यत्र दृष्टान्तमाह॥ उपाधिभेदादिति॥ मणेरि
ति॥ मणेः स्फटिकादेः॥ उपाधिभेदात् नीलपीतादिउपाधिभेदात्॥ तथा ज्ञानं एकं अनेकधा बहुधा जायत इ ८
त्यर्थः॥१६

यथा स्वप्ने भिन्नभेदस्य ज्ञानस्य कल्पितोपाधिभेदाद्भेदस्तथा व्यवहारास्पदत्वं दृष्टमेवं जागरितेऽप्यशेषव्यवहारास्प
दत्वं तस्योपपन्नमिति दार्ष्टान्तिकमाह॥ जाग्रतश्चेति॥ कथं चित्स्वरूपस्य ज्ञानस्यास्य जाग्रति विकल्पितत्वं तत्राह॥ बु
द्धिस्थमिति॥ आत्मा खल्वज्ञानकंचुकः प्रथमं बुद्धिपरिकल्पनतस्तत्कंचुकः संस्तदविवेकात् तां त्वा बुद्धिस्थोऽभि
वार्थं व्याकरोति॥ स्वात्मगततया कल्पयन्व्यवहरति॥ ततश्चात्मेति प्रयुक्तत्वात्मा स्वकामोद्भूतक्रियाहानोपादान

जाग्रद्धेतस्य यथा भेदो ज्ञानस्यास्य विकल्पितः॥ बुद्धिस्थं
व्याकरोत्यर्थमात्मात्मा तस्पोऽनवक्रियः॥१७॥ ॥ ॥

व्यवहाररूपायस्य सः॥ तथा॥ अविद्यापस्थापितान्तःकरणपरिणामावस्थामवभासयंस्तदविवेकादने
करूपश्चैवं च मात्मनि कल्पयन्व्यवहरतीत्यर्थः॥१७॥ स्वप्नदृष्टान्तसिद्धमनूद्य दार्ष्टान्तिकं निगमयत्यथेन॥ स्व
प्नेतद्वदिति॥ यद्वत्स्वप्ने व्यवहारस्तद्वत्प्रबोधेऽपि व्यवहारः॥ यथैव स्वप्ने॥ अन्तर्बहिर्भावितत्वेनैव प्रबोधेऽप्यन्तर्ब

उप॰स॰ हिर्भाव इति योजना॥ अंतर्बहिर्भावेन प्रथमानो व्यवहारः स्वप्नवत्कल्पित इत्युक्तात्त्रैव दृष्टांतांतरमाहः॥ प्र॰वि॰१
९० स्त्रालेख्ययोरिति॥ यथा आलेख्यापेक्षया अध्ययनं लोकादेरध्ययनापेक्षया च पश्चाद्दोषुनरालेखनं मिथो व सर्वगता
नां निरवयवानां वर्णानां संनवादित्यर्थः॥ एवमन्तरयोजना॥ आलेख्यं च अध्ययनं चालेख्याध्ययने तद्वुभयं च

स्वप्ने तद्वत्प्रबोधे यो बहिर्भ्यां तस्तथैव च॥ आलेख्या
ध्ययनेतद्वत्तदन्योन्याधियोद्भवे॥१८॥ ॥ ॥

धा॥ अन्योन्याधियोद्भवं अंतर्बहिर्भावेन परस्परापेक्षबुद्धिजन्यं बहिः॥ रेखाविन्यासाकारेणानुभूतं अपेक्षांत
बुद्धौ संस्काररूपेणाधीयते॥ तदपेक्षा च बहिः॥ शब्दव्यवहाराय आलिख्यत इत्यक्षरेषु॥ इत्युभयोरन्योन्यापेक्ष ९०
त्वेनालेख्याध्ययनयोरवस्तुत्वं॥ यद्वत्तद्वदोव्यस्य व्यंतर्बहिर्भावेनदृश्यमानः॥ सर्वो व्यवहारोऽनवस्तुसन्नि
तिः१८

बुद्धिनिर्भमर्यादा कुर्वन्नन्योन्यात्तद्भेदवत्कियदित्युक्तं प्रपंचयति॥ यदायमिति॥ अयमात्मा पूर्वं भ्रांतिसंस्का
रवशात् यदा बुद्धिकंचुकारूढः सन्॥ न विद्यायामेदं कल्पयेत् तदा तत्कामः॥ शो मनस्त्वेनाध्यस्तविषयभेदे भिला
षवान्सन्॥ यथाक्रतुः यथाकामं कृतसंकल्पो भवति॥ क्रतुः संकल्प इदमहं साधयिष्य इत्यध्यवसायरू

यदायं कल्पयेत्भेदं तत्कामः सन्यथाक्रतुः॥ यत्कामस्तत्क्रतुर्भू
त्वाकृतं यत्तत्प्रपद्यते॥१९॥

पः ततश्च यत्कामस्तत्क्रतुः॥ भूत्वा यत्कामसाधनं कर्म कृतं तन्निष्पादितं॥ तत्फलावस्थां प्रपद्यते प्राप्नोति
॥ पुनः तत्संस्कारसचिवो भेदं परिकल्प्य कामक्रतुपूर्वकं कर्मानुष्ठानाव फलभागित्येव मन्योन्याधियाहेतुफ

जात्मना परिकल्पितं संसारमनुभवतीत्यर्थः॥ तथा च श्रुतिः॥ अथो खल्वाहुः॥ काममय एवायं पुरुष इति
॥ स यथाकामो भवति तत्क्रतुर्भवति॥ यत्क्रतुर्भवति॥ तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यत इति
॥१९॥ उक्तं दृष्टमिथ्यात्वं सोपपत्तिकमुपसंहरति॥ अविद्याप्रभवमिति॥ तद्वता अविद्यावता यस्मात् गृह्यते॥

अविद्याप्रभवं सर्वमसत्तस्मादिदं जगत्॥ तद्वता दृश्यते यस्मात्
सुषुप्ते न च गृह्यते॥ २०॥

तदभावे सुषुप्ते न चैव गृह्यते॥ तस्मात् सर्वमिदं जगदविद्याप्रभवं मिथ्या अज्ञानविजृंभितं असदपरमार्थ
मिति योजना॥ २०॥ ॥ श्रीकृष्णाय नमः॥ ॥ श्रीरामाय नमः॥

तर्हि जगद्धेतुरविद्या कीदृशी तन्निवर्तिका विद्या वा कीदृशी केन वा विद्याविद्ये ज्ञायेते इत्याकांक्षायामाह॥ विद्या
विद्ये इति॥ एकत्वान्यधियौ विद्याविद्ये ब्रह्मात्मैकत्वधीः विद्या तद्भेदधीरविद्येति॥ स्वरूपोक्तिः श्रुतिप्रोक्ते इति ज्ञा
पकोक्तिः॥ अथ योऽन्यां देवतामिति श्रुता भेदधियो अविद्यात्वं लोकानुभवसिद्धभेदानुवादरूपतयोक्तं॥ किमु

विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हि नः॥ तस्मा
त्सर्वप्रयत्नेन शास्त्रे विद्या विधीयते॥ २१॥ ॥ ॥

तत् ब्रह्मावेदित्याद्येव पुरःसरं ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति॥ [illegible] प्रमाणानू
ता अप्रसिद्धार्थबोधिनी श्रुतिरेकत्वज्ञानस्य विद्यात्वं ज्ञापयति नोऽस्माकमित्यर्थः॥ ॥ श्रीनाथजी सत्य है॥

यस्मादविद्यावद्विद्याऽऽलोकस्यानुभवसिद्धानभवति॥ तस्मात्सर्वप्रयत्नेनाध्यारोपापवादप्रबंधनिर्मलितेनशा
स्त्रेविद्याविधीयतेप्रतिपाद्यातइतिमुमुक्षुः॥ शास्त्रतस्तत्त्वरोभवेदित्यर्थः॥२१॥ शास्त्रेचेतसर्वप्रयत्नेनविद्याव्यु
त्पाद्यतेकिमितितर्हिसर्वोविशास्त्रेनप्रवर्त्तते॥ प्रवर्त्तमानोवाकथंविद्यांनप्राप्नोतीत्यपेक्षायांचित्तशुध्यभावा

चित्तेशुद्धेततोयर्वविद्यास्माद्दुद्धेविद्याप्रकाशते॥ यमैर्नि
योमैश्चयतैश्चतपोभिस्तस्यशोधनं॥२२॥ ॥ ॥

दित्यभिप्रेत्याह॥ चित्तेहीति॥ तस्मात्चित्तशुद्धिः॥ कर्त्तव्येतिशेषः॥ तर्हिकैरुपायैः॥ चित्तशोधनमित्यपेक्षा
यामाह॥ यमैरिति॥ अहिंसाब्रह्मचर्यादयोयमाः॥ तैर्नित्यैः शौचादिभिर्नियमैरित्यर्थः॥ यतैः॥ स्वाश्रमविहित १२
धर्मैरीश्वरसात्कृतैस्तपोभिश्चतस्यचित्तस्यशोधनंकार्यमित्यर्थः॥२२॥ ॥श्रीकृष्णायनमः॥ ॥ ॥

तपःशब्दार्थमाह॥ शारीरादीति॥ तस्यस्वरूपंभगवतोक्तं॥ देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं॥ ब्रह्मचर्य
महिंसाचशारीरंतपउच्यते॥ अनुद्वेगकरंवाक्यंसत्यंप्रियंहितंचयत्॥ स्वाध्यायाभ्यसनंचैववाङ्मयंतप
उच्यते॥ मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः॥ भावसंशुद्धिरित्येतत्तपोमानसमुच्यतइति॥ एता

शारीरादितपःकुर्यात्तद्विशुध्यर्थमुत्तमं॥ मन
आदिसमाधानंतत्तद्देहविशोधनं॥२३॥ ॥ ॥

न्यपिसात्त्विकानिअनुष्ठेयानिनराजसतामसानि॥ तत्रसात्त्विकतपोलक्षणं॥ श्रद्धयापरयातप्तंतपस्तत्त्रि
विधंनरैः॥ अफलाकांक्षिभिर्युक्तैः॥ सात्त्विकंपरिचक्षतइति॥ एतदुक्तमुत्तममिति॥ ॥श्रीनाथजी॥ ॥

उप.स.
१३ तद्विशुध्यर्थं चित्तविशुध्यर्थं मनः आदित्याह परात् बाह्येंद्रियनिग्रहः ॥ समाधानं नैश्चल्यं तत्र तत्रे- प्र.वि.१३
त्यस्मिन्नर्थे तत्राहुः ॥ तेषु तेषु कृत्येषु देहविक्षेपणं ॥ शीतोष्णवर्षवातसहनेन कृशीकरणमित्यर्थः ॥२३

मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः ॥ त
ज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥२४॥

एवमाराद् उपकारकं तप उक्त्वा श्रवणादेः सन्निपत्योपकारकं तपोविशेषं स्मृतिवचनपाठेनाह ॥ मनस इ- १३
श्चेति ॥ ऐकाग्र्यमुक्ते वस्तुनि मननद्वारा स्थिरीकरणं ॥ एतस्यावश्यकर्त्तव्यत्वाय स्तुतिः क्रियते ॥ तज्ज्या-
य इति ॥२४

एवमुक्तैः साधनैः संशुद्धचित्तः श्रवणादिपरः सन् अवस्थात्रयात् तत्साक्षिणं विविच्य वाक्यात् ब्रह्मत्वेन
जानीयादित्याह ॥ दृष्टमिति ॥ दृष्टं दर्शनं बाह्येंद्रियैः ॥ बाह्यार्थोपलंभनं जागरितं विद्यात् ॥ तदेव तु दृष्टमाहु-
र्वाच्यमेव स्मृतं ॥ संस्कारवशात् निद्रादशायां भातं स्वप्नं विद्यात् तदभावे तयोः ॥ दृष्टतयोरभावो यस्मिंस्त-

दृष्टं जागरितं विद्यात् स्मृतं स्वप्नं तदेव तु ॥ सुषुप्तं
तदभावं च स्वमात्मानं परं पदं ॥२५॥ ॥ ॥

त्सुषुप्तं विद्यात् ॥ एवं दृश्यत्रयं पृथक्कृत्य तत्साक्षिणं स्वरूपभूतमात्मानं परं पदं सत्यज्ञानादिलक्ष-
णं ब्रह्माहमस्मीति विद्यादित्यर्थः ॥२५॥

उप.स. १४ नन्ववस्थात्रयहेतावज्ञाने सति कथं तद्विविक्तया प्रत्यगात्मनो ब्रह्मत्वमुपपद्यत इति तत्राह॥ सुषुप्ताख्य प्र.वि.१३
मिति॥ तम इति॥ विशेषणेनाज्ञानस्यावरणरूपत्वमुच्यते॥ ततो बीजत्वमुपादानत्वमुपपद्यते॥ तदज्ञानं स्वा
त्मनः॥ सम्यग्बोधाग्निना प्रकर्षेण निर्लेपं दग्धं स्यात् यथा दग्धं बीजं ऽभवं भवत्रुमंकार्योत्पादकं न भवति

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः॥ स्वात्म
बोधप्रदग्धं स्यात् बीजं दग्धं यथाऽभवं॥२६॥ ॥

॥तथा तत्त्वज्ञानाग्निदग्धमज्ञानं पुनरवस्थाप्ररोहकरं न भवतीति युज्यते॥ एवं प्रतीचो ब्रह्मत्वमित्यर्थः॥२६ १४

ऽज्ञानस्यावस्थाबीजत्वमुक्तमुपपादयन्नज्ञाननिवृत्त्यैव सर्वसंसारोपाधिनिवृत्तिर्नयत्नांतरसाध्येति द
र्शयति॥ तदेवैकमिति॥ तदेवैकं मायाख्यं बीजं त्रिधा भिन्नं क्रमात् सुषुप्त्यादिक्रमेणेत्यर्थः॥ पुनरित्यत्र
वीप्सा द्रष्टव्या॥ सुषुप्तिमारभ्य जागरितपर्यंतं तत आरभ्य सुषुप्तिपर्यंतमहरहस्त्रिधाविक्रियत इत्यर्थः
॥एतदुक्तं भवति॥ चिन्मात्राश्रयविषयमेकमेवाज्ञानमनाद्यनिर्वचनीयमनेककार्यविक्षेपसंस्कारोपेतं चै
तन्याभासखचितं स्वाश्रये आत्मन्यध्यात्माधिदैवतभेदेन प्रातिस्विकोपाधिविनिर्मुक्तसुषुप्तिलयावस्थाकारं

तदेवैकं त्रिधा ह्येयं मायाबीजं पुनः क्रमात्॥

जायते॥ तथा तैजसहिरण्यगर्भोपाधिसंभिन्नस्वप्नसृष्ट्यवस्थात्मकं भवति॥ तथा पुनर्विश्ववैश्वानरोपाधि
खचितजाग्रत्स्थित्यवस्थारूपमापद्यते॥ तत्रापि देवतिर्यङ्मनुष्यस्थावरादिभेदेन नानाविधशरीरेंद्रि
यातः॥ करणोपाध्याकारेणानुप्रत्यक्ब्रह्मचिदाभासानंतजीवभेदव्यवहारनिर्वाहकं भवति॥ यथैकं वटादिबी
जं मृदाग्नितेसनात् तस्मान्नवमदृश्यांकुरकांडविटपशाखापत्रपुष्पफलादिभावमापद्य पुनर्बीजभावं चापद्यते त

उप. स.
१५

येदमपीति द्रष्टव्यं॥ तदेव वृक्षाकारं वस्तु समूलं दोहे सति तन्नैव महद्भावमापद्य पुनः तत्र भवति॥ यथा तथा सं प्र. वि. १७
सारवृक्षमूलाज्ञानस्य तत्त्वज्ञानाग्निनाग्निनादाहे स्वाश्रये चिदेकात्मनाविलीनत्वात्॥ पुनरनर्थानियोग्यो न
वति संसारदृश्यज्ञानदाहाय वेतत्त्वज्ञाने यतितव्यमिति॥ तदेवैकं त्रिधेत्युक्तेन मोबीजस्य स्वातंत्र्येण प्रवृत्ति
र्नाकास्यात्तत्रथा सतिसांख्यसिद्धांतापातइत्यत स्तमसो येतित माश्रयं दर्शयति॥ मायावीति॥ आत्मा निरु
पचरितव्याप्तिमान्स्व त्रकार्यचिदेकरसो मायावी मायादिग्राद्ब्राच्याज्ञानाश्रय इत्यर्थः॥ मायाश्रयस्येद

मायाख्यात्मा विकारोपि बहुधैको जलार्कवत्॥२७॥

त्मात र्हितस्य मायाविहितानंतोपाधिष्वनेकधा विहितव्यमाणस्य कथं कूटस्थत्वमित्याशंक्य दृष्टांतेन प्रत्या
त्मात र्हितस्य मायाविहितानंतोपाधिष्वनेकधाविभाव्यमानो भवति जलार्कवत्॥ य
चष्टे॥ अविकार इति॥ एकएवात्मा स्वगतविक्रियाकाररहितोपि बहुधा विभाव्यमानो भवति जलार्कवत्॥ य १५
थैकएवार्को जलनेकोपाधिष्वनेकधा विभाव्यमानोपि नानेको भवति॥ न वा जलोपाधिविकारेण विक्रियते तथा
यमपीत्यर्थः॥२७॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामायनमः॥ ॥श्री॥ ॥

उक्तमेव दृष्टांतदार्ष्टांतिकरूपं प्रपंचयति॥ बीजं चेति॥ प्राणा इत्यव्याकृतावस्थोक्तिः॥ स्वप्नादिभिरिति जाग्रदव
स्थाच गृह्यते॥ यथैकमविद्यायाख्यं बीजमव्याकृतावस्थाभेदेन भिन्नं तथा स्वप्नजाग्रच्छरीरेषु समष्टिव्य
ष्टिरूपेषु स्वशरीरेषु जलेन्दुवत् चिदाभासो विभिन्नो भवति॥ तदात द्रष्टिष्ठानभूत श्चिदात्मापि चोपाधिगतामा

बीजं चैकं यथाभिन्नं प्राणाः स्वप्नादिभिस्तथा॥ स्वप्नजाग्रच्छरीरेषु
तद्वदात्मा जलेन्दुवत्॥२८॥ मायाहस्तिनमारुह्य मायाव्येकोपि यो
व्रजेत्॥ आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिगोचरः॥२९॥ ॥

नाविवेकात्तद्भिन्नो विभाव्यते॥ तेजस हिरण्यगर्भ विश्व वैश्वानरादिभेदेन प्रकाशत इत्यर्थः॥ ननु यद्या
त्मानो मायाकल्पितेषूपाधिषु बहुत्वेन हितत्र व्यापारवत्त्वमपि स्यादिति॥ कथं कूटस्थतेत्याशंक्याह

उ.प.स. ष्टां तेन निराकरोति ॥ मायाहस्तिनमिति ॥ यथैव एको मायाविनिर्मितं हस्तिनमारुह्य व्रजेदित्युक्तं मायागजु प्र.वि.२३
१६ नुच भवति ॥ गमनागमने आचरन्निव भासमानोप्यचल एव तद्वत् तथैवात्मा प्राणस्य प्राद्विगतत्वेन वि

न हस्ती न तदारूढो मायाव्यन्यो यथास्थितः ॥ न प्राणादि
न तत्तद्वत्तथात्मान्यः सदसद्दृशिः ॥ ३० ॥ ॥श्रीराम ॥

भाव्यमानोपि अचलः ॥ कूटस्थ एवेत्यर्थः ॥ २० ॥ प्राणाद्युपाधिसंबंधमात्मनः ॥ अंगीकृत्योक्तमिदा १६
नीं सोपि नास्ति वस्तुतरित्याह ॥ न हस्तीति ॥ निगदव्याख्यातं पद्यमिति ॥ ३० ॥ ॥श्रीनाथजी सत्य छे ॥ ॥

वस्तुतः प्राणाद्युपाधिसंबंधाभावेपि मायासंबंधोपरिहार्य इत्यत आह ॥ अबद्धेति ॥ न बद्धे चक्षुः यस्यासौ
अबद्धचक्षुस्तस्य लौकिकस्य यथा माया नास्ति मायाविनापि तथा च सर्वथाभावात्माया नास्ति वा शब्द इवार्थः ॥
अपि शब्दाद् वस्तुत्वनिश्चयादपि मायावी न व्यामुह्यतीत्यर्थः ॥ व्यतिरेकमुक्त्वान्वयमाह ॥ बद्धाक्षस्यैवेति ॥
या माया बद्धाक्षस्यैव भयहेतुर्हस्त्यादिरूपाभासत इत्यर्थः ॥ ततस्तस्माद् मायाप्येवमायोपलक्षित एव भवेत्सु
मात्माया धार इत्यर्थः ॥ अयमेव श्लोकोदाहृतिः केचिद्योज्य ॥ अबद्धचक्षुषो माया नावृतचित ॥ स्वभावस्य

अबद्धचक्षुषो नास्ति माया मायाविनोपि वा ॥ बद्धाक्षस्यैव सा माया मायाप्येव ततो भवेत् ॥ ३१ ॥

मायाविनोपि मायाविलत्वेन विभाव्यमानस्यापि माया नास्ति व्यामोहेतुर्हि माया सोहमस्मि परं ब्रह्मेति प्रकाशमा
न आत्मनि विरोधादेव न भवतीत्यर्थः ॥ वा शब्दो लोकप्रसिद्धमायाविदृष्टान्तार्थः ॥ तथा च तादृशस्याप्युद
चित् प्राणाद्याकारां मायां पश्यन्नप्यहं नावस्थायामिव न व्यामुह्यतीति किंतु सुषुप्तवन्निर्विकार एव भवती
त्यर्थः ॥ समानमन्यत् ॥ ३१ ॥ ॥श्रीकृष्णायनमः ॥ ॥श्रीरामायनमः ॥ ॥श्रीनाथजी सत्य छे ॥ ॥श्रीरामः ॥

उप.स. १७ तस्मात् साक्षात् ब्रह्मात्मज्ञानान् मायावी मायातत्कार्यसंबंधनिर्मुक्तो भवतीत्यर्थः॥ श्रुतिसिद्धः अद्यो मु ब्र.वि.१७
मुक्षोत्याह॥ साक्षात् देव इति॥ स सर्वविकारसाक्षी कूटस्थ आत्मा साक्षात्॥ देवो विज्ञानघनानंदब्रह्मैत्यक्ष ज्ञेयो
विज्ञेयः॥ यत्साक्षाद् अपरोक्षात् ब्रह्म य आत्मा सर्वांतर इति ब्रह्मात्मैकत्वश्रुतेरित्यर्थः॥ एवं विज्ञाने ज्ञानमविज्ञाने

साक्षादेव स विज्ञेयः साक्षादात्मेति च श्रुतेः॥ भिद्यते हृदयग्रंथिर्न चेदित्या
दितः श्रुतेः॥३२॥ अन्नाद्याहितत्वतोस्य ग्रहणं चेद्धियै भवेत्॥ सुखादि
व्यस्त यान्यत्वाद् ध्यानापि कथं भवेत्॥३३॥ ॥श्रीरामाय नमः॥ ॥

ज्ञानमविज्ञाने हानिश्च श्रुत्या दर्शयति॥ भिद्यते इति॥ न चेदिहावेदीन्महती विनष्टिरित्यादि तद् इत्यादिग्रहणाद् एक
धैवानुद्रष्टव्यं॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति इत्यादिश्रुतयो गृह्यंते॥३२॥ साक्षादात्मविज्ञानमु १७
क्त्वा आक्षिपति॥ अन्नाद्याहितत्वत इति॥ बाह्यांतःकरणग्राह्यत्वाद् आत्मनः कथं साक्षात् विज्ञानं स्यादित्यर्थः॥३३॥

परिहरति॥ अदृश्योपीति॥ यथा स्वरूपेण अदृश्योपि राहुश्चंद्रे चंद्रमंडले उपरक्तो दृश्यते॥ यथा वा नभसि जले चं
द्रादेः प्रतिबिंबं दृश्यते॥ तथैव च सुराद्यगोचरोपि परमात्मा सर्वगोपि सर्वत्र वर्तमानोपि तत्वमस्यादिमहा
वाक्योत्थबुद्धावेव प्रतिबिंबितः सन्॥ गृह्यते तत्र प्रतिबिंबितत्वात्स्वतः स्फुरणमेव ग्रहणं न विषयीभावेरि

अदृश्योपि यथा राहुश्चंद्रे बिंबं यथांभसि॥ सर्वगो
पि तथैवात्मा बुद्धावेव स गृह्यते॥३४॥ ॥ ॥

त्यर्थः॥ नास्त्वैककगम्यस्यापि अस्वच्छत्वे राहुदृष्टांतः॥ सर्वसन्निहिततया भासमानस्य सर्वत्र यथावद्स्फुर
तोप्युपाधिविशेषे यथावत्॥ स्फुरणे प्रतिबिंबदृष्टांत इति विवेकः॥३४॥ ॥श्रीरामाय नमः॥ ॥श्री॥ ॥ ॥

उप.स. बुद्धौ बोधस्तावत् गृह्यते चेत् बुद्धिधर्मो बोध इति नैयायिकादृष्टं तेन प्रत्याचष्टे॥ भानोरिति॥ यथा जले दृष्टं बिंबं भा प्र.वि १७
१८ दृष्टं च भानोरेव न चांभसो जलस्य धर्मः तस्यात्मत्वस्याभावात् तथैव बुद्धौ स्फुरन् बोधो न बुद्धिधर्मः स्यात् कुतो
विधर्मतो विपरीतधर्मतो बुद्धेः जाड्यधर्मत्वनिश्चयादित्यर्थः॥३५॥ न केवलं नास्त्रीयबुद्धावेवेच्चितमानुः प

अहंवृत्त्यो दियथा राहुग्रस्तं द्विबिंबं यथा न वि॥ भानो बिंबं
यथा चो दृष्टं जले दृष्टं न चांभसः॥ बुद्धौ बोधो न तद्धर्मस्त्वयै
व स्याद्विधर्मतः॥३५॥ चक्षुर्युक्तो धियो वृत्तिर्यातां प्रत्य
गात्मनुसंदधे॥ इदं ईदृशमवेदात्स्मृतेः श्रोतात्मपाभवेतः ३६

रमात्मा स्फुरति॥ किंतु॥ लौकिकी घटविषयाकारबुद्धिवृत्तिर्यात्मात्वतोऽपरोक्षसाक्षीतया स्फुरतीत्या १८
ह॥ चक्षुरिति॥ चक्षुःद्वारिकात्सूपाकारायाधियो वृत्तिः तां प्रत्यगवभासयन् आत्मा अनुसंदृगकुर्वित॥ हा

तान् गाक्तिः इदं ईदृशमवेत॥ एवमुत्तरत्रापियोज्यमिति॥३६॥ केवलामिति॥ चक्षुरादिद्वारा बहिरप्रवृत्ता मंतरे
ज्ञान गाक्तिः इदं ईदृशमवेत॥ एवमुत्तरत्रापियोज्यमिति॥३६॥ अनुस्मवितत्त्वक्तित्वादित्यर्थः॥ अनुसंधाक्तित्वेऽपुतिमु
व विषयाकारामित्यर्थः॥ अजो विकाररहित इत्यर्थः॥ अलुप्तचित्तद्वक्तित्वादित्यर्थः॥ अनुसंधाक्तित्वेऽपुतिमु
द्राहरति॥ तथाद्यामिति॥ एतदित्यस्मिन्नर्थे तेः नात्र॥ ततः सार्वविभक्तिकं त्वंगीकारात्॥ समस्यर्थेयं तमिरि
तिकेचित्तत् हि इदृशं ईदृशमित्यारभ्य न हि विज्ञातुः॥ विज्ञातेः॥ विपरिलोपो विद्यत इति श्रुतेरित्यर्थः॥ इदं ईदृशत्वाहेच

केवलां मनसो वृत्तिं पश्यंस्तां तामतेरजः॥ विज्ञाताऽलुप्तशक्तित्वात् तथाऽग्रोऽस्मन्नहीत्यतः॥३७॥ ध्यायती
त्यविकारित्वं तथा लेलायतीत्यपि॥ अनंतस्नेनेति श्रुद्धत्वं तथाऽनन्वागतं श्रुतेः॥३८॥ ॥श्रीनोथजीः॥

न दृष्टेः॥ द्रष्टारं पश्येन्न श्रुतेः॥ श्रोतारं शृणुयान्न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः एष त आत्मा सर्वा
तर इति श्रुतिरुदाहरति॥३७॥ इदं त्वादित्यपदेनाविकारित्वादुद्धत्वप्रशक्तिमाशंक्याह॥ ध्यायतीति॥ श्रुता विकाराद्धा
तद्ध्यानचलनयोरात्मासत्त्वमुच्यते॥ अतो विकारित्वं सिद्धमित्यर्थः॥ अनंतस्नेनोस्तनोभवति भ्रूणहा भ्रूणहा भवती ॥
ति॥ अनन्वागतं पुण्येनानन्वागतं पापेनेति च श्रुतेः॥ शुद्धत्वं सिद्धमित्यर्थः॥३८॥ ॥श्रीरामायनमः॥ ॥

उप.स. ननु सुषुप्ते ज्ञानाभावाज्जाग्रत्स्वप्नयोश्च तज्ज्ञातात्मनः॥ कथमविकारित्वमित्यत आह॥ नाशक्यज्ञोपाधिरिति॥ सु उ.वि.१३
१८ षुप्ते ध्यात्मा तु एव नाशक्यज्ञोपाधिरिति योजना॥ यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादिश्रुतेरित्यर्थः॥ तथा चा
धबोधदृष्ट्याः जाग्रत्स्वप्नयोरिति यावत्॥ ज्ञानस्वरूप एवात्मा निरवयवत्वेनाविकारत्वादविकारानुपपत्तेरि
त्यर्थः॥ अवस्थान्तरे विनिर्विशेषचिद्रूपेऽप्यात्मा कथं तर्हि नानात्वमिति॥ सुषुप्तिपरामर्शो बोधावस्थायां च

नाशक्यज्ञोपात्सुषुप्ते तत्त्वबोधेऽविकारितः॥ नेयत्ये
वविशेषस्तु पश्यन्वैतिश्रुतेर्वचः॥३९॥ ॥श्रीराम॥ ॥

धर्मज्ञानामित्यनुभवदृष्ट्याशंक्य॥ विषयोपरमानुपरमोपाधिनिबन्धनं तदुभयं स्वरूपनिबन्धनं तदेवमुत्या १८
ह्यत्वादित्याह॥ नेयत्येति॥ यत्र वा अन्यदिवस्यात्तत्रान्योऽन्यत्पश्येदित्यादिका यत्र त्वस्य सर्वमात्मैवाभूत्तत
त्केन कं पश्येदित्यादिका चोदाहरणं॥३९॥

एवं नित्यचैतन्यस्वरूपत्वान्नित्यापरोक्षो निरविकारश्चात्मेत्युक्तं प्रपंचयति॥ सोऽकृत्रयेण व्यवधानादीति॥ अना
त्मनो घटादेर्विषयस्य ग्राहिका या लौकिकदृष्टेस्तया ह्यकच तुरादिदृष्टेः देशतः कालतो वा व्यवधानादसन्निकर्षा
त्पारोक्ष्यं हि प्रसिद्धमित्यर्थः॥ न तथात्मनो दृष्टिव्यवधानमस्ति दृष्टेरात्मस्वरूपत्वादात्मन एव ब्रह्मत्वात्तद्ब्रह्मत्वाच्चै
ब्रह्मत्वस्वत एव सदा प्रत्यक्त्वेन तद्ब्रह्म विद्धि इति योजना॥४०॥ स्वरूपप्रकाशस्यानन्यापेक्षत्वं दृष्टान्तेन स्फुटयति॥ न

व्यवधानादिपारोक्ष्यं लोकदृष्टेरनात्मनः॥ दृष्टेरात्मस्वरूपत्वात्प्रत्यक्त्वं ब्रह्म तत्स्मृ
तं॥४०॥ न हि दीपान्तरापेक्षा यद्वद्दीपप्रकाशने॥ बोधेऽप्यात्मस्वरूपत्वान्न बोधोऽन्यस्त
थेष्यते॥४१॥ विषयत्वं विकारित्वं नानात्वं वा न हीष्यते॥ न हेयो नाप्युपादेय आत्मा ना
न्येन वा ततः॥४२॥

हीति॥ स्फुटं॥४१॥ एवमपरोक्षत्वं विशदीकृत्याविशदीकृत्याविकारित्वं विशा
दीकुर्वन्नात्मनो निर्विशेषत्वमाह॥ विषयत्वमिति॥ न हीष्यते श्रुतिविरोधादिति शेषः॥ अन्यस्यासत्त्वाज्जडत्वाच्चे
ति हेतुरनुसंधेयः॥ वा नाशात्स्वेनापीत्यर्थः॥४२॥ ॥श्रीगोपीजनवल्लभायनमः॥ ॥श्रीरामायनमः॥ ॥

उ॰प॰स॰ २० नन्वेवमपि कुतः आत्मनो निर्विकारत्वं नरकपातादिनिवृत्तिर्वा इत्याशंक्याह ॥ सबाह्याभ्यंतर इति सप्यकूपदा अ॰वि॰१७
र्थज्ञो धनपूर्वकं यः आत्मतत्त्वं जानाति स कुतो न्वेव बिभेति ॥ नरकहेतोर्द्वितीयस्य बाधितत्वादित्यर्थः ॥ ४३ ॥ तथापि
यावज्जीवादिश्रुतिविहितत्वात्कर्मणां तदकरणे प्रत्यवायनर्थविदुषोप्यस्तीति तत्परिहारायानुष्ठानं स्यादिति चेन्ने

सबाह्याभ्यंतरोजीर्णोजन्ममृत्युजरातिगः ॥ अहमात्मेति यो वेति कुतो न्वेव बिभेति स
:॥४३॥ प्रागेवैतद्विधेः कर्म वर्णित्वादेरयोहनात् ॥ तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवे
ति निश्चयात् ॥४४॥

त्याह ॥ प्रागेवेति ॥ अस्थूलादिशास्त्रेभ्यो वर्णित्वादेः ॥ कर्माधिकारहेतोरपोह
नात्तत्त्वमेवेति वाक्येन ब्रह्मस्वरूपत्वनिश्चयादेतद्विधेरेतदात्मतत्त्वविधानात्प्रतिपादनात्प्रागेव पूर्वमेव तत्र २०
यावज्जीवादिशास्त्रविहितकर्मणोर्ध्वमिति योजना ॥ अनधिकारिणोऽकरणे प्रत्यवायासंभावान्नानुष्ठानप्राप्ति
रिति भावः ॥ ४४ ॥ ॥ ॥ ॥

आत्मनो ध्यासं विनानवर्णित्वाद्यस्तीत्यत्र युक्तिमाह ॥ पूर्वेति ॥ देहपरित्यागे तदनुरक्तजातेरपि परित्यागा द्दा
गमापायित्वेन जात्यादेरात्मधर्मत्वं किं तु देहस्यैव जात्यादिधर्मः ॥ तर्हि भेदग्राह्यात्मास्त्वित्यत आह ॥ तस्यापी
ति ॥ एवमागमापायित्वादेव देहस्याप्यनात्मतेत्यर्थः ॥ देहस्याजात्यादेश्च वर्णित्वादिनाप्रकारेण कर्माधिका

पूर्वदेहपरित्यागे जात्यादीनां प्रहाणतः ॥ देहस्यैव तु जात्या
दिस्तस्याप्येवं ह्यनात्मता ॥ ४५ ॥ ममाहं चेत्यतोऽविद्याशारीरा
दिष्वनात्मसु ॥ आत्मज्ञानेन हेयास्याद्सुराणामिति श्रुते ॥ ४६

रहेतोरभावादात्मनो न स्वभावतः कर्मकर्तृत्वमुपपद्यत इति भावः ॥ ४५ ॥ शारीरादिषु आत्मात्मीयाभिमान
स्याप्रसिद्धत्वेन हेयत्वायोगमाशंक्याह ॥ ममाहमिति ॥ यतः आत्मन्यागमापायाभ्यामनात्मत्वे देहादेः निश्चित
मतो हेतोः ॥ शारीरादिष्वनात्मसु ममाहं चेत्यभिमानो अविद्या मिथ्याप्रत्ययः ॥ ॥श्रीरामायनमः॥ ॥श्री॥ ॥

उप.स. सात्मज्ञानेनात्मतत्त्वब्रह्मात्मानुसंधानेन हेयात्स्यात् तद्बाध्यस्यात् देहात्मदृष्टेरासुरत्वेन निंद्यश्रुतेश्चेत्याह॥ असुर्या प्र.वि.१७
२१ णामिति॥ असुर्या नाम ते लोका इति श्रुतेरित्यर्थः॥४६॥ तत्त्वज्ञानात्तदूर्ध्वं न कर्म न वा तत् प्रयोजकं ज्ञात्याद्यभि

दृष्टाहानौच कार्यत्वात्पारिव्राज्ये निवर्त्तनं॥ यथाहा
नस्यैव प्राप्तौ तद्धतज्ञात्यादिकर्मणां॥४७॥ ॥ ॥

नोत्तीत्येवं तद्दृष्टांतेन साधयति॥ दृष्टाहेति॥ पारिव्राज्ये सति विशिष्टाभिमानाभावात्॥ संन्यासिनो यथा आत्मनो २१
चाहेरननुष्ठेयता॥ तथा ब्रह्मात्मज्ञानस्य संप्राप्तौ सत्यां ज्ञात्याद्यभिमानाभावात्॥ विदुषः कर्माननुष्ठानाभाव इत्यर्थः॥ ४७

यस्मादेवमात्मनो ब्रह्मात्मत्वाज्ञानमूलो देहाद्यध्यासनिबंधनः संसारस्तस्मात् तत्त्वज्ञानात् प्राक् कामादियुक्तो ध
र्माधर्मद्वारा संसरति॥ ब्रह्मात्मज्ञाने च सति कामादेरभावान्मुक्तो भवेदित्याह॥ यत्काम इति॥ स्वे स्वरूपे ब्रह्मण्येवा
त्महृदि यस्य सः॥ स्वात्महृत् तस्य स्वात्महृदः इति विग्रहः॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः॥ अथ मर्त्यो

यत्कामस्तत्क्रतुर्भूत्वा कृतं तत्तत् प्रपद्यते॥ यदा स्वात्महृदः कामाः प्रमु
च्यंते मृतस्तदा॥४८॥ आत्मरूपविधेः कार्यं क्रियादिभ्यो निवर्त्तनं॥

मृतो भवतीति श्रुतेः॥ हृदयस्थाः कामा हृदयाध्यासबाधिताः॥ संतोषप्रदा प्रकर्षेण मुच्यंते॥ तदा प्रवृत्तिबीजाभा
वात् स्वात्मसंस्थः आत्मा मृतो मुक्तः संसारबंधनो भवतीत्यर्थः॥४८॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुप
जीवंतीति नित्यतृप्तो निरंजन इत्यादिश्रुतेरात्मनो नित्यतृप्तत्वावगमात् तत्र विलक्षणत्वेन स्वतः क्रियादिसंस्प

उप॰स॰ न्निर्गुणत्वाभावाद्ध्यासमूलत्वं क्रियातत्कारकयोगस्येति निश्चित्यात्मतत्त्वात्मतत्त्वावबोधेनैव क्रियादित्याज्य प्र॰वि॰१७
२२ मित्याह॥ आत्मरूपेति॥ विधिः विधानं तत्स्वरूपावधारणं॥४९॥ यद्यपि विज्ञाता तत्त्वस्य क्रियाहेत्वभावात्॥ तद्
भावः॥ तथापि जिज्ञासोः॥ मुमुक्षोः मोक्षाय क्रियानुष्ठानं स्यादित्याशंक्य॥ मोक्षस्य क्रियाफलविलक्षणत्वान्नानन्त

न साध्यं साधनं वात्मा नित्यतृप्तः श्रुतेर्मतः॥४९॥ उत्पाद्याप्यविकार्याणि
संस्कार्यं च क्रियाफलं॥ नातोऽन्यत्कर्मणः कार्यं त्यजेत्तस्मात्ससाधनं
॥५०

स्यापि क्रियासंभवं इत्याह॥ उत्पाद्येति॥ ससाधनं जायापत्यवित्ताग्निस्वाध्याययज्ञोपवीतादिसाधनसहितं कर्मविधि २२
जन्यं त्यजेत् मुमुक्षुरिति शेषः॥ कृतकस्यानित्यत्वात् मोक्षस्य च नित्यात्मरूपावस्थानरूपत्वात्॥ न मुमुक्षोर
पि कर्मणा कृत्यमस्तीति भावः॥५०॥ ॥श्रीरामायनम॥ ॥

किं ससाधनकर्मत्यागमात्रेण मुक्तिसिद्धिः किं वान्यत्किमपि कृत्यमस्तीत्यपेक्षायामात्मतत्त्वज्ञानाय गुरूपस
त्तिः कर्तव्येत्याह॥ तापान्तेति॥ यद्वा यस्मात्सर्वकर्मनिबंधना प्रीतिरनित्या दुःखांता स्वार्थत्वयुक्ता च तस्मात्तन्नि
मित्तां प्रीतिमनात्मविषयामात्मन्येवोपसंहृत्यानित्यपुरुषार्थी गुरुं समाश्रयेतेति मुमुक्षुः शिक्ष्यते॥ तापान्तत्वादि

तापांतत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः॥ संहृत्यात्मनि तां प्रीतिं सत्सा
धीर्गुरुमाश्रयेत्॥५१॥ शांतं प्राज्ञं तथा मुक्तं निःक्रियं ब्रह्मणि स्थितं॥ ॥

ति॥ या बहिरात्मनोऽन्यत्र जायापुत्रादौ प्रीतिस्तां प्रीतिमात्मन्युपसंहृत्यात्मसात्कृत्वेत्यर्थः॥५१॥ उपगंतव्यं गुरुं
विशिनष्टि॥ शांतमिति॥ शांतमन्तर्बाह्यचित्तं प्राज्ञं मेधाविनं यथापरित्यक्तबंधसजातीयेन पुनः बंधो न भवति॥ त
थामुक्तं निःकिंच॥ न मित्यर्थः॥ निःक्रियमैहिकामुष्मिकार्थप्रवृत्तिरहितं ब्रह्मणि स्थितं स्वस्वरूपानंदानुभवेन यद्व

त्वोदासीनमित्यर्थः॥ गुरोराश्रयणीयत्वे प्रमाणमाह॥ श्रुतेरिति॥ आचार्यवान्पुरुषो वेदेति च श्रुतेः॥ तद्विद्धि प्रणि
पातेन परिप्रश्नेन सेवया॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति स्मृतेश्चेत्यर्थः॥५२॥ उक्तप्रकारेणानुसारेणो
त्यविशेषणगुरूपगमनेन फलं निरतिशयं दर्शयति॥ स गुरुरिति॥ युक्तं समाहितं शिष्यगुणैः प्रशांतचित्ताय जितें

श्रुतेराचार्यवान्वेद तद्विद्धीति स्मृतेस्तथा॥५२॥ स गुरुस्तारयेद्युक्तं शि
ष्यं गुणान्वितं॥ ब्रह्मविद्याप्लवेनाशु स्वांतध्वांतमहोदधिं॥५३॥ ॥ ॥

द्रियायेत्यत्रोक्तागुणाः शमादयस्तैरन्वितमित्यर्थः॥ ब्रह्मविद्यैव प्लवो ब्रह्मविद्या
प्लवस्तेनेत्यर्थः॥ स्वांतमंतःकरणं तदुपाधित्वेनोपाधिमानो जीवो लक्ष्यते॥ तस्य ध्वांतमात्मस्वभावावर्ण
नात्मविषयाज्ञानमनाद्यनिर्वाच्यमज्ञानं॥ तदेव महानुदधिरपर्यंतमित्यर्थः॥५३॥ ॥श्रीनोपजी॥

कथमुक्तलक्षणो गुरुरुक्तलक्षणं शिष्यं सम्यग्ज्ञानेन सद्यः संसारसागरं तारयेदित्यपेक्षायां प्रथमं पदा
र्थविवेकं कारयित्वा वाक्यार्थज्ञानोपदेशो तेस्य संक्षेपतः पदार्थविवेकमाह॥ दृग्दृश्यविरिति॥ अन्याश्चरय
ति वक्ति गत्याद्याश्चशक्तय इत्यर्थः॥ एता दृग्दृश्यादिशक्तयो यद्यप्यखंडचिद्रूपाण्येव तथापि तत्तदिंद्रियद्वारकवृ
त्तिवृत्तिभेदोपाधिभिः भिद्यंते न वस्तुतो भेदोस्तीति॥ तत्र दृक्स्वरूपपरित्यागेन सर्ववृत्तिसाक्षितयानुगतप्रका

दृग्दृश्यदृिः श्रुतिद्युतिमतिर्विततिरेव च॥ शक्तयो न्याश्चभिद्यंते चिद्रू
पत्वेप्युपाधिभिः॥५४॥ अपायोद्भूतिहीनाभिर्निस्यंदीप्यनुरविर्यथाः॥

शस्वभावत्वात्त्वंपदार्थ इति प्रथमं ग्राह्य इत्यर्थः॥५४॥ कथमुपाधिभिरेव चितशक्तिभेदः स्वरूप
त एव भेदो यथानुभवमस्त्विति चेन्न एवमात्मनोऽविकारित्वापत्तेः॥ कल्पनागौरवाच्चेत्यभिप्रेत्य दृष्टांतेनाखंड
रूपतां साधयति॥ अपायेति॥ यथा रविरपायोद्भूतिहीनाभिः विनाशजन्मरहिताभिः स्वरश्मिभिः॥ ॥ ॥

उप॰स॰ २४ सर्वत्रास्योऽइंदीपवल्लोकरावाप्रकाशान् प्रकाशयन्नेकाग्रवाविक्रितो वर्त्तते॥ तथात्माप्युपायोत्पत्तिहीनाभिरेव स्व प्र॰वि॰१७
भूतचिद्वृत्तिभिस्तत्तद्बुद्धिवृत्त्युपाधिभेदात्॥ भिन्नाभिः॥ सर्वं विषयजातं विशेषतो जानाति सर्वज्ञः सर्वदृक्
सामान्येनापि सर्वपश्यत्वात्॥ यतः सर्वगतः॥ सर्वदृश्याधिष्ठानत्वेन सर्वाव्यभिचारी तस्मात्स एव निर्विकार इति
योजना॥५५॥ यद्येवमुक्तलक्षण आत्मा कथं तत्स्वसंसारोपलब्ध्यतापरिच्छेदप्रतिभासस्तत्र आह॥ अन्यदृष्टिरि
ति॥ अविद्यया शरीरस्थः स्थूलसूक्ष्मशरीरयोरेवोपलभ्यमानत्वात्॥ तत्र वर्त्तमानस्तावन्मात्रः॥ शरीरं यावत्तावन्मा

सर्वतः सर्वदृक् शुद्धः सर्वं जानाति सर्वदा॥५५॥ अन्यदृष्टिः शरीरस्थ
स्तावन्मात्रो ह्यविद्यया॥ जलेद्याद्युपमाभिस्तु तद्धर्मश्च विभाव्यते॥५६

ज्ञोऽहमिति मन्यमानो अन्यदृष्टिः॥ देहबाह्येभ्यो व्यावृत्तात्मदृष्टिस्तत्कृतदुःखधर्मैरात्मनो धर्मवत्स्वदृष्टिरविसत्तप्र
तिच्छिन्नः संसारीव चावभासते इत्यर्थः॥ एतदेव दृष्टान्तेन स्पष्टयति॥ जलेद्याद्यीति॥ यथा च सूर्यादिजले प्रतिबि २४
म्बितो जलोपाधिभेदात् भेदवानिव जलकंपादिनोकपादिमानिव चाविवेकादेव विभाव्यते॥ तथैव ताभि
रुपमाभिस्तद्धर्मत्वाद्युक्तार्थः॥५६॥

तद्देवमुपाधिपरामर्शमन्तरेणात्मनि भेदसंसारादेरनुपलम्भादुपाधीनां चात्मनो बहिः स्वातंत्र्येण सत्ता
यां प्रमाणाभावाद्विद्यामयत्वसंततिनित्यशुद्धः परिपूर्ण एव चिदात्मेत्यवान्तरवान्तरवाक्यैरवधारितः आ
त्मैव सत्यज्ञानादिलक्षणं ब्रह्मेति महावाक्येनाचार्यादेवमतात्मतत्त्वो मुमुक्षुरवस्थात्रयात्मकं विश्वमेव सर्वद्र
न्वयत्वात्॥ तद्दृश्योऽहं न तत्साक्षितयातदधिष्ठानतया चाव्यभिचारित्वादिविविक्तैकरसं ब्रह्मास्मीति॥ स्वानुभवमा
पादयन्मुच्यते इत्यभिप्रेत्यानुसंधानप्रकारमाह॥ दृष्ट्वेति॥ बाह्यं जागरितं पंचीकृतपंचमहाभूततत्कार्या

दृष्ट्वा बाह्यं निमील्याप स्मृत्वा तत्तद्विहाय च॥

त्मकं समष्टिव्यष्टिरूपं सर्वं विषयजातं दृष्ट्वा दृग्दृश्ययोरन्वयव्यतिरेकाभ्यां कार्यकारणान्वयव्यतिरेकाभ्यां
चापनिमील्य दृश्यं तत्सर्वं दृङ्मात्रत्वेन कार्यं सर्वं कारणभूततन्मात्रत्वेन विलाप्येत्यर्थः॥ अथानंतरं स्मृत्वा
जाग्रत्तद्दृश्यवासनाकार्यं स्वप्ने दर्शनं स्मृतिस्तां स्मृत्वा विश्ववैश्वानरसहितं॥ स्थूलोपाधितद्वासनामये लिंगे
सूक्ष्मभूतसहिते प्रविलाप्य वासनामयं स्वप्नमात्रमेव तदित्यनुसंधायेत्यर्थः॥ ॥श्रीरामायनमः॥ ॥

उप.स.
२५
तदपि लिंगशरीरवासनामयं अविद्याप्रपंचवासनासहितस्य मनःप्राणेन्द्रियसंघातस्यापि तत्कारणं पंचतन्मा प्र.वि.१७
त्रादेरतिरेकात्तावन्मात्रेण अविज्ञायते यो चोत्पत्तिक्रमवैपरीत्येन तत्कारणसामान्यमोक्षानेनत्वेन अवि
ज्ञाप्यावस्थानेन तद्दानं तत्कृतत्वेत्यर्थः॥ अथानंतरं मुमुक्षुर्बीजाज्ञानमात्रेण दर्वरितं तदपि सदसत्त्वभिन्नानि
त्यादिप्रकारनिरूपणासहत्वादि बाधपरिकल्पितं तत्प्रकारवस्तु न किंचिदिति॥ विवेकेन बाधितात्मनः सर्वा

अथोन्मील्यात्मनो दृष्टिं ब्रह्मैवाप्नोत्यनध्वगः॥५७॥

वस्थासाक्षितयानुस्यूतसच्चिदानंदमात्रस्य दृष्टिं ज्ञानप्रकाशस्वरूपामुन्मील्य निरुपाधिकां कृत्वा॥ वि
तो ब्रह्म प्राप्नोति स स्वतोनादि ज्ञानं ब्रह्मैव भवतीति यावत्॥ अनध्वगो अर्चिरादिक्रमध्वानमप्राप्नोति॥ २५
ब्रह्मणः आत्मत्वान्न गत्वा यद्ब्रह्मैव प्राप्नोतीत्यर्थः॥५८॥ ॥श्रीरामाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥

अनध्वगो ब्रह्माप्नोतीत्युक्तमेव विशदयन्निरूपयति तेनास्य मुक्तिर्नोपासकस्येवापेक्षितकालेति शोतय
ति॥ प्राणाद्येति॥ द्वाभ्यां॥ सुषुप्त्यादीत्यर्थः॥ स्वात्मस्थो नार्चिरादिमार्गस्थः यतो निर्गुणः स्वात्मनि प्रविलापितं
सकलगुण इत्यर्थः॥ शुद्धो निरुपाधिको तःस्वतः स्वभावत एव मुक्त इत्यर्थः॥५८॥ अजो हमिति॥ एवंविधो
हं ब्रह्मास्मीति यो बुद्धो ज्ञाननिश्चयानिगतः स न जायते पुनः शरीरं न गृह्णातीत्यर्थः॥५९॥ अबुद्धस्य पुनर्जन्मा

प्राणादेवं त्रिकं हित्वा तीर्णोऽज्ञानमहोदधिं॥ स्वात्मस्थो निर्गुणः शुद्धो मु
क्तस्वतो हि सः॥५८॥ अजो हं चामरो मृत्युरजरो भय एव च॥ सर्वज्ञः सर्व
दृक्शुद्ध इति बुद्धो न जायते॥५९॥ ॥ ॥

भावे हेतुमाह॥ पूर्वोक्तमिति॥ सुषुप्ताख्यं तमोज्ञा
नमित्यादिना॥ यत्पूर्वोक्तमज्ञानं तत्कालत्रयेपि नास्तीति विनिश्चयः॥ कस्मिन्नपि काले सतो ज्ञानमात्रात्ति
रोधानासंभवादस्य तु ज्ञानोदयमात्र एव तिरोधानाद्युक्तिरजनवदित्यर्थः॥ तदभाव इति॥ कारणाभावात्कार्या
भाव इत्यर्थः॥६१

उप॰स॰ २६ अहं ब्रह्मास्मीत्यात्मानं साक्षात्कृतवतोपि पूर्ववद्व्यवहारदर्शनात्॥ तत्कृतधर्माधर्मनिबंधनं पुनः शरीर- व॰वि॰१३
ग्रहणं स्यादित्याशंक्य बाधितानुवृत्तिमात्रत्वात्॥ ज्ञानिनो व्यवहारस्य न तन्निबंधनः पुनः शरीरग्रहणादिति
सार इति दृष्टांतपूर्वकमाह॥ क्षीरादिति॥ यथा सर्पिर्निर्मथितं क्षीरादुपायेनोद्धृतं तस्मिन्नेव निः॥ क्षारीकृतेपि
रेक्षितं न पूर्ववद्विविक्तं न भवति॥ तथा सत्याद्बुद्ध्यादेः॥ संघातात्त्वंपदमात्मानं विविक्तं ज्ञानमात्ररूपेणोद्धृत्य

पूर्वोक्तं यत्तमोबीजं तन्नास्तीति विनिश्चयः॥ तदभावे कुतो जन्म ब्रह्मैकत्वं
विजानतः॥ ६०॥ क्षीरात्सर्पिर्यथोद्धृत्य क्षिप्तं तस्मिन्न पूर्ववत्॥ बुद्ध्यादेस्त
स्तथा सत्यान्न देही पूर्ववद्भवेत्॥ ६१॥

ब्रह्माहमस्मीति वाक्यादवगतब्रह्मभावः॥ पूर्ववत्पु
नः॥ देही देहद्वयसंघाताभिमानवान्न तस्मिन्विद्यमानोपि न भवेदित्यर्थः॥ साहंकारस्य हि कर्मबंधहेतुर्न नि २६
रहंकारस्य तथा चोक्तं भगवता॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वापि स इमांल्लोकान्न हंति न नि
बध्यत इति॥ ६१॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥

पदार्थपरिशोधनपूर्वकं वाक्यादहं ब्रह्मास्मीति प्रतिबुद्धस्य पुनः संसारभयशंका नास्तीत्युक्तेऽर्थे आनंदं ब्रह्म
णो विद्वान्न बिभेति कुतश्चनेति श्रुतिमर्थतः पठति॥ सत्यं ज्ञानमिति॥ रसादेरन्नमयप्राणमयमनोमयविज्ञा
नमयानंदमयाख्यकोशपंचकात्परं तदाधारभूतं ब्रह्म पुच्छं प्रतिष्ठेति निर्दिष्टं यदेवादृश्येनात्म्येनिरुक्ते
निलयनेऽभयं प्रतिष्ठां विंदते इति ज्ञात्वोक्तं ब्रह्माहमस्मीति पश्यन्निर्भयो भवतीति योजना॥ ६२॥ भय

सत्यं ज्ञानमनंतं च रसादेः पंचकात्परं॥ स्यामदृश्यादिशास्त्रोक्त
महं ब्रह्मेति निर्भयः॥ ६२॥ यस्माद्भीताः प्रवर्तंते वाय्वर्कः पावका
दयः॥ तदात्मानंदतत्त्वज्ञो न बिभेति कुतश्चनः॥ ६३॥ ॥ ॥

कारणमपि भयंकरं ब्रह्मात्मभूतस्य कुतो भयशंकावकाश इति ब्रह्मभूतस्य पुनः संसाराभावमुक्तं द्रढयति॥ य
स्मादिति॥ यद्विवाग्निनो वाय्वर्कादय इति॥ वायुः॥ तदाद्यनः॥ सूर्यः॥ आदिपदादिंद्रमृत्युग्रहो॥ तथा च श्रुतिः॥ भी
षास्माद्वातः॥ पवते भीषोदेति सूर्यः॥ भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति॥ ॥श्रीरामायनमः॥ ॥ ॥

उप.स. वाङ्मनपावकादय इतिपाठे ध्यात्वं वागादयोऽधिदैवमध्यात्मादयस्थयत्नाज्ञाताः प्रवर्त्तंत इत्यर्थः तथा च श्रुतिः ॥ के न.वि.१३
२७ नेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः ॥ प्रैति युक्तः ॥ केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युन
क्ति ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः ॥ भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति ॥ ६३ ॥ ननु विद्वेषोदिहरी
हरहिरण्यगर्भादीनां नमस्कार्यत्वात्तद्व्यतिक्रमे भयसंभवात्कार्यं नो वा विद्यत इति चेत्तत्राह ॥ नामादिभ्य इति ॥ नाम

नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितोऽद्वये ॥ प्रण
मेत्कं तदात्मज्ञो न कार्यं कर्मणा तदा ॥ ६४ ॥ ॥ ॥

दिभ्य इति ॥ नाम वाक् मनः प्राणादि प्राणांतेभ्य उत्तरोत्तरं भूयस्त्वेन श्रुतेभ्यः परे परस्मिन् भूम्नि सर्वव्यवहारातीत
मते सुखरूपे ऽद्वये स्वे महिम्नि स्वराज्ये चेदहमस्मि भूमा ब्रह्मेति ॥ व्यवस्थितः आत्मज्ञो विद्वांस्तदा तस्यान्यं प्रति २७
गुणाभावात्कं प्रणमेत् ॥ प्रणम्यानामात्मभूतत्वादतः ॥ परिपक्वज्ञानस्य कृतकृत्यत्वान्न कर्मणा किमपि कार्य
मस्तीत्यर्थः ॥ ६४ ॥ ॥ श्रीगोपीजनवल्लभायनमः ॥ ॥

भूम्नो नामादिभ्यः परत्वेपि कथमद्वयत्वमित्याशंक्य नामादेरवस्थात्रयरूपस्याध्यस्तत्वेन मिथ्यात्वात्तत
त्वास्तिरस्तुरीयस्य भूम्नोऽद्वयत्वमिति वक्तुमवस्थात्रयमनुवदति ॥ विराडिति ॥ अध्यात्माधिदैवतयोरभेदा
भिप्रायेण विराट् वैश्वानर इत्युक्तं विश्वो वैश्वानर इत्यर्थः ॥ बाह्यो बहिः ॥ प्रवृत्तिरित्यर्थः ॥ अंतः स्मरन्निति ॥ स्ववे
वासनामयविषयद्रष्टा प्रजापतिर्हिरण्यगर्भस्तैजसेति योज्यं ॥ अव्याकृतमायोपाधीश्वराख्यतत्वप्राज्ञइत्य

विराट् वैश्वानरो बाह्यः स्मरन्नंतः प्रजापतिः ॥ प्रविलीने तु सर्वस्मिन् प्राज्ञो
व्याकृतमुच्यते ॥ ६५ ॥ वाचारंभणमात्रत्वात्सुषुप्तादिकं त्वसत् ॥ सत्यो
ऽस्म्यहमित्येवं सत्यसंधो विमुच्यते ॥ ६६ ॥

च्यत इत्यर्थः ॥ ६५ ॥ एतदवस्थात्रयात्मकं जगदपो
ह्यात स्वाहितोऽवस्तु नतु तस्याहं ब्रह्मेति सम्यग्ज्ञानान्मुक्तो भवतीत्याह ॥ वाचेति ॥ ततः साक्षी सत्यः परमात्मा
सोऽहमेवेत्येवं सत्यसंधो ऽनोपासेन मुच्यत इत्यर्थः ॥ ६६ ॥

आत्मतत्त्वाज्ञानाध्यस्तः संसारस्तत्त्वज्ञानान्निवर्तत इत्युक्ते ज्ञानाज्ञानयोरात्मधर्मत्वं स्यादित्याशंक्याह यतेन
ज्ञस्याहं ॥ नामरूपत्वादिति ॥ ज्ञानाज्ञानयोरपि नामरूपत्वात् कल्पितत्वे सति नात्मधर्मत्वमिति भावः ॥ ६७ ॥ आ
त्मनो निर्विशेषत्वाच्छास्त्रप्रामाण्यादेव सिद्धिः ॥ नात्र युक्तिकल्पनया मनः खेदनीयमित्यभिप्रेत्याह ॥ शास्त्र

नामरूपत्वाद्यथा भानोर्नाहोरात्रे तथैव च ॥ ज्ञानाज्ञाने न मे स्यातां चिद्रूपत्वा
विशेषतः ॥ ६७ ॥ शास्त्रस्यानतिशंक्यत्वात् ब्रह्मैवास्म्यहमद्वयः ॥ ब्रह्मणो मेन
हेयं स्यान्न ग्राह्यं वेति च संस्मरेत् ॥ ६८ ॥ अहमेव च भूतेषु सर्वेष्वेको नभो य
था ॥ मयि सर्वाणि भूतानि पश्यन्नेवं न जायते ॥ ६९ ॥

स्येति ॥ पश्यन्निति ॥ ६९ ॥ किं तत् ब्रह्म परं ज्ञानं
किं वा सर्वदृहेयामुपादेयं ब्रह्मात्मज्ञाननिष्ठस्य फलमित्यपेक्षायां ॥ यस्तु सर्वाणि भूतानीत्यादिमंत्रार्थमुदाहर
ति ॥ अहमेवेति ॥ पश्यन्निति ॥ ६९ ॥ ॥श्रीकृष्णायनमः॥ ॥

आत्मनोऽद्वितीयब्रह्मरूपत्वे शास्त्रमर्थत उपसंहृत्य निर्विशेषब्रह्मरूपत्वे विरुदाहरति ॥ न बाह्यमिति
॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरिति श्रुतेरित्यर्थः ॥ सर्वानुभूरित्यस्यार्थः
स्वयंप्रभ इति ॥ ७० ॥ सामान्येन सर्वप्रपंचसंस्पर्शरहितत्वे श्रुतिमुदाहरति ॥ नेतीति ॥ प्रपंचनिषेधद्वारेणैवा

न बाह्यं मध्यतो वांतर्विद्यतेऽन्यत्स्वतः क्वचित् ॥ अबा
ह्यांतः श्रुतेः किंचित्तस्माच्छुद्धः स्वयंप्रभः ॥ ७० ॥ नेति ने
त्यादिशास्त्रेभ्यः प्रपंचोपशमोऽद्वयः ॥ अविज्ञाताविज्ञात्रा
चनैवं ज्ञेयो ह्यतोऽन्यथा ॥ ७१ ॥

त्माविज्ञेयो न पुनः ॥ विषयतया प्रपंचतया वेत्यत्रान्यदेव तद्विदितादथो अविदितादधीत्यस्यामतं तस्य म
तमतं यस्य ॥ नवेद रसः ॥ अविज्ञातं विज्ञानतामित्यादिशास्त्रमुदाहरति ॥ अविज्ञातेति ॥ ७१ ॥ ॥श्रीनोथजी॥ ॥

उप.स. २९

तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युरिति श्रुतेरेवमस्य यादिजन्म तामात्मानं जानतो देवाः फलप्राप्तिं वि प्र.वि.१७
घ्नन्तीति चेन्नैव ॥ देवानामप्यात्मभूतत्वात्तैर्विद्वांश्च विघ्नन्तु नेर विद्वद्विषयत्वादित्यभिप्रेत्याह ॥ सर्वस्येति ॥ तस्य
ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेरित्यर्थः ॥ १२ ॥ एवं ब्रह्मात्मज्ञानवतो देवैरप्युपास्यत्व
सिद्धेः ॥ न तस्य देवपशुत्वं क्वापीत्यतो न कुतश्चिद्भयमस्तीत्यत्र श्रुतिमर्थतः पठति ॥ जीवन्नेवेति ॥ यदेवम

सर्वस्यात्माहमेवेति ब्रह्म चेद्विदितं परं ॥ स आत्मा सर्वभूतानामा
त्मा ह्येषां भवतीति श्रुतेः ॥ १२ ॥ जीवन्नेव तु परमात्मानं स्वात्मानं देवमेन
सा ॥ देवोपास्यः स देवानां पशुत्वान्निवर्तते ॥ १३ ॥ ॥ ॥

नु पश्यन्स्वात्मानं देवमंजसा ॥ ईशानं भूतभव्यस्य न ततो विजुगुप्सते सर्वस्यैवेयावजिमावहं तितमेवं विद्वा २९
नमृत इह भवति ॥ इति च श्रुतिभ्य इत्यर्थः ॥ १३ ॥

यदुक्तं सत्यसंधो विमुच्यत इति तत्स्फुटयत्याह ॥ अहमेवेति ॥ सत्यात्मा चासौ हश्चेति सदात्मनः तत्त्वमस
स्मीत्येति श्रुतिरिहोदाहरणं ॥ अन्यैः शून्य इति वा चारं मलश्रुत्यादर्शितः ॥ यथांबरमिति दृष्टांतः सर्वगत्व
नित्यत्वात्तद्रूपस्त्वेन दृष्टांतोक्तिः ॥ अप्रयातानतानतामि संविहितो तत्स्फुरद्वन बध्यते वं धानर्थहो

अहमेव सदात्मनः शून्यस्त्वन्यैर्यथांबरं ॥ इत्येवं
सत्यसंधत्वादसद्यातानबध्यते ॥ १४ ॥ ॥ ॥

नोभवति ॥ स यथा तत्र नादाह्येतैवं सत्यमिदं सर्वमिदं हि श्रुतिरिहोदाहार्या ॥ १४ ॥ एवंविधज्ञाना
अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवंतीति
नावाहितरे पशुभूताः ॥ नो चेच्छाभवंतीति दुर्नापन्नथयेन्यथो विदुरन्यराजानस्ते तत्तयाविदुस्ते हि कृपणाः ॥ ॥
श्रुत्यर्थमाह ॥ कृपणा इति ॥ ये परं ब्रह्मातोन्यथैवोक्तं वेदपरायणा नात्मभूतं तत्तथा विदुस्ते हि कृपणाः

न्यो ऽन्यथा एवेति योजना ॥ अन्ये ऽदृक्त्वाच्च कृपणा इत्याह ॥ स्वराडिति ॥ एवं विजानन्नात्मरतिरात्मक्रीड आ
त्ममिथुन आत्मानंदः स स्वराड्भवतीति श्रुतिरिहोदाहरणं स सर्वेषु लोकेषु कामचारो भवतीति ॥ अ
न्यथेत्यत्र भागोदाहरणेन द्योतयति ॥ तस्येति ॥ आसन्नित्यर्थे ऽसन्निति छांदसं ॥ यस्त्वेवं ब्राह्मणो विद्यात्

कृपणास्ते ऽन्यथैवातो विदुर्ब्रह्म परं हि ये ॥ स्वराड्यो
नान्यदृक्स्वस्य स्तस्य देवा असन्वशे ॥७५॥ ॥

तस्य देवा असन्वशे इति मंत्रो ऽस्यायमर्थः ॥ यस्त्वेवं ब्राह्मणो ब्रह्मनिष्ठ एवं वेदाहमेतं पुरुषं महांतमित्यु
क्तप्रकारेण ब्रह्मात्मानं विद्यात्तस्य विदुषो देवा वशगा भवंतीति ७५॥ ॥श्रीरामायनमः॥ ॥ ॥

यस्मात्पूर्वोक्त आत्मज्ञानादेव कृतकृत्यता तस्मात्मुमुक्षुभिस्तदर्थं प्रयत्नवद्भिर्भवितव्यमिति तां शि
ष्यन्नाह ॥ हित्वेति ॥ यस्मिन्द्यौः पृथिवी चांतरीक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ ॥ आ
त्मानमन्या वाचो विमुंचथामृतस्यैष सेतुः ॥ ओमित्येवं ध्यायथ आत्मानमिति च वाक्यद्वयमत्रोदाहर

हित्वा जात्यादिसंबंधान्वाचो ऽन्याः सह कर्मभिः ॥ ओमित्येवं
सदात्मानं सर्वं शुद्धमुपास्यथ ॥७६॥ सेतुं सर्वव्यवस्थानामहो
रात्रादिवर्जितं ॥ तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयं ॥७७

णं ॥ अन्या वाचो ऽनात्मविषयाः ॥ प्रवृत्तिपराः ॥ सर्वं सर्वाधारभूतं शुद्धं विविक्तं निर्विशेषमित्यर्थः ॥७६॥
तमेव प्रतिपत्तव्यमात्मानं स्तुत्यंतरेण विशिनष्टि ॥ सेतुमिति ॥

उप.स. सर्वव्यवस्थानां वर्णाश्रमादिमर्यादीनां सेतुं विधारकं॥ अप अयं आत्मा स सेतुर्विधृतिरेषां लोकाना प्र.वि.१७
३१ मसंभेदायैनं सेतुमहोरात्रे तरतः॥ सकृद्विभातो ह्येवैष ब्रह्मलोक इति श्रुतिरत्रोदाहरणं॥१७॥ पुनः कि

धर्माधर्मविनिर्मुक्तं ततव्याप्तं कृताकृतात्॥ स्वमात्मानं प
रं विद्याद्विमुक्तं सर्वबंधनैः॥१८॥ ॥श्रीकृष्णाय नमः॥॥

ज्वलं आत्मानं प्रपद्यते॥ इत्यपेक्षायामन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्॥ अन्यत्र भूता ३१
त्च भव्यात्च यत्तत्पश्यसि तद्वदेति श्रुत्यर्थमाह॥ धर्माधर्मेति॥ कृताकृतात् कार्यकारणादित्यर्थः॥१८॥

ननु कथं सर्वबंधनैर्मुक्तः आत्मा तस्य कर्तृत्वादिश्रवणादित्याशंक्याकर्तृत्वादेरपि सहैव श्रवणाद्विरुद्धोभ
यस्वभावस्यैकस्मिन्नयोगात् स्वभावप्राप्तं कर्तृत्वादिकं मायामयं अमाणावधेयमकर्तृत्वादिकमात्मस्वभा
व इति॥ विरुद्धधर्मवादिनीः श्रुतीरुदाहरति॥ अकुर्वन्निति॥ अनेजदेकं मनसो जवीय
इति मंत्रभागार्थो कुर्वन्सर्वकृदित्युक्तः शुद्धमपापविद्धमित्यस्यार्थः॥ शुद्ध इति॥ तद्धावतोन्यानत्येति तिष्ठ

अकुर्वत्सर्वकृत्शुद्धस्तिष्ठन्नत्येति धावतः॥ मायया सर्वश
क्तित्वादजः सन्बहुधा मतः॥१९॥

न्नित्यस्यार्थमाह॥ तिष्ठन्निति॥ धावतो वेगवतोन्यान्मनः॥ प्राणादीनत्येति अतीत्य गच्छति॥ यत्र मनः प्राणा
दि गच्छति तत्र सर्वत्रात्मा चैतन्यस्याभिव्यक्तिनियमाद्व्याप्त्या तिष्ठन्नपि गच्छतीव भासत इत्यर्थः॥ अजायमानो ब
हुधा विजायत इत्येतत्त्वार्थमाह॥ अजः सन्बहुधा मत इति॥ सर्वत्र हेतुः॥ मायया सर्वशक्तित्वादिति॥ न हि माया
या मसंभावनीयमस्तीति भावः॥१९॥ ॥

उप·स·
३२

-अक्रियस्यापिक्रियावत्त्वोपचारमुक्तं दृष्टांतेन प्रपंचयति॥ राजवदिति॥ स्पष्टं॥८०॥ यस्मादेव मात्मात्वतो नित्य प्र·बि·१०
शुद्धत्वादिस्वभावः॥ शास्त्रन्यायाभ्यामवगतस्तस्मात्॥ तथैव जानीयादित्याप्पयेत्युपसंहरति॥ निर्गुणमिति॥ नै
तपुस्तोकेषु पुनरुक्तं दोषावहं॥ यतः प्रतिपाद्यवस्तुनो दुर्बोधत्वात् मुमुक्षूपकारायेकारुणिक-आचार्यः॥ क्वचि

राजवत्साक्षिमात्रत्वात् सांनिध्यात्भ्रामकोपमा॥ नामयनुज
गद्यात्माहंनिःक्रियोकारकोद्वयः॥८०॥ निर्गुणं निःक्रियं नित्यंनि
र्द्वंद्वं यन्निरामयं॥ शुद्धं बुद्धं तथा मुक्तं तत् ब्रह्मास्मीति धारयेत्॥८१

त्फलजकथनेन क्वचिद्विदनुभवाभिनवेन पुनः पुनः प्रतिपादयति॥ भूयोपि पथ्यं वक्तव्यमिति न्यायादिति ३२
॥८१

उक्तं प्रकरणार्थं प्रतिपत्तिसौकार्यार्थं संक्षिप्य कथयति॥ बंधमोक्षमिति॥ बंधं मोक्षं च सर्वं यथावद्विज्ञायम
यरहितः स्यादित्ययमन्वयः॥ बंधः प्रमातृत्वकर्तृत्वादिप्रतिभासलक्षणः॥ मोक्षो ब्रह्मस्वरूपावस्थानं सर्वमिति॥
निःशेषं पूर्वोक्तप्रकारमित्यर्थः॥ इदमुभयं बंधमोक्षं च यतो हेतोरज्ञानात् ज्ञानान्नाशाच्च भवतः॥ त-अपि विज्ञा
येति संबंधः॥ तथा एकमनुवृत्तंकारणद्वयं व्यावृत्तं कार्यं च यत् ज्ञेयं विषयभूतं तत्सर्वं हेयं बाध्यं विज्ञायेत्य

बंधं मोक्षं च सर्वं यत इदमुभयं हेयमेकं द्वयं च ज्ञेयं ज्ञेया
त्यातीतं परममधिगतं तत्त्वमेकं विशुद्धं॥ ॥श्रीराम॥

न्वयः॥ ज्ञेयात्यतीतं दृश्याद्गम्याद्बहिर्भूतं परमं निरतिशयं विशुद्धं एकं ब्रह्माद्वयं तत् वेदांतेषु-अधिगतं तत्त्वं परमा
मार्थं तद्विदित्वा यावत् विज्ञाया आत्मत्वेनोपासाय॥ किं ज्ञातं एक श्रुतिमुक्तिगादितं॥ श्रुतिवाक्येन मुनिना गुरुणा उपदिष्ट
